SERIES—
ल्हणकृता
तरङ्गिणी
ARANGINI
OF
LHANA
तीयो भाग
PART II

कल्हणकृता

राजतरङ्गिणी

Rājataraṅgiṇī

OF

KALHANA

द्वितीयो भागः (तरङ्गः ८)
PART II
(Taraṅga VIII)

विश्वेश्वरानन्द - वैदिक शोध - संस्थानम्
होशिआरपुर
VISHVESHVARANAND VEDIC RESEARCH INSTITUTE
HOSHIARPUR

Price : Rs. 35.00

7819/B
30

विश्वेश्वरानन्द-वैदिकशोध-संस्थान-प्रकाशनम्—३५७
V. V. Research Institute Publication—357

वुल्नर-भारतभारती-ग्रन्थमाला—६
Woolner Indological Series—6

V. BOOK AGENCY
Revised Price (INR)
Rs. 142.00

संपादकः — विश्वबन्धुः
Editor — VISHVA BANDHU

वु. भामा. ग्रन्थमाला—६

कल्हणकृता

राजतरङ्गिणी

सा च
पाठविमर्शौपयिकेन पाठभेदादिटिप्पणेन संयोजिता ऽस्ती
भीमदेवः, के. एस्. रामस्वामिशास्त्री, एस्. भास्करन् नायर्
इत्येतैः सहकृतेन

विश्वबन्धुना
संपादिता

तत्र चाऽयम् ८म-तरङ्गात्मकः
२यो भागः

होश्यारपुरम्
विश्वेश्वरानन्द-वैदिकशोध-संस्थानम्

7869 B

W.I. Series—6

RĀJATARAṄGINĪ
OF
KALHANA

Edited,

Critically, and annotated with text-comparative data from original manuscripts and other available materials

By

VISHVA BANDHU

In collaboration with

BHIMA DEV, K. S. RAMASWAMI SASTRI
and
S. BHASKARAN NAIR

PART II

(Taraṅga VIII)

विश्वभारती
(लिया सिनमा के सामने)

HOSHIARPUR
Vishveshvaranand Vedic Research Institute

सर्वेऽधिकाराः सुरक्षिताः

प्रथमं संस्करणम्, २०२२ वि०
प्रकाशकृत्—विश्वेश्वरानन्द-वैदिकशोध-संस्थानम्
साधु-आश्रमः (प. गृ.), होशियारपुरम् (पं., भारतम्)।

All Rights Reserved

FIRST EDITION, 1965

Publishers :
Vishveshvaranand Vedic Research Institute,
Sadhu Ashram (P.O.), Hoshiarpur (Pb., India)

भारतप्रशासनीय-शिक्षामन्त्रालयकृतेन
व्ययार्द्धपरिमित-वित्तानुदानेन प्रकाशनम् अकारि।
Published with 50 percent Financial Assistance received from the Ministry of Education, Government of India

भारते होशियारपुरे वि. वै. शो. सं. मुद्रागृहे।
शास्त्रिणा देवदत्तेन मुद्राप्येदं प्रकाश्यते॥
Printed and Published by DEV DATTA SHASTRI
at the V. V. R. I. Press, Hoshiarpur, (Pb., India)

The Late Rai Bahadur Lala
Ishwar Das Sawhney
(1882-1956)

RĀJATARAṄGIṆĪ

Being

A Chronicle of the Kings of Kashmir

By

Kalhaṇa, Jonarāja, Śrivara and Suka

(c. 2448 B.C.—1586 A.D.)

Rai Bahadur Lala
Ishwar Das Sawhney
Memorial Edition

Vishveshvaranand Vedic Research Institute

HOSHIARPUR

अथ

कल्हणकृतायां

राजतरङ्गिण्याम्

अष्टमतरङ्गात्मको

द्वितीयो भागः

CONTENTS

		Pages
अष्टमस्तरङ्गः	...	४६६-८६७
Appendices :—	...	1-180
(I) Chart of Editorial Divergences	...	1
(II) Comparative List of Lacunae	...	65
(III) Index of *Pratīkas*	...	68
Corrigenda and Addenda	...	181

अथ

श्रीकल्हणकृतायां राजतरङ्गिण्याम्

अष्टमस्तरङ्गः

प्रौढाः कञ्चुकिनो जरद्वरवृषः कुब्जस्तुषारद्युति-
    र्नित्याप्तोऽपि बहिष्कृतः परिकरः सोऽयं समस्तोऽप्यहो।
अर्धाद् यद्वसतीकृताद् भगवता चारित्रचर्याविदा
    सा भिद्याद् दुरितं चराचरगुरोरन्तःपुरं पार्वती॥ १॥

छन्नकोपप्रसादोऽभूत् कंचित् कालं नवो नृपः।
प्राङ्मन्थादिव पाथोधिरव्यञ्जितविषामृतः॥ २॥

सोदरो डामरौघश्च तस्याऽभूतां भृशोन्मदौ।
मेघस्येव पुरो वातावग्रहौ स्फूर्तिहारिणौ॥ ३॥

यत्किंचनविधाय्यासीद् भ्राता यद्यौवनोन्मदः।
राज्ञो दुष्प्रक्रिया दौस्स्थ्यकरी वात्सल्यशालिनः॥ ४॥

सोऽनिशं हि गजारूढो विकोशासिः परिभ्रमन्।
आत्तसारां महीं पीतरसां रविरिवाऽकरोत्॥ ५॥

एकीभूतानमून् सर्वान् डामरान् निर्दहाऽग्निना।
इत्युक्तं तेन नोर्वीभृत् सत्त्वैकाग्रो वचोऽग्रहीत्॥ ६॥

St C begin with ओं नमो विघ्नहर्त्रे; P_1 ओं नमो भगवते वासुदेवाय; P_2 ओं नमः शिवाभ्याम्.

1. [a]) C जरद्गव°; S′ जरंगव° (for जरद्वर°). —[c]) I_3 अद्य° (for अर्धाद्य°). —[d]) D C I_3 $P_{1,3}$ S′ SA_2 भिन्द्या° (for भिद्या°).

2. [b]) I_3 P_{1-3} SA किंचित् (for कंचित्).

5. [b]) SA_1 om. कोशासिः with a space. I_3 विशोकाशिः (for विकोशासिः).

दस्यवो मन्त्रिसामन्ता द्वैराज्येच्छुः सहोदरः ।
भूर्निष्कोशेत्यभूत् किं न भूपतेस्तस्य संकटम् ॥ ७ ॥

अधिराज्याभिषेकेण सत्कृत्य भ्रातरं ततः ।
पातुं लोहरसंबद्धं प्राहिणोन्मण्डलान्तरम् ॥ ८ ॥

द्विरदायुधपत्त्यश्वकोशामात्यादि स व्रजन् ।
निनाय सर्वं वात्सल्यादनिषिद्धोऽग्रजन्मना ॥ ९ ॥

आशङ्क्य कोट्टभृत्येभ्यः प्रवेशे प्रत्यवस्थितिम् ।
उत्कर्षजं प्रतापाख्यं सह निन्येऽब्रवीच्च तान् ॥ १० ॥

कुर्याममुं नृपमहं प्रातिहार्यं समाचरन् ।
नम्राः स्वभृत्यवत्तस्थुर्भूभुजो भूम्यनन्तराः ॥ ११ ॥

दिनानि सप्त संरुद्धे मार्गे तदनुयायिनाम् ।
गायनः कनको लब्धान्तरो देशान्तरं ययौ ॥ १२ ॥

वाराणस्यां विजहता निर्वेदात् तेन जीवितम् ।
हर्षभूभर्तृभृत्येषु व्यक्तं निन्ये कृतज्ञता ॥ १३ ॥

ऊर्ध्वाधिरोहं दाक्षिण्याद् दस्यूनामुच्चलः पुनः ।
सेवास्मृत्या सुधीः सेहे चन्दनो भोगिनामिव ॥ १४ ॥

तथा जनकचन्द्रेण दर्पाद् व्यवहृतं तदा ।
राजाऽन्ये डामराश्चाऽऽसन् यथा नष्टप्रभा इव ॥ १५ ॥

अभयस्योरशाभर्तुस्तनयायामजीजनत् ।
राज्ञ्यां विभवमत्यां यं भोजो हर्षनृपात्मजः ॥ १६ ॥

---

8. c) St I_3 $P_{2,3}$ °बन्धं (for °बद्धं).

10. c) C S′ I_3 तत्क° (for उत्क°).

12. a) S′ °मरुद्धे [sic]; P_3 संरुद्ध° (for संरुद्धे). —b) P_3 om. मार्गे.

13. d) C S′ °ज्ञतां (for °ज्ञता).

15. d) S′ C पथा (for यथा).

16. a) C S′ °स्योरसा°; P_3 °स्योरचाहर्तु° (for °स्योरशाभर्तु°).

जातं मृतद्वित्रपुत्रानन्तरं गुरुभिः शिशुम् ।
आयुष्कामैस्तमाबद्धाभव्यभिक्षाचराभिधम् ॥ १७ ॥

द्व्यब्दमप्यरिसंतानतन्तुत्वेनाऽप्रियोचितम् ।
ररक्ष तद्गिरा राजा राज्ञ्याश्चाऽङ्के समार्पयत् ॥ १८ ॥

तमादाय स्वयं वाऽसौ यावद् राज्येऽकरोन्मनः ।
तावद् बभारेङ्गितज्ञो नीतिकौटिल्यमुच्चलः ॥ १९ ॥

तुल्योत्साहासहिष्णुत्वादस्मै कुप्यन्तु डामराः ।
एष एवाऽतिसत्काराद् यद्वाऽस्तु विशदाशयः ॥ २० ॥

इति संचिन्त्य स द्वारदित्सां तस्योदघोषयत् ।
यथा विकारं प्रययुर्भीमादेवादयोऽखिलाः ॥ २१ ॥

तेषां तस्य च मात्सर्यं यदा पर्याप्तिमाययौ ।
तदाऽन्योन्याश्रिता भृत्याः पणं चक्रुर्युयुत्सवः ॥ २२ ॥

दिदृक्षुः क्ष्मापतिस्तेषां सेतुपृष्ठे रणं मिथः ।
वार्यमाणोऽपि सचिवैरारुरोह चतुष्किकाम् ॥ २३ ॥

द्वन्द्वयुद्धे प्रवृत्ते तु डामरैरुभयाश्रितैः ।
अथ प्रारभ्यताऽकस्मात् संरब्धैर्दारुणो रणः ॥ २४ ॥

सेतुद्वयाध्वना युद्धे लग्ने राज्ञि सरित्तटात् ।
योधा जनकचन्द्रस्य शरवर्षमवाकिरन् ॥ २५ ॥

---

17. [a]) SA मृतं (for मृत°). St S′ C I_3 $P_{2,3}$ °द्वित्रि° (for °द्वित्र°).

18. [d]) I_3 $P_{2,3}$ SA समर्पयत् (for समार्पयत्). After this *v.* तिलकम् .

21. [d]) P_1 °र्भीमि° (for °र्भीमा°).

24. [c]) C P_3 S′ प्रारभता° (for प्रारभ्यता°). —[d]) C S′ °र्दारुणै (for °र्दारुणो).

25. [a]) C S′ सेत्वत्य° (for सेतुद्व°).

यान्तः शराः ससीत्कारास्ते स्पृष्टनृपविग्रहाः ।
मग्नाः स्तम्भेष्वदृश्यन्त कोपेनेव प्रकम्पिनः ॥ २६ ॥

आकृष्य दोर्भ्यां भूपालं बलादिव ततोऽनुगाः ।
प्रविष्टा मण्डपद्वारं चक्रिरे निहितार्गलम् ॥ २७ ॥

शस्त्रं जनकचन्द्राद्या भीमादेवादयोऽपि ते ।
चतुष्किकायां चकृषुस्ततोऽन्योन्यं जिघांसवः ॥ २८ ॥

तुमुले तत्र शस्त्र्याऽङ्गं भीमादेवानुगोऽभिनत् ।
तीक्ष्णो जनकचन्द्रस्य कालपाशात्मजोऽर्जुनः ॥ २९ ॥

स वीक्ष्य स्वं क्षतं द्रोहं प्रयुक्तं भूभुजा विदन् ।
पादप्रहारान् विदधे क्रोधाद् द्वारि नृपौकसः ॥ ३० ॥

अभग्ने तत्र संत्रासात् स्नानद्रोण्यन्तरं गतम् ।
अधावत् कृष्टशस्त्रीको भीमादेवो जिघांसया ॥ ३१ ॥

स्तम्भच्छन्नस्तद्विलोक्य तद्गेहगणनापतिः ।
मध्यं जनकचन्द्रस्य कृपाणेन द्विधा व्यधात् ॥ ३२ ॥

तस्मिन् हते तदनुजौ गगसड्डौ प्रधावितौ ।
स एव करवालेनाऽलक्षितोऽकृत विक्षतौ ॥ ३३ ॥

अवभज्य तरुं वज्रः सुचिरं नाऽवतिष्ठते ।
उदग्रकर्मा च पुमान् निहत्याऽत्युन्नतं रिपुम् ॥ ३४ ॥

स हि द्विभाद्रे तत्राऽब्दे हर्षान्ताहादनन्तरम् ।
अन्यूनानतिरिक्तैर्यत्त्रिभिः पक्षैरहन्यत ॥ ३५ ॥

---

26. a) St I_3 $P_{1,2}$ वान्तः (for यान्तः). —b) SA_1 om. स्पृ in स्पृष्ट with a space. D [अ] स्पृष्ट°; $P_{1,2}$ I_3 स्पृष्टा°; P_3 पृष्ट° (for स्पृष्ट°).
27. c) C S′ °विष्टं; $P_{1,3}$ °विष्ट° (for °विष्टा). —d) S′ C P_3 SA निहता° (for निहित।°).
29. a) C S′ शस्त्रा° (for शस्त्र्या°). —b) P_1 भीम° (for भीमा°).
30. c) C S′ °प्रहाराद् (for °प्रहारान्).
34. a) P_2 गुरुं (for तरुं).
35. b) C S′ हर्षात्ता° (for हर्षान्ता°). —c) C S′ °स्त्रिभिः (for °त्रिभिः).

यद्दोपकर्तुरप्येष द्रोहं यत्स्वामिनो व्यधात् ।
औत्कट्यात् पाप्मनस्तस्य क्षिप्रमेव क्षयं ययौ ॥ ३६ ॥

सान्तस्तोषे कोपशोकावाविष्कुर्वति कृत्रिमौ ।
भीमादेवः पलायिष्ट गगगस्तु व्यश्वसीन्नृपे ॥ ३७ ॥

प्रहिते लहरं गगगे स्वमुल्लाघयितुं क्षतम् ।
त्रस्तास्तेन व्यसृज्यन्त स्वोर्वीरन्येऽपि डामराः ॥ ३८ ॥

उपायापकृतैः प्राप्य राज्यं दस्युभिरुज्झितम् ।
एवं शनैरवष्टम्भं भेजे भूपतिरुच्चलः ॥ ३९ ॥

तेनाऽथ लब्धस्थैर्येण दिनैरेव जिगीषुणा ।
त्याजिताः क्रमराज्यान्तर्हयसैन्यादि डामराः ॥ ४० ॥

ततो मडवराज्यं स प्रस्थितो विप्रियप्रियान् ।
डामरान् कालियमुखान् बद्ध्वा शूले व्यपादयत् ॥ ४१ ॥

इल्लाराजोऽपि बलवांस्तेन क्रान्तक्षितिः क्रमात् ।
बलैर्नगर एवोग्रैरवस्कन्देन घातितः ॥ ४२ ॥

प्राग्जन्मप्रेमसंस्कारादन्तरज्ञतयाऽथवा ।
तस्य पुत्र इव प्रीतिर्गगग एव व्यवर्धत ॥ ४३ ॥

न सेहे नाममात्रं यः कण्टकानां प्रियप्रजः ।
नृपो गगगाय चुक्रोध सापराधाय न क्वचित् ॥ ४४ ॥

राज्यारम्भेऽनुयुक्तेन भीमादेवेन धीमता ।
उक्ते शुभावहे शिक्षे द्वे स मन्त्रवदस्मरत् ॥ ४५ ॥

---

36. [c]) C S′ औत्कंठ्या° (for औत्कट्या°).
38. [a]) All Mss. read लोहरं (for लहरं suggested with St. Tr. cf. *vv*. v. 51; vii. 1361, 1374; viii. 437).
39. P_3 om. *vv*. 39—40. —[a]) All Mss. read प्राप्त° (for प्राप्य suggested with St).
41. [d]) P_3 शूलैः (for शूले). —[d]) C S′ °दयन् (for °दयत्).
42. [a]) C S′ इला° (इल्ला°).
44. [b]) C S′ °प्रजाः (for °प्रजः). —[d]) SA °राध (for °राधाय). C S′ P_3 कुत्र°; I_3 P_1 कूत्र° ⌊sic⌋ (for क्व°).

यान्तः शराः ससीत्कारास्ते स्पृष्टनृपविग्रहाः ।
मग्नाः स्तम्भेष्वदृश्यन्त कोपेनेव प्रकम्पिनः ॥ २६ ॥

आकृष्य दोर्भ्यां भूपालं बलादिव ततोऽनुगाः ।
प्रविष्टा मण्डपद्वारं चक्रिरे निहितार्गलम् ॥ २७ ॥

शस्त्रं जनकचन्द्राद्या भीमादेवादयोऽपि ते ।
चतुष्किकायां चकृषुस्ततोऽन्योन्यं जिघांसवः ॥ २८ ॥

तुमुले तत्र शस्त्र्याऽङ्गं भीमादेवानुगोऽभिनत् ।
तीक्ष्णो जनकचन्द्रस्य कालपाशात्मजोऽर्जुनः ॥ २९ ॥

स वीक्ष्य स्वं क्षतं द्रोहं प्रयुक्तं भूभुजा विदन् ।
पादप्रहारान् विदधे क्रोधाद् द्वारि नृपौकसः ॥ ३० ॥

अभग्ने तत्र संत्रासात् स्नानद्रोण्यन्तरं गतम् ।
अधावत् कृष्टशस्त्रीको भीमादेवो जिघांसया ॥ ३१ ॥

स्तम्भच्छन्नस्तद्विलोक्य तद्गेहगणनापतिः ।
मध्यं जनकचन्द्रस्य कृपाणेन द्विधा व्यधात् ॥ ३२ ॥

तस्मिन् हते तदनुजौ गग्गसङ्घौ प्रधावितौ ।
स एव करवालेनाऽलक्षितोऽकृत विक्षतौ ॥ ३३ ॥

अवभज्य तरुं वज्रः सुचिरं नाऽवतिष्ठते ।
उदग्रकर्मा च पुमान् निहत्याऽत्युन्नतं रिपुम् ॥ ३४ ॥

स हि द्विभाद्रे तत्राऽब्दे हर्षान्ताहादनन्तरम् ।
अन्यूनानतिरिक्तैर्यत्त्रिभिः पक्षैरहन्यत ॥ ३५ ॥

---

26. a) St I_3 $P_{1,2}$ वान्तः (for यान्तः). —b) SA_1 om. स्पृ in स्पृष्ट with a space. D [अ] स्पृष्ट°; $P_{1,2}$ I_3 स्पृष्टा°; P_3 पृष्ट° (for स्पृष्ट°).
27. c) C S′ °विष्टं; $P_{1,3}$ °विष्ट° (for °विष्टा). —d) S′ C P_3 SA निहता° (for निहिता°).
29. a) C S′ शस्त्रा° (for शस्त्र्या°). —b) P_1 भीम° (for भीमा°).
30. c) C S′ °प्रहाराद् (for °प्रहारान्).
34. a) P_2 गुरुं (for तरुं).
35. b) C S′ हर्षात्ता° (for हर्षान्ता°). —c) C S′ °स्त्रिभिः (for °त्रिभिः).

यद्धोपकर्तुरप्येष द्रोहं यत्स्वामिनो व्यधात् ।
औत्कट्यात् पाप्मनस्तस्य क्षिप्रमेव क्षयं ययौ ॥ ३६ ॥

सान्तस्तोषे कोपशोकावाविष्कुर्वति कृत्रिमौ ।
भीमादेवः पलायिष्ट गग्गस्तु व्यश्वसीन्नृपे ॥ ३७ ॥

प्रहिते लहरं गग्गे स्वमुल्लाघयितुं क्षतम् ।
त्रस्तास्तेन व्यसृज्यन्त स्वोर्वीरन्येऽपि डामराः ॥ ३८ ॥

उपायापकृतैः प्राप्य राज्यं दस्युभिरुज्झितम् ।
एवं शनैरवष्टम्भं भेजे भूपतिरुच्चलः ॥ ३९ ॥

तेनाऽथ लब्धस्थैर्येण दिनैरेव जिगीषुणा ।
त्याजिताः क्रमराज्यान्तर्हयसैन्यादि डामराः ॥ ४० ॥

ततो मडवराज्यं स प्रस्थितो विप्रियप्रियान् ।
डामरान् कालियमुखान् बद्ध्वा शूले व्यपादयत् ॥ ४१ ॥

इल्लाराजोऽपि बलवांस्तेन क्रान्तक्षितिः क्रमात् ।
बलैर्नगर एवोग्रैरवस्कन्देन घातितः ॥ ४२ ॥

प्राग्जन्मप्रेमसंस्कारादन्तरङ्गतयाऽथवा ।
तस्य पुत्र इव प्रीतिर्गग्ग एव व्यवर्धत ॥ ४३ ॥

न सेहे नाममात्रं यः कण्टकानां प्रियप्रजः ।
नृपो गग्गाय चुक्रोध सापराधाय न क्वचित् ॥ ४४ ॥

राज्यारम्भेऽनुयुक्तेन भीमादेवेन धीमता ।
उक्ते शुभावहे शिक्षे द्वे स मन्त्रवदस्मरत् ॥ ४५ ॥

---

36. c) C S′ औत्कंठ्या° (for औत्कट्या°).
38. a) All Mss. read लोहरं (for लहरं suggested with St. Tr. cf. *vv.* v. 51; vii. 1361, 1374; viii. 437).
39. P_3 om. *vv.* 39—40. —a) All Mss. read प्राप्त° (for प्राप्य suggested with St).
41. d) P_3 शूलैः (for शूले). —d) C S′ °दयन् (for °दयत्).
42. a) C S′ इला° (इल्ला°).
44. b) C S′ °प्रजाः (for °प्रजः). —d) SA °राध (for °राधाय). C S′ P_3 कुत्र°; I_3 P_1 कूत्र° ⌊sic⌋ (for क्व°).

एकया लोकवार्तार्थं प्राह्णात् प्रभृति निर्गतः ।
बहिरुद्दिश्य वाह्यालीरचारीदादिनक्षयम् ॥ ४६ ॥

अन्ययोत्थानशीलेन श्रुत्वा नामाऽपि वैरिणः ।
अर्धरात्रेऽपि यात्राभिस्तेनाऽच्छिद्यत विप्लवः ॥ ४७ ॥

तस्यैवाऽलुप्तधैर्यस्य राज्ञां मध्ये मनस्विनः ।
कार्पण्योपहतं वृत्तं नाऽप्यभूदमलीमसम् ॥ ४८ ॥

अद्योच्चलसदाचारजाह्नवीजलमज्जनात् ।
कुनृपोदीरणोद्भूतो गिरः पाप्माऽपनेष्यते ॥ ४९ ॥

तेनाऽनुपचिताङ्गेन प्रायशो विनिवारिताः ।
अनूरुणेव सद्दृष्टिध्वंसिनो ध्वान्तसंचयाः ॥ ५० ॥

प्रायोपविष्टप्रमये देहत्यागप्रतिज्ञया ।
निवद्धया प्रत्यवेक्षां धर्माध्यक्षानकारयत् ॥ ५१ ॥

निशम्य कृपणस्याऽऽर्तं क्रन्दितं तदनिष्टकृत् ।
वभूव तस्य स्वात्माऽपि नाऽनिग्राह्यो महात्मनः ॥ ५२ ॥

कार्यिणो यस्य वा दोषादार्ताक्रन्दितमुद्ययौ ।
तस्य स्ववान्धवाक्रन्दैस्तस्मिन् क्रुद्धे शशाम तत् ॥ ५३ ॥

अवलानुग्रहव्यग्रे तस्मिन् राजनि सर्वतः ।
वास्तव्या वलिनस्तस्थुरवलास्त्वधिकारिणः ॥ ५४ ॥

---

47. [a]) SA_1 *sec. manu.* S′ C $P_{2,3}$ I_3 अन्यायो° (for अन्ययो°).

48. [ab]) SA_1 om. upto मध्ये with a space. —[c]) SA_1 P_2 कार्मणा°; S′ C कार्मण्यो° (for कार्पण्यो°). —[d]) P_2 SA_1 नाप्राभूद°; S′ C न प्रान्भूद° (for नाऽप्यभूद°).

51. [c]) C निर्वद्धया; S′ निवर्द्धया; I_3 P_2 निवंधया (for निवद्धया).

52. [a]) S′ C P_2 I_3 °स्यान्तं (for °स्याऽऽर्तं).

53. [ab]) S′ दोषोद्दता; I_3 $P_{1,2}$ C दोषाद्दत्ता; SA दोषादर्ता° (for दोषादार्ता°).

सोऽश्वेनैकश्चरन् राजेत्यज्ञात्वा कथितं जनैः ।
यं यं स्वदोषमश्रौषीत् तं तं त्वरितमत्यजत् ॥ ५५ ॥

येन केनाऽपि संप्राप्तः प्राप्त्युपायेन पार्थिवः ।
अमोघदर्शनः सोऽभूत् कल्पवृक्ष इवाऽर्थिनाम् ॥ ५६ ॥

सुधावर्षी प्रियालापप्रीतिदायैर्जनप्रियः ।
नाऽशकत् सेवकांस्त्यक्तुं विस्रम्भभवनेष्वपि ॥ ५७ ॥

श्लाघ्यश्रमैः प्रतिकलं तस्य सेवाविधायिभिः ।
प्राप्तं त्रिचतुरान् वारान् क्षणदास्वपि दर्शनम् ॥ ५८ ॥

सेव्यमानः सदाक्षिण्यः क्षणेनैव फलप्रदः ।
कस्यैन्द्रजालिकैरुप्तः शाखीव न बभूव सः ॥ ५९ ॥

वास्तव्यानां निशम्याऽर्तिं तेन दैन्यनिवारणम् ।
चक्रे पित्रेव पुत्राणां संत्यक्तेतरकर्मणा ॥ ६० ॥

स्वसंचितानि सोऽन्नानि विक्रीणानोऽल्पवेतनैः ।
दुर्भिक्षमुद्गतावेव जघान जनवत्सलः ॥ ६१ ॥

निवार्य चौर्याचरणात् कृपार्द्रस्तस्करानपि ।
कोशाध्यक्षान् स विदधच्चकाराऽगर्ह्यजीविकान् ॥ ६२ ॥

कः संविभाग्यश्छेत्तव्या विपदः कस्य मण्डले ।
इत्यन्विष्यन् सदैकैकं चारैश्चिन्तापरोऽभवत् ॥ ६३ ॥

तस्यैकोऽप्यर्थनैस्पृह्यं नाम कोऽपि महान् गुणः ।
अनुषक्तो गुणैस्तैस्तै राज्ञः पल्लवितोऽभवत् ॥ ६४ ॥

---

57. [a]) S′ C स्वधा° (for सुधा°). —[b]) S′ C °यज° (for °यैर्ज°). —[d]) St विश्रम्भ° (for विस्रम्भ°).

58. [a]) S′ C श्लाघ्यः (for श्लाघ्य°).

61. [a]) S′ C स्वर्णानि (for सोऽन्नानि).

63. [a]) S′ C $P_{2,3}$ °भाग्यः च्छे° (for °भाग्यच्छे°). —[c]) S′ C इतो° (for इत्य°).

64. [a]) S′ C तस्य का° (for तस्यैको°).

स स्थित्यै दण्डयन् दण्ड्यानघाश्लेषभयाद् धनम् ।
तेषां नाऽऽदत्त सत्कर्म शुद्धये तांस्त्वकारयत् ॥ ६५ ॥

प्रस्तुतस्याऽर्थिने दातुं वस्तु तस्यैकसंख्यया ।
सहस्रसंख्यया दानश्रद्धाऽगात् पूर्णतां यदि ॥ ६६ ॥

श्रूयतेऽर्थी यथा मह्यं देहि देहीति गां वदन् ।
तथाऽस्मै देहि देहीति वदन् दाता स शुश्रुवे ॥ ६७ ॥

अनुदात्तं क्षिप्तकालं क्षीणसंख्यमसत्कृतम् ।
नेतृदूतादिनीतार्धं न तद्दत्तमदृश्यत ॥ ६८ ॥

उत्सवे दैन्यविज्ञप्तौ रञ्जने कार्यसाधने ।
आलेख्यलीनशाखीव न सोऽलभ्यफलोऽभवत् ॥ ६९ ॥

उत्सवे शिवरात्र्यादौ जनतां सोऽसिचद् धनैः ।
ग्रहयोगे पयःपूरैर्महेन्द्र इव मेदिनीम् ॥ ७० ॥

ताम्बूलदानव्यसनं पराध्योंत्सवता तथा ।
नाऽभूद्धर्षनृपस्याऽपि तादृक् तस्याऽऽस्त यादृशी ॥ ७१ ॥

लोष्टमात्रावशेषेऽपि लब्धे नृपपदे व्यधात् ।
स दानविभ्रमांस्तान् ये धनदेनाऽपि दुष्कराः ॥ ७२ ॥

निर्माणलोठनैर्धाम्नामजस्रं वाजिनां क्रयैः ।
काश्मीरकोऽपि चक्रे स न मृत्तस्करसाद् धनम् ॥ ७३ ॥

अध्वन्यध्वनि योगेन प्राणविन्यासनैस्तथा ।
बभूव सर्वकृत्यज्ञः सोऽन्तरात्मेव देहिनाम् ॥ ७४ ॥

---

65. c) S′ C °त्कर्मा° (for °त्कर्म).

68. a) S C I_3 $P_{1,2}$ °दातुं (for °दात्तं). —b) S′ C °संख्यं न (for °संख्यम°). —c) S′ C I_3 P_{1-3} नेत्य° (for नेतृ°).

69. d) S′ C I_3 नासौ° (for न सो°).

71. d) P_2 SA_3 °स्यास्तु (for °स्याऽऽस्त).

72. c) SA I_3 P_2 °भ्रमास्ता° (for °भ्रमांस्ता°).

73. c) St °रिकोपि (for °रकोऽपि).

भोगान् राजोचितान् विप्रा भैषज्यं व्याधिपीडिताः ।
वेतनं वृत्तिहीनाश्च तस्मात् समुपलेभिरे ॥ ७५ ॥

पित्र्योपरागकेत्वादिदुर्निमित्तोपशान्तिषु ।
गोसहस्राश्वहेमादिसंभवैः सोऽभजद् द्विजान् ॥ ७६ ॥

नन्दिक्षेत्रे पुरं कृत्स्नं दग्धमुत्पातवह्निना ।
पूर्वाधिकगुणं तेन नवं राज्ये व्यधीयत ॥ ७७ ॥

श्रीचक्रधरयोगेशस्वयंभूस्थानयोजनम् ।
जीर्णोद्धृतिव्यसनिना कृतं तेन सुकर्मणा ॥ ७८ ॥

हर्षदेवेन यो निन्ये श्रीपरीहासकेशवः ।
परिहासपुरे तं स नवं नरपतिर्व्यधात् ॥ ७९ ॥

प्राग्वर्णितशुकावल्या भूषितो हर्षनीतया ।
तेन त्रिभुवनस्वामी निर्लोभेन महीभुजा ॥ ८० ॥

जयापीडाहृतं हर्षोत्पाटने प्लुष्टमग्निना ।
सिंहासनं नवं चक्रे स राज्यककुदं नृपः ॥ ८१ ॥

लब्ध्वा तदर्धाध्यारोहं भर्तुः प्रेम्णाऽतिदुर्लभम् ।
सामान्ययाऽपि देवीत्वं जयमत्या न दूषितम् ॥ ८२ ॥

सा ह्यानृशंस्यमाधुर्यत्यागसत्प्रियतानयैः ।
अस्तम्भार्तपरित्राणमुख्यैर्भव्याऽभवद् गुणैः ॥ ८३ ॥

लब्धभूपालवाल्लभ्या नार्यः क्रोधात् प्रजासु यत् ।
राक्षस्य इव भङ्गाय लावण्यललिता अपि ॥ ८४ ॥

---

76. [b]) All Mss. read °मित्तोपमार्ति°; D suggests °मित्तामयार्ति° (for °मित्तोपशान्ति° suggested with St). —[d]) St. Tr. suggests °संभारैः (for °संभवैः).

78. [b]) S′ C °स्थानु° (for °स्थान°). —[d]) I_3 P_2 स्वकर्म° (for सुकर्म°).

80. [d]) C °र्लोभो न (for °र्लोभेन).

82. [a]) C तदर्ध्वा° (for तदर्धा°).

83. [b]) P_3 om. नयैः. —[c]) S′ C I_3 $P_{1,2}$ अस्तम्भा तु° (for अस्तम्भार्त°).

84. [b]) C S′ प्रजास्वयं (for प्रजासु यत्).

प्रियप्रजस्याऽयमन्यो गुणः सर्वगुणाग्रणीः ।
उच्चलक्ष्मापतेरासीदर्थैनैस्पृह्यशालिनः ॥ ८५ ॥

जिघांसवः पापकामाः परस्वादायिनश्शठाः ।
रक्षांस्यधिकृता नाम तेभ्यो रक्षेदिमाः प्रजाः ॥ ८६ ॥

तेनेतिहासिनीं नीतिं श्रद्दधानेन सर्वदा ।
येन संपठता श्लोकं कायस्थोन्मूलनं कृतम् ॥ ८७ ॥

यत्ते विषूचिकाशूलसंन्यासेभ्यः किलेतरे ।
घ्नन्त्याशुकारिणो विश्वं प्रजारोगा नियोगिनः ॥ ८८ ॥

पितरं कर्कटो हन्ति मातरं हन्ति पुत्तिका ।
हन्ति सर्वं तु कायस्थः कृतघ्नः प्राप्तसंभवः ॥ ८९ ॥

गुणान् समर्प्य स्फुरता येनैवोत्थाप्यते शठः ।
वेताल इव कायस्थस्तमेवाऽऽहन्ति हेलया ॥ ९० ॥

विषवृक्षो नियोगी च यदेवाऽऽश्रित्य वर्धते ।
चित्रं करोति तस्यैव स्थानस्याऽनभिगम्यताम् ॥ ९१ ॥

तेन ते क्ष्माभुजा मानक्षतिकार्यनिवारणैः ।
काराप्रवेशैश्च खलाः शमं नीताः पदे पदे ॥ ९२ ॥

कार्यान्निवार्य बहुशः सहेलाद्यान् महत्तमान् ।
भङ्गासूत्रमयं वासः कारायां पर्यधापयत् ॥ ९३ ॥

---

86. b) All Mss. read °दायिनश्च ताः (for °दायिनश्शठाः suggested with D, cf. *Manu.* vii. 123 and St. Tr.).

87. d) S′ C °द्धर्जनं (for °न्मूलनं).

89. b) S′ C I_3 पुत्रिका (for पुत्तिका).

90. b) S′ C °वोत्पाद्य° (for °वोत्थाप्य°).

91. d) S′ C °नति° (for ⌊अ⌋नभि°).

93. b) C S′ °लस्याप्याहेतु° (for °लाद्यान् महत्त°).

स कार्यवेषं हास्याय सभार्यं चारणोचितम् ।
अकारयद् भूतभिश्चं धावनं डोम्बयोधवत् ॥ ९४ ॥

स प्रांशुर्वेष्टितश्मश्रुरुष्णीषेणोत्फलन् पुनः ।
शूलहस्तः सजानूरुः केषामासीन्न हास्यकृत् ॥ ९५ ॥

स शीर्षदर्शनं साम्यवादवेश्याविटान्वितम् ।
प्रियवेश्यं कंचिदग्रे नृत्तवाद्यमकारयत् ॥ ९६ ॥

बद्ध्वाऽन्यं शकटे नग्नं क्षुरलूनार्धमस्तकम् ।
अकारयत् सटान्यस्तचीनपिष्टच्छटाङ्कितम् ॥ ९७ ॥

ते कुम्भवादनैर्मुण्डमण्डनैश्चाऽङ्किताभिधाः ।
नियोगिनो भग्नमानाः सर्वतः ख्यातिमाययुः ॥ ९८ ॥

कार्यभ्रष्टा मलक्लिन्नक्षीणवस्त्रावगुण्ठनाः ।
सर्वार्थिनो व्यभाव्यन्त केऽप्यटन्तः प्रतिक्षपम् ॥ ९९ ॥

वृथावृद्धाः सुखप्राप्यं पाण्डित्यं भूर्जवत् परे ।
मत्वा बाला इवाऽऽचार्यगृहे प्रारेभिरे श्रुतम् ॥१००॥

केऽप्युच्चैरट्टभिक्षाकाः सादरं स्तोत्रपाठिनः ।
कृतानुपाठाः स्वापत्यैः प्राह्ले लोकमहासयन् ॥१०१॥

माता स्वसा सुता भार्या स्वापि कैरप्यकार्यत ।
सामन्तसेवनं कार्यप्राप्त्यै सुरतसेवया ॥१०२॥

---

94. [a]) D सकार्य° (for स कार्य°). —[b]) C S′ सभायां वरणो° (for सभार्यं चारणो°). —[c]) All Mss. read °भिश्चधा° (for °भिश्चं धा° suggested with St). —[d]) All Mss. read डोम्भ° (for डोम्ब° suggested with St).

96. [a]) D C S′ °दशनं (for °दर्शनं). —[b]) St. Tr. suggestes साम्यवादि° (for साम्यवाद°). —[d]) C S′ ⌊अ⌋नृतवंद्य°; I_3 P_2 नृतुवाद्य° (for नृत्तवाद्य°).

98. [c]) P_2 °मना: (for °माना:).

99. [a]) C S′ अन्न° (for मल°). —[d]) C S′ °क्षयं (for °क्षपं).

102. [d]) C S °प्राप्तैः (for °प्राप्त्यै).

जातकस्वप्नशकुनस्वलक्षणनिरीक्षणम् ।
कारयद्भिः शठैरन्यैर्गणकाः परिखेदिताः ॥ १०३ ॥

पिशाचा इव शुष्कास्या रूक्षश्मश्रुकचाः कृशाः ।
बद्धाः परैर्व्यभाव्यन्त शृङ्खलामुखराङ्घ्रयः ॥ १०४ ॥

नृपेण कार्यिणां दर्पलिङ्गनाशे विपाटिते ।
अक्ष्णोर्ज्ञातिपरिज्ञानक्षमत्वं समजायत ॥ १०५ ॥

भारतस्तवराजादिस्तोत्रपाठमशिश्रियन् ।
ते दुर्गोत्तारिणीविद्याजपं चोदश्रुलोचनाः ॥ १०६ ॥

इत्थं दौस्स्थ्योदये दीर्घे मज्जन्तो नित्यदुर्जनाः ।
तस्मिन् राजनि कायस्था व्यलोक्यन्त पदे पदे ॥ १०७ ॥

भिन्नसन्धानभूर्यर्थदानभोज्यादिढौकनैः ।
न हि मोहयितुं शक्ताः प्राज्ञं तं तेऽन्यराजवत् ॥ १०८ ॥

तान् प्रजाकण्टकान् दुष्टान् कृतधीरकृताऽनिशम् ।
तैस्तैः शुचिभिरध्यक्षैः स विशामीश्वरो वशान् ॥ १०९ ॥

भूतेशस्य यथा पुरी हुतवहप्लुष्टा त्वदाज्ञाबलाद्
भूयः स्वां श्रियमाससाद सहसा तद्वत्समस्तामिमाम् ।
त्वं कायस्थकुटुम्बिक्लृतिसचिवप्रायाख्यपञ्चानली-
लीढामुच्चलदेव निर्वृतिसुखस्थित्या पुरीं स्वां क्रियाः ॥ ११० ॥

---

103. a) C S′ °शक्ते° (for °शकु°). —b) St °सुल° (for °स्वल°). —c) C S′ शुभै°; P_2 शुभे°; I_3 शठे° (for शठै°).

105. c) C °ज्योतिः; S′ °ज्योति° (for °ज्ञाति°).

106. b) C S′ °शिश्रयन् (for °शि।श्रियन्). —d) C S′ °जपंश्चो° (for °जपं चो°).

108. d) C S′ तेन° (for तेऽन्य°).

109. a) C पुष्टा° (for दुष्टा°). —d) C S′ ⌊अ⌋ वशान् (for वशान्).

110. a) C S′ तदाज्ञा° (for त्वदाज्ञा°). —c) D °प्रायं; $P_{2,3}$ I_3 °प्राय; P_1 °प्रायि; C S′ °प्रायाञ्च (for °प्रायाख्य° suggested). D St SA_1 P_{1-3}. I_3 indicate a *lacuna* of one syllable before पञ्चा°).

शिवरात्र्युत्सवे श्लोकममुं शिवरथाभिधः ।
विद्वान् पठंस्तेन हठात् सर्वाध्यक्षो व्यधीयत ॥ १११ ॥

व्यवहारानभिज्ञोऽपि कंचित्कालमदीदृशत् ।
शुचित्वादार्यभाजः स क्रामन् कृतयुगस्थितिम् ॥ ११२ ॥

शीघ्रदण्डत्वमुच्चण्डतेजसस्तस्य भूपतेः ।
क्रूरानुद्दिश्य कायस्थान् धीमद्भिर्बह्वमन्यत ॥ ११३ ॥

नहि क्षुद्राश्वकायस्थपिशाचाविष्टवैरिणाम् ।
शंसन्त्यन्तरितं दण्डं दण्डनीतिविशारदाः ॥ ११४ ॥

चिरेण दण्डिता ह्येते कुर्युर्दण्डभयाद् ध्रुवम् ।
लब्धान्तराः प्राणहरं कृच्छ्रं किंचित् प्रशासितुः ॥ ११५ ॥

दण्ड्यानां दण्ड्यमानानां पुत्रस्त्रीमित्रबान्धवाः ।
राज्ञा विचारशीलेन न तेनोपद्रुताः क्वचित् ॥ ११६ ॥

कर्णेजपाँल्लोष्टधरप्रमुखांस्तेन दुःखदैः ।
कर्मभिः क्लिश्नताऽध्वाऽपि पैशुन्यस्य खिलीकृतः ॥ ११७ ॥

विस्मृतिं लब्धराज्यानां पूर्वसंकल्पवासनाः ।
प्रयान्ति प्राप्तजनुषां गर्भवासस्पृहा इव ॥ ११८ ॥

प्राग्राज्याधिगमात् किंचित् सदसद्यद् व्यचिन्तयत् ।
राज्ये तन्न विसस्मार जातिस्मर इवोच्चलः ॥ ११९ ॥

ददर्श शत्रोरद्रोहान् यान् द्रोग्धॄन् वा पुरानुगान् ।
कर्तव्यानुगुणं तेषां प्रतिपत्तिमदर्शयत् ॥ १२० ॥

स्मरेन्नोपपतिः पूर्वपतिद्रोहं कुयोषितः ।
पूर्वस्वाम्यरितां चाऽद्य कुभृत्यस्येश्वरो जडः ॥ १२१ ॥

---

111. [a]) $P_{1,2}$ SA लोक° (for श्लोक°).
112. [b]) C S′ °दीद° (for °दीदृ°). —[d]) C S′ क्रमन् (for क्रामन्).
115. [b]) C S′ °धराद् (for °भयाद्).
116. [c]) C S′ राज्ञां (for राज्ञा).
117. [c]) C S′ क्लिष्टताद्या° (for क्लिश्नताऽध्वा°).
119. [c]) C S′ P_1 तत्र (for तन्न).
121. [d]) C S′ °स्योद्धरो (for °स्येश्वरो).

शेषाहिदेहान्मेदिन्या समं प्रज्ञाऽपि राज्ञ्यभूत् ।
तस्मिन् परिणता नूनं कृत्याकृत्यविवेक्तरि ॥१२२॥

तथाह्येकस्य वणिजो व्यवहर्तुश्च सोऽभवत् ।
विवादे संशयं छिन्दन्नेवं स्थेयाद्यगोचरे ॥१२३॥

सौहृदारूढसद्भावे व्यापदौपयिकं धनी ।
न्यासीचकार दीन्नारलक्षं कोऽपि वणिग्गृहे ॥१२४॥

तेनोपयुज्यमाना च व्ययेषु वणिजः करात् ।
कियत्यपि गृहीताऽभूदर्थमात्राऽन्तरान्तरा ॥१२५॥

त्रिंशद्विंशासु यातासु समासु न्यासधारिणम् ।
गृहीतशेषं दातुं स धनं प्रार्थयताऽथ तम् ॥१२६॥

वणिक् तु कुकृती तस्य न्यासग्रासाय सोद्यमः ।
कालापहारमकरोत् तैस्तैः कलुषधीर्मिषैः ॥१२७॥

स्रोतोभिर्व्यस्तमम्भोधौ लभ्यं मेघमुखैः पयः ।
प्राप्तिर्भूयस्तु नाऽस्त्येव वणिङ्न्यस्तस्य वस्तुनः ॥१२८॥

तैलस्निग्धमुखः स्वल्पालापो मृद्वाकृतिर्भवन् ।
न्यासग्रासविवादोग्रो वणिग् व्याघ्राद् विशिष्यते ॥१२९॥

विवादे श्रेष्ठिना शाठ्यं स्मितैः प्राक्सख्यदर्शनैः ।
मुक्तं मुक्तं ज्ञायमानं प्राणान्तेऽपि न मुच्यते ॥१३०॥

---

122. b) C S′ राज्ञ्यभृत् (for राज्ञ्यभूत्).

124. a) St I_3 $P_{1,2}$ °गूढ° (for °रूढ°). —b) C S′ °यिके (°यिकं).

125. d) SA °दत्तमात्रा°; S′ C °दनुमात्रा°; SL I_3 P_3 °दन्तमात्रा°; St °दात्तमात्रा°; D $P_{1,2}$ °द्दत्तमात्रा° (for °दर्थमात्रा° suggested with St.Tr.).

126. a) S′ C °द्विंशत्सु या°; P_3 °द्विंशत्प्रया°; SA °द्विशद्या° (for °द्विंशासु या° suggested with St). D $P_{1,2}$ I_3 indicate a *lacuna* of one syllable after °द्विंश. Here the word त्रिंशद्विंश- means thirty or twenty and not fifty, cf. *v.* v. 210.

130. c) S′ C सुस्थं सुस्थं (for मुक्तं मुक्तं). —d) C S′ मुख्यते ⌊sic⌋ (for मुच्यते).

निसर्गवञ्चका वेश्याः कायस्थो दिविरो वणिक् ।
गुरूपदेशोपस्कारैर्विशिष्टाः सविषादिषोः ॥१३१॥

चन्दनाङ्कालिके श्वेतांशुके धूपाधिवासिनि ।
विश्वस्तः स्यात् किराटे यो विप्रकृष्टेऽस्य नाऽऽपदः ॥१३२॥

ललाटदृक्पुटश्रोत्रद्वन्द्वहृन्न्यस्तचन्दनः ।
षड्बिन्दुर्वृश्चिक इव क्षणात् प्राणान्तकृद्वणिक् ॥१३३॥

पाण्डुश्यामोऽग्निधूमार्द्रः सूच्यास्यो गहनोदरः ।
तुम्बीफलोपमः श्रेष्ठी रक्तं मांसं च कर्षति ॥१३४॥

सोऽथ निश्शेषितमिषः क्रुद्धो निर्बन्धकारिणः ।
गणनापत्रिकां तस्य सभ्रूभङ्गमदर्शयत् ॥१३५॥

यदादौ श्रेयस इति न्यस्तमश्रेयसे पदम् ।
आतरेष्वत्यये सेतोर्गृहीता षट्शती त्वया ॥१३६॥

छिन्नोपानत्कषाबन्धे शतं चर्मकृतेऽर्पितम् ।
विपादिकाकृते दास्या नीतं पञ्चाशतो घृतम् ॥१३७॥

स्फोटने भाण्डभारस्य क्रन्दन्त्याः कृपयाऽर्पितम् ।
कुलाल्या बहुशः पश्य भूर्जे लग्नं शतत्रयम् ॥१३८॥

शिशुभ्योऽस्य बिडालस्य क्रीताः पोषाय मूषिकाः ।
त्वया शतेन वात्सल्याद्धट्टान्मत्स्यरसस्तथा ॥१३९॥

---

131. [b]) C S′ ⌊अ⌋पि वरो; P_{1-3} शिविरो (for दिविरो). —[d]) D S′ C P_{1-3} °षाशिषोः (for °षादिषोः).

132. [c]) St suggests किराते (for किराटे found in all Mss.). किराट– means a shopkeeper, cf. *Yogavāsiṣṭha* iv. 83.16 and W. Panjābī किराड़, also cf. MW. —[d]) C S′ °ष्टेष्वना° (for °ष्टेऽस्य ना°).

133. [a]) C °क्षत्र°; P_1 °क्पुत्र°; I_3 °क्षुट° (for °पुट°).

135. [c]) C तस्याः (for तस्य).

136. [d]) C S′ °सुधी (for °शती).

139. [d]) C S′ °त्पट्टान् (for °द्धट्टान्).

शेषाहिदेहान्मेदिन्या समं प्रज्ञाऽपि राज्यभूत् ।
तस्मिन् परिणता नूनं कृत्याकृत्यविवेक्तरि ॥१२२॥

तथाह्येकस्य वणिजो व्यवहर्तुश्च सोऽभवत् ।
विवादे संशयं छिन्दन्नेवं स्थेयाद्यगोचरे ॥१२३॥

सौहृदारूढसद्भावे व्यापदौपयिकं धनी ।
न्यासीचकार दीन्नारलक्षं कोऽपि वणिग्गृहे ॥१२४॥

तेनोपयुज्यमाना च व्ययेषु वणिजः करात् ।
कियत्यपि गृहीताऽभूदर्थमात्राऽन्तरान्तरा ॥१२५॥

त्रिंशद्विंशासु यातासु समासु न्यासधारिणम् ।
गृहीतशेषं दातुं स धनं प्रार्थयताऽथ तम् ॥१२६॥

वणिक् तु कुकृती तस्य न्यासग्रासाय सोद्यमः ।
कालापहारमकरोत् तैस्तैः कलुषधीर्मिषैः ॥१२७॥

स्रोतोभिर्व्यस्तमम्भोधौ लभ्यं मेघमुखैः पयः ।
प्रातिभूयस्तु नाऽस्त्येव वणिङ्न्यस्तस्य वस्तुनः ॥१२८॥

तैलस्निग्धमुखः स्वल्पालापो मृद्वाकृतिर्भवन् ।
न्यासग्रासविवादोग्रो वणिग् व्याघ्राद् विशिष्यते ॥१२९॥

विवादे श्रेष्ठिना शाठ्यं स्मितैः प्राक्सख्यदर्शनैः ।
मुक्तं मुक्तं ज्ञायमानं प्राणान्तेऽपि न मुच्यते ॥१३०॥

---

122. [b]) C S′ राज्यभृत् (for राज्यभूत्).

124. [a]) St I_3 $P_{1,2}$ °गूढ° (for °रूढ°). —[b]) C S′ °यिके (°यिकं).

125. [d]) SA °दत्तमात्रा°; S′ C °दनुमात्रा°; SL I_3 P_3 °दन्तमात्रा°; St °दात्तमात्रा°; D $P_{1,2}$ °द्त्तमात्रा° (for °दर्थमात्रा° suggested with St.Tr.).

126. [a]) S′ C °द्विंशत्सु या°; P_3 °द्विंशत्प्रया°; SA °द्विंशद्या° (for °द्विंशासु या° suggested with St). D $P_{1,2}$ I_3 indicate a *lacuna* of one syllable after °द्विंश. Here the word त्रिंशद्विंश - means thirty or twenty and not fifty, cf. *v.* v. 210.

130. [c]) S′ C सुस्थं सुस्थं (for मुक्तं मुक्तं). —[d]) C S′ मुख्यते ⌊sic⌋ (for मुच्यते).

निसर्गवञ्चका वेश्याः कायस्थो दिविरो वणिक् ।
गुरूपदेशोपस्कारैर्विशिष्टाः सविषादिषोः ॥१३१॥

चन्दनाङ्कालिके श्वेतांशुके धूपाधिवासिनि ।
विश्वस्तः स्यात् किराटे यो विप्रकृष्टेऽस्य नाऽऽपदः ॥१३२॥

ललाटदृक्पुटश्रोत्रद्वन्द्वहृन्न्यस्तचन्दनः ।
षड्बिन्दुर्वृश्चिक इव क्षणात् प्राणान्तकृद्वणिक् ॥१३३॥

पाण्डुश्यामोऽग्निधूमार्द्रः सूच्यास्यो गहनोदरः ।
तुम्बीफलोपमः श्रेष्ठी रक्तं मांसं च कर्षति ॥१३४॥

सोऽथ निःशेषितमिषः क्रुद्धो निर्बन्धकारिणः ।
गणनापत्रिकां तस्य सभ्रूभङ्गमदर्शयत् ॥१३५॥

यदादौ श्रेयस इति न्यस्तमश्रेयसे पदम् ।
आतरेष्वत्यये सेतोर्गृहीता षट्शती त्वया ॥१३६॥

छिन्नोपानत्कषाबन्धे शतं चर्मकृतेऽर्पितम् ।
विपादिकाकृते दास्या नीतं पञ्चाशतो घृतम् ॥१३७॥

स्फोटने भाण्डभारस्य क्रन्दन्त्याः कृपयाऽर्पितम् ।
कुलाल्या बहुशः पश्य भूर्जे लग्नं शतत्रयम् ॥१३८॥

शिशुभ्योऽस्य बिडालस्य क्रीताः पोषाय मूषिकाः ।
त्वया शतेन वात्सल्याद्धट्टान्मत्स्यरसस्तथा ॥१३९॥

---

131. b) C S′ ⌊अ⌋पि वरो; P_{1-3} शिविरो (for दिविरो). —d) D S′ C P_{1-3} °षाशिषोः (for °षादिषोः).

132. c) St suggests किराते (for किराटे found in all Mss.). किराट– means a shopkeeper, cf. *Yogavāsiṣṭha* iv. 83.16 and W. Panjābī किराड़, also cf. MW. —d) C S′ °ष्टेष्वना° (for °ष्टेऽस्य ना°).

133. a) C °क्षत्र°; P_1 °क्पुत्र°; I_3 °क्षुट° (for °पुट°).

135. c) C तस्याः (for तस्य).

136. d) C S′ °सुधी (for °शती).

139. d) C S′ °त्पट्टान् (for °द्धट्टान्).

चरणोद्वर्तनं सर्पिः शालिचूर्णं च सप्तभिः।
क्रीतं शतैः श्राद्धपक्षस्नाने च घृतमाक्षिकम् ॥१४०॥

नीतं क्षौद्रार्द्रकं कासायासायादर्भकेण ते।
सोऽव्यक्तजिह्वः किं वेत्ति वक्तुं लग्नं शतं ततः ॥१४१॥

वृषणोत्पाटको भिक्षाचरस्ते हठयाचकः।
यो वारितो युद्धपटुस्तस्मै दत्तं शतत्रयम् ॥१४२॥

आनीते भट्टपादानां मध्यं सर्वव्ययोपरि।
शतं शतद्वयं धूपशन्दामूलपलाण्डुषु ॥१४३॥

इत्याद्यचिन्तितायुक्तापरिहार्यव्ययानसौ।
तस्यैकीकृत्य गणनां लाभेऽपि शनकैर्व्यधात् ॥१४४॥

वर्षमासग्रहतिथिप्रत्यावृत्तिः पुनः पुनः।
संसारस्येव तस्याऽन्तं न ययौ नर्तिताङ्गुलेः ॥१४५॥

स मूलग्रहणं पिण्डीकृत्याऽथ सकलान्तरम्।
प्रसारितौष्ठस्तन्नेत्रे मीलयन्नभ्यधान्मृदु ॥१४६॥

शल्यमुद्धर निक्षेपं नयोज्ज्ञामधनं त्विदम्।
विस्रम्भदत्तं निर्दम्भं दीयतां सकलान्तरम् ॥१४७॥

तत् स धर्म्यं वचो जानन् क्षणमुच्छ्वसितोऽभवत्।
क्षुरं क्षौद्रोपलिप्तं तु ध्यात्वा पश्चादतप्यत ॥१४८॥

---

140. P_1 om. *ab*.

142. [a]) C S′ मृष° (for वृष°). —[b]) C S′ इव (for हठ°).

144. [a]) St °द्यचिन्त्यतायुक्तान्परि°; D (before suggestion) C S′ P_{1-3} °द्यचिन्ततायुक्तापरि°; I_3 °दि चिंतता° (for °द्यचिन्तितायुक्ता° suggested with D).

145. [c]) C S′ °मेव (for °स्येव). C S′ °स्यान्ते (for °स्याऽन्तं).

146. [c]) St P_1 °तोष्ठ°; P_2 I_3 °तोष्ट° (for °तौष्ठ°).

147. [b]) S′ C °योज्ञास°; P_1 °यज्ञास°; D St SA $P_{2,3}$ °योज्जास° (for °योज्जाम° found in SL). —[c]) St विश्रम्भ° (for विस्रम्भ°).

युक्त्याऽपहुतसर्वस्वं क्रौर्यानार्यमथाऽर्थकः।
विवादे नाऽशकज्जेतुं नाऽपि स्थेया विचारकाः ॥१४९॥

स्थेयैरनिश्चितन्यायं पुरो न्यस्तं ततो नृपः।
तदित्थमिति निश्चित्य वणिजं तमभाषत ॥१५०॥

अद्याऽपि न्यासदीन्नाराः सन्ति चेत् तत् प्रदर्श्यताम्।
अंशः कियानपि ततस्ततो वच्मि यथोचितम् ॥१५१॥

तथा कृते तेन वीक्ष्य दीन्नारान् मन्त्रिणोऽब्रवीत्।
राजभिर्भाविनां राज्ञां नाम्ना टङ्कः क्रियेत किम् ॥१५२॥

न चेत् कलशभूपालकाले न्यासीकृतेष्वमी।
दीन्नारेषु कुतष्टङ्का मन्नामाङ्का अपि स्थिताः ॥१५३॥

निक्षिप्तेनैष लक्षेण वणिक् तस्माद् व्यवाहरत्।
वणिजो द्रविणेनाऽयमप्याप्तेनाऽतरान्तरा ॥१५४॥

तस्माद् यदा यदेतेन गृहीतं दीयतां ततः।
तदाप्रभृत्यद्य यावल्लाभोऽस्मै वणिजोऽर्थिनः ॥१५५॥

न्यसनानेहसश्चैष प्रभृत्यस्मै प्रयच्छतु।
लक्षादखण्डिताल्लाभं किं वाच्यं मौलिके धने ॥१५६॥

अवधारयितुं शक्यं मादृशैः सघृणैरियत्।
श्रीयशस्करवद् रौक्ष्यमीदृक्षेषु तु युज्यते ॥१५७॥

---

149. a) St S′ C I_3 $P_{1,2}$ युक्ताप° (for युक्त्याऽप°). —b) S′ SA क्रौर्यानर्य° (for क्रौर्यानार्य°).

155. c) St C तदा प्रभृ° (for तदाप्रभृ°). St D C °त्यद्यया° (for °त्यद्य या°). —d) St.Tr. suggestes वणिजोऽर्थिना (for वणिजोऽर्थिनः found in all Mss.).

156. d) C S′ लौलिके (for मौलिके).

विवादे संदिहानस्य युक्तं क्षान्त्याऽनुशासनम् ।
भाव्यं दण्डधराचारैः प्रयुक्तकुसृतैः पुनः ॥१५८॥

अनिर्हार्येषु शल्येषु महामर्मगतेष्विव ।
सविवादेषु चोपेक्षां कालापेक्षी व्यधान्नृपः ॥१५९॥

पप्रथे पार्थिवस्येत्थं निश्चोद्यं तस्य पालनम् ।
प्रजासु जागरूकस्य मनोरिव मनस्विनः ॥१६०॥

सख्यं कारणनिर्व्यपेक्षमिनताऽहंकारहीना सती-
भावो वीतजनापवाद उचितोक्तित्वं समस्तप्रियम् ।
विद्वत्ता विभवान्विता तरुणिमा पारिप्लवत्वोज्झितो
राजत्वं विकलङ्कमत्र चरमे काले किलेत्यन्यथा ॥१६१॥

स तादृशोऽपि राजेन्द्रचन्द्रमाः सन् किलाऽभवत् ।
मात्सर्याविष्टवैवश्याद् दोषोल्कावर्षभीषणः ॥१६२॥

औदार्यशौर्यधीधैर्यगुणतारुण्यमत्सरः ।
बभूव संख्यातीतानां मानप्राणहरो नृणाम् ॥१६३॥

मानोन्नतैश्च भूयोऽपि वाक्पारुष्यरुषाऽऽहतैः ।
लाघवं प्रत्युपालम्भैः पार्थिवोऽप्यनुभावितः ॥१६४॥

प्रसुप्तानां फणीन्द्राणामिव कोपोद्भवं विना ।
तेजोविस्फूर्जितं ज्ञेयं नहि नाम शरीरिणाम् ॥१६५॥

विविधे भूतसर्गेऽस्मिन् न च कश्चित् स विद्यते ।
वपुर्वंशचरित्रादि यस्य दोषैर्न दूषितम् ॥१६६॥

---

158. b) C S′ क्षान्त्य° (for क्षान्त्या°). —c) C S′ °परा° (for °धरा°). —d) C S′ प्रयुक्तं (for प्रयुक्त°).
159. a) D P_1 अतिहार्येषु (for अनिर्हार्येषु).
160. c) C S′ प्रजास्व° (for प्रजासु).
161. b) C S′ °तोत्थित्वं (for °तोक्तित्वं).
162. a) D suggests यत् (for स). —b) D S′ C P_{1-3} I_3 SA स (for सन् suggested with St). —c) D suggests °वेश° (for °विष्ट°). —d) C S′ °त्कावर्षयो° (for °ल्कावर्षभी°).
164. b) D हतै: (for [आ]हतै:).

जातिः पङ्करुहाद् वपुः कपिलताक्रान्तं शिरःखण्डन-
प्रभ्रश्यच्छुचिशीलतादिविगुणाचारप्रदुष्टं यशः ।
विश्वस्रष्टुरिति प्रभूतविषयव्याप्तिस्पृशो दुस्सहा
दोषा यत्र पुरोऽस्तु तत्र कतमो निर्दोषतोत्सेकभूः ॥१६७॥

अविचार्यैति भूपालः स चकाराऽनुजीविनाम् ।
वंशचारित्रदेहादिदोषोद्घोषणमन्वहम् ॥१६८॥

अन्योन्यद्वेषमुत्पाद्य संख्यातीता महाभटाः ।
युद्धश्रद्धालुना तेन द्वन्द्वयुद्धेषु घातिताः ॥१६९॥

मासार्धदिनमाहेन्द्रमहाद्यवसरेषु सः ।
निनाय योधान् संनद्धानन्योन्यप्रधनैर्धनम् ॥१७०॥

स नाऽभूदुत्सवः कश्चित् तदा यत्र नृपाङ्गने ।
भूमिर्न सिक्ता रक्तेन हाहाकारो न चोद्ययौ ॥१७१॥

नृत्यन्त इव निर्याता गृहेभ्यो वंशशोभिनः ।
बान्धवैर्निन्यिरे योधा लूनाङ्गाः पार्थिवाङ्गनात् ॥१७२॥

स्निग्धश्यामकचांश्चारुश्मश्रूनाकल्पशोभिनः ।
हतान् वीक्ष्य भटान् राजा मुमुदे न तु विव्यथे ॥१७३॥

नार्यो राजगृहं गत्वा प्रत्यायातेषु भर्तृषु ।
मेनिरे दिवसं लब्धमनास्था नित्यमन्यथा ॥१७४॥

भवेत् तद् यदहं कुर्यामित्यहंक्रियया वदन् ।
साचिव्यमव्याहतवाक् तैस्तैर्भृत्यैरजिग्रहत् ॥१७५॥

---

167. a) C S′ ज्ञातं (for °क्रान्तं). D S′ C °खण्डनं (for °खण्डन°). —d) C S′ पुरस्तु (for पुरोऽस्तु).

169. a) C S′ °दोष° (for °द्वेष°). —c) D I_3 P_{1-3} °द्धालुता (for °द्धालुना).

170. a) C S′ मासार्द्ध° (for मासार्ध°). —d) C S′ °न्योन्यं (for °न्योन्य°). P_3 °नैः क्षयं (for °नैर्धनं).

173. d) C S′ च (for तु).

175. d) St P_{1-3} I_3 यै° (for तै°).

प्रवर्धमानांस्तानेव विद्वेषकलुषाशयः ।
हृताधिकारान् विदधे बहुशश्च विमानितान् ॥१७६॥

दञ्छकः कम्पनाधीशः प्रवृद्धौ तत्र सक्रुधि ।
विद्रुतो विषलाटायां निपत्य निहतः खशैः ॥१७७॥

तेन स्ववर्धितो द्वाराधीश्वरो रक्ककाभिधः ।
हृताधिकारो विदधे विभूतिं वीक्ष्य भूयसीम् ॥१७८॥

माणिक्यसैन्यपतिना द्वारेऽकस्मान्निवारिते ।
खिन्नेन विजयक्षेत्रे चक्रे व्रतपरिग्रहः ॥१७९॥

कम्पनाद्यधिकारस्थाः प्रवीरास्तिलकादयः ।
काकवंशा मार्दवेन तत्कोपं नाऽनुभाविताः ॥१८०॥

भोगसेनो निरनुगः क्षीणवासा भवन् कृतः ।
तेनाऽतिसेवाप्रीतेन राजस्थानाधिकारभाक् ॥१८१॥

यस्येन्द्रद्वादशीयुद्धे सान्द्रसैन्योऽपि विद्रुतः ।
क्षुद्रवद् गग्गचन्द्रोऽपि रौद्रमालोक्य विक्रमम् ॥१८२॥

येऽपि सङ्गाभिधानस्य पुत्राः सामान्यशस्त्रिणः ।
तान् रङ्गच्छुङ्गव्ययङ्गान् स मन्त्रिणः समपादयत् ॥१८३॥

पुत्रौ विजयसिंहस्य तत्सेवात्यक्तदुर्दशौ ।
तिलको जनकश्चाऽऽस्तामममात्यश्रेणिमध्यगौ ॥१८४॥

---

176. b) S′ C विदुषः (for विद्वेष°).

177. a) C S′ दंशकः (for दञ्छकः). —b) C S′ प्रवृद्धे (for प्रवृद्धौ).

179. d) C S′ वृत° (व्रत°).

180. C S′ subst. काकवंशादिर्मंत्रित्वे न तत्कोपेन भाविताः for *cd*.

181. b) C S′ °वासोऽभवत्कृतः; D (before suggestion) P_{1-3} I_3 °वासा भवत्कृतः; D suggests °वासाः कृतोभवत् (for °वासा भवन् कृतः).

184. c) SA I_3 P_2 °श्चास्त° (for °श्चाऽऽस्ता°).

यमैलाभयबाणादिमुख्या द्वारादिनायकाः ।
कस्तान् समर्थः संख्यातुं तडित्तरलसंपदः ॥१८५॥

द्वित्राः प्रशस्तकलशादयः पूर्वं तदन्तरे ।
प्रापुर्बालद्रुमान्तस्स्थजीर्णानोकहविभ्रमम् ॥१८६॥

कंदर्पः क्ष्माभुजा दूतैः समानीतोऽपि नाऽऽददे ।
तस्याऽसहनतां वीक्ष्य प्रार्थितोऽप्यधिकारिताम् ॥१८७॥

आस्थानाचारसंलापव्यवहारादि मण्डले ।
नवमेवाऽभवत् सर्वं तस्मिन्नभिनवे नृपे ॥१८८॥

लक्ष्मीः कार्मणचूर्णाङ्का वेश्येव वशवर्तिनः ।
धीरानपि विधायेयं करोत्युन्मार्गवर्तिनः ॥१८९॥

सपिण्डानामपि व्यक्तशीलवीक्षणतत्परा ।
प्रेततेव नरेन्द्रश्रीर्जातिस्नेहापकारिणी ॥१९०॥

समस्तसंपत्पूर्णोऽपि यस्मात् सुस्सलभूपतिः ।
दध्यौ भ्रातुरवस्कन्दं राज्यापहरणोद्यतः ॥१९१॥

अकस्मादश्रृणोच्छ्येनमिव तं शीघ्रपातिनम् ।
स्थानं वराहवार्ताख्यमुल्लङ्घ्याऽऽयातमग्रजः ॥१९२॥

क्षिप्रकारी विनिर्गत्य तमप्राप्तपदं ततः ।
निपत्य सैन्यैर्बहुलैः सोऽपकारमकारयत् ॥१९३॥

---

185. a) D C S′ $P_{1,3}$ °भाय° (for °भय°).

186. d) I_3 $P_{1,2}$ SA °नौकह° (for °नोकह°).

189. ab) C S′ °ङ्कवेश्यायावे; P_2 °ङ्का वेशेव व° (for °ङ्का वेश्येव व°).

190. b) C S′ I_3 St P_2 °शूल° (for °शील°).

विद्रुतस्याऽऽस्पदे तस्य नानोपकरणैश्च्युतैः ।
ताम्बूलवल्लीकूटैश्च सामग्री समभाव्यत ॥१९४॥

कृतकार्यः परावृत्त्याऽसावरूढोऽपि पार्थिवः ।
प्रत्यावृत्तं तमश्रृणोदन्येद्युः क्रूरविक्रमम् ॥१९५॥

गगचन्द्रस्तदादेशाद् गत्वा बहलसैनिकः ।
चक्रे सुस्सलभूपालबलनिर्दलनं ततः ॥१९६॥

असंख्यैः सोस्सलैर्योधैराहवायासनिस्सहैः ।
क्लान्तिर्विमानोद्यानेषु द्युनारीणाममुच्यत ॥१९७॥

भर्तृप्रसादस्याऽऽनृण्यं प्राणैर्युधि समर्पितैः ।
राजपुत्रौ गतौ तत्र सहदेवयुधिष्ठिरौ ॥१९८॥

वराश्वान् सुस्सलानीकाद् गग्गस्तान् प्राप विद्रुतान् ।
चक्रे भूरितुरङ्गस्य यैर्भूपस्याऽपि कौतुकम् ॥१९९॥

निविष्टकटकं तं स श्रुत्वा सेल्यपुराध्वना ।
क्रमराज्योन्मुखं यान्तं द्रुतमन्वसरन्नृपः ॥२००॥

अन्विष्यमाणसरणिः प्रयत्नादग्रजन्मना ।
प्रविवेश दरद्देशं परिमेयपरिच्छदः ॥२०१॥

दत्तमार्गं तस्य राजा डामरं लोष्टकाभिधम् ।
स सेल्यपुरजं हत्वा नगरं प्राविशत् ततः ॥२०२॥

तस्मिन् दूरं गते वैरकलुषोऽपि स नाऽऽददे ।
भ्रातृस्नेहेन संरम्भं ग्रहीतुं लोहरं गिरिम् ॥२०३॥

---

194. c) All Mss. read °वेला° (for °वल्ली° suggested with St).
195. a) D St I_3 P_{1-3} °कार्यं° (for °कार्यः).
197. b) C S′ °याम° (for °यास°).
199. a) All Mss. read °नीकान् (for °नीकाद् suggested with St D).
203. c) D C S′ $P_{1,3}$ भ्रातृस्नेहैर्° (for भ्रातृस्नेहेन).

कल्हः कालिञ्जराधीशो दौहित्रीं पुत्रवद्गृहे ।
यामवर्धयत स्नेहादपुत्रः पितृवर्जिताम् ॥२०४॥

राज्ञो विजयपालस्य सुतां सुस्सलभूपतिः ।
उपयेमे स तां श्रीमाननघां मेघमञ्जरीम् ॥२०५॥

तस्य प्रभावाधिष्ठानाच्छिशोरपि न लोहरे ।
शक्तिरासीद् विरुद्धानामपि बाधाय वैरिणाम् ॥२०६॥

धीरः सुस्सलदेवोऽपि मार्गैर्निर्गत्य दुर्गमैः ।
आसदद् भूरिभिर्मासैः स्वोर्वीं दुर्गिरिवर्त्मना ॥२०७॥

प्रशान्ते व्यसने तस्मिन् धीरस्योच्चलभूपतेः ।
अन्येऽपि व्यसनाभासा उत्पन्नध्वंसिनोऽभवन् ॥२०८॥

भीमादेवः समादाय भोजं कलशदेवजम् ।
साहायकार्थमानिन्ये दरद्राजं जगद्दलम् ॥२०९॥

सह्लो हर्षमहीभर्तुरवरुद्धात्मजोऽभवत् ।
भ्राता दर्शनपलस्य सञ्जपालस्तु तद्बलम् ॥२१०॥

नीतिज्ञेन ततो राज्ञा साम्नैव दरदीश्वरः ।
आक्षेपाद् वारितः प्रायात् प्रत्यावृत्त्य निजां भुवम् ॥२११॥

सह्लस्तमन्वगाच्छन्नं भोजोऽविक्षत् स्वमण्डलम् ।
भेजे सुस्सलदेवस्य सञ्जपालोऽनुजीविताम् ॥२१२॥

गृहीतार्थेन भृत्येन निजेनैव प्रदर्शितः ।
भोजः क्षिप्रं नृपात् प्राप निग्रहं तस्करोचितम् ॥२१३॥

---

204. [a]) All Mss. read कालिन्दरा° (for कालिञ्जरा° suggested with St. cf. *vv*. vii. 1257; viii. 618). —[b]) C S′ P_2 °द्गृही ⌊sic⌋ (for द्गृहे°).

206. [b]) C S′ °च्छिशिरेऽपि (for °च्छिशोरपि).

209. [a]) C S′ °मुत्थाय (for °मादाय).

212. [d]) C S′ °पाला° (for °पालो°).

देवेश्वरात्मजः पित्थकोऽपि द्वैराज्यलालसः ।
डामरानाश्रिते राज्ञि निर्याते व्यद्रवद् दिशः ॥२१४॥

विचारपरिहारेण धावन्तः सर्वतो जडाः ।
तिर्यञ्च इव हास्याय प्रसिद्धिशरणा जनाः ॥२१५॥

मल्लस्य रामलाख्योऽहं सूनुरासं दिगन्तरे ।
अट्टसूदः कश्चिदेवं चक्रिकाचतुरो वदन् ॥२१६॥

निन्ये प्रवृद्धिं व्यामूढैर्बहुभिर्विप्लवप्रियैः ।
धनमानादिदानेन भूमिपैर्भूम्यनन्तरैः ॥२१७॥

ग्रीष्मे प्रविष्टः काश्मीरानेकाकी धर्मपीडितः ।
व्यधीयत च्छिन्ननासः परिज्ञाय नृपानुगैः ॥२१८॥

कटके पर्यटन् राज्ञः स एव ददृशे पुनः ।
स्वजात्युचितभक्ष्यादिविक्रयी सस्मितं जनैः ॥२१९॥

मिथ्यैव नीतिकौटिल्यैः क्रियतेऽभ्युदयश्रमः ।
शक्यतेऽपरथा कर्तुं न दैवस्य मनीषितम् ॥२२०॥

शान्ताऽपि ज्वलति काऽपि कचिद्दीप्ताऽपि शाम्यति ।
दैववातवशाच्छक्तिः पुंसः कक्षाग्निसंनिभा ॥२२१॥

पलायनैर्नाऽपयाति निश्चला भवितव्यता ।
देहिनः पुच्छसंलीना वह्निज्वालेव पक्षिणः ॥२२२॥

---

214. d) I_3 $P_{1,2}$ SA वद्रव° (for व्यद्रव°).

216. a) SA_1 (before corr.) मल्लरामाला° (for मल्लस्य रामला°). —c) C S′ अर्द्ध° (for अट्ट°).

217. d) C S′ °नन्तरः (for °नन्तरैः). After this *v.* युग्मम्.

218. c) St छिन्न° (for च्छिन्न°).

222. a) C S′ पलायने नाप° (for पलायनैर्नाऽप°).

नाऽच्छिन्नवह्निविषशस्त्रशरप्रयोगै-
र्न श्वभ्रपातरभसेन न चाऽभिचारैः ।
शक्या निहन्तुमसवो विधुरैरकाण्डे
भोक्तव्यभोगनियतोच्छ्वसितस्य जन्तोः ॥२२३॥

भिक्षाचरः समादिष्टवधो जयमतीगृहात् ।
नक्तं वध्यभुवं निन्ये वधकैः पार्थिवाज्ञया ॥२२४॥

ग्राविण प्रस्फोटय निक्षिप्तो वितस्तायां समीरणैः ।
क्षिप्तस्तटं क्षणं स्पन्दमानवक्षाः कृपालुना ॥२२५॥

द्विजेनैकेन संप्राप्तश्चिरादुद्गतचेतनः ।
आसमत्यभिधानाया ज्ञातिर्दिद्देति गौरवात् ॥२२६॥

शाहिपुत्रीभिरुक्ता या दत्तश्चतुरया तया ।
नीतो देशान्तरं गूढं ववृधे दक्षिणापथे ॥२२७॥

स वृत्तप्रत्यभिज्ञोऽथ पुत्रवन्नरवर्मणा ।
मालवेन्द्रेण शस्त्रास्त्रविद्याभ्यासमकार्यत ॥२२८॥

अन्यदीयं घातयित्वा तत्तुल्यवयसं शिशुम् ।
रक्षितो जयमत्यैव स किलेत्यपरेऽब्रुवन् ॥२२९॥

देशान्तरागताद् दूतात् तां वार्तामुपलब्धवान् ।
अत एवाऽभवत् तस्या भूभृद् विरलितादरः ॥२३०॥

---

223. [c]) C S′ शक्ता (for शक्या).

225. [c]) C S′ °स्तटान्तरे (for °स्तटं क्षणं). —[d]) C S′ °वृक्षे (for °वक्षाः).

226. [b]) C S′ °श्रिया दुर्ग° (for °श्चिरादुद्ग°).

227. [c]) P_2 °शान्तरे रू° (for °शान्तरं गू°). —[d]) P_2 °पथं (for °पथे). After this *v.* तिलकम् .

228. [a]) C S′ कृत° (for वृत्त°). —[c]) S′ C शास्त्रा° (for शस्त्रा°).

230. [ab]) C S′ °तात्तद्वार्ता°; I_3 P_1 °तात्तावत्ता°; SA °तात्तावत्त° (for °तात् तां वार्ता°).

बहिरप्रतिभिन्दंस्तत् स धीरो मार्गवर्तिभिः ।
चक्रे तदप्रवेशाय संवन्धं पार्थिवैः समम् ॥२३१॥

ईर्ष्यामगोपयन् नार्याः शङ्कामच्छादयन् रिपोः ।
स्वयमन्याभिगम्यत्वं करोति हि जडो जनः ॥२३२॥

भिक्षाचरे हते वालं कंचिदादाय तत्समम् ।
तन्नाम्ना ख्यातिमनयद् दिद्देवेत्यपरेऽब्रुवन् ॥२३३॥

तथ्येन सोऽस्तु मिथ्या वा प्रतिष्ठां तां तथाऽऽप्तवान् ।
यथा लघुत्वमानेतुं न दैवेनाऽप्यशक्यत ॥२३४॥

स्वप्नेन्द्रजालमायानामपि निर्विषया इमाः ।
कर्मवैचित्र्यजनिताः काश्चिदाश्चर्यविप्रुषः ॥२३५॥

स राजवीजी नाशाय विशां गूढं व्यवर्धत ।
पुरग्रामादिदाहाय कक्षान्तरिव पावकः ॥२३६॥

रोहत्यन्तिकसीमनि प्रतिविषावीरुद् विषक्ष्मारुहः
काले प्रावृडुपद्रुताच्छसलिले मूर्च्छत्यगस्त्योदयः ।
सर्गच्छेदविधिक्षमानुदयतो दृष्ट्वा किलोपद्रवान्
संधत्ते प्रतिकारकल्पनमहो दीर्घावलोकी विधिः ॥२३७॥

अजायत विपन्मज्जज्जगदुद्धरणक्षमः ।
तस्मिन्नेव क्षणे यस्मात् सुस्सलक्ष्मापतेः सुतः ॥२३८॥

तज्जन्मकालादारभ्य सर्वतो जयमर्जयन् ।
नामाऽन्वर्थं नृपस्तस्य जयसिंह इति व्यधात् ॥२३९॥

---

232. [d]) P_3 जने जडः (for जडो जनः).

234. [a]) C S′ तथैवैषोस्तु (for तथ्येन सोऽस्तु). —[c]) S′ C यया (for यथा). —[d]) I_3 SA °शङ्कत; P_2 °शंक्यत (for °शक्यत).

236. [b]) P_3 गूढमव° (for गूढं व्यव°).

237. [a]) ŚA_3 gloss प्रतिविषा वीरुत् यस्या उपविषेत्यादिनामान्तरं कोशे यथा विश्वाविषा प्रतिविषातिविषोपविषारुणा शृङ्गीमहौषधं चेति (for प्रतिविषा-वीरुद्).

शास्तुः सर्वार्थसिद्धाख्या यथा सर्वार्थसिद्धिभिः ।
तथा तस्याऽभिधाऽन्वर्था नाऽत्यजद् रूढिशब्दताम् ॥२४०॥

मुद्रां सकुङ्कुमस्याऽङ्घ्रेस्तदीयस्याऽभ्युपागताम् ।
विलोक्योच्चलदेवोऽभूद् विमन्युर्भ्रातरं प्रति ॥२४१॥

बालस्यैवाऽङ्घ्रिमुद्राऽस्य वैरं पितृपितृव्ययोः ।
निवारयन्ती विदधे सुस्थितं मण्डलद्वयम् ॥२४२॥

स स्वर्गिणः पितुर्नाम्ना ततः सुकृतसिद्धये ।
चकारोच्चलभूपालः पैतृके स्थण्डिले मठम् ॥२४३॥

गोभूमिहेमवस्त्रान्नदाता तस्मिन् महोत्सवे ।
आश्चर्यकल्पवृक्षत्वं त्यागी सर्वार्थिनामगात् ॥२४४॥

प्रसादैः प्रहितैस्तेन महार्घैः श्लाघ्यसंपदा ।
महान्तोऽपि दिगन्तेषु पार्थिवा विस्मयं ययुः ॥२४५॥

भर्तृप्रसादाधिगतां श्रियं नेतुं परार्ध्यताम् ।
विहारं समठं देवी जयमत्यपि निर्ममे ॥२४६॥

केषांचित् पूर्वपुण्यानां विरहेण महीभुजः ।
हताभीष्टाभिधानोऽभून्मठो नवमठाख्यया ॥२४७॥

सुल्लां स्वसारमुद्दिश्य परस्मिन् स्थण्डिले पितुः ।
विहारोऽपि कृतस्तेन नोचितां ख्यातिमाययौ ॥२४८॥

---

240. [a]) C S′ $P_{1,3}$ °सिद्धाख्यां (for °सिद्धाख्या).

241. [a]) St स कु°; C S′ तां कु° (for सकु°).

242. [d]) $P_{1,2}$ स्वस्थि° (for सुस्थि°).

247. [c]) C S′ सुताभी° (for हताभी°). —[d]) C S′ I_3 $P_{1,2}$ SA °न्मठे (for °न्मठो).

248. [a]) C S′ स्वलां; P_1 स्वल्लां (for सुल्लां).

मृत्योर्मस्तकपातित्वं तस्याऽऽकलयतः किल।
न निष्ठां स्वप्रतिष्ठासु संप्रपेदे व्ययस्थितिः ॥२४९॥

कदाचित् क्रमराज्यस्थो द्रष्टुमाग्निं स्वयंभुवम्।
ययौ बर्हठचक्राख्यं गिरिग्रामं स भूपतिः ॥२५०॥

तं कम्बलेश्वरग्रामाध्वना यान्तमवेष्टयन्।
अकस्मादेत्य तत्रत्याश्चौराश्चण्डालशस्त्रिणः ॥२५१॥

प्रजिहीर्षुभिरप्याशु तस्मिन्नत्यल्पसैनिके।
न तैः प्रहृतमुत्तेजोऽवष्टम्भस्तम्भितायुधैः ॥२५२॥

अथ हारितमार्गः स गहने गिरिगह्वरे।
भ्रमन्नल्पानुयाय्येकां क्षणदामत्यवाहयत् ॥२५३॥

उच्चचार क्षणे तस्मिन् स्कन्धावारेषु दुस्सहा।
नाऽस्ति राजेति दुर्वार्ता सर्वतः क्षोभकारिणी ॥२५४॥

कटकान्निस्सृताऽत्यल्पा वात्येव गिरिगह्वरात्।
सा दुष्प्रवृत्तिर्दीर्घत्वं पुरेऽरण्य इवाऽऽसदत् ॥२५५॥

नगराधिकृतस्तस्मिन् क्षणे छुड्डाभिधोऽभवत्।
शस्त्रिणः कामदेवस्य कुल्यो रड्डादिसोदरः ॥२५६॥

कृत्वा पुरक्षोभशान्तिं शस्त्रौकः स नृपास्पदे।
प्रविश्य भ्रातृभिः सार्धं कार्यशेषमचिन्तयत् ॥२५७॥

---

249. [a]) C S′ मृत्योर्ह° (for मृत्योर्म°). —[c]) P_{1-3} सुप्रति° (for स्वप्रति°),

250. [c]) D C S′ P_{1-3} बर्हण°; St. Tr. बर्हट° (for बर्हठ°).

252. [c]) S′ C °मह्यो°; D SA I_3 P_{1-3} °मुद्रो° (for °मुत्ते° suggested with St).

254. [b]) St (before corr.) SA I_3 P_{1-3} C स्कन्दा° (for स्कन्धा°).

257. [b]) C S′ शस्त्रौघैः (for शस्त्रौकः).

नृपं कं कुर्म इत्येवं तान् विचिन्तयतोऽब्रवीत् ।
सङ्काभिधोऽपि कायस्थः कुटुम्बिकुटिलाशयः ॥२५८॥

यूयमेव सुहृद्बन्धुभृत्यबाहुल्यदुर्जयाः ।
राज्यं कुरुत संप्राप्य राष्ट्रमेवमकण्टकम् ॥२५९॥

तेनैवमुक्तास्ते पापा जातराज्यस्पृहास्ततः ।
सिंहासनाधिरोहाय क्षिप्रमासन् समुद्यताः ॥२६०॥

श्रीयशस्करदेवस्य वंश्या एत इति श्रुतिः ।
तदन्वयेऽभूत् सर्वेषां राज्यौत्सुक्यप्रदायिनी ॥२६१॥

अत एवाऽभजत् क्रोधं तेषां कुसुहृदुक्तिभिः ।
सा वासनाऽन्तस्संलीना सदाचारानपेक्षिणाम् ॥२६२॥

कथं न प्रतिभात्वेषा सङ्कस्याऽपि कुपद्धतिः ।
भारिकस्य कुले जातो लवटस्य हि सोऽधमः ॥२६३॥

क्षेमदेवाभिधानस्य पुत्रोऽप्यल्पनियोगिनः ।
क्रूराशयत्वमभजन्महासाहसिकोचितम् ॥२६४॥

चौर्येण स्वर्णभृङ्गारं हृतवान् भूपतेर्गृहात् ।
संभावितोऽपि गाम्भीर्यान्नाऽज्ञायि स किलेङ्गितैः ॥२६५॥

सासिधेनुर्निरुष्णीषो विहसन्नखिलान् स्मयात् ।
राजपुत्र इवाऽत्यल्पं स त्रैलोक्यममन्यत ॥२६६॥

तस्य चिन्ता काचिदासीत् सदा दोलायतोऽङ्गुलीः ।
या राज्यहेतुः क्रूरेण फलेन समभाव्यत ॥२६७॥

---

261. b) C S′ I_3 °यत (for एत).

263. a) C S′ व: (for न). C S′ °भात्वेषां (for °भात्वेषा).

266. a) C S′ सामि° (for सासि°). C S′ °रुष्णीषे (for °रुष्णीषो). —b) C S′ स्मयन् (for स्मयात्).

तद्गिरा निजसंकल्पादपि ते राज्यलालसाः ।
नृपं जीवन्तमाकर्ण्य ततोऽभूवन् हतस्पृहाः ॥२६८॥

न स्फुरन् न च संमीलन् न वा सुप्त इवाऽनिशम् ।
तेषां चेतसि संकल्पस्तदाप्रभृति सोऽभवत् ॥२६९॥

असुस्थिरादरेणाऽथ शनैः पृथिवीभुजा ।
निन्यिरे मध्यमां वृत्तिं राजस्थानान्निवार्य ते ॥२७०॥

प्रकृत्या रूक्षवाग् राजा सर्वेषामेव सर्वदा ।
तेषामप्यकरोदत्राऽन्तरे मर्मस्पृशः कथाः ॥२७१॥

ते राज्ये हर्षभूभर्तुः पितरि प्रमयं गते ।
मातुस्तारुण्यमत्ताया विधवाया गृहेऽवसन् ॥२७२॥

तैर्मय्यामत्तको नाम शस्त्रभृत् प्रातिवेश्मिकः ।
सुहृद्धतोऽथ विश्वस्तो जननीजारशङ्कया ॥२७३॥

असतीमपि किं नैते न्यगृह्णन्निति भूपतिः ।
विचार्य कोपात् तन्मातुर्नासाच्छेदमकारयत् ॥२७४॥

तां कथां स नृपस्तेषां परोक्षमुदघोषयत् ।
क्व पुत्राश्छिन्ननासाया वदन्नित्यन्वियेष च ॥२७५॥

बृहद्रज्ञादिगञ्जेशं कृत्वा कार्याण्न्यवारयत् ।
स कायस्थकृतान्तत्वं भजन् सद्मपि प्रभुः ॥२७६॥

पीडितस्तेन रौद्रेण निजोऽथ गणनापतिः ।
कोशोत्पत्त्यपहर्तारं तं नृपाय न्यवेदयत् ॥२७७॥

---

269. [d]) St °स्तदा प्रभृ° (for °स्तदाप्रभृ°).
273. [a]) D C S′ °र्मंद्यासत्तको (for °र्मय्यामत्तको).
274. [d]) C S′ °र्नांम°; I_3 P_3 °र्नांमा° (for °र्नांसा°).
275. [c]) SA P_2 °याच्छि°; C °त्र्याच्छि° (for °त्राश्छि°).
276. [c]) C S′ °यस्थ: कृ° (for °यस्थकृ°).

प्रवेशभागिकपदे हृते राज्ञा रुषा ततः।
स क्रूरो रड्डच्छुड्डादीन् प्रैरयत् पूर्वचिन्तिते ॥२७८॥

जिघांसवस्ते नृपतिं प्रसङ्गापेक्षिणः परैः।
समगंसत दुष्प्रज्ञैरथ हंसरथादिभिः ॥२७९॥

प्रजिहीर्षुभिरुर्वीशं पीतकोशैः समेत्य तैः।
चतुष्पञ्चानि वर्षाणि नाऽवाप्यवसरः क्वचित् ॥२८०॥

बहुभिर्बहुधा भिन्नैर्बहुकालं विचिन्तितः।
न भेदमगमन्मन्त्रः स चित्रं लोकदुष्कृतैः ॥२८१॥

तवैतां कुरुते शश्वन्नृपो मर्मस्पृशं कथाम्।
इति प्रत्येकमुक्त्वा ते विरागं पार्थिवेऽभजन् ॥२८२॥

तैरुरःपार्श्वपृष्ठादि गूढैर्वर्मभिरायसैः।
प्रच्छाद्य पार्थिवोऽजस्रमनुसस्रे जिघांसुभिः ॥२८३॥

असहो विरहं सोढुं यां प्रसादयितुं न काम्।
राजाऽपि संदधे चेष्टां प्राक् प्राकृतभुजंगवत् ॥२८४॥

स्वभाववैपरीत्येन नाशचिह्नेन स स्थिराम्।
जयमत्या सहाऽप्रीतिं तदाऽऽदाद् वत्सरद्वयम् ॥२८५॥

रक्षां भिक्षाचरस्याऽऽहुर्निमित्तं तत्र केचन।
केचित् तु विद्युत्सदृशीं प्रेम्णां तरलवृत्तिताम् ॥२८६॥

---

279. b) C S′ °सङ्गप्रेक्षि° (for °सङ्गापेक्षि°).

282. b) P_2 °स्पृशां (for °स्पृशं).

283. c) I_3 P_{1-3} SA C पार्थिवे° (for पार्थिवो°).

285. c) S′ C I_3 $P_{1,3}$ SA महा° (for सहा°).

286. c) SA P_{1-3} °विद्रुत्स° (for °विद्युत्स°).

अथ वर्तुलभूभर्तुरात्मजा बिज्जलाभिधा ।
कृतपाणिग्रहाऽस्याऽगाद् वाल्लभ्यं वसुधाभुजः ॥२८७॥

संग्रामपाले नृपतौ तस्मिन्नवसरे मृते ।
तत्सूनुः सोमपालाख्यः पित्र्यं राज्यं समादधे ॥२८८॥

राज्यार्हमग्रजं बद्ध्वा सोऽभ्यषिच्यत चाक्रिकैः ।
इति कोपान्नरेन्द्रोऽभूत् क्रुध्यन् राजपुरीं प्रति ॥२८९॥

लक्ष्मीस्थैर्यप्रतिभुवः पुत्र्याः पाणिमजिग्रहत् ।
तं प्रेष्ठं सर्वलोकानां श्रेष्ठं सर्वक्षमाभुजाम् ॥२९०॥

अर्थिचिन्तामणेस्तस्य प्रीणतो निखिलाः प्रजाः ।
नानाव्ययोर्जितो रेजे पश्चिमः स महोत्सवः ॥२९१॥

याते जामातरि क्ष्माभृच्चक्रे निखिलतन्त्रिणः ।
निवृत्तान् किमपि क्रुध्यन् दुभ्रुक्षूंस्तु व्यसर्जयत् ॥२९२॥

भोगसेनोऽपि भूपेन काले तस्मिन् समन्युना ।
निवारितो द्वारकार्यात् सवैरः समपद्यत ॥२९३॥

विक्रान्तः स हि कार्यस्थो निर्जिताखिलडामरः ।
सुस्सलक्ष्मापतिं जेतुं प्रतस्थे लोहरं पुरा ॥२९४॥

वात्सल्यमिश्रवैरेण वारितोऽथ महीभुजा ।
तत्परीवादमकरोच्चुक्रोधाऽवेत्य तच्च सः ॥२९५॥

---

287. c) St I_3 P_{1-3} °ग्रहस्या° (for °ग्रहाऽस्या°).

288. d) C S′ पितृरा° (for पित्र्यं रा°).

290. D St SA P_{1-3} I_3 om. *cd*.

292. c) SL निवृत्तीः; D I_3 P_{1-3} SA निर्वृत्तीः; C S′ St निर्वृत्तीन् (for निवृत्तान् suggested). —d) SA I_3 $P_{1,2}$ दुद्रु °(for दुभ्रु°).

294. b) C S′ °तः खिल° [sic] (for °ताखिल°).

295. a) I_3 P_{1-3} D SA °मिश्रं वै° (for °मिश्रवै°).

प्रावेशयद् रङ्कच्छुङ्गमुखान् स समयान्तरम् ।
तमादिसुहृदं वीरं तदा राज्ञा विमानितम् ॥२९६॥

विमानिता विशालेच्छाः संहता हतवृत्तयः ।
न ते बहिष्कृतास्तेन यमराष्ट्रं जिगीषता ॥२९७॥

तान् भोगसेनविन्यस्तसद्भावान् कुटिलाशयः ।
सड्डो निनिन्द वीरत्वात् तं जानन् सरलान्तरम् ॥२९८॥

ऊचे चाऽद्यैव हित्वाऽपि प्राणान् व्यापाद्यतां नृपः ।
भोगसेनोऽन्यथा भेदं कुर्यादगहनाशयः ॥२९९॥

अन्यथाऽभून्न सड्डोक्तं भोगसेनो यदब्रवीत् ।
किंचिद् रहोऽस्मि वक्तेति नृपतिं भेदलालसः ॥३००॥

स तु किं वक्षि न द्वारं तव दद्यामिति ब्रुवन् ।
दुधुक्षुपक्षप्रणयं निन्ये तमवमानयन् ॥३०१॥

प्रबोधाधायिनो द्वेष्टि नियतिप्रणयीभवन् ।
तपात्ययाहनिद्रान्त इव जन्तुर्गतस्मृतिः ॥३०२॥

तन्त्रिणो यामिका भूत्वा स्वस्मिन् वारे ततोऽविशन् ।
ते राजधानीं संनद्धैः स्वसैन्यैः सह संहताः ॥३०३॥

यामिन्यां यं वयं हन्मस्तं हतेत्यभिधाय च ।
प्रावेशयन्न्यस्तचिह्नांश्चण्डालान् मण्डपान्तरम् ॥३०४॥

---

296. a) St I_3 P_1 प्रवेशयन्; D $P_{2,3}$ प्रावेशयन् (for प्रावेशयद्). —b) C S′ समया ततः (for समयान्तरम्).

300. b) C S′ °सेने (for °सेनो). —c) C S′ द्रोहेऽस्मि (for रहोऽस्मि).

301. a) C S′ दक्षिण° (for वक्षि न). —c) P_{1-3} SA दुद्दु° (for दुधु°).

302. c) D °द्रार्त (for °द्रान्त).

304. b) S′ हृते° (for हते°).

भुक्तोत्तरं स्थिते राज्ञि ते बाह्ये मण्डपे स्थिताः ।
सरोषो नृप इत्युक्त्वा सेवकोत्सारणं व्यधुः ॥३०५॥

राजा च विजलावेश्म यियासुर्मण्डपान्तरात् ।
दीपिकाभिः कृतालोको निर्ययौ मदनालसः ॥३०६॥

मध्यमं मण्डपं तस्मिन् प्राप्ते स्वल्पैः सहानुगैः ।
तत्यक्तं मण्डपं सद्यो रुद्ध्वाऽन्यानरुणज्जनान् ॥३०७॥

अन्यैरप्यग्रिमे द्वारे निरुद्धे सर्व एव ते ।
जिघांसवः समुत्थाय नृपतिं पर्यवारयन् ॥३०८॥

विज्ञप्तिदम्भादेकेन रुद्धमग्रे निषेदुषा ।
तं द्विजो दिन्नजस्तेजः शस्त्र्या कृष्टकचोऽभिनत् ॥३०९॥

ततः काञ्चनगौराणि तस्याङ्गान्यसिधेनवः ।
वह्नयः सुमेरुशृङ्गाणि महोरग्य इवाऽऽविशन् ॥३१०॥

स द्रोहो द्रोह इत्युक्त्वा केशान् कृष्टान् विमोचयन् ।
क्रीडाशस्त्र्याः कषां रुद्धमुष्टिं दन्तैर्व्यपाटयत् ॥३११॥

सुजनाकरनामा हि भृत्यः कट्टारकं वहन् ।
तस्याऽन्तिकात् पलायिष्ट प्रहरत्सु विरोधिषु ॥३१२॥

अतो बालोचितां लघ्वीं क्षुरिकां स चकर्ष ताम् ।
मुष्टावर्गलिता कोशात् सा कृच्छ्रेण विनिर्ययौ ॥३१३॥

---

305. c) C S′ सरोष° (for सरोषो).

307. c) C P_3 मध्यमं; P_2 मध्यमे (for तत्यक्तं).

309. c) SA_1 (before corr.) दिन्नजस्तेज्जः; S′ दीर्घसतेजाः; C दीर्घसत्तेजाः; I_3 दिर्नजस्तेजः (for दिन्नजस्तेजः).

310. d) St [sic] महोरम्य (for महोरग्य).

311. d) C S′ °पादयत् (for °पाटयत्).

313. c) C S′ $P_{1,3}$ कीला°; I_3 कीना° (for कोशा°).

निर्यातान्त्रः शत्रुभिस्तैस्त्यक्तकेशो बबन्ध तम् ।
धम्मिल्लमथ तां शस्त्रीं जानुद्वन्द्वान्तरर्पयन् ॥३१४॥

नदित्वा प्रहरंस्तेजं तादृग्वीर्योऽपि सोऽभवत् ।
येन क्षितौ निपतितः सर्वमर्मस्विवाऽऽहतः ॥३१५॥

अभिनच्च ततो रड्डं प्रहरन्तं च पृष्ठतः ।
नदन् सिंह इव व्यड्डं परिवृत्य व्यदारयत् ॥३१६॥

अन्यं च शस्त्रिणं कंचित् सवर्माणमपातयत् ।
विवेष्टमनो यः प्राणैरचिरेण व्ययुज्यत ॥३१७॥

लब्धान्तरे प्रवासाय तस्मिन् धावति मण्डपः ।
रक्षिभिर्भूमिपालोऽयमित्यबुद्ध्वा कवाटितः ॥३१८॥

द्वारमन्यत् प्रसर्पन् स क्व प्रयासीति जल्पता ।
छुड्डेन रुद्धमार्गेण खड्गपातैरहन्यत ॥३१९॥

भोगसेनं ततोऽपश्यद् द्वारस्याऽन्ते समुत्थितम् ।
दारुतूलिकया भित्तिमालिखन्तं पराङ्मुखम् ॥३२०॥

भोगसेनेक्षसे कस्मादमुं त्वमिति वादिनम् ।
सोऽव्यक्तं किमपि ह्रीतः प्रधावन्तं जगाद तम् ॥३२१॥

रय्यावट्टाभिधो दीपधरस्तिष्ठन् निरायुधः ।
अयोदीपिकयाऽऽरब्धयुद्धस्तैर्विक्षतोऽपतत् ॥३२२॥

---

314. [d]) P_3 °रुद्धानु° (for °द्वन्द्वान्त°).

315. [a]) C S′ न हित्वा; P_1 नशित्वा (for नदित्वा). C S′ °स्तेजस्ता°; D °स्तेजंस्ता° (for °स्तेजं ता°).

316. [d]) C °व्यड्य (for °वृत्य).

318. [b]) P_3 मण्डपात् (for मण्डपः). —[d]) C S′ कपा° (for कवा°).

321. [a]) C S′ I_3 P_2 क्षमे (for °क्षसे).

चाम्पेयः सोमपालाख्यराजपुत्रः क्षताहितः ।
प्रहारैः प्राप्तवैक्लव्यो न गर्ह्याचारतामगात् ॥३२३॥

पौत्रः श्रीशूरपालस्य राजकापत्यमज्जकः ।
विदद्रौ श्वेव संछाद्य शस्त्रीं पुच्छच्छटोपमाम् ॥३२४॥

ततः प्रधावन् प्रग्रीवमारुरुक्षुः क्षितीश्वरः ।
निकृत्तजानुश्चण्डालैरालिलिङ्ग वसुंधराम् ॥३२५॥

तत्पृष्ठे स्वं क्षिपन् देहं प्रहारैर्जर्जरीकृतः ।
शृङ्गारनामा कायस्थो निद्रोहो वारितोऽरिभिः ॥३२६॥

पुनरुत्थातुकामस्य सर्वे शस्त्रावलीर्द्विषः ।
न्यपातयंस्तस्य काल्या नीलाब्जवरणस्रजम् ॥३२७॥

तिष्ठेत् कदाचिद् धूर्तोऽयमविपन्नो विपन्नवत् ।
कंधरामधमः सङ्गस्तस्येति स्वयमच्छिनत् ॥३२८॥

कृतं पदापहरणं यस्य सोऽहमिति ब्रुवन् ।
छित्त्वाऽङ्गुलीश्चकर्षाऽपि रत्नाङ्कामूर्मिकावलीम् ॥३२९॥

एकपादस्थितोपानत्स्रस्तमाल्यैः शिरोरुहैः ।
छन्नवक्त्रः स ददृशे सुप्तो दीर्घभुजः क्षितौ ॥३३०॥

पर्याप्तयाऽस्य पर्यन्ते वीरवृत्त्या महौजसः ।
निर्दोषतामीषदगान्निस्त्रिंशत्वं जनान् प्रति ॥३३१॥

सेवकः शूरटो नाम पूत्कुर्वन् द्रोहमुच्चकैः ।
निर्गत्य भोगसेनेन बहिः क्रोधान्निपातितः ॥३३२॥

---

323. d) C ग्राह्या° (for गर्ह्या°).

332. a) C S' शूरजो° (for शूरटो).

प्रस्थितो दयितावासं स दिङ्मोहवशादिव ।
पन्थानं पृथिवीनाथः काल्या जग्राह वेश्मनि ॥३३३॥

राज्योद्याने नृपतिमधुपा भोगकिञ्जल्कलोला-
श्चेतो नानावसनकुसुमश्रेणिभिः प्रीणयन्तः ।
हा धिग्दैवानिलतरलया पात्यमाना नियत्या
वल्ल्यैवैते किमपि सहसा दृष्टनष्टा भवन्ति ॥३३४॥

तिर्यग्भ्यस्त्रिजगज्जयी परिभवं लङ्केश्वरो लब्धवान्
प्रापाऽशेषनृपोत्तमः कुरुपतिः पादाहतिं मूर्धनि ।
इत्यन्ते बहुमानहृत्परिभवः सर्वस्य सामान्यवत्
तत्को नाम भवेन्महानहमिति ध्यायन् धृताहंक्रियः ॥३३५॥

परासुमहितैस्त्यक्तं तमनाथमिव प्रभुम् ।
नग्नं हुताशसात्कर्तुं स्वच्छत्रग्राहिणोऽनयन् ॥३३६॥

भुजौ कण्ठे गृहीत्वैकः कराभ्यां चरणौ परः ।
तं भुग्नग्रीवमालोलकुन्तलं रुधिरोक्षितम् ॥३३७॥

सशूत्कारव्रणं नग्नमनाथमिव पार्थिवम् ।
राजधान्या विनिष्कृष्टं न्यधत्तां पितृकानने ॥३३८॥

महासरिद्वितस्ताम्भस्संभेदद्वीपभूतले ।
अह्नाय वह्निसंस्कारं ते भीतास्तस्य चक्रिरे ॥३३९॥

न हतो नाऽपि निर्दग्धः स केनाऽपि व्यलोक्यत ।
उड्डीयेव गतस्त्वाशु नेत्रनिर्विषयोऽभवत् ॥३४०॥

---

334. b) P_2 °कुमुद° (for °कुसुम°).

336. a) I_3 P_2 पुरा° (for परा°). S′ C °स्त्यक्तुं (for °स्त्यक्तं).

338. a) C सथूत्कार°; S′ सपूत्कार° (for सशूत्कार°). After this *v.* D P_3 add युग्मम्.

339. d) C S′ भूता° (for भीता°).

व्यतीतेन स वर्षैकचत्वारिंशतमायुषा ।
सप्ताशीत्यब्दपौषस्य शुक्लषष्ठ्यां व्ययुज्यत ॥३४१॥

चक्रेऽथ सासिकवचो रङ्गः शोणितमण्डितः ।
श्मशानाश्मनि वेताल इव सिंहासने पदम् ॥३४२॥

.... ।
सकक्षबद्धमूलानामाद्यानां तन्न दिद्युते ॥३४३॥

तस्याऽवरोहतः सिंहासनाद् योद्धुं पुरो युधि ।
विक्रामन्तो बन्धुभृत्या युद्धभूमिमभूषयन् ॥३४४॥

तन्त्रिणौ वट्टपट्टाख्यौ युद्ध्वा तद्बान्धवौ चिरम् ।
योधाश्च कट्टसूर्याद्याः सिंहद्वारेऽपतन् हताः ॥३४५॥

रणरङ्गनटो नृत्यन्निव राजगृहाङ्गने ।
सखड्गखेटको रङ्गः खण्डयन्नहितान् बभौ ॥३४६॥

दिशन् विजयसंदेहमहितानां क्षणे क्षणे ।
प्रहारैः सुबहून् भित्त्वा स चिरेणाऽपतद् रणे ॥३४७॥

राजद्रोहोचितं तस्य निहतस्याऽपि निग्रहम् ।
वैशसत्यक्तमर्यादो गर्गः कोपादकारयत् ॥३४८॥

दिद्दामठान्तिके व्यङ्गः पौरैर्भस्माश्मवर्षिभिः ।
अवस्करप्रणालान्तर्मग्नवक्त्रो न्यपात्यत ॥३४९॥

---

343. C S′ om. this *v.* St D SA P_{1-3} I_3 om. upto सकक्ष in *c*. SL om. *ab*. —[d]) $P_{1,2}$ °त्यानां (for °द्यानां). SA I_3 $P_{1,2}$ तन्निदि° (for तन्न दि°).

345. [c]) P_1 कण्ठ° (for कट्ट°).

348. [d]) SA_1 (before corr.) $P_{2,3}$ गग्ग: (for गर्गः).

349. [a]) C S′ °ठान्तिको (for °ठान्तिके).

ते गुल्फदामभिः कृष्टाः स्थाने स्थाने प्रभुद्रुहः ।
तत्क्षणं लोकथूत्कारपूजां कृत्योचितां दधुः ॥३५०॥

पलाय्य प्रययुः क्वाऽपि सङ्गुं हंसरथादयः ।
मरणाभ्यधिकां कंचित् कालं सोढुं विपद्व्यथाम् ॥३५१॥

दृप्यन् पराजितं गर्गं नष्टे तदनुजे विदन् ।
भोगसेनोऽथ तां वार्तामश‍ृणोत् प्रलयोपमाम् ॥३५२॥

व्यावृत्य प्रत्यवस्थातुकामः पश्यन् पलायिनः ।
योधान्स्वैः सहितः कैश्चित् ततः क्वाऽपि भयादगात् ॥३५३॥

इत्थं निहतविध्वस्तनायका द्रोग्धृसंहतिः ।
स्वदोर्मात्रसहायेन गर्गचन्द्रेण सा कृता ॥३५४॥

सत्त्वं साहससिद्धिं च नेतिहासेष्वपि क्वचित् ।
अश्रौषं तादृशं यादृक् तस्याऽऽस्ते स्म प्रतापिनः ॥३५५॥

निशां प्रहरमह्नश्च राज्यं कृत्वा स लब्धवान् ।
द्रोहकृच्छङ्खराजाख्यां गतिं कुकृतिनामगात् ॥३५६॥

यशस्करकुले जन्म द्रोग्धृभिस्तैः प्रमाणितम् ।
क्षणभङ्ग्यभजद् राज्यं यस्माद् वर्णटदेववत् ॥३५७॥

दावोद्दीपनकूटयन्त्रघटनैः सिंहादिसंहारिणो
यान्त्याकस्मिकगण्डशैलपतनैरन्तं किराता वने ।
एकेनैव ननु प्रधावति जनः सर्वोऽपि मृत्योः पथा
हन्ताऽहं निहतोऽयमेष तु मितं कालं विभेदग्रहः ॥३५८॥

---

351. [b]) C S′ सङ्गुहंस° (for सङ्गुं हंस°). —[c]) P_3 कांचित् (for कंचित्).
352. [a]) C S′ दृप्तं परा° (for दृप्यन् परा°). SA_1 (before corr.) $P_{2,3}$ गग्गं (for गर्गं).
356. P_1 om. *ab*. —[c]) C S′ °कृच्छ्लं ख° (for °कृच्छंङ्ख°).
357. [c]) SL St.Tr. °भजन् (for °भजद्).
358. [d]) C S′ subst. हन्ता हन्ति हतोऽयमेष तु वृथा कालस्य भेदग्रहः (for *d*). SA_1 gloss अहं हन्ता (for हन्ताऽहं).

स्वोद्वाहे ललनौघमङ्गलरवो यैर्हर्षुलैः श्रूयते
दीनैस्तैर्दयिताविलाप उदयन्नाकर्ण्यतेऽन्तक्षणे।
योऽपि घ्नन्नहितं प्रहृष्यति परः स्वं घ्नन्तमन्ते मुदोद्-
वृत्तं सोऽप्यवलोकयत्यहह धिङ्मोहोऽयमान्ध्यावहः ॥३५९॥

सायं विचिन्तितो रात्रौ फलितोऽन्यत्र वासरे।
दुर्विपाकप्रदाताऽभूद् द्रोग्धॄणां साहसद्रुमः ॥३६०॥

अथ सिंहासनस्याऽन्तः कार्यान्ते त्यक्तविग्रहः।
गर्गः प्रक्षालितामर्षश्चक्रन्द स्वामिनं चिरम् ॥३६१॥

तस्मिन् रुदति सर्वोऽपि पौरलोको भयोज्झितः।
संप्राप्तावसरो भूपं व्यलापील्लोकवत्सलम् ॥३६२॥

कारुण्योत्पत्तये दत्त्वा कोशं जीवितकामया।
जयमत्या तदावादि गर्गः कपटशीलया ॥३६३॥

कुरु मे संविदं भ्रातरिति सत्त्वमयस्तु सः।
तत्प्रक्रियावचो ज्ञात्वा चितिं तस्या अकल्पयत् ॥३६४॥

चिकुरनिचये यत् कौटिल्यं विलोचनयोश्च या
तरलतरता यत् काठिन्यं तथा कुचकुम्भयोः।
वसति हृदि तद् यासां पिण्डीभवन्ननु ता इमा
गहनहृदया विज्ञायन्ते न कैश्चन योषितः ॥३६५॥

---

359. [b]) C S′ $P_{1,2}$ °ते तु क्षणे; P_3 तन्ते क्षणे (for °तेऽन्तक्षणे). —[c]) D (before suggestion) St P_{1-3} I_3 घ्नोपि (for योऽपि).

362. [b]) P_3 पयो° (for भयो°).

364. [b]) C °भय° (for °मय°). —[d]) C चिन्तितस्याप्य° (for चितिं तस्या अ°).

दौश्शील्यमप्याचरन्त्यो घातयन्त्योऽपि वल्लभान् ।
हेलया प्रविशन्त्यग्निं न स्त्रीषु प्रत्ययः क्वचित् ॥३६६॥

युग्याधिरूढा सा यान्ती यावन्मार्गे व्यलम्बत ।
अग्रतो बिजला तावन्निर्गत्य प्राविशच्चिताम् ॥३६७॥

अथ तस्याश्चितारोहं कुर्वत्या भूषणार्थिभिः ।
लुण्ठकैर्लुण्ठ्यमानाया व्यथा गात्रेषु पप्रथे ॥३६८॥

सच्छत्रचामरे राज्यौ दह्यमाने विलोकयन् ।
लोकः सर्वोऽपि साक्रन्दो दग्धदृष्टिरिवाऽभवत् ॥३६९॥

औचित्यं तेन च तदा निन्येऽत्यन्तपवित्रताम् ।
सर्वैर्यदर्थ्यमानोऽपि नोपाविक्षन्नृपासने ॥३७०॥

सुतमुच्चलदेवस्य बालमङ्के निधित्सता ।
राज्येऽभिषेक्तुं ते केचित् तेनाऽन्वैष्यन्त यत्नतः ॥३७१॥

लोको येष्वद्य केषांचित् तत्त्वमालोक्य सस्मितः ।
भिक्षामप्यटितुं जाने नैष जानाति योग्यताम् ॥३७२॥

राज्ञ्यां श्वेताभिधानायां मल्लराजस्य ये सुताः ।
सल्हणाद्यास्त्रयोऽभूवन्मध्यमे प्राक्क्षयं गते ॥३७३॥

हन्तुं ज्येष्ठकनिष्ठौ द्वौ शेषौ सल्हणलोठनौ ।
अन्विष्टौ शङ्कराजेन भयान्नवमठं गतौ ॥३७४॥

---

367. a) $P_{1,2}$ मा (for सा).

368. b) St C S′ I_3 P_{1-3} कुर्वन्त्या (for कुर्वत्या). —d) P_3 पस्पृशे (for पप्रथे).

369. a) C P_{1-3} S′ SA राज्ञो (for राज्यौ).

371. d) I_3 P_{1-3} SA °न्वेष्यन्त (for °न्वैष्यन्त).

372. a) I_3 लोके (for लोको). —b) P_1 संमितः; P_3 विस्मितः (for सस्मितः). —d) St I_3 P_{1-3} नैव (for नैष).

373. b) I_3 P_1 SA_1 यं (for ये).

निर्लज्जैर्निहतान् द्रोग्धॄन् विहाय मिलितैः पुनः ।
तन्व्यश्वरोहसचिवैरानीतः कृतचाक्रिकैः ॥३७५॥

दृष्ट्वा राज्यार्हमप्राप्य कंचिज्ज्यायांस्तयोस्तदा ।
गर्गेण राज्ये संरम्भादभ्यषिच्यत सल्हणः ॥३७६॥

हा धिक् चतुर्णां यामानामन्तरे नृपतित्रयी ।
अहस्त्रियामे तत्राऽऽसीद् दृश्या या पुरुषायुषैः ॥३७७॥

ये सायमुच्चलनृपं प्राह्णे रड्डं सिषेविरे ।
मध्याह्ने सल्हणं प्रापुर्दृष्टास्ते राजसेवकाः ॥३७८॥

अथ लोहरकोट्टस्थः सार्धेऽह्नि गलिते नृपः ।
सुस्सलो भ्रातृमरणं श्रुत्वा तूद्भ्रान्तमानसः ॥३७९॥

गर्गेण प्रहितो दूतः स क्रन्दन् स्वं क्षिपन् क्षितौ ।
ततस्तं वीतसन्देहं चकाराऽऽर्तप्रलापिनम् ॥३८०॥

आद्यात् सल्हणवृत्तान्तपर्यन्तां नाऽश्रृणोत् कथाम् ।
गर्गदूताद् भ्रातृवधं स्वस्याऽऽह्वानं च केवलम् ॥३८१॥

अश्रद्दधानस्तं शीघ्रमरिच्छेदं सुदुष्करम् ।
तदाह्वानाय गर्गो यं प्राहिणोत् तं चलन् गृहात् ॥३८२॥

आक्रन्दमुखरो भूत्वा तां रात्रिमरुणोदये ।
कश्मीराभिमुखो यात्रामसंभृतबलोऽप्यदात् ॥३८३॥

---

376. [a]) C S′ °मप्राप्यं (for °मप्राप्य).

379. [d]) D suggests श्रुत्वाभू° (for श्रुत्वा तू°).

383. [d]) C S′ °धात् (for °दात्).

अन्योऽथ गर्गदूतस्तं पथि संघटितोऽभ्यधात् ।
कृत्स्नमावेद्य वृत्तान्तं नाऽऽगन्तव्यमिति ध्रुवम् ॥३८४॥

क्षिप्रं हतेषु द्रोहेषु त्वय्यसंनिहितेऽनुजः ।
कृतस्तु सल्हणो राजा कृत्यमागमनेन किम् ॥३८५॥

श्रुत्वेति गर्गसंदेशं कोपादसहनो नृपः ।
अप्रयाणैषिणो भृत्यान् विहस्यैवं वचोऽब्रवीत् ॥३८६॥

नाऽस्माकं पैतृकं राज्यं यदि रिक्थहरोऽनुजः ।
मज्ज्यायसा मया चैतद् भुजाभ्यामर्जितं पुनः ॥३८७॥

राज्यं स्वीकुर्वतोरन्यो न दाताऽभूत् तदावयोः ।
येनाऽऽहृतमिदं पूर्वं स क्रमः क्व गतोऽधुना ॥३८८॥

इत्युक्त्वाऽविरतैरेव वहन्नासीत् प्रयाणकैः ।
दूतांश्च पार्श्वे गर्गस्य स्वीकृत्यै प्राहिणोद् बहून् ॥३८९॥

स काष्ठवाटं संप्राप सल्हणस्य हितैषिणा ।
निर्गत्य गर्गचन्द्रेण चक्रे हुष्कपुरे पदम् ॥३९०॥

प्रवृत्तायां विभावर्यां दूतैः कृतगतागतैः ।
तस्याऽङ्गीकृतसामाऽपि गर्गो द्रोग्धा व्यधीयत ॥३९१॥

कार्यमध्यगतो राजा तथाऽपि प्राहिणोत् तदा ।
धात्रेयं भ्रातरं गर्गाभ्यर्णं हितहिताभिधम् ॥३९२॥

---

384. [b]) C S′ संगादि° (for संघटि°).

387. [b]) C S′ रिक्त°; $P_{1,3}$ रिकु° (for रिक्थ°).

388. [d]) C S′ P_3 °ध्वना (for °धुना).

389. [c]) C पार्शं; St I_3 P_{1-3} पारवं (for पार्श्वे).

391. [d]) C St P_2 द्रोग्धाभ्य° (for द्रोग्धा व्य°).

भोगसेनः क्षणे तस्मिन्नाययौ दैवमोहितः ।
खाशकान् बिल्ववनजान् मध्येकृत्य नृपान्तिकम् ॥३९३॥

सोऽभ्यर्णं कर्णभूत्याख्यमश्वारोहं महीपतेः ।
विसृज्य गर्गं जेष्यामीत्युक्त्वाऽभूल्लोभनोद्यतः ॥३९४॥

कालापेक्षामपि त्यक्त्वा हन्तुं भ्रातृद्रुहं स तम् ।
योग्यं प्रसङ्गमन्विष्यञ्जज्ञे लोकैरसज्जनः ॥३९५॥

यस्य भ्रातृद्रुहः पार्श्वे स त्वमाश्रीयसे कथम् ।
गर्गोऽपि तमुपालेभे दूतैरित्यादि संदिशन् ॥३९६॥

स तु मार्गात् पलाय्याऽयं तमसीति विलम्बकृत् ।
दत्तास्कन्दः क्षपापाये तं सानुगमघातयत् ॥३९७॥

पतन् रणं कर्णभूतिर्वीरवृत्त्या व्यरोचत ।
तस्य द्वैमातुरो भ्राता तेजस्सेनोऽप्यनूनया ॥३९८॥

तेजस्सेनस्तु शूलाग्रे नृपादेशान्न्यवेश्यत ।
मरिचो लवराजस्य तनूजोऽश्वपतेरपि ॥३९९॥

अवष्टम्भेन भूपोऽभून्निग्रहानुग्रहक्षमः ।
नयेनाऽसितुमस्वस्थं तावदासीत् तु तद्बलम् ॥४००॥

पुरोगोऽपि कृतः पश्चाद् योऽतीतेऽह्नि महीभुजा ।
स सज्ञपालस्तत्पार्श्वमथाऽऽदायाऽऽययौ हयान् ॥४०१॥

---

396. d) SA I_3 P_2 संदिशत् (for संदिशन्).

400. b) St SL I_3 $P_{1,2}$ C S′ °वग्र° (for °नुग्र°). —c) St न येना° (for नयेना°). St D I_3 P_{1-3} °मप्यास्था (for °मस्वस्थं). —d) D न (for तु). D suggests तद्बले (for तद्बलम्).

401. c) D सञ्जपा° (for सज्ञपा°). —d) D (before suggestion) P_{1-3} °दाय ययौ (for °दायाऽऽययौ).

तेष्वायातेष्ववष्टम्भं यातं किंचिच्च तद्बलम् ।
प्रातश्च गर्गसेनानीः सूर्याख्योऽनल्पसैनिकः ॥४०२॥

दुधुक्षून् वीक्ष्य तानातैर्नृपोऽश्वमधिरोपितः ।
उत्सेकशठधीर्वर्म कृच्छ्राच्च परिधापितः ॥४०३॥

गगनं शलभच्छन्नमिव कुर्वन्नथाऽपतत् ।
शरासारो रिपुबलात् सर्वतोऽच्छिन्नसंततिः ॥४०४॥

ओंकारं शरशूत्कारैः कृत्वा द्रोहस्य दुस्सहाः ।
प्राहरन् राजकटके सर्वान् सर्वायुधैर्द्विषः ॥४०५॥

हतविक्षतविध्वस्तसैन्यः साहसिको नृपः ।
वेगादपससारैको मध्यान्निर्गत्य वैरिणाम् ॥४०६॥

गर्जत्सिन्धुरथाऽश्रान्तनत्युन्नतिरलङ्घ्यत ।
सवाजिना तेन सेतुर्दुर्लङ्घ्यः पत्रिणामपि ॥४०७॥

सज्ञपालादयो द्वित्राः शेकुस्तमनुवर्तितुम् ।
पृष्ठलग्ना निरुन्धन्तः स्थाने स्थाने विरोधिनः ॥४०८॥

वीरानकाभिधं वीरः स खशानां निवेशनम् ।
त्रिंशद्विंशैः समं भृत्यैः प्रविष्टस्तत्यजेऽरिभिः ॥४०९॥

निरम्बरैर्निराहारैस्तिष्ठन् कतिपयैः समम् ।
स तत्र चित्रमाक्रम्य निर्भयोऽदण्डयत् खशान् ॥४१०॥

---

402. d) C S′ P_1 सुवाष्पो°; D सूयाश्वो°; I_3 P_2 सुयाध्यो° (for सूर्याख्यो°).

403. a) C S′ दुधुक्षून् वी°; St P_{1-3} I_3 दुध्रक्षुर्वी° (for दुधुक्षून् वी°).

404. c) C रिपोर्वल्गन् ; S′ रिपोर्वलान् (for रिपुबलात्).

407. a) C S′ °रयाश्रान्त° (for °रथाऽश्रान्त°). —d) C S′ °नोंल्लङ्घ्यः (for °र्दुर्लङ्घ्यः).

408. a) S′ D सज्जपा° (for सज्ञपा°). —d) C S′ °नेऽवरो° (for °ने विरो°).

410. d) St C P_1 °दण्डयन् (for °दण्डयत्).

क्रमेण च हिमापातदुर्लङ्घ्याध्वनि संकटे।
अविपन्नो भाग्ययोगात् प्रययौ लोहरं पुनः ॥४११॥

पदे पदे प्राप्तमृत्युरायुश्शेषेण रक्षितः।
तथाऽप्यासीत् स कश्मीरप्राप्तिमेव विचिन्तयन् ॥४१२॥

वराकं द्वारसेत्वग्राद् गर्गो हितहितं क्रुधा।
विरुद्धधीर्वितस्तायां बद्धपाण्यङ्घ्रिमक्षिपत् ॥४१३॥

तस्मिन् प्रक्षिप्यमाणेऽप्सु क्षेमाख्यः स्वं क्षिपन् पुरः।
दासोऽस्योच्चैः पदारोहमधःपातेऽपि लब्धवान् ॥४१४॥

राज्यप्रदः क्षतारिश्च गर्गः प्राप्तोऽन्तिकं ततः।
प्राप सल्हणराजस्य सविशेषमधीशताम् ॥४१५॥

स भूभृन्मन्त्रिविक्रान्तिहीनो राज्यमवाप्तवान्।
चक्रभ्रममिवाऽपश्यत् सर्वतो भ्रान्तमानसः ॥४१६॥

न मन्त्रो न च विक्रान्तिर्न कौटिल्यं न चाऽऽर्जवम्।
न दातृता न लुब्धत्वं तस्योद्रिक्तं किमप्यभूत् ॥४१७॥

तद्राज्ये राजधान्यन्तर्मध्याह्नेऽपि मलिम्लुचः।
लोकं मुमुषुरन्याध्वसंचारस्य कथैव का ॥४१८॥

पङ्गुरप्यङ्गनाकालं क्रान्त्या यत्राऽत्यवाहयत्।
पुमानप्यभवत् तत्र साध्वसाध्वस्तधीरसौ ॥४१९॥

यामद्य सल्हणोऽन्येद्युर्भेजे तां लोठनः श्रियम्।
साधारण्यं गतो राज्यभोग इत्यभवत् तयोः ॥४२०॥

---

419. d) D suggests साध्वसध्वस्तधी° (साध्वसाध्वस्तधी°).

420. b) SA SL St. Tr. P_2 लोष्ठनः (for लोठनः, cf. St. Tr. fn.). All Mss. except D (after corr.) C read स्त्रियम् (for श्रियम्).

पुरुषान्तरविज्ञानविहीनस्य प्रमाद्यतः ।
सर्वोऽपि तस्य तन्त्रज्ञैर्व्यवहारो व्यहस्यत ॥४२१॥

श्वशुरो लोठनस्योजसूहस्तेन व्यधीयत ।
द्वारे तापसगोष्ठीषु योग्यो विक्रमनिष्ठुरे ॥४२२॥

यः सुस्सलभयोच्छेदमङ्गीकुर्वंस्तदागमे ।
स्वमन्त्रलक्षजापेन सिद्धिं मन्त्रक्षणेऽभ्यधात् ॥४२३॥

जिह्मो गर्गाज्ञया राजा तदप्रियमपातयत् ।
बद्धाश्मानं वितस्तायां विम्बं नीलाश्वडामरम् ॥४२४॥

राजानुग्राहको गर्गस्तांस्तान् व्यापादयन् रिपून् ।
हालाहाण्डामरान् भूरीन् दत्तभोज्यानघातयत् ॥४२५॥

राज्ञ्यकिंचित्करे गर्गायत्तजीवितमृत्यवः ।
बाह्याश्चाऽऽभ्यन्तरे चाऽऽसन्नल्पे वा पृथवोऽपि वा ॥४२६॥

कदाचिल्लहराद् गर्गे प्रविष्टेऽथ नृपान्तिकम् ।
चुक्षोभ नगरे लोकः सर्व एव भयाकुलः ॥४२७॥

तदा ह्युदचरद् वार्ता शूलान्यारोप्य नौषु यत् ।
क्रुध्यन् गर्गोऽयमायातो हन्तुं सर्वान् नृपाश्रितान् ॥४२८॥

गर्भिणीगर्भपातिन्या तादृश्या भयवार्तया ।
द्वित्राण्यहान्यन्वभावि जनैर्ज्वर इवाऽखिलैः ॥४२९॥

---

422. ab) SA °स्योजस्सूह°; C S′ I_3 P_1 °स्योजःसूर्य°; P_2 °स्योजःसूह° (for °स्योजसूह°).

426. c) D C S′ P_3 बहिश्चा° (for बाह्याश्चा°).

427. a) C S′ °चिल्लोह° (for °चिल्लह°).

429. b) C S′ तादृशा (for तादृश्या).

ततस्तिलकसिंहाद्यैरुद्रेकाद् द्रागदीयत ।
अनवेक्ष्य नृपादेशमास्कन्दो गर्गमन्दिरे ॥४३०॥

देशश्चाऽत्युल्बणः कृत्स्नो धावति स्म धृतायुधः ।
प्रत्यग्रहीत् तानखिलान् गर्गचन्द्रस्त्वविह्वलः ॥४३१॥

निर्लज्जा दिल्हभट्टारलक्ककाद्यास्तुरंगमैः ।
भ्राम्यन्तस्तत्राऽदृश्यन्त गर्गावसथवीथिषु ॥४३२॥

निषिषेध न तान् राजा प्रत्युतास्कन्ददायिनाम् ।
लोठनं कुण्ठशक्तीनां तेषां स्फूर्त्यै व्यसर्जयत् ॥४३३॥

तेनाऽपि योधैर्गर्गस्य रुद्धमार्गेण मन्दिरम् ।
न रुद्धं नाऽपि निर्दग्धुं पारितं दत्तवह्निना ॥४३४॥

धानुष्कः केशवो नाम मठेशो लोठिकामठे ।
अबाधतैव नाराचैस्तद्योधान् घातयन् परम् ॥४३५॥

प्रकाशेन समं राजलोके विरलतां गते ।
सायं सानुचरो गर्गो हयारूढो विनिर्ययौ ॥४३६॥

समरैरप्रतिहतो निनाय लहरं व्रजन् ।
बद्धवोजसूहमस्वस्थमासीनं त्रिपुरेश्वरे ॥४३७॥

तापसेन किमेतेनेत्युक्त्वाऽन्येद्युर्मुमोच तम् ।
तं सुस्सलेऽपि विधुरे नृपतिं नोदपाटयत् ॥४३८॥

क्षणे क्षणेऽभवद् देशस्ततः प्रभृति सर्वतः ।
गर्गागमनसंत्रस्तपौरार्गलितमन्दिरः ॥४३९॥

---

431. d) C S′ °चन्द्रस्तु (for °चन्द्रस्त्व°).
433. d) C स्फूर्त्यें (for स्फूर्त्यै).
435. a) C S′ P_1 °नुष्ककै° (for °नुष्कः के°).
437. b) C S′ लोहरं (for लहरं). —c) C वद्धवौजःसूर्य°; S′ वद्धौजःसर्य°; P_3 वद्धवांजसूय° (for बद्धवोजसूह°).

अथाऽऽर्तस्य महीभर्तुर्गर्गसंधानमिच्छतः ।
महत्तमः सहेलोऽभूल्लहरे दूत्यमाचरन् ॥४४०॥

तेनाऽङ्गीकारितो गर्गः कथंचित् कन्यकार्पणम् ।
भृत्यास्तु तेन संबन्धं नैच्छन् भूतस्य भूपतेः ॥४४१॥

ततः सुस्सलदेवेन सह संधिं निबद्धवान् ।
पश्चात् संप्रार्थ्यमानोऽपि संबन्धं न व्यधत्त सः ॥४४२॥

मण्डले विशरारुत्वमेवं याते नृपोऽवधीत् ।
सङ्गं हंसरथं नोनरथं चाऽऽसादितांश्चरैः ॥४४३॥

तानग्निकणसूच्यादिप्रवेशैरिहदुर्जनः ।
अत्यक्तानसुभिर्घोरामवस्थामन्वबीभवत् ॥४४४॥

भोगसेनाङ्गनां मल्लामनुमेने स यन्नृपः ।
अनुमर्तुं पतिं छन्नं वसन्तीं साधु तद्व्यधात् ॥४४५॥

तादृग् दृष्ट्वाऽपि वैक्लव्यं शङ्कितेन तदन्तरे ।
प्रमिम्ये दिल्हभट्टारो रसदानेन भूभुजा ॥४४६॥

न राजबीजी नोच्चण्डविक्रमो वा बभूव सः ।
शमितो गूढदण्डेन यत् तथा तेन पापिना ॥४४७॥

तं या निनिन्दाऽनिष्पन्नपौरुषं तत्स्वसुस्तदा ।
तस्या वह्निप्रवेशेन सिद्धं मानवतीव्रतम् ॥४४८॥

---

440. a) P_2 °थाऽऽत्त° (for °थाऽऽर्त°). —cd) C [अ]भूल्लोह° (for [अ]भूल्लह°).

441. c) S′ संबन्धे (for सम्बधं).

443. a) $P_{1,3}$ मण्डलं (for मण्डले). —b) All Mss. read [अ]ब्रवीत् (for [अ]वधीत् suggested with St D).

444. b) SA_1 without indicating a *lacuna*, St D St.Tr. P_{1-3} I_3 with a space om. रिहदु. —d) I_3 P_{1-3} SA °भीभवत् (for °बीभवत्).

445. b) C S′ P_2 स्वयं नृपः (for स यन्नृपः). —c) All Mss. except SL read अनुसर्तुं (for अनुमर्तुं). —d) SA *prima manu* P_{1-3} S′ वसन्ती (for वसन्तीं also found in SL).

सोऽल्पोऽपि राज्यकालोऽभूदेवमातङ्कदुस्सहः ।
दीर्घक्षपादृश्यमानदीर्घदुस्स्वप्नसंनिभः ॥४४९॥

कालवित् सुस्सलो गर्गाद् बद्धसंधिरपि त्रसन् ।
न्ययुङ्क्ताऽग्रे सज्ञपालं काश्मीरौन्मुख्यभाक् ततः ॥४५०॥

द्वारेण सह दत्तार्थो लक्ककः सल्हभूभुजा ।
वराहमूलं संप्राप कथंचित् प्रस्थितिं भजन् ॥४५१॥

गर्गः स्मरन्नवस्कन्दं पश्चादभ्येत्य नाशयन् ।
वराहमूलेन समं तस्य सैन्यमलुण्ठयत् ॥४५२॥

विदद्रौ स तु तद्योधैर्हतैश्च परिषस्वजे ।
अदिव्यैर्मेदिनी दिव्यैर्देहैस्त्वप्सरसां गणः ॥४५३॥

नायके गलिते शुद्धवृत्तैः सद्वंशजैर्मही ।
पतितैरुप्पलुड्डाद्यैर्भूषिता मौक्तिकैरिव ॥४५४॥

आगच्छता छिन्नभीतिः सज्ञपालेन लक्ककः ।
निराश्रयः संप्रपेदे पार्श्वं सुस्सलभूपतेः ॥४५५॥

सोऽथ भूभृत् सज्ञपाले दूरं क्रान्तरिपौ गते ।
आजगामाऽन्तिकं प्राप्तैः प्रेरितः पौरडामरैः ॥४५६॥

संधिं तव विधास्यामि सार्धं सुस्सलभूभुजा ।
इत्युक्त्वा सल्हणं प्रायात् तदभ्यर्णं सहेलकः ॥४५७॥

काङ्क्षिताभ्युदयं पौरैश्चातकैरिव वारिदम् ।
अशिश्रियन् राजवर्जं सर्वं पञ्चोचलानुजम् ॥४५८॥

गर्गस्य गृहिणी छुड्डाभिधानाऽथ तदन्तिकम् ।
कन्यकाद्वयमादाय परिणेतुमुपाययौ ॥४५९॥

---

449. [a]) $P_{1,2}$ SA राज° (for राज्य°).
450. [b]) C S′ I_3 भ्रमन् (for त्रसन्). —[c]) P_1 D सज्जपा° (for सज्ञपा°).
452. [c]) St SA वाराह° (for वराह°).
454. [a]) C S′ °कैर्गलितैः (for °के गलिते);

उपयेमे स्वयं राजा राजलक्ष्म्यभिधां तयोः ।
गुणलेखां स्नुषात्वेन स्वीचक्रे तद्यवीयसीम् ॥४६०॥

सल्हणे सानुजेऽभ्येत्य सज्जपालेन वेष्टिते ।
राजाऽपि राजसद्मः सिंहद्वारं समासदत् ॥४६१॥

साक्षाद् विरोधिभृत्येन द्वारमेकेन पातितम् ।
अभून्मोघं तमप्राप्य सार्धं वैरिमनोरथैः ॥४६२॥

ससैन्येऽर्गलितद्वारराजवेश्मस्थिते रिपौ ।
गर्गास्कन्दविशङ्कयासीच्चकितं सौस्सलं बलम् ॥४६३॥

गर्गे वितीर्णकन्येऽपि राजसैन्यमविश्वसत् ।
तस्थौ स्थातव्यमित्येव तृणस्पन्देऽपि शङ्कितम् ॥४६४॥

अस्ताभिलाषिणि दिने तादृक्त्रासहते बले ।
स्नेहाददहति क्ष्मापे दुर्भेदौकःस्थितान् रिपून् ॥४६५॥

प्रविश्य ग्रावनिर्भुग्नकवाटेन तमोरिणा ।
द्वारं विवृत्याऽङ्गनस्थैः सज्जपालोऽग्रहीद् रणम् ॥४६६॥

तस्य निश्चित्य पातंगीं वृत्तिं भूयस्यरिव्रजे ।
अनुप्रवेशं विदधे पदातिर्लक्काभिधः ॥४६७॥

दरदानयने काष्ठवाटसंकटविक्रमे ।
यस्तस्य सदृशो योधः प्रतिबिम्ब इवाऽभवत् ॥४६८॥

स केशवश्च स मठाधीशस्तमनुसस्रतुः ।
शैनेयमारुती पार्थमिव प्रार्थितसैन्धवम् ॥४६९॥

---

460. [b]) D ततः (for तयोः).
462. [a]) $P_{1,2}$ I_3 SA साधा°; P_3 सौधा° (for साक्षा°).
465. [c]) P_2 I_3 स्नेहादाद° (for स्नेहादद°).
466. [a]) All Mss. read ग्राम° (for ग्राव° suggested with St). After this *v.* D P_3 add युग्मम् .

सोऽल्पोऽपि राज्यकालोऽभूदेवमातङ्कदुस्सहः।
दीर्घक्षपादृश्यमानदीर्घदुस्स्वप्नसंनिभः ॥४४९॥

कालवित् सुस्सलो गर्गाद् बद्धसंधिरपि त्रसन्।
न्ययुङ्क्ताऽग्रे सज्जपालं काश्मीरौन्मुख्यभाक् ततः ॥४५०॥

द्वारेण सह दत्तार्थो लक्ककः सल्हभूभुजा।
वराहमूलं संप्राप कथंचित् प्रस्थितिं भजन् ॥४५१॥

गर्गः सरन्नवस्कन्दं पश्चादभ्येत्य नाशयन्।
वराहमूलेन समं तस्य सैन्यमलुण्ठयत् ॥४५२॥

विदद्भौ स तु तद्योधैर्हतैश्च परिषस्वजे।
अदिव्यैर्मेदिनी दिव्यैर्देहैस्त्वप्सरसां गणः ॥४५३॥

नायके गलिते शुद्धवृत्तैः सद्वंशजैर्मही।
पतितैरुप्पलछुड्डाद्यैर्भूषिता मौक्तिकैरिव ॥४५४॥

आगच्छता छिन्नभीतिः सज्जपालेन लक्ककः।
निराश्रयः संप्रपेदे पार्श्वं सुस्सलभूपतेः ॥४५५॥

सोऽथ भूभृत् सज्जपाले दूरं क्रान्तरिपौ गते।
आजगामाऽन्तिकं [illegible] ॥४५६॥

[illegible] संधिं तव विधास्यामि सार्धं सुस्सलभूभुजा।
[illegible] ॥४५७॥

काङ्क्षिताभ्युदयं पौरैर्घातकैरिव वारिदम्।
[illegible] राजवर्ज्जं सर्वं पञ्चोचलानुजम् ॥४५८॥

गर्गस्य गृहिणी छुड्डाभिधानाऽथ तदन्तिकम्।
कन्यकाद्वयमादाय परिणेतुमुपाययौ ॥४५९॥

---

449. a) $P_{1,2}$ SA राज° (for राज्य°).
450. b) C S′ I_3 भ्रमन् (for त्रसन्). —c) P_1 D सज्जपा° (for सज्जपा°).
452. c) St SA वाराह° (for वराह°).
454. a) C S′ °कैर्गलितैः (for °के गलिते).

उपयेमे स्वयं राजा राजलक्ष्म्यभिधां तयोः ।
गुणलेखां स्नुषात्वेन स्वीचक्रे तद्यवीयसीम् ॥४६०॥

सल्हणे सानुजेऽभ्येत्य सज्जपालेन वेष्टिते ।
राजाऽपि राजसदसः सिंहद्वारं समासदत् ॥४६१॥

साक्षाद् विरोधिभृत्येन द्वारमेकेन पातितम् ।
अभून्मोघं तमप्राप्य सार्धं वैरिमनोरथैः ॥४६२॥

ससैन्येऽर्गलितद्वारराजवेश्मस्थिते रिपौ ।
गर्गास्कन्दविशङ्कयासीच्चकितं सौस्सलं बलम् ॥४६३॥

गर्गे वितीर्णकन्येऽपि राजसैन्यमविश्वसत् ।
तस्थौ स्थातव्यमित्येव तृणस्पन्देऽपि शङ्कितम् ॥४६४॥

अस्ताभिलाषिणि दिने तादृक्त्रासहते बले ।
स्नेहाददहति क्ष्मापे दुर्भेदौकःस्थितान् रिपून् ॥४६५॥

प्रविश्य ग्रावनिर्भुग्नकवाटेन तमोरिणा ।
द्वारं विवृत्त्याऽङ्गनस्थैः सज्जपालोऽग्रहीद् रणम् ॥४६६॥

तस्य निश्चित्य पातंगीं वृत्तिं भूयस्यरिव्रजे ।
अनुप्रवेशं विदधे पदातिर्लक्ककाभिधः ॥४६७॥

दरदानयने काष्ठवाटसंकटविक्रमे ।
यस्तस्य सदृशो योधः प्रतिबिम्ब इवाऽभवत् ॥४६८॥

स केशवश्च स मठाधीशस्तमनुसस्रतुः ।
शैनेयमारुती पार्थमिव प्रार्थितसैन्धवम् ॥४६९॥

---

460. [b]) D ततः (for तयोः).

462. [a]) $P_{1,2}$ I_3 SA साधा°; P_3 सौधा° (for साक्षा°).

465. [c]) P_2 I_3 स्नेहाददा° (for स्नेहादद°).

466. [a]) All Mss. read ग्राम° (for ग्राव° suggested with St). After this *v.* D P_3 add युग्मम् .

निर्गत्य मण्डपाल्लग्नप्रहारैस्तैः कथंचन ।
विवृते प्राङ्गनद्वारे धीरो राजाऽविशत् स्वयम् ॥४७०॥

निर्विभागे वर्तमाने संगरे सैन्ययोर्द्वयोः ।
प्राङ्गने प्रमयं प्रापुर्भूयांसस्तत्र शस्त्रिणः ॥४७१॥

सचिवः सल्हराजस्य पतंगग्रामजो द्विजः ।
आजौ प्रापाऽजको नाम स्वःस्त्रीसंभोगभागिताम् ॥४७२॥

कायस्थेनाऽपि रुद्रेण लब्ध्वा गञ्जाधिकारिताम् ।
स्वामिप्रसादः साफल्यं निन्ये त्यक्त्वा तनुं रणे ॥४७३॥

सायं वनस्पतिर्लीनैः खगैर्वाचालितो यथा ।
प्राङ्गणे प्रविष्टे प्रोड्डीननिश्शब्दविहगोऽभवत् ॥४७४॥

आयोधनोर्वी वाचाला चक्रे चित्रार्पितेव सा ।
तथा सुस्सलभूपेन तुरंगस्थेन तर्जिता ॥४७५॥

अनारूढेऽङ्गनान्तस्स्थे तस्मिन् सिंहासनं ध्वनिः ।
सुस्सलो जयतीत्येवं ढक्कावाद्यं च शुश्रुवे ॥४७६॥

मल्लराजगृहे तादृङ्नाऽन्यस्याऽप्युदपद्यत ।
अगातां तत्र वैक्लव्यं यादृक् सल्हणलोठनौ ॥४७७॥

आबद्धकवचावश्वारूढावालिङ्ग्य सुस्सलः ।
बालौ युवामिति वदन् धूर्तोऽत्याजयदायुधम् ॥४७८॥

आदिश्य मण्डपेऽन्यस्मिन् बद्धयोश्च स्थितिं तयोः ।
प्रातराज्यस्ततो राजा विवेशाऽऽस्थानमण्डपम् ॥४७९॥

त्र्यहोनांश्चतुरो मासान् भुक्तराज्यं बबन्ध तम् ।
सितस्य सोऽष्टाशीतेऽब्दे राधस्य त्रितयेऽहनि ॥४८०॥

---

473. b) P_1 I_3 D °कारताम् (for °कारिताम्).
474. d) D suggests भवेत् (for [अ]भवत् found in all Mss.).
476. d) I_3 °वाच्यं (for °वाद्यं).

7869/B

तेन सिंहासने क्रान्ते भास्वतेव नभस्तले।
क्षणादेवाऽखिलो लोकः क्षोभमब्धिरिवाऽत्यजत् ॥४८१॥

विकोशशस्त्रः सन् द्रोहावेक्षणक्षोभतः सदा।
व्याधलोके व्यात्तवक्त्रो मृगराज इवाऽभवत् ॥४८२॥

भ्रातृद्रुहां कुलच्छेदमन्विष्याऽन्विष्य कुर्वता।
न तेन नीतिनिष्ठेन शिशवोऽप्यवशेषिताः ॥४८३॥

जनस्य वीक्ष्य दौर्जन्यमधृष्टाकारतां वहन्।
स कार्यापेक्षयाऽप्यासीन्न काऽप्याहितमार्दवः ॥४८४॥

वस्तुतस्त्वार्द्रहृदयः क्रूरं दमयितुं जनम्।
अवास्तवं तद्भीमत्वं भित्तिव्याल इवाऽऽदधे ॥४८५॥

कालवित् समयत्यागी प्रगल्भः प्रतिभानवान्।
इङ्गितज्ञो दीर्घदृष्टिः स एवाऽन्यो न कोऽप्यभूत् ॥४८६॥

अधिकः कोऽपि कोऽप्यूनः कोऽपि तस्य समो गुणः।
दोषोऽथ वा पूर्वजस्य स्वभावैक्येऽप्यदृश्यत ॥४८७॥

अन्वकारि समानेऽपि कोपे तत्पूर्वजन्मनः।
कोपेन विषमालर्कं तदीयेन तु सारघम् ॥४८८॥

न बभूव स वेषादौ सासूयोऽनुचितं पुनः।
स्थितिभेदभयात् सेहे नोत्सेकमनुजीविनाम् ॥४८९॥

---

482. b) P_2 °क्षणे (for °क्षण°).
483. a) C S′ °द्रुहः (for °द्रुहां). —d) C S′ रिपवो° (for शिशवो°).
485. c) All Mss. read °तद्भीमत्वात् (for तद्भीमत्वं suggested with D). —d) C S′ भित्तिं (for भित्ति°).
486. a) C S′ स मल° (for समय°).
488. b) C कोऽपि; S′ (with diplography) कोऽपि कोऽपि (for कोपे). —d) C S′ सारधम् (for सारघम्).
489. a) St (before suggestion in corrigenda) SA P_2 वेशा°; C I_8 वेदा°; S′ वदो°[sic] (for वेषा°).

नैच्छत् स द्वन्द्वयुद्धादिसंधानैर्मानिनां वधम् ।
तस्मिन् प्रमादान्निर्व्यूढे त्वदीयत कृपाकुलः ॥४९०॥

वाक्पारुष्यं नृपस्याऽऽसीदाद्यस्याऽऽतङ्कदुस्सहम् ।
तस्य तु प्रणयप्रायं हिंसाद्याबाधवर्जितम् ॥४९१॥

तस्याऽर्थगृध्नोरुत्पादो भूयानास्ते स्म संपदाम् ।
त्यागो विषयकालादिनैयत्यात् तु मितोऽभवत् ॥४९२॥

नवकर्माश्वबाहुल्यप्रिये तस्मिन् दरिद्रताम् ।
तत्यजुः कारवो वाजिविक्रेतारश्च दैशिकाः ॥४९३॥

दुस्सहव्यसनोत्पत्तौ जिगीषोः प्रशमैषिणः ।
तस्याऽऽसीदपरित्याज्यं न किंचिद् वसुवर्षिणः ॥४९४॥

तस्येन्द्रद्वादशी भूरिपरार्ध्यांशुकदायिनः ।
यथा नृपस्य शुशुभे तथा नाऽन्यस्य कस्यचित् ॥४९५॥

यथा प्रागुच्चलो राजा सुप्रापः प्रियसेवकः ।
स तथा सेवकैरासीद् भूम्ना दुर्लभदर्शनः ॥४९६॥

नोच्चलादपरस्याऽऽसीद् व्यसनं हयवाहने ।
नाऽन्यस्य सुस्सलनृपाद् दाक्ष्यं तत्र च पप्रथे ॥४९७॥

शममुत्पन्नमुत्पन्नं निन्ये दुर्भिक्षमुच्चलः ।
राज्ये सुस्सलदेवस्य न तत् स्वप्नेऽप्यदृश्यत ॥४९८॥

किमन्यदखिलैः सोऽभूदग्रजादधिको गुणैः ।
त्यक्त्वा त्यागार्थनैस्पृह्यसुप्रापत्वानि केवलम् ॥४९९॥

---

490. [c]) C S′ °निर्व्यूढ़े (for °न्निर्व्यूंढे).
492. [a]) C S′ °गृध्नो°; P_2 °धृध्नो° (for °गृध्नो°). —[d]) D P_{1-3} I_3 SA °नैयत्या तु; C S′ °नैयत्यानु° (for °नैयत्यात् तु suggested with St).
494. [d]) S′ कश्चिद् (for किंचिद्).
495. [b]) C °राद्धां° (for °राध्यां°).
497. [d]) C S′ राज्यं (for दाक्ष्यं).
498. [d]) SA om. प्य in स्वप्नेऽप्य without indicating a *lacuna*.

औच्चलेः पालको गर्गो यं राज्ये कर्तुमैहत ।
सहस्रमङ्गलस्तेन निरवास्यत स क्रुधा ॥५००॥

तस्मिन् भद्रावकाशस्थे प्रासनामा तदात्मजः ।
काञ्चनोत्कोचदश्चक्रे डामरैः सह चाक्रिकम् ॥५०१॥

असंत्यजन्नुच्चलजं पितृव्येणाऽर्थितं शिशुम् ।
प्रसङ्गे तत्र गर्गोऽपि प्रातिकूल्यमदर्शयत् ॥५०२॥

प्रहितानां नरेन्द्रेण तृणानामिव शस्त्रिणाम् ।
गर्गदावाग्निदग्धानां निस्संख्यानामभूत् क्षयः ॥५०३॥

गर्गस्यालोऽपि विजयः स देवसरसोद्भवः ।
प्रातिलोम्येन नृपतिसैन्यानां कदनं व्यधात् ॥५०४॥

राज्यप्राप्तेर्मासमात्रे दिनैरभ्यधिके गते ।
तेनोत्पिञ्जेन राज्ञोऽभून्न धीरस्याऽऽकुलं मनः ॥५०५॥

सुरेश्वर्यमरेशोर्वीवितस्तासिन्धुसंगमाः ।
गर्गेण राजसैन्यानां कृताः कदनकाङ्क्षिणः ॥५०६॥

संग्रामे तुमुलेऽमात्यौ शृङ्गारकपिलौ हतौ ।
कर्णशूद्रकनामानौ तन्त्रिणौ च सहोदरौ ॥५०७॥

निहतानन्तसुभटसमूहान्तरलक्षितान् ।
तादृशानपि निष्क्रष्टुं नाऽऽसीत् कस्याऽपि पाटवम् ॥५०८॥

हर्षमित्रः कम्पनेशो भूभर्तुर्मातुलात्मजः ।
विजयेन हतानीको विदधे विजयेश्वरे ॥५०९॥

---

500. d) C S′ निरा° (for निर°).
501. d) St I_3 चाक्रिकाम् (for चाक्रिकम्).
502. b) P_{1-3} °व्येना° [sic] (for °व्येणा°).
505. cd) C S′ °भूदधी° (for °भून्न धी°).
506. c) SA राज्य° (for राज°).
507. c) C S′ कर्ण्य° (for कर्ण°).
508. a) C S′ °सुतट° (for °सुभट°).
509. a) D suggests °मित्रं (for °मित्रः). —c) C S′ °तानेको (for °तानीको).

पुत्रो मङ्गलराजस्य तिल्हो राजन्यवंशजः ।
तत्र त्रिब्बाकरमुखास्तन्त्रिणश्च प्रमिम्यिरे ॥५१०॥

राजानीके सज्ञपालः प्रवीरप्रवरोऽभवत् ।
भूरिसैन्येन गर्गेण नाऽल्पसैन्योऽपि यो जितः ॥५११॥

संस्तम्भ्य विजयक्षेत्रे लक्ककाद्यैर्विसर्जितैः ।
धीरो राजा बलं भग्नं स्वयं गर्गोन्मुखं ययौ ॥५१२॥

सोऽन्विष्य गर्गेण हतान् योधान् राशीकृतान् बहून् ।
निरदाहयदन्यैश्चुरसंख्येयैश्चिताग्निभिः ॥५१३॥

बलिना भूभुजा गर्गः पीड्यमानः शनैः शनैः ।
ततः स्ववसतीर्दग्ध्वा हलाहाभिमुखोऽभवत् ॥५१४॥

स तत्र रत्नवर्षाख्यं गिरिदुर्गं समाश्रितः ।
हृताश्वोऽनुचरैस्त्यक्तो नृपेणाऽऽरादवेष्ट्यत ॥५१५॥

अन्वारूढेन तत्राऽपि सज्ञपालेन वेष्टितः ।
चरणौ शरणीचक्रे राज्ञो दत्त्वोचलात्मजम् ॥५१६॥

अन्तिकस्थं नृपे कर्णकोष्ठजं मल्लकोष्ठकम् ।
विरुद्धं रुद्धवत्याशु गर्गो विश्वासमाययौ ॥५१७॥

गृहीतप्रणतिस्तस्य नष्टेषु विजयादिषु ।
शमितोपप्लवो राजा विवेश नगरं शनैः ॥५१८॥

---

510. b) St $P_{1,2}$ I_3 राजान्य° (for राजन्य° also found in SL). —c) D $P_{1,3}$ तिब्धाकर°; P_2 I_3 त्रिब्धाकर°; C S′ तिव्दाकर° (for त्रिब्बाकर°). —cd) $P_{1,2}$ I_3 मुखांस्त° (for मुखास्त°).
514. d) D C S′ P_{1-3} I_3 SA SL फलाहा° (for हलाहा° suggested with St, cf. *v.* viii. 425).
517. a) C S′ °कस्थे (for °कस्थं). —b) D S′ I_3 °कोष्टजं (for °कोष्ठजं). SA (with diplography) °कोष्ठकोष्ठकम्; D °कोष्टकम् (for °कोष्ठकम्).
518. b) C S′ P_1 नेष्टेपु (for नष्टेषु).

गत्वाऽथ लोहरे न्यस्य बद्ध्वा सल्हणलोठनौ ।
स कल्हसोमपालाद्यै रेमे संसेवितो नृपैः ॥५१९॥

भूयः प्रविष्टः कश्मीरान् सेव्यः सर्वातिशायिभिः ।
गर्गं प्रसादैरनयत् प्रवृद्धिमधिकाधिकैः ॥५२०॥

ग्रीष्मार्कप्रतिमे तस्मिन् ह्लादिनावनुचक्रतुः ।
महादेवी कुमारश्च द्रुमच्छायावनानिलौ ॥५२१॥

डामरौ देवसरसोद्भवौ विजयगोत्रिणौ ।
बृहट्टिकस्तथा सूक्ष्मटिक्को वेलां प्रचक्रतुः ॥५२२॥

सानाथ्यकाङ्क्षिणौ पार्थिवस्य प्रविशतः पुरः ।
लोकपुण्ये तस्थतुस्तौ क्रन्दद्भिः स्वानुगैः समम् ॥५२३॥

विजये गर्गसंबन्धात् सदाक्षिण्यो महीपतिः ।
सदाचारं परित्यज्य वेत्रिभिस्तावताडयत् ॥५२४॥

तौ मानिनश्च तद्भृत्याः कृष्टशस्त्रास्ततो व्यधुः ।
साहसं सुमहत्सैन्ये प्रहरन्तो महीपतेः ॥५२५॥

श्वपाको भोगदेवाख्यः कृपाण्या प्राहरन्नृपम् ।
धीरो गज्जकनामा च करवालेन पृष्ठतः ॥५२६॥

सावशेषतया भूपस्याऽऽयुषो मोघतां ययुः ।
द्विषत्प्रहृतयो वाहतुरगी तु व्यपद्यत ॥५२७॥

---

519. d) D P_1 I_3 नृपः (for नृपैः).
521. S' om. 521*cd*—522.
523. b) C S' °वेऽस्य (for °वस्य).
525. c) C S' °हत्सैन्यं (for °हत्सैन्ये).
526. a) C S' °पाके (for °पाको).

पुत्रो मङ्गलराजस्य तिल्हो राजन्यवंशजः।
तत्र त्रिब्बाकरमुखास्तन्त्रिणश्च प्रमिम्यिरे ॥५१०॥

राजानीके सज्जपालः प्रवीरप्रवरोऽभवत्।
भूरिसैन्येन गर्गेण नाऽल्पसैन्योऽपि यो जितः ॥५११॥

संस्तम्भ्य विजयक्षेत्रे लक्ककाद्यैर्विसर्जितैः।
धीरो राजा बलं भग्नं स्वयं गर्गोन्मुखं ययौ ॥५१२॥

सोऽन्विष्य गर्गेण हतान् योधान् राशीकृतान् बहून्।
निरदाहयदन्येद्युरसंख्येयैश्चिताग्निभिः ॥५१३॥

बलिना भूभुजा गर्गः पीड्यमानः शनैः शनैः।
ततः स्ववसतीर्दग्ध्वा हलाहाभिमुखोऽभवत् ॥५१४॥

स तत्र रत्नवर्षाख्यं गिरिदुर्गं समाश्रितः।
हताश्वोऽनुचरैस्त्यक्तो नृपेणाऽऽरादवेष्ट्यत ॥५१५॥

अन्वारूढेन तत्राऽपि सज्जपालेन वेष्टितः।
चरणौ शरणीचक्रे राज्ञो दत्त्वोच्चलात्मजम् ॥५१६॥

अन्तिकस्थं नृपे कर्णकोष्ठजं मल्लकोष्ठकम्।
विरुद्धं रुद्धवत्याशु गर्गो विश्वासमाययौ ॥५१७॥

गृहीतप्रणतिस्तस्य नष्टेषु विजयादिषु।
शमितोपप्लवो राजा विवेश नगरं शनैः ॥५१८॥

---

510. b) St $P_{1,2}$ I_3 राजान्य° (for राजन्य° also found in SL). —c) D $P_{1,3}$ तिब्धाकर°; P_2 I_3 त्रिब्धाकर°; C S′ तिव्दाकर° (for त्रिब्बाकर°). —cd) $P_{1,2}$ I_3 मुखांस्त° (for मुखास्त°).
514. d) D C S′ P_{1-3} I_3 SA SL फलाहा° (for हलाहा° suggested with St, cf. *v.* viii. 425).
517. a) C S′ °कस्थे (for °कस्थं). —b) D S′ I_3 °कोष्टजं (for °कोष्ठजं). SA (with diplography) °कोष्ठकोष्ठकम्; D °कोष्टकम् (for °कोष्ठकम्).
518. b) C S′ P_1 नेष्टेषु (for नष्टेषु).

गत्वाऽथ लोहरे न्यस्य बद्ध्वा सल्हणलोठनौ ।
स कल्हसोमपालाद्यै रेमे संसेवितो नृपैः ॥५१९॥

भूयः प्रविष्टः कश्मीरान् सेव्यः सर्वातिशायिभिः ।
गर्गं प्रसादैरनयत् प्रवृद्धिमधिकाधिकैः ॥५२०॥

ग्रीष्मार्कप्रतिमे तस्मिन् ह्लादिनावनुचक्रतुः ।
महादेवी कुमारश्च द्रुमच्छायावनानिलौ ॥५२१॥

डामरौ देवसरसोद्भवौ विजयगोत्रिणौ ।
बृहट्टिकस्तथा सूक्ष्मटिको वेलां प्रचक्रतुः ॥५२२॥

सानाथ्यकाङ्क्षिणौ पार्थिवस्य प्रविशतः पुरः ।
लोकपुण्ये तस्थतुस्तौ क्रन्दद्भिः स्वानुगैः समम् ॥५२३॥

विजये गर्गसंबन्धात् सदाक्षिण्यो महीपतिः ।
सदाचारं परित्यज्य वेत्रिभिस्तावताडयत् ॥५२४॥

तौ मानिनश्च तद्भृत्याः कृष्टशस्त्रास्ततो व्यधुः ।
साहसं सुमहत्सैन्ये प्रहरन्तो महीपतेः ॥५२५॥

श्वपाको भोगदेवाख्यः कृपाण्या प्राहरन्नृपम् ।
धीरो गज्जकनामा च करवालेन पृष्ठतः ॥५२६॥

सावशेषतया भूपस्याऽऽयुषो मोघतां ययुः ।
द्विषत्प्रहृतयो वाहतुरगी तु व्यपद्यत ॥५२७॥

---

519. d) D P_1 I_3 नृपः (for नृपैः).
521. S′ om. 521*cd*—522.
523. b) C S′ °वेऽस्य (for °वस्य).
525. c) C S′ °हत्सैन्यं (for °हत्सैन्ये).
526. a) C S′ °पाके (for °पाको).

नृपस्याऽन्तरयन्वैरिप्रहर्तिं बाणवंशजः।
निहतस्तत्र शृङ्गारसीहः सादीशससस्यकः ॥५२८॥

सैनिकैस्तैर्बृहट्टिक्काभोगदेवादयो हताः।
सूक्ष्मटिकस्तु निस्तीर्णो हेतुर्भाविनि विप्लवे ॥५२९॥

शूले व्यापादिता गज्जकादयो द्रोहसंश्रिताः।
संदेहितासुरित्यासीद् राजा गर्गानुकूल्यभाक् ॥५३०॥

न भवेत् पविपातेऽपि प्रमयः समयं विना।
प्रसूनमप्यसून् हन्ति जन्तोः प्राप्तावधेः पुनः ॥५३१॥

ज्वालाभिरौर्वदहनस्य पयोधिमध्ये
न म्लानतामपि हि यानि मुहुः स्पृशन्ति।
तान्येव यान्ति विलयं किल मौक्तिकानि
कान्ताकुचेषु युवभावभुवोष्मणाऽपि ॥५३२॥

प्राक्सेवामपि विस्मृत्य परोत्सेकासहिष्णुना।
मण्डलात् सज्ञपालाद्या निरवास्यन्त भूभुजा ॥५३३॥

संबन्धी काकवंश्यानां यशोराजाभिधस्ततः।
सहस्रमङ्गलाभ्यर्णं राज्ञा निर्वासितो ययौ ॥५३४॥

तमन्यांश्च विनिर्यातान् देशाद् गृह्णन् समृद्धिमान्।
ऐच्छल्लब्धप्रतिष्ठः स राज्ञः प्रत्यभियोगिताम् ॥५३५॥

तत्पुत्रः कान्दमार्गेण विविक्षुः क्ष्मापसैनिकैः।
यशोराजे क्षते प्रासः प्रत्यावृत्त्य ययौ भयात् ॥५३६॥

---

528. a) C °यद्वैरि° (for °यन्वैरि°). —b) P_{1-3} °क्रृतिं (for °हर्तिं). —d) C S′ °दी सश°; D °दी शस° (for °दीशस°). For the word सस्यकः cf. *Pāṇ*. v. 2.68.

531. a) C S′ परि° (for पवि°).

534. d) SA $P_{2,3}$ I_3 राजा (for राज्ञा).

अथाऽन्येष्वपि भृत्येषु राज्ञा निर्वासितेषु सः।
मिलितेषु प्रथां यावद् यथावदुपलब्धवान् ॥५३७॥

उपरागे नवे सज्जे पार्वतीयास्त्रयो नृपाः।
चाम्पेयो जासटो वज्रधरो बब्बापुराधिपः ॥५३८॥

राजा सहजपालश्च वर्तुलानामधीश्वरः।
युवराजौ त्रिगर्तोर्वीवल्लापुरनरेन्द्रयोः ॥५३९॥

बल्ह आनन्दराजश्च पञ्च संघटिताः क्वचित्।
प्रस्थानार्थं कृतपणाः कुरुक्षेत्रमुपागताः ॥५४०॥

आसमत्याहृतं तावदभ्येत्य नरवर्मणः।
प्रापुर्भिक्षाचरं तेन दत्तपाथेयकाञ्चनम् ॥५४१॥

स जासटेन संबन्धिस्नेहाद् विहितसत्कृतिः।
नीतोऽन्यैश्च प्रथां भूपैर्वल्लापुरमथाऽऽययौ ॥५४२॥

देशाद् विनिर्गतैर्बिम्बप्रमुखैर्वर्धितप्रथे।
तस्मिन् प्राप्ते सहस्रस्य प्रतिष्ठा लघुतामगात् ॥५४३॥

पौत्रोऽयं हर्षदेवस्य क एते राज्य इत्यथ।
उक्त्वा त्यक्त्वा सहस्रादींस्तमेवाऽशिश्रियञ्जनाः ॥५४४॥

कृतज्ञभावमुत्सृज्य संबन्धिस्नेहमोहितः।
दर्यको राजपुत्रस्तं राज्ञा निर्वासितोऽप्यगात् ॥५४५॥

---

538. [d]) D C I_3 वल्ला°; S′ वल्ल°; $P_{2,3}$ वभा° (for बब्बा°).

539. [c]) P_1 I_3 °राजो त्रि°; P_3 °राजस्त्रि° (for °राजौ त्रि°).

541. [c]) $P_{1,3}$ °चरे (for °चरं). After this *v.* कुलकम् .

544. [a]) C S′ आज्ञेयं (for पौत्रोऽयं). —[d]) S′ °यज्जनाः (for °यञ्जनाः).

545. [c]) C S′ दर्पको (for दर्यको).

पुत्रः कुमारपालस्य तत्पितुर्मातुलस्य सः ।
वृद्धिं सुस्सलदेवेन पुरा निन्ये हि पुत्रवत् ॥५४६॥

प्रेरितो युवराजेन जासटेन च कन्यकाम् ।
वल्लापुरेशः प्रददौ भिक्षवेऽथ स पद्मकः ॥५४७॥

तद्देशठक्कुरो भूपान् संघटय्याऽखिलांस्ततः ।
तमैच्छद् गयपालाख्यः कर्तुं पैतामहे पदे ॥५४८॥

तां वार्तां श्रुतवान् राजा यावदासीत् समाकुलः ।
गयपालो हतस्तावद् गोत्रजैश्छद्मना बली ॥५४९॥

पद्मके तान् प्रतिगते योद्धुं प्रधनमध्यगः ।
भिक्षाचरचमूधुर्यो दर्यकोऽपि व्यपद्यत ॥५५०॥

तेन प्रधाननाशेन ततो भिक्षाचरो ययौ ।
अकिंचित्करतां मेघ इवाऽवग्रहवारितः ॥५५१॥

आसमत्यां प्रयातायां क्षीणे पाथेयकाञ्चने ।
श्वशुरोऽपि ययौ तस्य शनैर्मन्दोपचारिताम् ॥५५२॥

चतुष्पञ्चानि वर्षाणि तिष्ठञासटमन्दिरे ।
ग्रासाच्छादनमात्रं स ततः क्लेशात् समासदत् ॥५५३॥

ठक्कुरो देङ्गपालोऽथ चन्द्रभागातटाश्रयः ।
दत्त्वा सुतां बप्पिकाख्यां तं निनाय निजान्तिकम् ॥५५४॥

---

550. [a]) C S′ $P_{1,3}$ I_3 SA प्रतिगतो (for प्रतिगते).
551. [a]) C P_2 प्रधन° (for प्रधान°).
552. [b]) C S′ $P_{1,3}$ I_3 SA क्षणे (for क्षीणे). —[d]) St $P_{1,3}$ I_3 °चारताम् (for °चारिताम्).
554. [c]) C धम्मिका°; S′ धस्मिका° (for वप्पिका°).

प्राप्तसौख्यो वसंस्तत्र कंचित् कालं भयोज्झितः ।
स राजबीजी दैन्येन शैशवेन च तत्यजे ॥५५५॥

तदन्तरे साहसिकः प्रासः साहस्रिरुन्मदः ।
गतागतानि कुर्वाणः संरम्भमनयन्नृपम् ॥५५६॥

स सिद्धपथमार्गेण विविक्षुर्विप्लवोन्मुखः ।
स्वैरेव भृत्यैर्भूभर्तुर्बद्ध्वा पापैः समर्पितः ॥५५७॥

तत्रोत्पिञ्जे परं सत्त्वं सज्ञपालस्य पप्रथे ।
खिन्नोऽपि द्रोहविमुखो यत् स देशान्तरं ययौ ॥५५८॥

तस्मिञ्शूरे कुलीने च किं वाच्यं स दिगन्तरे ।
शौर्येणैव यशोराजः पप्रथे यत् तदद्भुतम् ॥५५९॥

अथ राजा निवार्याऽऽद्यान् सहेलादीन् महत्तमान् ।
सर्वाधिकारे विदधे कायस्थं गौरकाभिधम् ॥५६०॥

स तापसस्य संबन्धी कस्यचिद् विजयेश्वरे ।
सेवया लोहरस्थस्य तस्य वाल्लभ्यमाययौ ॥५६१॥

शमिते पूर्वकायस्थवर्गे तेन ततः क्रमात् ।
नीतः सर्वाधिकारित्वं सोऽन्यामेव स्थितिं व्यधात् ॥५६२॥

अशेषकर्मस्थानेभ्यो वृत्तिं राजोपजीविनाम् ।
निवार्य कोशे भरणं तेनाऽकार्यनिशं प्रभोः ॥५६३॥

---

556. b) D P_3 साहसि° (for साहस्रि°).
557. c) C S′ तैरेव; I_3 द्वैरेव (for स्वैरेव). —d) C °वंद्धा (for °बंद्ध्वा).
558. b) D S′ P_3 सज्जपालस्य (for सज्ञपालस्य).
559. c) C S′ शौर्येण च (for शौर्येणैव).
560. a) C S′ निवास्या° (for निवार्या°). —b) C S′ सहीला° (for सहेला°).
561. b) C S′ कथञ्चि° (for कस्यचि°).
563. c) D (before suggestion) C P_{1-3} I_3 S′ निर्वाद°; SA निर्वार्य (for निवार्य suggested with St D). D °कोश° (for कोशे).

म्रदिम्ना पाप्मिनस्तस्य नाऽज्ञायि क्रूरता जनैः ।
मधुरिम्णा विषस्येव शक्तिः प्राणापहारिणी ॥५६४॥

न्यधात् कृपणवित्तं स पूर्वसंचितनाशकृत् ।
विशुद्धे नृपतेः कोशे हिमे हिममिवाऽम्बुदः ॥५६५॥

कोशः कृपणवित्तेन प्रविष्टेन हि दूषितः ।
भुज्यते भूमिपालानां तस्करैरथवाऽरिभिः ॥५६६॥

लोभाभ्यासेन भूपोऽपि संचिन्वन् कोशमन्वहम् ।
आस्ते स्म लोहरगिरौ प्रहिण्वन् सर्वसंपदः ॥५६७॥

गौरकाश्रयिभिर्वट्टपञ्जकाद्यैर्नियोगिभिः ।
विधीयते स्म निस्सारा महोत्पातैरिव क्षितिः ॥५६८॥

उच्चलक्ष्मापतौ शान्ते मूर्धारूढशिलोपमे ।
अबाधन्त पुनर्लोकं व्याधा इव नियोगिनः ॥५६९॥

प्रशस्तकलशस्याऽन्ते तद्भ्रातृतनयः परम् ।
कायस्थः कनको नाम श्लाघ्यामकृत संपदम् ॥५७०॥

नानादिगन्तरायातो दुर्भिक्षपतितो जनः ।
येनाऽविच्छिन्नसत्रेण शान्तव्यापद् व्यधीयत ॥५७१॥

संजातमुच्चलस्याऽन्ते येषां तत्त्वपरीक्षणम् ।
त एव चक्रिरे राज्ञा प्रमत्तेनाऽधिकारिणः ॥५७२॥

---

564. a) C S′ पापिन° (for पाप्मिन°). —c) C S′ °रिम्णो (for °रिम्णा).
565. c) C S′ नृपतिः (for नृपतेः).
566. d) St °रथ वारि° (for °रथवाऽरि°).
567. a) D St भूयो° (for भूपो°, cf. St. Tr.). —b) C S′ संचितं (for संचिन्वन्).
569. b) C S′ °पदे (for °पमे). —c) C S′ अधावंस्तं (for अबाधन्त).
570. c) C S′ कायस्थ° (for कायस्थः).
571. c) C S′ °सूत्रेण (for °सत्रेण).

द्वारे तिलकसिंहः स तादृक् तेन व्यधीयत ।
राजस्थाने च जनकः काणस्तस्य सहोदरः ॥५७३॥

प्रतापैर्नृपतेस्तीक्ष्णैः करमाक्रान्तमण्डलः ।
जिताद् द्वाराधिपः सोऽपि स्वीचकारोरशाधिपात् ॥५७४॥

काकवंश्यस्तु तिलकः क्ष्माभुजा दत्तकम्पनः ।
निन्ये प्रकम्पमहितान् प्रकम्पन इव द्रुमान् ॥५७५॥

ग्राम्यशस्त्रभृता शेडराजस्थानाधिकारिणा ।
नृपप्रतापैरहिताः सज्जकेनाऽपि निर्जिताः ॥५७६॥

काकवंशाश्रयात् प्राप्तराजद्वारेण धीमता ।
अट्टमेलकभृत्येनाऽप्यवापीष्टेन मन्त्रिता ॥५७७॥

एवं स्वाहंक्रियां त्यक्त्वा गुणापेक्षेण मन्त्रिणः ।
कुर्वतोच्चावचांस्तेन कश्चित् कालोऽत्यवाह्यत ॥५७८॥

वितस्तापुलिने सोऽथ कर्तुं प्रारभतोन्नतम् ।
स्वस्य श्वश्र्वाश्च पत्न्याश्च नाम्ना सुरगृहत्रयम् ॥५७९॥

उत्पातवह्निना दग्धो निस्संख्यधनदायिना ।
तेन दिद्दाविहारोऽपि नूतनत्वमनीयत ॥५८०॥

पुरीमट्टलिकां जातु स प्रयातोऽन्तिकस्थितैः ।
आप्तैः प्रैर्यत कल्हाद्यैर्गर्गोच्छेदाय भूपतिः ॥५८१॥

---

573. [a]) C S′ °सिंहस्य (for °सिंहः). —[d]) C S′ I_3 कण° (for काण°).

575. [c]) P_{1-3} I_3 SA प्रकम्पं सहि° (for प्रकम्पमहि°).

576. [c]) C S′ नृपाः (for नृप°).

577. [a]) SA °श्रयान् (for °श्रयात्).

578. [a]) St D P_{1-3} I_3 °क्रियात्यक्त° (for °क्रियां त्यक्त्वा).

579. P_3 om. *cd*.

581. [a]) All Mss. except P_3 read °मट्टिलकां ;St. Tr.suggests °मट्टालिकां (for °मट्टलिकां, cf. *vv.* viii. 764, 831, 1819 etc.). —[b]) C S′ °स्थितेः (for °स्थितैः). —[c]) C S′ कल्पाद्यै° (for कल्हाद्यै°).

गार्गिः कल्याणचन्द्राख्यस्तानतिक्रम्य हि स्फुरन् ।
मृगयादिक्षणे तेषामसूयामुदपादयत् ॥५८२॥

सर्वाभ्यधिकसामर्थ्यं तं निग्राह्यं निवेद्य ते ।
नित्योपजपनैर्गर्गे विक्रियामनयन्नृपम् ॥५८३॥

बद्ध्वा त्वां लोहरे भूभृदिच्छति क्षेप्तुमित्यथ ।
गर्गः शशङ्के भृत्येन राज्ञा चैकेन बोधितः ॥५८४॥

ततः स ससुतस्तत्र पलाय्य स्वभुवं ययौ ।
दिनैर्भूपोऽपि संप्राप्तः प्रविवेश स्वमण्डलम् ॥५८५॥

अन्योन्यशङ्कया भेदं यातयो राजगर्गयोः ।
चाक्रिकैः कृतसंचारैर्वैरं प्रौढिमनीयत ॥५८६॥

स्यालं गर्गस्य विजयं स्नेहशेषवशंवदः ।
समीपात् संत्यजन् राजा पश्चात्तापेन पस्पृशे ॥५८७॥

कारायां गर्गशत्रुर्यस्तेन पूर्वं न्यधीयत ।
स मल्लकोष्ठकस्तस्मिन् कालेऽमुच्यत बन्धनात् ॥५८८॥

निबद्धयौनसंबन्धं डामरैरपरैः समम् ।
तं कारयित्वा सामर्षो निनाय बलितां नृपः ॥५८९॥

शनैर्युद्धाय निर्याते राजसैन्येऽथ पूर्ववत् ।
गर्गेण कदनं चक्रे योधानाममरेश्वरे ॥५९०॥

---

587. c) St D P_{1-3} I_3 स त्यजन् (for संत्यजन्).

588. b) St P_2 व्यधीयत (for न्यधीयत). —c) D C S′ °कोष्ट° (for °कोष्ठ°).

589. a) C S• निबन्धे येन सोऽबद्ध (for निबद्धयौनसंबन्धं). —c) $P_{2,3}$ तें (for तं).

590. a) C S′ °युंद्धेषु (for °युंद्धाय).

तत्र सर्वातिशायिन्या वीरवृत्त्या नृपाश्रितः ।
शमालाडामरः प्राप प्रथां पृथ्वीहरः परम् ॥५९१॥

रणे द्वारपतेर्गर्गनिर्जितस्य पलायने ।
शौर्यं तिलकसिंहस्य प्राप सर्वोपहास्यताम् ॥५९२॥

हतशेषाः क्षताः शस्त्रवस्त्रादि त्याजिता भटाः ।
तदीया गर्गचन्द्रेण कारुण्यात् केऽपि रक्षिताः ॥५९३॥

वह्निसात्क्रियमाणेषु वीरदेहेषु सर्वतः ।
राजसैन्ये चिताग्नीनां गणना काऽपि नाऽभवत् ॥५९४॥

कृष्टसैन्येन राज्ञाऽथ गर्गो निर्दग्धमन्दिरः ।
संत्यज्य लहरं प्रायाद् गिरिं धुडावनाभिधम् ॥५९५॥

गिरिमूलोपविष्टस्य भूपतेः सैनिकैः समम् ।
तेषु तेष्वकरोन्नित्यं गिरिमार्गेषु संगरम् ॥५९६॥

कूटयुद्धैर्नृपानीकं प्रतिरात्र्युपतापयन् ।
रणे त्रैलोक्यराजादिप्रमुखांस्तंत्रिणोऽवधीत् ॥५९७॥

फाल्गुने हिमसंभारभीमे परिमितानुगः ।
स धीरो राज्यपि रिपौ न धैर्येण व्ययुज्यत ॥५९८॥

धैर्यवान् काकवंश्यस्तु तिलकः कम्पनापतिः ।
परं शिखरिशृङ्गस्थं शक्तोऽभूत् तं प्रधावितुम् ॥५९९॥

---

591. b) $P_{2,3}$ °श्रिताः (for °श्रितः). —c) C S′ °मालो (for °माला°). —d) C S′ पराम् (for परम्).

595. c) C S′ लोह° (for लह°). —d) C S′ गिरिचूडा°; P_3 गिरिं धुड° (for गिरिं धुडा°).

598. a) C S′ I_3 P_{1-3} SA फाल्गुणे (for फाल्गुने).

पीडितस्तेन संप्रेष्य स्वभार्यातनयेऽन्तिकम्।
निन्येऽनुकूलतां भूपं प्रसादाच्छादितक्रुधम् ॥६००॥

गूढमन्युर्नृपः संधिं बद्ध्वा प्रचलितस्ततः।
तं मल्लकोष्ठकं वृद्धिं निनाय न पुनः शमम् ॥६०१॥

सेहेऽथ लहरे द्वित्रान् मासानविशदे नृपे।
स मल्लकोष्ठकासह्यस्पर्धां नीचविमाननाम् ॥६०२॥

तन्मध्ये नृपतिर्गूढं विभेदं तद्बलं नयन्।
तदीयानकरोद् भृत्यान् कर्णादीन् स्वहितावहान् ॥६०३॥

स खिन्नो नीचदायादसमशीर्षिकयाऽथ तैः।
प्रेरितः पार्थिवाभ्यर्णं सदारतनयोऽविशत् ॥६०४॥

स्नातुं प्रवृत्तः पार्श्वस्थं स्नानद्रोण्युपरिस्थितः।
अथैकदा तमाक्षिप्तं शस्त्रमत्याजयन्नृपः ॥६०५॥

कुर्यादास्थामवष्टम्भे कोऽन्यः पौरुषगर्वितः।
आक्षेपसमये सोऽपि यत् क्लैब्यं भीरुवद् ययौ ॥६०६॥

उत्खातरोपितनृपः क्व नु सोऽभिमानः
कार्पण्यभागितरलोकसमा क्व वृत्तिः।
यद्वा वशं नटयति प्रकटं विधातु-
रिच्छैव यन्त्रगुणपङ्क्तिरिवाऽत्र जन्तुम् ॥६०७॥

---

600. [b]) D C S′ °भार्या तनया° (for भार्यातनये°). —[d]) P_{1-3} I_3 St °सादच्छा° (for °सादाच्छा°).

601. P_1 om. *bc*. —[c]) All Mss. except St read °कोष्ट° (for °कोष्ठ°).

602. [a]) C S′ लोहरे (for लहरे). —[c]) D P_{1-3} I_3 °कोष्ट°; C S′ °कोट° (for° कोष्ठ°).

603. [d]) C S′ कर्णाशीन् (for कर्णादीन्).

604. [c]) P_{1-3} I_3 SA पार्णिवा° (for पार्थिवा°).

605. [a]) C S′ स्नानप्र° (for स्नातुं प्र°). —[cd]) D (before suggestion) SA C S′ P_{1-3} I_3 °क्षिप्तशस्त्र°; D *sec.* suggests °क्षिप्य शस्त्र° (for °क्षिप्तं शस्त्र° suggested with St D).

अशकन् युधि ये द्रष्टुमपि तं नाऽस्य ते शठाः ।
केऽपि राजप्रिया बाहू ग्रन्थिबद्धौ तदा व्यधुः ॥६०८॥

श्रीसंग्राममठाभ्यर्णमन्दिरस्था नृपे स्वयम् ।
संक्रान्ते प्राङ्गनं युद्धात् कल्याणाद्या व्यरंसिषुः ॥६०९॥

जीवन्तं पितरं श्रुत्वा विदेहो गर्गनन्दनः ।
सान्त्व्यमानः स्वयं राज्ञा कृच्छ्राच्छस्त्रं समार्पयत् ॥६१०॥

गर्गः सदारतनयो राजौकस्येव भूभुजा ।
उपाचर्यत दाक्षिण्याद् बद्धो भोगैर्निजोचितैः ॥६११॥

गार्गिः पलाय्य यातोऽपि चतुष्को निजमन्दिरात् ।
अवर्णभाजा कर्णेन दृष्ट्वा राज्ञः समर्पितः ॥६१२॥

रूढच्छन्नप्रकोपस्य प्रसादस्य महीभुजः ।
अन्तश्शुद्धिविहीनस्य व्रणस्येव न निश्चयः ॥६१३॥

दरद्राजे मणिधरे दिदृक्षावागते नृपः ।
तत्संगमाय निर्यातो गर्गं भृत्यैरघातयत् ॥६१४॥

द्वित्रान् मासान् सोऽनुभूतकारागारस्थितिर्निशि ।
सत्रा त्रिभिः सुतैः कण्ठबद्धरज्जुर्न्यपात्यत ॥६१५॥

निष्ठां बिम्बमुखान्निन्ये यथैव स नृपानुगैः ।
तथैव कण्ठबद्धाश्मा सपुत्रोऽक्षिप्यताऽम्भसि ॥६१६॥

---

608. d) St C S′ $P_{1,2}$ तथा (for तदा).
609. c) D (before suggestion) P_{1-3} SA संग्रामे प्राङ्गनं; C S′ संग्रामोपस्थिते; D suggests संप्राप्ते प्राङ्गणं (for संक्रान्ते प्राङ्गनं suggested with St).
610. c) C S′ $P_{1,2}$ I_3 St सान्त्व° (for सान्त्व्य°). —d) C S′ P_1 °च्छत्रं (for °च्छस्त्रं). $P_{2,3}$ I_3 S′ SA समर्पयत् (for समार्पयत्).
612. b) C S′ D चतुष्कं (for चतुष्को).
613. c) C S′ अत° (for अन्त°). —d) C S′ हीन° (for व्रण°).
614. a) C S′ दरिद्राज्ये (for दरद्राजे). —c) C S′ उत्सं° (for तत्सं°).
615. c) C S′ सत्वात्रि° (for सत्रा त्रि°).
616. a) C S′ °मुखोनि° (for °मुखान्नि°).

तं चतुर्नवते वर्षे हत्वा भाद्रपदे नृपः ।
सुखेच्छुः प्रत्युत प्राप दुःखमुद्भूतविप्लवः ॥६१७॥

कल्हे कालिञ्जराधीशे महादेव्याश्च मातरि ।
मल्लाभिधायां शान्तायां स ततोऽभूत् सुदुःखितः ॥६१८॥

तन्मध्ये नागपालाख्यः सोमपालस्य सोदरः ।
तेन प्रतापपालाख्ये हते द्वैमातुरेऽग्रजे ॥६१९॥

शङ्कितस्तन्निहन्तारं हत्वाऽमात्यं पलायितः ।
त्यक्तस्वदेशः शरणं ययौ सुस्सलभूभुजम् ॥६२०॥

क्रुद्धः स कारणात् तस्मात् प्रणयं वशवर्तिनः ।
अगृह्णन् सोमपालस्य निश्चिकायाऽभिषेणनम् ॥६२१॥

निश्चित्य सर्वोपायानामसाध्यं विधुरं नृपम् ।
स भिक्षाचरमानिन्ये तस्य वल्लापुराद् रिपुम् ॥६२२॥

निशम्याऽऽनीतदायादं तं प्रकोपाकुलो नृपः ।
दत्तास्कन्दोऽविशत् तीव्रतेजा राजपुरीं ततः ॥६२३॥

दत्वा राज्ये नागपालं सोमपाले पलायिते ।
सप्त मासान् स तत्राऽऽसीत् तांस्तान्संत्रासयन् रिपून् ॥६२४॥

राज्ञां वज्रधरादीनां राजा वज्रधरोपमः ।
सेवावसरदानेन प्रसादविवशोऽभवत् ॥६२५॥

---

620. After this *v.* D P_3 add युग्मम् .

624. [a]) P_{1-3} रिपुं (for रिपून्).

भ्रमतां चन्द्रभागादिसरित्तीरेषु सर्वतः।
तत्सैन्यानां मुखमपि द्रष्टुं शेकुर्न वैरिणः ॥६२६॥

अग्रगाम्यभवत् तस्य तिलकः कम्पनापतिः।
पृथ्वीहरो डामरश्च मार्गरक्षणदीक्षितः ॥६२७॥

धार्मिको नृपतिर्ब्रह्मपुरीं देवगृहांश्च सः।
मण्डले द्विषतो रक्षन् प्रपेदे मौलिकं फलम् ॥६२८॥

तस्येन्द्रविभवस्याऽन्यत् सामग्र्यं वर्ण्यते कियत्।
आययावश्वघासोऽपि सैन्ये यस्य स्वमण्डलात् ॥६२९॥

तत्र प्रसङ्गे तत्राऽऽसीभवन् सुजनवर्धनः।
दूरस्थस्याऽनयद् रूढिं गौरकस्योपरि क्रुधम् ॥६३०॥

राष्ट्रगुप्त्यै स्वयं राज्ञा स्थापितः स स्वमण्डले।
अज्ञायि पैशुनाशुद्धबुद्धिना निखिलार्थहृत् ॥६३१॥

तत्संबन्धेन जनकं स निन्दन् नगराधिपम्।
मनस्तिलकसिंहस्य तद्भ्रातुरुदवेजयत् ॥६३२॥

हृत्वाऽधिकारं त्वस्याऽथ क्रुद्धः पर्णोत्ससंभवम्।
अनन्तात्मजमानन्दाभिधं द्वाराधिपं व्यधात् ॥६३३॥

सोमपालादयः श्लाघ्यास्तदा प्रकृतयोऽभवन्।
राज्ञस्तथा स्थितस्याऽपि न याः सविधमाययुः ॥६३४॥

---

626. P_2 om. *cd*. — c) C S′ P_1 SA तान्सैन्या° (for तत्सैन्या°).
627. d) P_1 I_3 °मोक्षितः (for °दीक्षितः).
628. c) All Mss. read मण्डलं (for मण्डले suggested with D).
629. d) C S′ °न्यमस्य (for °न्ये यस्य).
630. a) D suggests तस्या° (for तत्रा° found in all Mss.). — b) P_2 °वत्सुज°; C S′ I_3 °वत्स्वज° (for °वन् सुज°).
631. b) P_{1-3} I_3 SA स्थापितां (for स्थापितः).
632. a) C S′ तिलकं (for जनकं).
633. c) D C S′ P_{1-3} I_3 SA अनन्ताधिप° (for अनन्तात्मज° suggested with St, cf. *vv.* viii. 713, 1005, 1042).
634. d) P_2 या सवि° (for याः सवि°).

स पञ्चनवते वर्षे वैशाखेऽथ स्वमण्डलम् ।
प्राविशन्नागपालोऽपि राज्यभ्रष्टस्तमन्वगात् ॥६३५॥

दुस्सहातङ्कदूतेन लोभेन क्षोभितस्ततः ।
अदण्डयच्च वास्तव्याननयच्चाऽल्पतां व्ययम् ॥६३६॥

निवार्य गौरकं कार्यात् कार्यिणस्तत्समाश्रितान् ।
तस्य दण्डयतः सर्वे विरागं मन्त्रिणो ययुः ॥६३७॥

अकाण्डे व्यवहारेषु स विपर्यासितेष्वभूत् ।
अवसन्नधनो गाढमप्रौढ्यान्नवमन्त्रिणाम् ॥६३८॥

सौवर्णीरिष्टिकाः कृत्वा प्राहिणोल्लोहरान्तरे ।
काञ्चनाद्रिप्रतीकाशान् स्वर्णराशीनढौकयत् ॥६३९॥

अथ दण्डयितुं गर्गभृत्यान् दण्डाधिकारिणम् ।
लहरेऽकृत गर्गस्य मन्त्रिणं गजकाभिधम् ॥६४०॥

तं दण्डभीतैर्गर्गस्य सेवकैराश्रितस्ततः ।
विश्वस्तमवधीत् क्रुध्यंश्छद्मना मल्लकोष्ठकः ॥६४१॥

लहरे विप्लुते राजा द्वैमातुरमथाऽग्रजम् ।
मल्लकोष्ठस्याऽर्जुनाख्यं बबन्ध सविधस्थितम् ॥६४२॥

हस्तं च सङ्चन्द्रस्य पुत्रं गोत्रिणमप्यसौ ।
बद्ध्वा व्यधाद् बिद्दकाख्यं तस्य तद्भ्रातरं हितम् ॥६४३॥

---

635. c) D suggests प्रविशन्ना° (for प्राविशन्ना°).

636. b) All Mss. read क्षोभत° (for क्षोभित° suggested with St D).

640. b) D (before suggestion) P_{1-3} I_3 SA °कारिणाम् (for °कारिणम्).

641. cd D °ध्यन्छ° (for °ध्यंश्छ°). All Mss. except St here and elsewhere read °कोष्ट° (for °कोष्ठ°).

पूर्ववैरं स्मरन् सूर्यं सपुत्रं तं परांस्तथा ।
बबन्धाऽऽनन्दचन्द्रादीन् नीत्युल्लङ्घनमाचरन् ॥६४४॥

निर्गते लहरं मल्लकोष्ठके विद्रुते ततः ।
आरोप्याऽर्जुनकोष्ठं तं शूले कोपाद् व्यपादयत् ॥६४५॥

निवेश्य सैन्यं तत्राऽथ प्रविष्टस्य पुरं ययुः ।
डामरा निखिलास्तस्य वैरं विश्वस्तघातिनः ॥६४६॥

क्रुध्यन् पृथ्वीहरायाऽपि कृतसेवाय मन्त्रिभिः ।
आदिष्टैः कम्पनेशाद्यैरवस्कन्दमदापयत् ॥६४७॥

कथंचित् स तु निस्तीर्णो जयन्तीविषयौकसः ।
बन्धोः क्षीराभिधानस्य प्रविवेशोपवेशनम् ॥६४८॥

दिनेऽवन्तिपुरादीनां पुराणामन्तरेण तम् ।
व्रजन्तं विधुरं केचिन्नाऽशकन् बाधितुं द्विषः ॥६४९॥

तद्वैधुर्यविधानं तत्प्रजासंहारकार्यभूत् ।
प्रमादाद् भूपतेः क्रुद्धवेतालोत्थापनोपमम् ॥६५०॥

क्षीरोऽथ तीक्ष्णधीर्वृद्धः सह पृथ्वीहरेण सः ।
अढौकयच्छमाङ्गासान्तरेऽष्टादश डामरान् ॥६५१॥

अभेद्यसंघांस्ताञ्जेतुं निर्यातो विजयेश्वरम् ।
न्ययुङ्क्त भूभृत् संभ्रान्तस्तिलकं कम्पनापतिम् ॥६५२॥

---

644. b) I_3 P_2 SA परंस्त° (for परांस्त°).

645. a) St. Tr. suggests निर्गत्य (for निर्गते).

650. ab) $P_{2,3}$ तु प्र° (for तत्प्र°). —c) I_3 SA om. दा in प्रमादाद् without indicating a *lacuna*.

स पञ्चनवते वर्षे वैशाखेऽथ स्वमण्डलम् ।
प्राविशन्नागपालोऽपि राज्यभ्रष्टस्तमन्वगात् ॥६३५॥

दुस्सहातङ्कदूतेन लोभेन क्षोभितस्ततः ।
अदण्डयच्च वास्तव्याननयच्चाऽल्पतां व्ययम् ॥६३६॥

निवार्य गौरकं कार्यात् कार्यिणस्तत्समाश्रितान् ।
तस्य दण्डयतः सर्वे विरागं मन्त्रिणो ययुः ॥६३७॥

अकाण्डे व्यवहारेषु स विपर्यासितेष्वभूत् ।
अवसन्नधनो गाढमप्रौढ्यान्नवमन्त्रिणाम् ॥६३८॥

सौवर्णीरिष्टिकाः कृत्वा प्राहिणोल्लोहरान्तरे ।
काञ्चनाद्रिप्रतीकाशान् स्वर्णराशीनढौकयत् ॥६३९॥

अथ दण्डयितुं गर्गभृत्यान् दण्डाधिकारिणम् ।
लहरेऽकृत गर्गस्य मन्त्रिणं गजकाभिधम् ॥६४०॥

तं दण्डभीतैर्गर्गस्य सेवकैराश्रितस्ततः ।
विश्वस्तमवधीत् क्रुध्यंश्छद्मना मल्लकोष्ठकः ॥६४१॥

लहरे विप्लुते राजा द्वैमातुरमथाऽग्रजम् ।
मल्लकोष्ठस्याऽर्जुनाख्यं बबन्ध सविधस्थितम् ॥६४२॥

हस्तं च सङ्घचन्द्रस्य पुत्रं गोत्रिणमप्यसौ ।
बद्ध्वा व्यधाद् विद्दकाख्यं तस्य तद्भ्रातरं हितम् ॥६४३॥

---

635. [c]) D suggests प्रविशन्ना° (for प्राविशन्ना°).
636. [b]) All Mss. read क्षोभत° (for क्षोभित° suggested with St D).
640. [b]) D (before suggestion) P_{1-3} I_3 SA °कारिणाम् (for °कारिणम्).
641. [cd] D °ध्यञ्छ° (for °ध्यंश्छ°). All Mss. except St here and elsewhere read °कोष्ट° (for °कोष्ठ°).

पूर्ववैरं स्मरन् सूर्यं सपुत्रं तं परांस्तथा ।
बबन्धाऽऽनन्दचन्द्रादीन् नीत्युल्लङ्घनमाचरन् ॥६४४॥

निर्गते लहरं मल्लकोष्ठके विद्रुते ततः ।
आरोप्याऽर्जुनकोष्ठं तं शूले कोपाद् व्यपादयत् ॥६४५॥

निवेश्य सैन्यं तत्राऽथ प्रविष्टस्य पुरं ययुः ।
डामरा निखिलास्तस्य वैरं विश्वस्तघातिनः ॥६४६॥

क्रुध्यन् पृथ्वीहरायाऽपि कृतसेवाय मन्त्रिभिः ।
आदिष्टैः कम्पनेशाद्यैरवस्कन्दमदापयत् ॥६४७॥

कथंचित् स तु निस्तीर्णो जयन्तीविषयौकसः ।
बन्धोः क्षीराभिधानस्य प्रविवेशोपवेशनम् ॥६४८॥

दिनेऽवन्तिपुरादीनां पुराणामन्तरेण तम् ।
व्रजन्तं विधुरं केचिन्नाऽशकन् बाधितुं द्विषः ॥६४९॥

तद्वैधुर्यविधानं तत्प्रजासंहारकार्यभूत् ।
प्रमादाद् भूपतेः क्रुद्धवेतालोत्थापनोपमम् ॥६५०॥

क्षीरोऽथ तीक्ष्णधीर्वृद्धः सह पृथ्वीहरेण सः ।
अढौकयच्छमाङ्गासान्तरेऽष्टादश डामरान् ॥६५१॥

अभेद्यसंघांस्ताञ्जेतुं निर्यातो विजयेश्वरम् ।
न्ययुङ्क्त भूभृत् संभ्रान्तस्तिलकं कम्पनापतिम् ॥६५२॥

---

644. b) I_3 P_2 SA परंस्त° (for परांस्त°).

645. a) St. Tr. suggests निर्गत्य (for निर्गते).

650. ab) $P_{2,3}$ तु प्र° (for तत्प्र°). —c) I_3 SA om. दा in प्रमादाद् without indicating a *lacuna*.

संग्रामैः खण्डशः कुर्वन् स तानतुलविक्रमः ।
विद्रावयामास रयैः पुरोवायुरिवाऽम्बुदान् ॥६५३॥

संमानावसरे तस्य जित्वाऽऽयातस्य डामरान् ।
प्रवेशं प्रत्युत नृपो न प्रादादवमानकृत् ॥६५४॥

स भग्नमानो नगरं प्रविष्टे नृपतौ ततः ।
खिन्नः स्ववेश्मन्यवसत् स्वामिकार्ये निरुद्यमः ॥६५५॥

संप्राप्ताः समशीर्षिकां विसदृशैस्तुल्यैर्निरुद्धोदया
वैरे विद्विषतां कृता धुरि पदं संधौ बहिः स्थापिताः ।
कार्यान्तेऽद्भुतकर्मकौशलकृतावज्ञा विरागस्पृशः
सर्पाकीर्णमिवाऽऽशु वेश्म गृहिणो भृत्यास्त्यजन्ति प्रभुम् ॥६५६॥

त्यक्तकार्यानुसंधाने तस्मिन् सर्वत्र डामराः ।
संभृतिं विक्रियां निन्युः कृषिं क्षयधना इव ॥६५७॥

आतङ्कोद्वेजितैर्विप्रैः कृतप्रायैः पुरे पुरे ।
वह्नौ हुतात्मभिर्घोरा कुकीर्तिरुदपद्यत ॥६५८॥

उपसर्गेण तुरगाः करभाश्च क्षयं गताः ।
न्यवेदयन्मण्डलस्य प्रत्यासन्नमहाभयम् ॥६५९॥

प्रत्यासन्नाशुभा कम्पं भयेन जनता दधे ।
आसन्नवज्रपतना वातेनेव द्रुमावलिः ॥६६०॥

अथ षण्णवताब्दस्य प्रारम्भे डामरावलिः ।
ऊष्मस्पृष्टा हिमानीव बभूवाऽऽपतनोन्मुखी ॥६६१॥

---

656. [b]) SA_1 (after corr.) St परं (for पदं).
657. [d]) St. Tr. D क्षयघना (for क्षयधना also found in SL, cf. St. Tr. fn.).
658. [c]) All Mss. read हुताग्निभिः (for हुतात्मभिः suggested with D). —[d]) P_2 °रुपप° (for °रुदप°).
661. P_1 om. *ab*.

प्रथमं देवसरसाद् विप्लवप्रसरस्ततः।
मुख्यं व्यथावहो गण्ड इव पाकं व्यदर्शयत् ॥६६२॥

एककार्यत्वमानीय टिक्कादीन् गोत्रजान् बली।
स्थामस्थं विजयोऽभ्येत्य राजानीकमवेष्टयत् ॥६६३॥

तत्र कायस्थपुत्रोऽपि स्थामस्थानीकनायकः।
संरम्भं नागवट्टाख्यः सेहे तस्य चिरं युधि ॥६६४॥

कथंचिदथ भूपेन प्रार्थितः कम्पनापतिः।
निर्ययौ स्वामिदौरात्म्यसंस्मृतिश्लथसौष्ठवः ॥६६५॥

विजयेन समं तस्य बद्धमूलेन संयुगे।
संदेहं प्राणवृत्तिश्च जयश्रीश्चाऽसकृद् ययौ ॥६६६॥

प्रवृद्धिं मल्लकोष्ठेऽपि प्रयाते लहरान्तरे।
वैशाखे निर्ययौ राजा ग्रामं थल्योरकाभिधम् ॥६६७॥

सैनिकाः शत्रुभिस्तस्य भ्रामितास्तत्र रात्रिषु।
अरातिं निन्यिरे घोरैः स्वप्नैरिव मुमूर्षवः ॥६६८॥

बाहुमात्रसहायेन सर्वशक्तिमतां वरः।
येन हर्षनरेन्द्रोऽपि विधुरेणोदपाट्यत ॥६६९॥

भूरीन् वाराञ्जितवतो विक्रमेण महीमिमाम्।
साहसानां न संख्याऽस्ति जामदग्न्यस्य यस्य वा ॥६७०॥

---

662. c) St $P_{2,3}$ I_3 मुखं (for मुख्यं).

663. c) स्थामस्थं means encamped, cf. St. Tr. fn. *v.* vii. 1542. $P_{2,3}$ भृत्ये (for °भ्येत्य).

665. cd) SA D P_{1-3} P_3 °रात्म्यासं°; C S′ °वैल्यात्सं° (for °रात्म्यसं° suggested with St).

668. b) C S′ राशि° (for रात्रि°). —c) C S′ अरा° (for अर°).

669. a) All St. Mss. except SA_3 om. मात्र.

670. a) C S′ भूरीर्षया जित° (for भूरीन् वाराञ्जित°).

स सङ्कुचितविक्रान्तिः कालस्य बलवत्तया।
तत्र भग्नबलोऽकस्माद् व्ययुज्यत जयश्रिया ॥६७१॥

ततः पलायिते तस्मिन्नकस्मादेत्य सज्जकम्।
हाडिग्रामस्थितो वीरं भङ्क्त्वा पृथ्वीहरोऽनयत् ॥६७२॥

पलायितस्याऽनुसरंस्तस्य पृष्ठं स निष्ठुरः।
प्रतापी नगराभ्यर्णे दग्ध्वा नागमठं ययौ ॥६७३॥

स चाऽन्ये च ततः क्रूरा डामराः सर्वतोऽनयन्।
राज्ञो राजाश्रितानां च चरकेभ्यस्तुरंगमान् ॥६७४॥

निस्त्रिंशतां तीव्रकोपस्ततो भूपः समाश्रयन्।
अभाग्यभागिनां योग्यामालम्बे कुपद्धतिम् ॥६७५॥

नीविं पृथ्वीहरस्याऽथ हत्वा डामरमन्तिकम्।
पृष्ठन्यस्तबिसं भोज्यमिव रात्रौ व्यसर्जयत् ॥६७६॥

विसृज्य भ्रातरं हम्वं बिद्दकस्य तथैव सः।
अन्येषां प्राहिणोत् पार्श्वं भ्रातॄन् पुत्रांश्च विप्लुतः ॥६७७॥

मातरं जय्यकाख्यस्य सिफिन्नाग्रामवासिनः।
विच्छिन्नकर्णघ्राणां च कृत्वाऽभ्यर्णं व्यसर्जयत् ॥६७८॥

---

671. After this *v.* P_3 adds तिलकम्.

672. c) C S′ हामि° (for हाडि°).

673. c) $P_{1,2}$ °तापे नग; P_3 °तापनग° (for °तापी नग°).

674. d) St चार° (for चर°).

675. c) $P_{2,3}$ °भाग्यो भा° (for °भाग्यभा°).

676. a) D C S′ नीवीं (for नीविं). —c) D $P_{1,2}$ I_3 °न्यस्तधिं सं°; C S′ °न्यस्तविषं (for °न्यस्तबिसं, cf. St. Tr. fn.).

677. a) St (before corr. in corrigenda) हम्व (for हम्वं). —b) C S′ I_3 $P_{1,2}$ SA तयैव (for तथैव).

678. a) D C S′ P_{1-3} जयका° (for जय्यका°).

सपुत्रं सूर्यकं शूलेऽधिरोप्य नगरे परान् ।
भूरीन् वध्यानवध्यांश्च क्रोधाक्रान्तो न्यपातयत् ॥६७९॥

कालस्येवोल्बणस्याऽथ तस्य सर्वेऽपि शङ्किताः ।
आभ्यन्तराश्च बाह्याश्च विरागं प्रतिपेदिरे ॥६८०॥

येनैवाऽनीतिमार्गेण हारितं हर्षभूभुजा ।
निन्दन्नप्यादधे तं स राज्ये व्यवहरन् स्वयम् ॥६८१॥

प्रविष्टानां युद्धे गहनकविकर्मप्रणयिनां
प्रसक्तानां द्यूते नरपतिधुरायां विहरताम् ।
तटस्थत्वे वक्तुं स्खलितमसकृत् सोऽर्हति परं
प्रयोगे वैकल्यं स्वयमविकलो यो न भजते ॥६८२॥

तीव्रप्रयत्नो नृपतिस्तत्राऽपि विहितोद्यमः ।
निनाय मल्लकोष्ठादीन् किंचिन्मन्दप्रतापताम् ॥६८३॥

अथाऽऽनिनाय विजयो विषलाटाध्वना शनैः ।
नप्तारं हर्षदेवस्य तं भिक्षाचरमन्तिकम् ॥६८४॥

विविक्षन् देवसरसं कम्पनापतिना ततः ।
विद्राव्यमाणः श्वभ्राग्रात् प्रधावन्सोऽपतत् क्षितौ ॥६८५॥

परिज्ञाय हतस्याऽथ स तस्य विजयी शिरः ।
विससर्जाऽन्तिकं राज्ञः फलं जयतरोरिव ॥६८६॥

तदप्यत्यद्भुतं कर्म भजन् भूभृत् कृतघ्नताम् ।
न तस्य तुष्टस्तुष्टाव न चकार च सत्क्रियाम् ॥६८७॥

अवजानन्नधानाऽमुं श्वभ्राख्यः कम्पनापतिः ।
तत्र कस्मात् तवोत्सेक इति तं संदिदेश च ॥६८८॥

---

679. b) D [अ] परान् (for परान्).
684. b) C S′ °लाण्टा° (for °लाटा°).
686. a) S′ हृत° (for हत°).
688. b) D शुभ्रा° (for श्वभ्रा°).

सर्वप्रकारं तिलकः कृतघ्नं नृपतिं विदन् ।
अथ जातविरागः स द्रोहौन्मुख्यं समादधे ॥६८९॥

सतां स्यादनुपालभ्यो भजेद् वैमुख्यमेव चेत् ।
द्रोहेच्छया स तु तया ययावग्राह्यनामताम् ॥६९०॥

नेयाशयत्वमथवोचितकृत्यकृत्त्वं
नीतिप्रियाः प्रतिपदं समुदाहरन्तु ।
मानोन्नतास्तु विहितस्तुतयः कृतघ्नै-
स्त्यक्त्वाऽप्यसून् परहितं घटयन्ति सन्तः ॥६९१॥

पटं वह्निस्पर्शज्वलितमहिदंष्ट्रां त्वचमरेः
श्रुतिं यातं मन्त्रं पतननिरतां जीर्णवसतिम् ।
असेवाज्ञं भूपं व्यसनविमुखं स्निग्धमजह
न्न धीरोऽप्युत्थानोपहतमहिमा शर्म लभते ॥६९२॥

इत्युपायं परित्यज्य न्याय्यं ये प्रभवे क्रुधि ।
द्रोग्धारः कथितास्तेभ्यः केऽन्ये पापीयसां धुरि ॥६९३॥

जन्मन्येकोपकारित्वं पित्रोः सर्वत्र च प्रभोः ।
अधिकाः पितृघातिभ्यः पापिनः स्वप्रभुद्रुहः ॥६९४॥

निहते विजये शाम्यत्प्रभावेष्वपरेष्वपि ।
नाऽज्ञायि कस्यचित्स्वास्थ्यं तत्त्वज्ञेनाऽन्तरात्मना ॥६९५॥

---

689. d) C S′ द्रोहो° (for द्रोहौ°).
690. c) C S′ निर्याय (for तु तया).
691. a) D St C P_1 S′ I_3 नेयाशयि° (for नेयाशय°).
694. a) D suggests °न्येवोपका° (for °न्येकोपका° found in all Mss.). —d) St $P_{1,2}$ I_3 स्तत्प्रभु° (for स्वप्रभु°).
695. ab) D C S′ शान्तप्र°; SL *Varia lectio* P_3 शास्यप्र°; St $P_{1,2}$ I_3 शाम्यप्र° (for शाम्यत्प्र° suggested). —d) D (before suggestion) St P_{1-3} I_3 °रात्मनः (for °रात्मना).

कंचित्क्षणं सोऽपसृतः प्रत्युतोग्रोपतापकृत् ।
विप्लवप्रसरो ज्ञातः सर्वैर्डुड इवोन्मदः ॥६९६॥

आनिनीषुस्ततो मल्लकोष्ठो भिक्षाचरं पुनः ।
विषलाटां तस्य पार्श्वे निजं सैन्यं व्यसर्जयत् ॥६९७॥

कम्पनेशस्तमायान्तं द्रोग्धाऽप्यावेदयंस्ततः ।
राज्ञा न्यषेधि तद्रोषादेवं च समदिश्यत ॥६९८॥

एनं वर्त्मन्यनुद्धाते त्यज हन्यामहं ततः ।
पुरोगतं मृगव्यान्तः सृगालमिव वाजिभिः ॥६९९॥

द्वैराज्यकार्यमर्मज्ञभावेऽपि विधिचोदितः ।
कर्तव्ये तत्र शाठ्यं स नृपतिः प्रत्यपद्यत ॥७००॥

मर्म राजमुखादेवं लब्ध्वा द्रोग्धाऽथ डामरान् ।
तिलकोऽकारयच्छैलमार्गैर्भिक्षाचरागमम् ॥७०१॥

स्थाने स्थाने ततः प्राप ततः कर्णोपकर्णिका ।
जनानां या ख्यातिहेतुर्भिक्षो राज्ञस्तु भीतिदा ॥७०२॥

नाऽसंस्कृतं वक्ति शिला भिनत्त्येकेषुणा दश ।
अश्रान्तो योजनशतं यात्यायाति च संचरन् ॥७०३॥

इत्यादि तादृङ्माहात्म्यभिक्षुस्तुत्याऽनयज्जनः ।
निखिलान् पलितश्वेतलम्बकूर्चोऽपि कौतुकम् ॥७०४॥

---

697. b) D (before suggestion) C S′ P_{1-3} I_3 °कोष्टं; SA °कोष्ठं; D suggests °कोष्टो (for °कोष्ठो suggested with St). —c) SA P_{1-3} I_3 °लाटं; C S′ °लाण्टं (for °लाटां).

698. b) $P_{2,3}$ °वेश° (for °वेद°). —d) $P_{2,3}$ °दिव्यत (for °दिश्यत).

699. a) I_3 एवं (for एनं). —b) I_3 त्यज्य (for त्यज).

701. a) St D C मर्मराज° (for मर्म राज°). C S′ °नेवं (for °देवं). —d) D C S′ °चरानुगान्; P_{1-3} I_3 SA °चरागम् (for °चरागमम् also found in SL).

704. a) C S′ माहात्म्यं (for °माहात्म्य°). After this v. युग्मम् .

भविष्यन्निव साम्राज्यस्यैक एकोऽर्धभागभाक् ।
वार्तामव्यवहर्तोऽपि भिक्षोरूचेऽन्वियेष च ॥७०५॥

सरित्स्नानगृहे स्नान्तो वृद्धाः क्षीणनियोगिनः ।
राजवेश्मन्यगणिता नाममात्रं नृपात्मजाः ॥७०६॥

स्वभावदुर्जनाः केचिद् योधाश्चोच्चाश्वकाङ्क्षिणः ।
कारयन्तोऽप्युपाध्यायाः शिष्यान् स्फिक्कषणं नखैः ॥७०७॥

वृद्धाः सुरौकोनर्तक्यो देवप्रासादपालकाः ।
वणिजो भुक्तनिक्षेपाः पुस्तकश्रुतितत्पराः ॥७०८॥

प्रायोपवेशकुशलाः पारिषद्यद्विजातयः ।
शस्त्रिणः कार्षकप्राया नगरोपान्तडामराः ॥७०९॥

सुखयन्तः स्वमन्यांश्च किमप्युत्पिञ्जवार्तया ।
एते प्रायेण देशेऽस्मिन् पार्थिवोपप्लवप्रियाः ॥७१०॥

प्रवर्धमानया भिक्षाचरागमनवार्तया ।
वेपमानोऽभवल्लोको ययौ चिन्तां च भूपतिः ॥७११॥

पृथ्वीहरस्तरुच्छन्ने गिरिकच्छे वसन्नथ ।
राजानीकं बभञ्जाऽऽजौ निर्गत्याऽतुलविक्रमः ॥७१२॥

अनन्तकाक्योर्वेश्यावानन्दौ द्वारनायकौ ।
चक्रे तिलकसिंहं च मन्त्रिणस्त्रीन् पलायिनः ॥७१३॥

---

705. b) C S′ °कोऽर्थभार° (for °कोऽर्धभाग°).
706. d) St P_3 °मात्र° (for °मात्रं).
707. c) C S′ °प्युपाख्या° (for °प्युपाध्या°). —d) SA_1 (before corr.) °ष्याक्स्फिक्क°; P_3 °ष्यान्स्फिक्को° (for °ष्यान् स्फिक्क°).
708. a) C S′ सुराको (for सुरौको°).
709. c) C S′ कार्मुक°; P_3 कार्पिक° (for कार्षक°).
710. After this *v.* कुलकम् .
711. c) $P_{2,3}$ °ल्लोके (for °ल्लोको).
712. c) P_2 °जानीके (for °जानीकं).
713. b) All Mss. read °वानन्दद्वार° (for °वानन्दौ द्वार° suggested, cf. St. Tr. fn.).

निहते विजये ज्येष्ठे शुक्लषष्ठ्यां पराभवम् ।
तमाषाढस्य नृपतिः प्राप्याऽभूद् विवशः पुनः ॥७१४॥

उट्टीकितैर्गवां वृक्षमूर्धारोहेण भोगिनाम् ।
पिपीलककुलस्याऽण्डोपसंक्रान्त्येव वर्षणम् ॥७१५॥

प्रत्यासन्नं स राजाऽथ दुर्निमित्तैरुपद्रवम् ।
विचिन्त्याऽऽयातमुचितं कर्तव्यं प्रत्यपद्यत ॥७१६॥

तृतीयेऽह्नि शुचेः शुक्ले ततः प्रास्थापयत् सुतम् ।
देवीमन्यत्कुटुम्बं च स कोटं लोहरं पटुः ॥७१७॥

ताननुव्रजतस्तस्य सेतुभङ्गात् परिच्युताः ।
लोष्ठद्विजातयो विप्रा वितस्तायां विपेदिरे ॥७१८॥

स तेन दुर्निमित्तेन खिन्नो हुष्कपुरान्तिकम् ।
अनुगम्याऽथ तान् द्वित्रैर्दिनैर्भूयोऽविशत् पुरम् ॥७१९॥

विना पुत्रेण देव्या च स ततः प्रत्यपद्यत ।
प्रतापेन च लक्ष्म्या च परित्यक्त इवाऽन्यताम् ॥७२०॥

स मन्त्रो व्यापदि शुभः प्रत्यभात् तस्य तद्वशात् ।
अभ्यन्तरप्रकोपेऽपि सर्वाभ्युदयभागभूत् ॥७२१॥

स्वयमुत्थापितानर्थः सोऽपि हर्षनरेन्द्रवत् ।
अद्याऽपि सान्वयो नीत्या तया साम्राज्यभोगभाक् ॥७२२॥

---

714. a) St P_2 I_3 ज्यैष्ठे (for ज्येष्ठे). —b) D $P_{1,3}$ S′ I_3 °कृषष्ट्यां; P_2 °क्काष्टम्यां (for °क्लषष्ठ्यां).

715. a) C S′ तट्टीकिते ग° (for उट्टीकितैर्ग°). —d) C S′ St P_2 I_3 °संक्रान्त्यैव (for °संक्रान्त्येव). C S′ वर्षिणम् (for वर्षणम्).

716. c) C S′ विचिन्त्य (for विचिन्त्या°). After this *v.* युग्मम् .

717. c) C °मन्यकु° (for °मन्यत्कु°). —d) C S′ लहरं (for लोहरं).

718. c) D (before suggestion) $P_{1,2}$ I_3 °द्विजानयो; St. Tr. suggests °द्विजादयो (for °द्विजातयो). —d) C S′ I_3 प्रपे° (for विपे°).

721. c) C S′ °प्रकम्पोऽपि (for °प्रकोपेऽपि).

722. S′ om. this *v.*

श्रावणे लाहरैर्योधैरानीय बलशालिनाम् ।
भिक्षुमंडवराज्यानां डामराणामथाऽऽर्प्यत ॥७२३॥

तेऽपि जन्या इव वरं श्वशुरालयसंनिभम् ।
प्रावेशयंस्तं लहरमनुयान्तः ससैनिकाः ॥७२४॥

सभाजयित्वा तान् मल्लकोष्ठमुख्या निजां भुवम् ।
व्यसर्जयन् कम्पनेशप्रमाथाय पृथुश्रियः ॥७२५॥

सर्वतः परचक्रेऽथ पर्यापतति पार्थिवः ।
संग्रहीतुं प्रववृते पदातीनतुलव्ययः ॥७२६॥

तस्मिन् दुर्व्यसने राज्ञि वसुवर्षिणि सर्वतः ।
अकारि शस्त्रग्रहणं शिल्पिशाकटिकैरपि ॥७२७॥

नगरे सैन्यपतयः प्रतिमार्गमकारयन् ।
तुरगान् न्यस्तसंनाहान् व्यायामं समरोन्मुखः ॥७२८॥

मयग्रामस्थिते भिक्षावमरेश्वरवासिभिः ।
राजसैन्यैः समं युद्धमगृह्णन्नेत्य लाहराः ॥७२९॥

तैर्हिरण्यपुरोपान्ते प्रबन्धारब्धसंगरैः ।
श्रीविनायकदेवाद्या राजसेनाधिपा हताः ॥७३०॥

आद्य एव रणे यातां राजानीकाद् विरोधिनः ।
लब्ध्वा वराश्वामायातामामन्यन्त नृपश्रियम् ॥७३१॥

---

724. [a]) $P_{2,3}$ वरे (for वरं).

725. [c]) $P_{1,2}$ °यत् (for °यन्). —[cd]) SA_1 om. य in व्यसर्जय, माथाय with a space. —[d]) C S′ °थायायुषे श्रियः (for °थाय पृथुश्रियः).

726. [c]) P_3 C S′ SA संगृहीतुं (for संग्रहीतुं).

728. [d]) All Mss. read व्यायामस° (for व्यायामं स° suggested with D).

729. [a]) P_2 मया° (for मय°).

राजधान्यन्तिके क्षितिकाख्यायाः सरितस्तटे ।
पृथ्वीहरश्चकाराऽऽजावशेषसुभटक्षयम् ॥७३२॥

तिलके विजयेशस्थेऽप्यगृह्णन्नेत्य डामराः ।
महासरित्तटे युद्धं खड्डवीहोलडौकसः ॥७३३॥

ते रुद्धनगरा दाहं क्वाऽपि क्वाऽपि च लुण्ठनम् ।
वास्तव्यानां विदधिरे विनदन्तो दिवानिशम् ॥७३४॥

निर्यत्सतूर्यपृतनाः प्रविशच्छस्त्रविक्षताः ।
क्रन्दद्धतार्तनिवहाः प्रधावद्भग्नसैनिकाः ॥७३५॥

प्रसरत्प्रेक्षिनिवहा वहदाशुगभारिकाः ।
संचार्यमाणसंनाहाः कृष्यमाणतुरंगमाः ॥७३६॥

आसन्नशान्तसंमर्दप्रसरत्पांसवोऽनिशम् ।
दिने दिने राजपथा उपप्लवविशृङ्खलाः ॥७३७॥

प्रतिप्रत्यूषमायात्सु सर्वारम्भेण वैरिषु ।
अद्य ध्रुवं जितो राजेत्यज्ञायि प्रतिवासरम् ॥७३८॥

धीरः कः सुस्सलादन्यो न यः प्रत्यभियोगिनाम् ।
कृच्छ्रेणाऽपि स्वराष्ट्रेण क्रष्टुं धैर्यादपार्यत ॥७३९॥

व्रणपट्टाञ्जनं शल्योद्धारं पथ्यधनार्पणम् ।
शस्त्रक्षतानां सततं कारयन् स व्यलोक्यत ॥७४०॥

---

733. a) $P_{1,3}$ तिलकं (for तिलके). —b) $P_{2,3}$ प्रगृह्ण°; S′ °थ गृह्ण° (for °प्यगृह्ण°). —c) C S′ D महत्सरि°; $P_{1,3}$ महिसरि° (for महासरि°). —d) D P_1 I_3 खड्गवी°; C स्वङ्गाची°; $P_{2,3}$ खड्गावी°; S′ स्वङ्गची° (for खड्डवी°). SA °होलळौ°; P_3 °हौलडौ° (for °होलडौ°).

735. c) C S′ °द्धतात्म°; St °द्धताप्त°; P_{1-3} °द्धतान्त° (for °द्धतार्त°).

736. a) C S′ °त्पाक्षि° (for °त्प्रेक्षि°). —b) SA व्यहद° (for वहदा°). C S′ °तारि° (for °भारि°).

737. a) C S′ °शत°; $P_{2,3}$ °मान्त° (for °शान्त°). After this v. तिलकम् :-

738. b) $P_{1,3}$ I_3 °म्भेन (for °म्भेण). —c) P_3 क्षिति° (for जितो).

739. c) $P_{1,3}$ सुरा° (for स्वरा°). —d) C दर्पादु° (for धैर्याद°).

740. a) C S′ °पट्यञ्ज° (for °पट्टाञ्ज°). —b) C S′ यद्वा (for पथ्य°).

प्रवासवेतनप्रीतिदायभैषज्यदत्तिभिः ।
शश्विलोके नरपतेर्निस्संख्योऽभूद् धनव्ययः ॥७४१॥

युद्ध एव विपन्नानां क्षतानां च स्ववेश्मसु ।
नित्यं नरतुरंगाणां सहस्राणि क्षयं ययुः ॥७४२॥

तुरंगवहलैर्हन्यमाना नृपवलैस्ततः ।
लाहरा मल्लकोष्ठाद्या मन्दोद्रेकत्वमाययुः ॥७४३॥

भिन्नैराभ्यन्तरैरेव दत्तमन्त्राः सुरेश्वरीम् ।
ते निन्युर्भिक्षुमलपेन तन्मार्गेण युयुत्सवः ॥७४४॥

सेतुना स्वल्पपार्श्वेन धन्विप्रायैः सरोऽन्तरे ।
अवापि तैर्जयोऽमोचि वाजिभ्यश्च भयं रणे ॥७४५॥

द्रोग्धाऽथ कम्पनेशः स निवसन् विजयेश्वरे ।
वलितां डामराश्निन्ये मन्दोद्रेकं स्फुरन् रणे ॥७४६॥

ल्वन्यलोको मा ज्ञासीदशक्तिं मेऽथ गच्छतः ।
पृष्ठे निपत्य मा कार्षीद् व्यथां चेति विचिन्तयन् ॥७४७॥

स प्रभावं दर्शयितुं प्राप्तस्य विजयेश्वरम् ।
अज्जराजस्य सेनायां व्यावृत्य प्रस्थितोऽभवत् ॥७४८॥

सार्धां शतद्वयीं तस्य योधानां हतवानपि ।
संत्यज्य विजयक्षेत्रं द्रोहकृन्नगरं ययौ ॥७४९॥

---

741. c) C S′ शश्वल्लो° (for शश्विलो°).

742. c) All Mss. except D P_3 read °गानां (for °गाणां).

745. cd) C S′ °योऽमीभिर्वा°; St (before corr.) °यो मोचिवा° (for °योऽमोचि वा°).

746. a) SA_1 (before corr.) कम्पनेशस्य (for कम्पनेशः स).

747. d) C S′ वृथा (for व्यथां).

748. c) C S′ अज° (for अज्ज°).

749. a) C S′ सार्द्धं शतद्वयं (for सार्धां शतद्वयीं).

पथि नाऽन्वसरन् भीत्या भयात् तं डामराः क्वचित् ।
नदन्तोऽद्रिशिरोरूढा मार्गान् सर्वांश्च तत्यजुः ॥७५०॥

त्यक्त्वा मडवराज्यं स प्रविष्टो व्यसनातुरम् ।
पूर्वचेष्टां स्मरन् भूपं जहास कृतसत्क्रियम् ॥७५१॥

इतरामात्यवत्स्थामस्थितोऽथ न निजोचितम् ।
रणे प्रादर्शयत् किंचित् साक्षिभूत इव स्थितः ॥७५२॥

ततो मडवराज्यात् ते समस्ता एव डामराः ।
अभ्येत्य प्रत्यपद्यन्त तां महासरितस्तटीम् ॥७५३॥

उपायाः सामभेदाद्या रिपुचक्रे प्रयोजिताः ।
राज्ञो विफलतां जग्मुर्बहिराप्तैः प्रकाशिताः ॥७५४॥

क्रान्ततत्तन्महीपालमण्डलस्याऽपि भूपतेः ।
फलं दोर्विक्रमस्याऽभ्यमासीन्नगररक्षणम् ॥७५५॥

अमरेशे द्वारपतिः सार्धं तस्थौ नृपात्मजैः ।
राजानवाटिकोपान्ते राजस्थानीयमन्त्रिणः ॥७५६॥

दूरद्वीपान्तरगता इव स्वीचक्रिरे नृपात् ।
ते प्रवासधनं भूरि न चाऽयुध्यन्त कुत्रचित् ॥७५७॥

कटका विद्विषां सर्वे पर्यायेण जयाजयौ ।
लेभिरे विजयादन्यन्न तु पृथ्वीहरः क्वचित् ॥७५८॥

---

750. b) P_2 I_3 °यार्त्तं (for °यात् तं).

751. b) C S′ $P_{2,3}$ °नान्तरम् (for °नातुरम्). —c) C S′ °चेष्टः (for °चेष्टां).

752. b) C S′ °थाजो नि° (for °थ न नि°).

753. a) C S′ I_3 °राज्यं (for °राज्यात्). —c) SA_1 (before corr.) °पद्यत (for °पद्यन्त).

756. c) $P_{2,3}$ °नुवाटि° (for °नवाटि°). After this v. P_1 I_3 SA_1 add युग्मम्.

757. a) C S′ °प्रपासद° (for °प्रवासध°).

मधुमत्तेन तेनाऽऽजौ वेतालेनेव वल्गता ।
प्रायो वरा वराः सर्वे ग्रस्ता नृपचमूभटाः ॥७५९॥

उदयस्येच्छटिकुलोद्भूतस्यैकस्य पप्रथे ।
युवदेश्यस्याऽपि शौर्यमेकस्मिंस्तु तदाहवे ॥७६०॥

पृथ्वीहरस्याऽपजह्रे द्वन्द्वयुद्धाभिमानिना ।
प्रहृत्य कृष्टकूर्चेन कराग्रेणाऽसिवल्लरी ॥७६१॥

युद्धे पुरोपकण्ठेषु वर्तमाने शराहताः ।
स्त्रीबालाद्या अपि वधं प्रमादात् प्रतिपेदिरे ॥७६२॥

एवं जनक्षये घोरे वर्धमाने किमप्यभूत् ।
अनुत्साहान्नृपो गेहादपि निर्गन्तुमक्षमः ॥७६३॥

तस्मिन्निरुद्धसंचारे सोमपालस्तदन्तरे ।
अलुण्ठयच्चाऽट्टलिकां लब्धरन्ध्रो ददाह च ॥७६४॥

सिंहे गजाहवव्यग्रे तद्गुहाग्रपरिग्रहे ।
समयो ग्रामगोमायोः पौरुषस्याऽपरोऽस्तु कः ॥७६५॥

राष्ट्रद्वयोपमर्देन राजा निस्सहशेन सः ।
तेन त्रपाविधेयोऽभूत् स्वमपि द्रष्टुमक्षमः ॥७६६॥

सर्वानौचित्यबहलः सर्वव्यसनदुस्सहः ।
सर्वदुःखमयः कालस्तस्याऽवर्तत कोऽपि सः ॥७६७॥

---

759. b) I_3 $P_{1,3}$ S′ C D °नैव (for °नेव). C वल्गुना (for वल्गता). —c) D C S′ वरावराः (for वरा वराः).

763. c) C S′ व्यूहा° (for गेहा°).

764. c) All Mss. except St read °च्चाटलि° (for °च्चाऽट्टलि°, cf. *vv.* viii. 581, 831, 1945).

765. d) C S′ पुरोऽस्तु; P_2 परोस्तु (for [अ]परोऽस्तु).

तथाऽप्यस्खलिते तस्मिन् हितव्याजाद्धितापहः।
राजानवाटिकाविप्रैः प्रायश्चक्रे विरागिभिः॥७६८॥

प्रार्थयन्ते स्म ते युद्धे तटस्थास्तव मन्त्रिणः।
गृहीत्वा नीविरेतेभ्यो लोहराद्रौ विसृज्यताम्॥७६९॥

न चेद् व्याप्य इवैतस्मिन् व्यसने स्थायितां गते।
को दद्यान्नः परैर्नीतं प्रत्यासन्नं शरत्फलम्॥७७०॥

न प्रत्यभैत्सीत् ताटस्थ्यं यत्कालापेक्षया नृपः।
तस्मिंस्तैर्दर्शिते शङ्कां निखिला मन्त्रिणो दधुः॥७७१॥

शक्तिस्तृणं कुब्जयितुं न यस्य स तदाऽर्थिभिः।
विसूत्रव्यवहारत्वं निन्ये राजा शठद्विजैः॥७७२॥

कर्मस्थानोपजीव्युग्रपारिषद्यादिसंकुला।
तत्पार्श्वात् प्रययौ वृद्धिमन्या सेनेव वैरिणाम्॥७७३॥

तत्सान्त्वनक्षणे तैस्तैः प्रमादैरुत्थितैरगात्।
देशो व्याकुलतां कृच्छ्रं लुण्ठिश्चाऽघटतोत्कटा॥७७४॥

अदृष्टपार्थिवास्थानैः शठैरव्यवहारिभिः।
ऊचे तैः सान्त्वयन् राजा दुस्स्थितस्तत्तदप्रियम्॥७७५॥

लवन्यविप्लवाद् राज्ञः सोऽधिको विप्लवोऽभवत्।
गलरोगः पादरोगादिव तीव्रव्यथावहः॥७७६॥

---

769. b) P_{1-3} तदस्था° (for तटस्था°).

770. a) D suggests चेद्या° (for चेद् व्या°). —c) D (before suggestion) St P_{1-3} I_3 C S′ को दध्यान्न; SL कोप्यदान्न (for को दद्यान्न: suggested with D).

772. b) D suggests येषां (for यस्य).

773. a) $P_{2,3}$ °स्थाने° (for °स्थानो°).

774. d) P_{1-3} I_3 SA °घटितो° (for °घटतो°).

776. a) C S′ राज्ञा (for राज्ञः).

काञ्चनोत्कोचदानेन तन्मध्येऽधिकचक्रिकाम् ।
कांश्चित् स्वीकृत्य स प्रायं कथंचिद् विन्यवीवरत् ॥७७७॥

विजयो वर्णसोमादिशस्त्रिवंश्यो हठात् पुरम् ।
प्रविशन् भिक्षुसेनानीरश्वारोहैरहन्यत ॥७७८॥

तेनाऽतिरभसात् स्थानं भित्त्वा प्रविशता पुरम् ।
प्रायशः कृत एवाऽभूत् तदा राज्यविपर्ययः ॥७७९॥

ईषन्मन्दप्रतापेन लवन्येष्वपि भूपतेः ।
पृथ्वीहरेण संधित्सा भेदेच्छोः संप्रकाशिता ॥७८०॥

तस्मिन् धुर्ये जिगीषूणां संधित्सौ भूभुजा समम् ।
द्वयेऽपि सैनिकाः शान्तं तममन्यन्त विप्लवम् ॥७८१॥

राज्ञा नागमठोपान्तमानेतुं प्रहितांस्ततः ।
त्रीनमात्यान् स विश्वस्तानागच्छंश्छद्मनाऽवधीत् ॥७८२॥

धात्रेयो मम्मको गुङ्गो द्विजो रामश्च वारिकः ।
तेषां तिलकसिंहस्य पार्श्वे भृत्यास्त्रयो हताः ॥७८३॥

नीविर्दत्तो गौरकस्तु हतो भूतपतिं स्मरन् ।
इष्टे त्वाक्रन्दिनि परैः प्रहृतं करुणोज्झितैः ॥७८४॥

तद्वैशसं श्रुतवतो देशः सर्वो विरागकृत् ।
राजधान्यन्तरे राज्ञो दुरुक्तिमुखरोऽभवत् ॥७८५॥

---

777. c) All Mss. except St कांचित् (for कांश्चित्). —d) SA_1 *Prima manu* °वीवृतत् (for °वीवरत्).

780. b) D (before suggestion) P_{1-3} I_3 नवन्ये°; SA न वन्ये°; C S′ नचान्ये° (for लवन्ये° suggested with St D).

781. b) C S′ समाम् (for समम्). —c) S′ °योऽपि (for °येऽपि). C S′ P_{1-3} I_3 °काश्चान्तं (for °काः शान्तं).

782. c) St I_3 सुवि°; C $P_{2,3}$ स्ववि° (for स वि°). —d) D C S′ I_3 P_1 °च्छञ्छ°; $P_{2,3}$ °च्छच्छ° (for °च्छंश्छ°).

783. b) For वारिकः cf. *vv.* vi. 345; vii. 781; viii. 861.

784. a) C S′ नीविन्दत्ते; P_2 नीविमत्तो (for नीविर्दत्तो).

इषे शुक्लचतुर्दश्यां तद्विपर्यस्तमण्डलम् ।
अतिवाहयितुं कष्टं दिनमासीन्महीपतेः ॥७८६॥

अथ संजातवैक्लव्यो नेदमस्तीति चिन्तयन् ।
किं कृत्यमित्यसदृशानपि पप्रच्छ भूपतिः ॥७८७॥

विषमे वर्तमानस्य तस्य कश्चित् स नाऽभवत् ।
अन्तर्जहास यो नाऽन्तर्बहिर्यो न तुतोष वा ॥७८८॥

तमपि व्यसनापातं तस्य सोढवतस्ततः ।
अभजन्त क्रमाद् भृत्याः प्रतिपक्षसमाश्रयम् ॥७८९॥

कम्पनेशस्य बिम्बाख्यो भ्राता द्वैमातुरोऽहितान् ।
समाश्रयद् द्वारकार्यं तद्दत्तं प्रत्यपद्यत ॥७९०॥

गूढं जनकसिंहेन दूतान् प्रेषयताऽनिशम् ।
भिक्षवे भ्रातृतनया वाग्दत्ता निरवर्त्यत ॥७९१॥

असिवाजितनुत्रादि हृत्वा भिक्षाचरान्तिकम् ।
अश्ववारा व्यभाव्यन्त प्रयान्तः प्रतिवासरम् ॥७९२॥

किमन्यद् व्यक्तमेवाऽह्नि येऽवसन् पार्थिवान्तिके ।
अलक्ष्यन्ताऽग्रतो भिक्षोस्ते निशायां गतत्रपाः ॥७९३॥

इतो याति ततश्चैति लोको व्यक्तमतन्त्रितः ।
इति राजनि कुण्ठाज्ञे कोऽप्यजृम्भत विप्लवः ॥७९४॥

---

788. S′ om. *b-d*. —c) I_3 SA °हासां; P_2 °हासे (for °हास). —d) All Mss. except C om. बहिर्यो.

789. S′ om. *a*. —a) C °मतिव्य (for °मपि व्य°). —b) C S′ °स्यासोढ° (for °स्य सोढ°).

790. b) D C द्वैमातुरो हि तान् (for द्वैमातुरोऽहितान्).

791. d) C S′ °वर्त्तत (for °वर्त्यत).

792. b) P_2 कृत्वा; S′ हृता (for हृत्वा). —d) S′ °पान्तः (for °यान्तः).

793. a) C S′ व्यर्थ° (for व्यक्त°).

794. a) C S′ यतो (for इतो). S′ P_{1-3} I_3 °तश्चेति (for °तश्चैति). —b) SA_1 (before corr. in marg.) °तन्द्रितः (for °तन्त्रितः). —d) S′ कोऽश्व; I_3 कोपि (for कोऽप्य°).

डामरैः शरदुत्पत्तौ नीतायां सर्वतस्ततः ।
कान्दिशीकोऽभवल्लोकः कृत्स्नो धनजनोज्झितः ॥७९५॥

प्रयाते सुस्सलनृपे स्वर्णपूर्णामिमां महीम् ।
भिक्षुः कुर्यादिति मृषा लोकस्याऽऽसीद् विनिश्चयः ॥७९६॥

क्व दृष्टा त्यागिता भिक्षोः कुतो वा तस्य संपदः ।
परामर्शो नैवेति गतानुगतिको जनः ॥७९७॥

संदृश्यते परिवृता चिरमम्बरेण
रेखा स्वयं न खलु या शशिनो नवस्य ।
तस्यां जनः प्रकुरुते नतिमम्बरार्थी
धिग् लुब्धतामपसरत्सदसद्विचाराम् ॥७९८॥

विजये राजवर्ग्याणां भुग्नग्रीव इवाऽभवत् ।
भिक्षुपक्षजये लोको हृष्यन्नासीद् विशृङ्खलः ॥७९९॥

द्विजकौलेयकन्यायो राजडामरसंघयोः ।
ततोऽन्योन्यभयभ्रश्यद्वैरयोरुदजृम्भत ॥८००॥

राजाभ्यन्तरभेदेन राज्ञः स्थैर्येण चाऽरयः ।
ऐच्छन् पलायितुं भीता अज्ञातान्योन्यनिश्चयाः ॥८०१॥

बान्धवानपि दुध्रुक्षूनविश्वस्तो विदन् नृपः ।
स्थितौ पलायने वाऽपि श्रद्दधे न स्वजीवितम् ॥८०२॥

तं महाव्यसने वासस्स्वर्णरत्नादिवर्षिणम् ।
नाऽभ्यनन्दन् गृहीतार्था निनिन्दुः शस्त्रिणः परम् ॥८०३॥

---

797. c) C S′ °मर्षणामेति; D I_3 P_{1-3} SA °मर्ष नैवेति (for °मर्शो नैवेति suggested with St).

801. b) S′ चारयोः (for चाऽरयः).

802. a) $P_{1,3}$ I_3 SA दुद्रु°; C दुध्रू°; S′ दुधु° (for दुध्रु°). —c) S′ °नं चा° (for °ने वा°).

803. b) St $P_{1,2}$ °वर्ष° (for °वर्षि°).

नष्टोऽयं नैष भवितेत्यभीतेर्जल्पतो जनात् ।
वचो रोगी भिषक्त्यक्त इव शृण्वन् स विव्यथे ॥८०४॥

अप्यग्रोपस्थितं किंचित् तदादेशेन ढौकयन् ।
सविलासं सगर्वं च तमैक्षिष्टाऽनुगव्रजः ॥८०५॥

सोऽन्य एवाऽभवत् तस्मिन् क्षणे साहसिकोऽप्यहो ।
स्वगृहादपि निर्गन्तुं नाऽशकद् यद्भयाकुलः ॥८०६॥

यावदैच्छन् संघभेदाच्चलितुं डामरव्रजाः ।
स्वैरेव शस्त्रिभिस्तावन्निन्ये भूभृद् विसूत्रताम् ॥८०७॥

ते कृष्टशस्त्रा द्वाराणि रुन्धन्तो नृपमन्दिरे ।
प्रवासवित्ते लब्धव्ये प्रायं चक्रुः पदे पदे ॥८०८॥

ददद्धनं धनेशश्रीर्देयादप्यधिकं नृपः ।
तेषामभिमतो नाऽभूदवमानाभिलाषिणाम् ॥८०९॥

मर्त्तुं चिचलिषुस्तीर्थमृणिकैरिव सामयः ।
स रुद्ध्वा निखिलैर्देयं दापितोऽथ गतत्रपैः ॥८१०॥

स्थानपालैरपि प्रायकृद्भिराक्रम्य दापितः ।
धनं सुवर्णभाण्डादि चूर्णीकृत्य विशृङ्खलैः ॥८११॥

सवृद्धबालं नगरं ततः क्षुभ्यत्क्षणे क्षणे ।
सोऽभूदब्धिमिवोद्वृत्तं न संस्थापयितुं क्षमः ॥८१२॥

---

805. [c]) C S′ सर्वंगं (for सगर्वं).

806. [a]) C S′ सैन्य° (for सोऽन्य°).

807. [a]) C सङ्ग° (for संघ°). —[c]) C °भिः सर्वैर्नि°; S′ भि सर्वे नि° (for °भिस्तावन्नि°).

808. [b]) C S′ रुन्धतो; P_2 रुद्धन्तो (for रुन्धन्तो).

810. [a]) P_{1-3} I_3 S′ SA विचलि° (for चिचलि°). —[ab]) C °र्थं सृणिकैः; S′ $P_{2,3}$ °र्थसृणिकै° (for °र्थमृणिकै°).

812. [a]) P_2 °बाले (for °बालं).

एकदा प्रातरेवाऽन्यै रुद्धद्वारः स्वशस्त्रिभिः।
सर्वतः क्षोभमागच्छन्नगरं स व्यलोकयत् ॥८१३॥

ततः क्षोभं शमयितुं जनकं नगराधिपम्।
पुरभ्रमार्थमादिश्य चलितुं क्षणमैक्षत ॥८१४॥

कथंचिद् दानमानाभ्यां तानावर्ज्याऽपि शस्त्रिणः।
सावरोधः स संनद्धो राजधान्या विनिर्ययौ ॥८१५॥

अङ्गनात् तुरगारूढो बहिर्यावन्न निर्ययौ।
राजधान्यन्तरे लुण्ठिस्तावत् प्रारम्भि तस्करैः ॥८१६॥

अरुदन् केऽपि केऽप्युच्चैरनदन् केऽप्यलुण्ठयन्।
तद्भृत्यान् राज्यमुत्सृज्य तस्मिन् व्रजति शस्त्रिणः ॥८१७॥

विशृङ्खलस्त्रपाकोपशङ्काभिः शस्त्रिणां नृपः।
सहस्रैः पञ्चषैरासीद् व्रजन्ननुगतोऽध्वनि ॥८१८॥

वर्षे षण्णवते कृष्णषष्ठ्यां मार्गे विनिर्गतः।
याममात्रावशेषेऽह्नि सभृत्यो द्रोहविह्वलः ॥८१९॥

निर्जैर्हरद्भिरश्वादि त्यज्यमानः पदे पदे।
स प्रतापपुरं प्राप क्षपायामल्पसैनिकः ॥८२०॥

तिलकस्य पुरो गत्वा प्रातस्याऽग्रं च विश्वसन्।
तत्र बन्धोरिवाऽस्रूणि चिरं दुःखोल्बणोऽमुचत् ॥८२१॥

---

813. b) All Mss. read स शस्त्रिभिः (for स्वशस्त्रिभिः suggested with St).

816. a) P_2 I_3 SA आङ्ग° (for अङ्ग°).

817. a) C S′ °दद° (for °रुद°).

819. a) SA षण्णन°; P_{1-3} D षण्न°; C S′ षण°; I_3 षणन° (for षण्ण°). —b) C P_{1-3} I_3 °षष्ट्यां (for °षष्ठ्यां).

821. b) P_2 °स्याग्रे (for °स्याऽग्रं).

द्रोहं न कुर्यादेवं मे चिन्तयित्वेति सत्वरम् ।
वेश्म हुष्कपुरेऽन्येद्युस्तस्य च प्राविशत् स्वयम् ॥८२२॥

तद्गौरवेण स्नानादि कृत्वैच्छत् सैन्यसंग्रहम् ।
प्रविश्य क्रमराज्यं स कर्तुं भूयो जयोत्सुकः ॥८२३॥

गूढं युयुत्सून् कल्याणवाडादीनथ डामरान् ।
आनीय स पुरस्तस्य धैर्यभ्रंशमकारयत् ॥८२४॥

गृहात् तेन तया युक्त्या निष्कृष्टः स ततो ययौ ।
स्वीकुर्वन् स्वर्णदानेन दस्यून् मार्गविरोधिनः ॥८२५॥

प्रयान्तं तत एवौज्झीत् तिलकस्तत्सहोदरः ।
प्रयाणमेकमानन्दो दाक्षिण्यादन्वगात् तु तम् ॥८२६॥

भृत्यत्यक्तः स दानेन विक्रमेण च तस्करान् ।
अगान्मार्गेण शमयन्नायुश्शेषेण रक्षितः ॥८२७॥

त्राणं सिंहनखा द्रुमाद्रिगहनस्याऽऽरादरण्यस्य ये
तेषां बालगलाश्रयादपि भवेत् कालातिवाहः क्रमात् ।
ये दन्ताः करिणां रणप्रहरणं तेऽप्याप्नुयुर्दीव्यतां
क्रीडायां करताडनानि न दृढा शौर्यस्य रूढिः क्वचित् ॥८२८॥

जन्तूनां विक्रमत्यागयशःप्रज्ञादयो गुणाः ।
भवे चित्रस्वभावेऽस्मिन् न भवेयुरभङ्गुराः ॥८२९॥

भास्वानप्यौग्र्यमृदुतां भिन्नावस्थां दिने दिने ।
तां तामायाति जन्तूनां कः प्रभावेषु निश्चयः ॥८३०॥

---

823. c) C S′ प्राविशत् (for प्रविश्य). —d) All Mss. read भूयो जनो°; D suggests भूयोर्जनो° (for भूयो जयो° suggested with St).

824. a) C S′ गृहं युयुत्सु° (for गूढं युयुत्सून्). —b) SA °वाळा°; S′ °वंद्या°; C P_2 °वाडया° (for °वाडा°).

826. d) C S′ ताम् (for तम्).

828. a) D द्रमा° (for द्रुमा°). S′ °दिग° (for °द्रिग°). —c) S′ °करणे (for °हरणं). C S′ तेऽथा° (for तेऽप्या°).

830. a) P_3 I_3 °मृडतां (for मृदुतां). —b) D (before suggestion) SA P_{1-3} I_3 भिन्नोवस्थां (for भिन्नावस्थां).

अशक्नुवन्नट्टलिकामरिप्लुष्टां निरीक्षितुम्
मन्युनिश्शब्दसैन्योऽद्रिमारुरोह स लोहरम् ॥८३१॥

स्वं कलत्रमपि द्रष्टुं तत्राऽतित्रपयाऽक्षमः ।
शयनीयविमुक्ताङ्गस्तप्यते स्म दिवानिशम् ॥८३२॥

दत्तदीपादनिर्गच्छन्नन्तर्गेहाद् दिनेष्वपि ।
दाक्षिण्याद् दर्शनं प्रादाद् भृत्यानां भोजनक्षणे ॥८३३॥

विलेपनानि नाऽस्प्राक्षीन्नारुरोह तुरंगमान् ।
गीतनृत्तादि नैक्षिष्ट सुखगोष्ठीर्न चाऽऽदधे ॥८३४॥

ताम्यंस्ताटस्थ्यमौखर्यतैक्ष्ण्यद्रोहादि दर्शितम् ।
एकैकेन च स्मृत्वा स्मृत्वा देव्यै न्यवेदयत् ॥८३५॥

अन्वगात् स्वां भुवं त्यक्त्वा मामेतेऽन्वगुरित्यपि ।
निन्ये वृद्धिं परार्ध्यश्रीः स दाक्षिण्याद्धनार्पणैः ॥८३६॥

कश्मीरेषु गते तस्मिंस्तदैवाऽखिलमन्त्रिणः ।
पुराणराजधान्यग्रे ससैन्याः समगंसत ॥८३७॥

मन्त्र्यश्वारोहसामन्ततन्त्रिपौरादिसंमतः ।
तेषां जनकसिंहोऽभूदग्रणीर्नगराधिपः ॥८३८॥

स भिक्षोर्मल्लकोष्ठाद्यैराप्तैः कृतगतागतैः ।
विश्वासाय सुतभ्रातृसुतौ नीविं प्रदापितः ॥८३९॥

---

833. [c]) C °क्षिण्याद° (for °क्षिण्याद् द°).

834. [c]) C S′ °नृत्यादि (for °नृत्तादि).

836. [a]) St. Tr. suggests अनुगान् (for अन्वगात् also found in SL).

837. [c]) D (before suggestion) C P_{1-3} I_3 SA पुराणि; S′ पुराणे (for पुराण° suggested with St D).

839. [d]) C °दायि°; I_3 °दाप° (for °दापि°).

प्रावर्तत भयभ्रश्यत्स्त्रीबालाद्यावृते पुरे।
अराजकाऽथ रजनी सर्वभूतभयावहा ॥८४०॥

निहताः केऽपि मुषिताः केऽपि केऽप्यरिभिः पुरे।
दग्धागारा व्यधीयन्त दुर्बला राजवर्जिते ॥८४१॥

सैन्यैरन्येद्युरुन्नादैर्निरुद्धाखिलदिक्पथः ।
सिन्दूरारुणपुण्ड्राश्वसादिमण्डलमध्यगः ॥८४२॥

विकोशशस्त्रकदलीषण्डदुर्लक्ष्यविग्रहः ।
मृगेन्द्र इव लोकस्य भयकौतूहलावहः ॥८४३॥

वीरपट्टाञ्चलश्लिष्टैर्यौवनोद्रेचितैः कचैः ।
अबद्धैः शोभितः पृष्ठे जयश्रीबन्धशृङ्खलैः ॥८४४॥

कुण्डलद्योतिना स्निग्धधवलायतदृष्टिना ।
प्रत्यग्रश्मश्रुणा चारुचन्दनोल्लेखशोभिना ॥८४५॥

ताम्राधरेण वक्त्रेण श्रीसांनिध्याधिकत्विषा ।
पक्षपाति विपक्षाणामपि संपादयन्मनः ॥८४६॥

असेर्विकोशस्याऽन्तस्स्थां श्रियमश्वेन वल्गता ।
केसरच्छटया चाऽपि चामरेणेव वीजयन् ॥८४७॥

पदे पदे निवृत्ताश्वः सामन्तैरुपपादिताम् ।
स्वीकुर्वन्नर्हणां भिक्षुः प्राविशन्नगरं ततः ॥८४८॥

---

840. a) C S′ °भ्रव्य° (for °भ्रश्य°). S′ om. *cd*.

841. S′ om. *ab*. —c) C S′ दग्धगेहा (for दग्धागारा).

843. a) I_3 विशोक°; P_3 निकोश° (for विकोश°).

844. a) C °ञ्जल° (for °ञ्चल°).

845. cd) D C चारु च° (for चारुच°).

847. c) SA (without indicating a *lacuna*) D P_{1-3} I_3 om. चाऽपि.

848. d) After this *v.* कुलकम् .

तस्याऽर्भकस्य धात्रीव पृष्ठस्थो मल्लकोष्ठकः ।
प्रययावप्रगल्भस्य सर्वकार्योपदेष्टृताम् ॥८४९॥

अयं पितुः प्रियस्तेऽभूत् त्वमस्याऽङ्के विवर्धितः ।
राज्यस्याऽयं मूलमिति प्रत्येकं समदर्शयत् ॥८५०॥

गृहं जनकसिंहस्य प्राक्न्यावातयेऽविशत् ।
राजलक्ष्मीं स संप्राप्तुं राजधानीं ततः परम् ॥८५१॥

दूरनष्टे कुले तेन पुनरुद्वेचिते ययौ ।
बद्धास्थो गर्भगेऽपत्ये स्त्रीजनोऽनवहास्यताम् ॥८५२॥

दृष्टेन तादृशा भिक्षोरितिवृत्तेन शत्रुषु ।
चित्रस्थेष्वपि साशङ्का नोपहास्या जिगीषवः ॥८५३॥

प्रावर्तन्त धनाधीशश्रियः सुस्सलभूपतेः ।
कोशेन नीतशेषेण विलासा नवभूपतेः ॥८५४॥

वाजिवर्मासिभूयिष्ठां राजलक्ष्मीं विभेजिरे ।
राजडामरलुण्ठाकमन्त्रिणो यन्त्रणोज्झिताः ॥८५५॥

पुरे स्वर्ग इवाऽऽस्वादं भोगानामुपलेभिरे ।
दस्यवो ग्रामभोगार्हाः पिशाचा इव गह्वराः ॥८५६॥

आस्थाने न बभौ भूभृद् ग्रामीणैः सर्वतो वसन् ।
प्रलम्बकम्बलप्रायविलासावरणैः समम् ॥८५७॥

---

850. b) C S′ °द्धितः (for °र्धितः). —c) $P_{1,3}$ राज° (for राज्य°).
852. c) C S′ °भंके° (for °भंगे°).
853. b) St C °रिति वृत्ते° (for °रितिवृत्ते°). —c) S′ विव° (for चित्र°).
854. c) All Mss. except St P_3 कोषेण (for कोशेन).
855. d) $P_{2,3}$ यन्त्रि (for यन्त्र°).
856. d) C S′ गत्वराः (for गह्वराः).

भिक्षाचरस्याऽसंभाव्यप्रादुर्भावतया प्रथाम् ।
डामरा अवतारोऽयमित्यन्यां निन्यिरे प्रथाम् ॥८५८॥

राज्यस्याऽनन्यदृष्टस्य कर्तव्येषु मुमोह सः ।
अदृष्टकर्मेव भिषग् भैषज्यस्य पदे पदे ॥८५९॥

शनैर्जनकसिंहेन कृतभ्रातृसुतार्पणम् ।
कम्पनाधिपतिर्दत्तकन्योऽपि तमशिश्रियत् ॥८६०॥

जुङ्गो राजपुरीयस्य राज्ञः कटकवारिकः ।
पादाग्राधिकृतोऽद्राक्षीत् स्वार्थमर्थं न तु प्रभोः ॥८६१॥

सर्वाधिकारिणं राजलक्ष्मीर्बिम्बमशिश्रियत् ।
राजशब्दस्यैव पात्रमभूद् भिक्षाचरः परम् ॥८६२॥

वेश्यायत्तीकृतैश्वर्यः प्राकृताचारभागपि ।
अन्तरज्ञः सदसतां किंचिद् बिम्बस्तदाऽभवत् ॥८६३॥

द्वैमातुरो दर्यकस्य भ्राता साश्चर्यशौर्यभूः ।
नृपान्तरङ्गज्येष्ठत्वं ज्येष्ठपालोऽप्यशिश्रियत् ॥८६४॥

मन्त्रिणो भूतभिश्राद्यास्तस्य पैतामहा अपि ।
लक्ष्मीसरोजिनीभृङ्गा बहवोऽन्ये जजृम्भिरे ॥८६५॥

मुग्धे राज्ञि प्रमत्तेषु मन्त्रिषूग्रेषु दस्युषु ।
उत्थानोपहतं राज्यं नवत्वेऽपि बभूव तत् ॥८६६॥

---

861. [a]) C S′ जङ्गो (for जुङ्गो). —[d]) C S′ प्रभुः (for प्रभोः).

862. [a]) P_{1-3} I_3 SA राजा (for राज°). —[b]) SA लक्ष्मीबिम्बमाशिश्र°; P_2 लक्ष्मीबिंब°; I_3 लक्ष्मीर्विंवममिश्र° (for °लक्ष्मीर्बिम्बमाशिश्रि°).

863. [c]) All Mss. read अन्तरङ्गः (for अन्तरज्ञः suggested with D).

864. [a]) P_2 °तुरे (for °तुरो).

865. [a]) SA भूतबिश्चा°; C S′ भूतविश्वा°; D P_{1-3} I_3 भूतविश्शा° (for भूतभिश्रा° cf. *vv.* vii. 1696, viii. 94).

स्त्रीभिर्नवनवाभिश्च भोज्यैः प्राज्यैश्च रञ्जितः ।
भिक्षुर्नैक्षिष्ट कर्तव्यं सुखानुभवमोहितः ॥८६७॥

स सुखानुभवप्रावृण्णिद्रान्धो विजयोद्यमे ।
स्वैः प्रेरितः सभामध्ये स्वप्तुमैच्छन्मदालसः ॥८६८॥

दर्पेण सचिवे वाचं कथयत्यनुकम्पिकाम् ।
न स चुक्रोध मुग्धस्तु पितरीवाऽन्वरज्यत ॥८६९॥

निष्प्रतिष्ठैः सेव्यमानो वेश्योच्छिष्टैरशिष्टवत् ।
अट्टचेटोचिताश्चेष्टा विटैः प्रैर्यत सेवितुम् ॥८७०॥

पानीयरेखाप्रतिमस्थैर्यस्याऽखिलवस्तुषु ।
तस्याऽप्रमाणवचसः सेवां प्रणयिनो जहुः ॥८७१॥

यदूचुः सचिवास्तत्र तानन्ववोचन्न भूभृतः ।
वचः सुषिरगर्भस्य तस्य किंचित् समुद्ययौ ॥८७२॥

सचिवैः स्वगृहान्नीत्वा दत्तभोज्यः स मुग्धधीः ।
धनी विपन्नपितृक इव प्रमुषितो विटैः ॥८७३॥

आहारमुष्टिं बिम्बस्य गृहे बिम्बनितम्बिनी ।
तस्याऽश्वस्येव वडवा रागिणोऽग्रगताऽऽहरत् ॥८७४॥

वञ्चयित्वा दृशौ पत्युर्दर्शितैः स्वैरया तया ।
कुचकक्षकटाक्षैः स लुप्तधैर्यो व्यधीयत ॥८७५॥

---

868. ab) St $P_{2,3}$ I_3 °वृड्नि°; C °वृणि° (for °वृण्नि°).
870. b) $P_{1,3}$ SA वेश्यै°; P_2 वश्यै° (for वेश्यो°). —c) C S′ अद्धा (for अट्ट°).
871. d) P_1 om. प्रणयिनो जहुः .
872. ab) P_1 om. upto तानन्व. —b) C °चत; S′ °चत्त (for °चन्न).
874. a) St °ष्टोर्बिं°; SA $P_{1,3}$ I_3 °ष्टिर्बिं° (for °ष्टिं बि°). —c) SA $P_{1,2}$ I_3 °श्वेव (for °श्वस्येव).
875. c) P_2 I_3 °कक्ष्य° (for °कक्ष°).

पृथ्वीहरो मल्लकोष्ठश्चाऽन्योन्योद्भूतमत्सरौ ।
क्षोभं व्यधत्तां संरब्धौ राजधान्याः क्षणे क्षणे ॥८७६॥

स्वयं राज्ञा सुतोद्वाहं गृहान् गत्वाऽपि कारितौ ।
तावन्योन्यमुपैक्षेतां न मन्युं विक्रमोन्मदौ ॥८७७॥

अथ पृथ्वीहरगृहात् कृतोद्वाहः स्वयं नृपः ।
जातामर्षेण सुस्पष्टं मल्लकोष्ठेन तत्यजे ॥८७८॥

दुह्यज्जनककाणोऽपि संबन्धापेक्षयोज्झितः ।
विरागमोजानन्दादीन् निन्ये ब्राह्मणमन्त्रिणः ॥८७९॥

तटस्थो द्रोग्धृदुर्बुद्धिप्रायभृत्यविधेयधीः ।
विसूत्रव्यवहारत्वं निन्द्यत्वं च ययौ नृपः ॥८८०॥

डामरस्वामिके लोके प्राभवत् को न विप्लवः ।
ब्राह्मण्यो धर्षणं यत्र श्वपाकेभ्योऽपि लेभिरे ॥८८१॥

अराजकेऽथवा भूरिराजके मण्डले तदा ।
समस्तव्यवहाराणां स्फुटं तुत्रोट पद्धतिः ॥८८२॥

दीन्नारा भैक्षवे राज्ये निष्प्रचाराः पुरातनाः ।
तच्छतेन तु नव्यानामशीतेरभवत् क्रयः ॥८८३॥

राजपुर्यध्वना बिम्बं ससैन्यमथ पार्थिवः ।
लोहरं प्राहिणोत् कर्तुं सुस्सलास्कन्दमुन्मदः ॥८८४॥

तुरुष्कसैन्यमानिन्ये सोमपालेन सोऽन्वितः ।
साहायकाय सल्लारे विस्मये मित्रतां गते ॥८८५॥

877. c) All Mss. read °मुपेक्षेतां (for °मुपैक्षेतां suggested with St).

879. b) C S' °योर्ज्जितः (for °योज्झितः).

881. b) C S' प्रभवेत् ; P_2 प्राभवेत् (for प्राभवत्).

संदर्श्य पाशमेतेन बद्ध्वा क्रक्ष्यामि सुस्सलम् ।
इत्येक एकोऽश्वारोहस्तुरुष्कैः समकथ्यत ॥८८६॥

काश्मीरकखशम्लेच्छयोधव्यतिकरोऽभवत् ।
न केषां नाम संभाव्यो विश्वोत्पाटनपाटवः ॥८८७॥

भिक्षाचरः प्रयाते तु बिम्बे विगलिताङ्कुशः ।
न कासामव्यवस्थानां मूढः स्थानमजायत ॥८८८॥

स निमन्त्र्य निजं नीतो गृहं बिम्बावरुद्धया ।
भोगसंभोगदानेन धर्षण्या पर्यतोष्यत ॥८८९॥

कार्यापेक्षाऽपि तस्याऽऽसीन्न मन्त्रिस्त्रीसमागमे ।
कौलीनभीतेरासन्ननिपातस्य कथैव का ॥८९०॥

आद्यूनानुगुणं भोज्यं कुम्भकांस्यादिवादनम् ।
तत्र प्राकृतकामीव न स जिह्राय शीलयन् ॥८९१॥

शनैः शनैस्ततो नष्टावष्टम्भस्य महीपतेः ।
काले भोज्यमपि प्राप्यं नाऽऽसीद् गलितसंपदः ॥८९२॥

तादृक्प्रलोभक्रौर्यादिक्रान्तो यः प्रागगर्ह्यत ।
स सुस्सलोऽथ लोकानामभिनन्द्यत्वमाययौ ॥८९३॥

---

886. [b]) D (before corr.) P_{1-3} °द्ध्वा द्रक्ष्यामि; S′ °द्ध्वा क्रक्षामि; D suggests °द्ध्वाक्रक्ष्यामि (for °द्ध्वा क्रक्ष्याामि). —[c]) इत्येवमेको° is suggested (for इत्येक एको°). —[d]) St °ष्काणामकत्थत; P_1 °ष्का समकथ्यत; P_2 °ष्काणामकथ्यत; P_3 °ष्कस्ससकथ्यत; I_3 °ष्कामचकथ्यत; SA °ष्कामकथ्यत (for °ष्कैः समकथ्यत).

887. [a]) St (before corr. in corrigenda) काश्मीरि°; C S′ P_2 कश्मीर° (for काश्मीर°). —[d]) St (before corr.) °पाटबः (for °पाटवः).

890. [c]) S′ °भीतो° (for °भीते°).

891. [a]) P_{1-3} I_3 SA °गुणो (for °गुणं). —[c]) C S′ °कर्मैव (for °कामीव).

893. [c]) C S′ °लो हि; $P_{1,3}$ °लो वा (for °लोऽथ).

धनमानादिनाशं या विरक्तास्तस्य चक्रिरे ।
काङ्क्षन्ति स्म घनोत्कण्ठास्ता एवाऽऽगमनं प्रजाः ॥८९४॥

प्रत्यक्षदर्शिनोऽप्याऽपि साश्चर्या वयमस्य यत् ।
ताः प्रजाः कोपिताः केन केन भूयः प्रसादिताः ॥८९५॥

क्षणाद्वैमुख्यमायान्ति सांमुख्यं यान्ति च क्षणात् ।
न हेतुं कंचिदीक्षन्ते पशुप्रायाः पृथग्जनाः ॥८९६॥

ते मल्लकोष्ठजनकाद्यो दूतैर्विसर्जितैः ।
त्यक्तराज्यं पुनर्भूपं जयोद्यममजिग्रहन् ॥८९७॥

अक्षोसुवाग्रहारेऽथ लोकैष्टिक्कस्य लुण्ठते ।
तत्रत्या ब्राह्मणाः प्रायं नृपमुद्दिश्य चक्रिरे ॥८९८॥

तैश्चाऽन्यैश्चाऽग्रहारैश्च संश्रितैर्विजयेश्वरे ।
राजानवटिकाप्रायो नगरेऽपि न्यविक्षत ॥८९९॥

ओजानन्दादिभिर्मुख्यद्विजैरुत्तेजितास्ततः ।
गोकुलेऽपि व्यधुः प्रायं त्रिदशालयपर्षदः ॥९००॥

युग्यार्पितैः सितच्छत्रवस्त्रचामरशोभिभिः ।
विबुधप्रतिमावृन्दैः सर्वतश्छादिताङ्गनः ॥९०१॥

काहलाकांस्यतालादिवाद्यक्षोभितदिङ्मुखः ।
अदृष्टपूर्वो ददृशे पारिषद्यसमागमः ॥९०२॥

---

894. c) C S′ च सोत्क° (for घनोत्क°).
895. b) P_3 तत् (for यत्).
896. c) P_3 केचि° (for कंचि°).
897. d) P_2 °ग्रहत् (for °ग्रहन्).
898. b) St. Tr. तिलकस्य (for टिक्कस्य).
899. b) P_3 °श्रिते° (for °श्रितै°). —c) C S′ °प्राणे (for °प्रायो).
900. a) D P_{1-3} I_3 ओज° (for ओजा°). —d) C S′ °पार्षदः (for °पर्षदः).
901. d) P_1 °श्चादिता°; $P_{2,3}$ I_3 °च्छादिता° (for °श्छादिता°).
902. a) St (before corr.) °तालादी° (for °तालादि°).

ते सान्त्व्यमाना भूभर्तुर्दूतैरुत्सेकवादिनः ।
न विना लम्बकूर्चं नो गतिरित्यब्रुवन् वचः ॥९०३॥

ते हेलया लम्बकूर्चाख्यया सुस्सलभूपतिम् ।
तं निर्दिशन्तोऽमन्यन्त क्रीडापुत्रकसंनिभम् ॥९०४॥

प्रायं प्रेक्षितुमायातैः पौरैः सह दिने दिने ।
अमन्त्रयत कां कां न व्यवस्थां पर्षदां गणः ॥९०५॥

नृपापातभयात् क्षोभं मुहुर्मुहुरुपागतैः ।
पारिषद्यैश्च पौरैश्च योद्धुमास्थीयतोद्धतम् ॥९०६॥

वश्यं जनकसिंहस्य नगरं तन्मतेन तत् ।
सज्जं सुस्सलदेवस्य कृत्स्नमानयनेऽभवत् ॥९०७॥

प्रायाद् वारयितुं पूर्वमग्रहारद्विजान्नृपः ।
प्रययौ विजयक्षेत्रं तत्राऽऽसीच्च हतोद्यमः ॥९०८॥

तन्मध्ये निखिलांस्तत्र डामरांस्तिलकोऽब्रवीत् ।
व्यापादयेति तं तच्च सत्त्वैकाग्रो न सोऽग्रहीत् ॥९०९॥

राज्ञ एव मुखाद् बुद्ध्वा लवन्यास्तद्विशश्वसुः ।
तस्मिन् पृथ्वीहरमुखास्तत्रसुस्तिलकात् पुनः ॥९१०॥

भागिनेयं प्रयागस्य क्षत्तारं लक्ष्मकाभिधम् ।
बन्धुमैच्छन्नृपोऽस्निग्धं प्रययौ स तु सुस्सलम् ॥९११॥

---

903. a) St C S′ $P_{2,3}$ I_3 सान्त्व° (for सान्त्व्य°). —c) D लाम्ब° (for लम्ब°).
905. d) C पार्षदां; S′ पाषदां (for पर्षदां).
906. d) C S′ °तौद्ध° (for °तोद्ध°).
907. a) C S′ ततो (for वश्यं).
910. a) C S′ P_{1-3} I_3 SA बद्ध्वा (for बुद्ध्वा).
911. b) C S′ लक्षका°; P_3 लक्ष्मणा° (for लक्ष्मका°).

ततः प्रविश्य नगरं संनिपात्याऽखिलं जनम् ।
अकारणविरक्तानां पौराणां प्रददौ सभाम् ॥९१२॥

युक्तमप्युक्तवांस्तत्र हतोक्तिः शठबुद्धिभिः ।
पौरैः स चक्रे नास्त्येव भेषजं विप्लवस्पृशाम् ॥९१३॥

अत्रान्तरे सोमपालबिम्बाद्या लोहरे स्थितम् ।
योद्धुं सुस्सलभूपं ते सर्वे पर्णोत्समाययुः ॥९१४॥

तं च पद्मरथो नाम राजा कालिञ्जरेश्वरः ।
मैत्रीं संस्मृत्य कल्हाद्यैरायया तत्कुलोद्भवः ॥९१५॥

सोऽथ शुक्लत्रयोदश्यां वैशाखे बलिभिः समम् ।
तैर्मानी सुस्सलो राजा संग्रामं प्रत्यपद्यत ॥९१६॥

प्रेक्षकैर्वर्ण्यतेऽद्याऽपि स पर्णोत्सान्तिके रणः ।
तस्याऽद्भुतोऽवमानाग्निक्षालनप्रथमक्षणः ॥९१७॥

कुतोऽप्येत्य निजस्फारस्ततः प्रभृति भूपतिम् ।
तमशून्यं पुनश्चक्रे मृगेन्द्र इव काननम् ॥९१८॥

भयस्खलितपाशानां कालपाशैः समागमम् ।
स चकार तुरुष्काणां क्षणात् पुष्कलविक्रमः ॥९१९॥

मातुलं सोमपालस्य निन्ये कवलतां बली ।
रणे तत्कोपवेतालो वितोलासरितस्तटे ॥९२०॥

---

912. [b]) D (before suggestion) St P_{1-3} S′ संनिपत्या°; C I_3 स निपत्या° (for संनिपात्या° suggested with D).

913. [d]) P_{1-3} I_3 भैषजं (for भेषजं).

914. [b]) All Mss. read लहरे (for लोहरे suggested with St, cf. *v.* viii. 831). D C S′ P_3 स्थिताः (for स्थितम्). —[d]) P_3 पूर्णो° (for पर्णो°).

919. [c]) $P_{1,3}$ I_3 °ष्कानां [sic] (for °ष्काणां).

920. [c]) S′ रणं (for रणे).

किमन्यदल्पसैन्यः सन् बहूनपि स तान् व्यधात् ।
हतविद्रुतविध्वस्तान् यथाऽऽत्मपरिपन्थिनः ॥९२१॥

काश्मीरकाणामौचित्यं किं नाऽभूत् स्वामिनो द्दुः ।
एकस्य ये रणं नष्टाः कुकीर्तिमपरस्य च ॥९२२॥

तुरुष्कैः सह यातेऽथ सोमपाले गतत्रपाः ।
बिम्बं काश्मीरकास्त्यक्त्वा राजान्तिकमशिश्रियन् ॥९२३॥

ह्यो धनूंषि शिरांस्यद्य नमयन्तोऽद्भुताशयाः ।
कुलप्रभोः पुरः स्पष्टं न ते धृष्टा ललज्जिरे ॥९२४॥

आगच्छद्भिस्ततः पौरैर्डामरैश्च समं नृपः ।
प्रतस्थे दिवसैर्द्वित्रैः कश्मीराभिमुखः पुनः ॥९२५॥

राजपुत्रः साहदेविः कल्हणो विशतः प्रभोः ।
डामरान् क्रमराज्यस्थान् संगृह्याऽग्रेसरोऽभवत् ॥९२६॥

य एव प्रथमं राजसैन्याद् भिक्षुमशिश्रियत् ।
स एव विम्बो राजानं तमुत्सृज्य समाययौ ॥९२७॥

अन्ये जनकसिंहस्य संमता मन्त्रितन्त्रिणः ।
प्रत्युद्यन्तो व्यलोकयन्त नृपतिं निरपत्रपाः ॥९२८॥

काण्डिलेत्राभिधग्रामजन्मा शस्त्री सुलक्षणः ।
भाङ्गिले कश्चिदभवच्छून्ये क्रान्तोपवेशनः ॥९२९॥

---

921. [a]) D St C S′ $P_{1,2}$ I_3 स; P_3 सु (for सन् suggested). —[c]) D C S′ SA $P_{1,2}$ I_3 °ध्वस्तय°; P_3 °ध्वस्ताय° (for °ध्वस्तान् य° suggested with St).
922. [a]) C S′ कश्मीर; St (before corr.) P_3 काश्मीरि° (for काश्मीर°). —[c]) $P_{1,3}$ नष्टः (for नष्टाः).
923. [c]) St (before corr.) P_3 काश्मीरि° (for काश्मीर°).
927. [b]) $P_{2,3}$ °श्रयत् (for °श्रियत).
928. [c]) D °द्यान्तो; C S′ P_1 °च्यन्तो (for °द्यन्तो).
929. [d]) P_2 I_3 SA °वेदनः; S′ °वेशिनः (for °वेशनः).

भिक्षुर्वितीर्णमार्गं तं सुस्सलान्तिकगामिनः ।
लोकस्याऽत्रान्तरे जेतुं सहपृथ्वीहरो ययौ ॥९३०॥

जितवांस्तं बबन्धेच्छां निहन्तुं सुस्सलोन्मुखम् ।
क्रोधाज्जनकसिंहं च वार्तां तां संविवेद सः ॥९३१॥

नगरस्थेन तेनाऽथ पौराश्वारोहतन्त्रिणः ।
संघटय्याऽखिलान् भिक्षोः प्रातिपक्ष्यमगृह्यत ॥९३२॥

जानंस्तेनाऽऽवृतं राज्यं ततो भिक्षाचरो नृपः ।
पृथ्वीहरेणाऽनुयातो नगरं सहसाऽविशत् ॥९३३॥

सेतौ सदाशिवाग्रस्थे तत्सैन्यैः सह संगरम् ।
दृप्यज्जनकसिंहोऽथ सान्त्व्यमानोऽपि सोऽग्रहीत् ॥९३४॥

दृष्टं जनकसिंहस्य योधानां वल्गतां मदात् ।
अविशङ्क्य पराभूतिं मुहूर्तं सुभटायितम् ॥९३५॥

अलकेन समं पृथ्वीहरस्तद्भ्रातृसूनुना ।
अन्येन सेतुना तीर्त्वा तस्य सैन्यमनाशयत् ॥९३६॥

तन्त्र्यश्वारोहपौरेषु विद्रुतेषु सबान्धवः ।
नक्तं जनकसिंहोऽथ पलाय्य लहरं ययौ ॥९३७॥

भिक्षुपृथ्वीहरौ प्रातस्तत्पृष्ठग्रहणोद्यतौ ।
तत्पश्चात्तेऽश्ववाराद्या धृष्टा भूयोऽप्यशिश्रियन् ॥९३८॥

---

930. d) D सह पृ° (for सहपृ°).

931. d) St C S′ P_3 च विवे°; SA P_2 स विवे° (for संविवे°).

934. d) St P_2 I_3 सान्त्व° (for सान्त्व्य°); P_3 °माने सो° [om. ऽपि] (for °मानोऽपि सो°).

935. a) C S′ द्रष्टुं (for दृष्टं). —d) C S′ °तः समजायत (for °र्तं सुभटायितम्).

937. a) $P_{1,2}$ I_3 SA तन्त्र्यारोह° (for तन्त्र्यश्वारोह°).

938. d) D C S′ P_{1-3} पृष्टा (for धृष्टा).

क्षिप्त्वा क्षिप्रं स्वकक्षान्तर्विबुधप्रतिमा भयात् ।
ते पारिषद्यविप्राद्याः प्रायमुत्सृज्य विद्रुताः ॥९३९॥

शून्यानि सुरयुग्यानि रक्षन्तः केऽपि भिक्षुणा ।
प्रायान्निवृत्ता वयमित्युक्तवन्तो न बाधिताः ॥९४०॥

ह्यो जानके भैक्षवेऽद्य वल्गत्तुङ्गतुरङ्गमान् ।
दृष्टवन्तो वयं सैन्ये सादिनोऽद्याऽपि साद्भुताः ॥९४१॥

भिक्षुराजप्रदीपेन द्योतितः क्षणभङ्गिना ।
पैतृव्येणाऽधिकारेण स्यालस्तिलकसिंहजः ॥९४२॥

गते जनकसिंहेऽथ प्रतिपक्षानुसारिणाम् ।
विधातुं वेश्मभङ्गादि लब्धं भिक्षुमहीभुजा ॥९४३॥

अत्रान्तरे हुष्कपुरे नीतेषु तिलकादिषु ।
भङ्गं सुल्हणसिम्बाद्यैः समेतानन्तसैनिकैः ॥९४४॥

अग्रायातैर्मल्लकोष्ठजनकाद्यैः ससैनिकैः ।
अपरैरपि सामन्तैर्बलबाहुल्यशालिभिः ॥९४५॥

अन्वीयमानो दिवसैर्द्वित्रैराक्रान्तमण्डलः ।
विशांल्लहरमार्गेण विपक्षालक्षितोऽपतत् ॥९४६॥

नगरापणवीथ्यन्तर्हर्यारोहमुखान् पुरः ।
द्रोहयोधानुपायातांस्तदैवोज्झितसाध्वसः ॥९४७॥

---

939. [a]) D (before suggestion) St P_{1-3} S′ I_3 स्वकक्ष्या° (for स्वकक्षा°). —[d]) D P_1 °मृत्सृज्य (for °मुत्सृज्य).
941. [b]) S′ P_1 वला°; P_2 वह्ल° (for वल्ग°). —[c]) C S′ सैन्यैः (for सैन्ये).
942. [c]) C S′ पितृवित्ताधि°; SA P_3 पितृव्येणाधि°; D $P_{1,2}$ I_3 पितृव्येनाधि° (for पैतृव्येणाऽधि° suggested with St).
946. [d]) C S′ °पक्षापेक्षि° (for पक्षालक्षि°).
947. [b]) C S′ °हया° (for °र्हया°). C S′ P_{1-3} I_3 SA °खात् (for °खान्). —[d]) C S′ °स्तान् वीक्ष्यो° (for °स्तदैवो°).

वेष्टितालम्बकूर्चेन वक्त्रेण भ्रुकुटीभृता ।
कोपकम्पिततारेण फुल्लनासापुटस्पृशा ॥९४८॥

कांश्चित् संतर्जयञ्छिन्दन्नन्यान् भग्नांस्तथाऽपरान् ।
तीव्रातपश्यामवपुस्ताम्यन् काल इवोल्बणः ॥९४९॥

आशीर्घोषकृतां पुष्पवर्षिणां पुरवासिनाम् ।
पूर्वापकारिणां श्रेणीष्ववज्ञान्यस्तलोचनः ॥९५०॥

स्कन्धमात्रोपरिन्यस्तं कवचं हेलया दधत् ।
केशानन्तशिरस्त्रान्तनिस्सृतान् धूलिधूसरान् ॥९५१॥

पक्ष्ममालां च बिभ्राणः सकोशासिस्तुरंगिणाम् ।
आकृष्टखड्गमालानामन्तर्वल्गत्तुरंगमः ॥९५२॥

ससिंहनादैरुद्दामैर्भेरीभांकारनिर्भरैः ।
बलैर्भरितदिक्कोशः सुस्सलः प्राविशत् पुरम् ॥९५३॥

षड्भिः सद्वादशदिनैर्मासैर्ज्यैष्ठे सितेऽहनि ।
स सप्तनवताब्दस्य तृतीये पुनराययौ ॥९५४॥

राजधानीमप्रविष्टो भिक्षुं पूर्वपलायितम् ।
अन्विष्यन् क्षिप्तिकातीरे सलवन्यं व्यलोकयत् ॥९५५॥

सरित्पारं रिपौ प्राप्ते स सपृथ्वीहरो गतः ।
मार्गे लवन्यैर्मिलितैरन्यैः साकं न्यवर्तत ॥९५६॥

---

948. a) C S′ चेष्टितो (for वेष्टिता°). —b) SA P_{1-3} I_3 वस्त्रेण (for वक्त्रेण).
949. a) C S′ भिन्द° (for निन्द°). —b) D °भग्नां° (for °भग्नां°). —d) D C S′ P_2 °स्ताम्यत्काल° (for °स्ताम्यन् काल°).
950. a) C S′ °दोंष° (for °घोंष°). —c) C श्रेणि° (for श्रेणी°).
951. a) St न्यस्तं (for °न्यस्तं).
953. a) C स सिंह (for ससिंह). —c) P_2 °दिक्कोशैः (for °दिक्कोशः). After this *v.* कुलकम्.
955. d) All Mss. read सलवन्यो (for सलवन्यं suggested with St).
956. a) P_2 °पारे (for °पारं).

तं विद्राव्य रणे राजा बद्ध्वा प्रहृतिविक्षतम् ।
सिंहं पृथ्वीहरज्ञातिं राजधानीमथाऽविशत् ॥९५७॥

उपभोगैः सपत्नस्य तत्कालनिस्सृतस्य सा ।
अङ्किता मानिनस्तस्य वेश्येवोद्वेगदाऽभवत् ॥९५८॥

भिक्षुः संत्यज्य कश्मीरान् सह पृथ्वीहरादिभिः ।
ग्रामं पुष्याणनाडाख्यं सोमपालाश्रयं ययौ ॥९५९॥

प्रस्थिते डामरान् सर्वान् राजा स्वीकृत्य तु व्यधात् ।
खेर्यां वड्डात्मजं मल्लं हर्षमित्रं च कम्पने ॥९६०॥

पूर्वापकारं स्मरतो देशकालानपेक्षिणः ।
पूर्वविद्वेषिणस्तस्य न कृपां प्रतिपेदिरे ॥९६१॥

भिक्षुसंपर्कजं गन्धमपि सोढुमशक्नुवन् ।
भृत्येभ्यः खण्डशः कृत्वा द्वेषात् सिंहासनं ददौ ॥९६२॥

अनयोपार्जितां त्यक्तुमनीशा डामराः श्रियम् ।
समन्योश्च नृपाद् भीता नाऽत्यजन् विप्लवोद्यमम् ॥९६३॥

भिक्षुस्तु राज्यविभ्रष्टः सुहृदो विषये वसन् ।
उत्साहं सोमपालस्य दानमानैः पुनर्ययौ ॥९६४॥

विम्बः साहायकप्रार्थी विस्मयस्याऽन्तिकं गतः ।
तस्मिन् विरोधिभिर्बद्धे रणे धीरस्तनुं जहौ ॥९६५॥

---

958. P_1 om. *bc*. S′ om. *c*.

959. [c]) D C S′ I_3 P_{1-3} पुष्पा° (for पुष्या°).

960. [a]) St (after suggestion) C S′ ग्रस्थितो (for प्रस्थिते).

961. SA (without indicating the *lacuna*) St P_{1-3} I_3 SL om. *cd*.

965. [c]) D (before suggestion) P_{1-3} I_3 SA °बंद्धै; D (after suggestion) C S′ °बंद्धो (for °बंद्धे suggested with St).

भिक्षाचरो विम्बशून्यो भजन् दुर्नयपात्रताम् ।
अनैषीदवरुद्धात्वं तत्प्रियां तां गतत्रपः ॥९६६॥

निपत्य स्वल्पसैन्योऽपि ततः शूरपुरे बली ।
जित्वा पृथ्वीहरो वड्डात्मजं व्यद्रावयद् रणात् ॥९६७॥

तस्मिन् पलायिते भिक्षुं पुनरानीय सोऽविशत् ।
भुवं मडवराज्यानां दस्यूनां स्वचिकीर्षया ॥९६८॥

तत्रत्यैर्मङ्गजय्याद्यैर्डामरैः स्वीकृतैः समम् ।
जगाम विजयक्षेत्रं विजेतुं कम्पनापतिम् ॥९६९॥

जितस्तेनाऽऽहवे हर्षमित्रो निहतसैनिकः ।
विजयेश्वरमुत्सृज्य भीतोऽवन्तिपुरे ययौ ॥९७०॥

विजयक्षेत्रजास्तत्तत्पुरग्रामोद्भवा अपि ।
जना भयेन प्राविक्षन्नथ चक्रधरान्तिकम् ॥९७१॥

योषिच्छिशुपशुव्रीहिधनोपेतैरपूर्यत ।
स्थानं तत्तैश्च राज्ञश्च योधैः सायुधवाजिभिः ॥९७२॥

अन्वारूढैरथ स्पष्टं लोकोल्लुण्ठनलालसैः ।
ते भैक्षवैरवेष्ट्यन्त कटकैर्व्याप्तदिक्तटैः ॥९७३॥

तान् दारुमयवप्रौघद्वारगुप्ते सुरौकसः ।
अङ्गने तिष्ठतो हन्तुं बन्द्धुं वा नाऽशकन् द्विषः ॥९७४॥

---

966. a) $P_{1,2}$ I_3 SA °चरे (for °चरो). —b) C S′ सुन°; I_3 मुन्न° (for दुर्न°). —c) C S′ °रुद्धां यत् ; P_1 I_3 °रुद्धांधं (for °रुद्धात्वं).

967. d) $P_{2,3}$ SA विद्रा° (for व्यद्रा°).

969. a) C °यज्या°; S′ °यय्या° (for °जय्या°). —b) S′ स्वकृ° (for स्वीकृ°).

970. b) C S′ विहत°; P_1 निहित° (for निहत°). —d) P_3 °पुरं (for °पुरे).

973. a) C S′ स्पृष्टं (for स्पष्टम्). —c) D (before suggestion) C S′ P_{1-3} I_3 SA तैर्भै° (for ते भै° suggested with St D). C S′ P_3 °ष्टन्त (for °ष्ट्यन्त).

974. a) P_3 द्वार° (for दारु°). —c) $P_{1,2}$ I_3 SA आङ्गने (for अङ्गने).

तदन्तरस्थितं दग्धुं कर्पूराख्यं स्ववैरिणम् ।
कश्चित् कतिस्थलीग्रामजन्मा निर्गुटडामरः ॥९७५॥

पापो जनकराजाख्यस्तत्राऽग्निमुददीदिपत् ।
मूढस्ताद्दगपर्यन्तजन्तुसंहारनिर्घृणः ॥९७६॥

तमापतन्तं ज्वलितं ज्वलनं वीक्ष्य सर्वतः ।
भूतग्रामस्य सुमहान् हाहाकारः समुद्ययौ ॥९७७॥

विशत्कृतान्तवाहारिभियेव छिन्नबन्धनैः ।
अश्वैरसूचीसंचारा भ्रमद्भिर्जघ्निरे जनाः ॥९७८॥

प्राच्छाद्यत वलज्ज्वालाकरालैर्धूमराशिभिः ।
व्योम पिङ्गकचश्मश्रुजालैर्नक्तंचरैरिव ॥९७९॥

निर्धूमस्य विसारिण्यो ज्वाला हव्यभुजो दधुः ।
संतापद्रुतहेमाभ्रसुवर्णलहरीभ्रमम् ॥९८०॥

संतापविद्रुतव्योमचारिमौलिपरिच्युताः ।
रक्तोष्णीषा इव भ्रेमुर्ज्वालाभङ्गा नभोऽङ्गने ॥९८१॥

दीर्घदारुग्रन्थिभङ्गजन्मा चटचटारवः ।
तापप्रक्वाथ्यमानाभ्रगङ्गाघोष इवोद्ययौ ॥९८२॥

स्फुलिङ्गैः प्लोषवित्रस्तजन्तुजीवितसंनिभैः ।
अग्राहि गहनव्योममार्गभ्रमणसंभ्रमः ॥९८३॥

---

975. d) C S′ निर्गूढ°; St (suggests in Ed. but rejects in Tr.) निर्गुण° (for निर्गुट°).

976. After this *v.* P_3 adds युग्मम् .

979. a) C S′ °ज्ज्वालैः (for °ज्ज्वाला°). —d) D C S′ °ज्वालै° (for जालै°).

980. c) S′ °हंसा° (for °हेमा°).

981. c) C S′ °श्नीषा [sic.] (for °ष्णीषा).

शकुनैः शावसंचारशोकादाक्रन्दिभिर्नभः ।
मानुषैर्दह्यमानैश्च भूमिर्मुखरिताऽभवत् ॥९८४॥

भ्रातॄन् भर्तॄन्पितॄन्पुत्रानालिङ्गयाऽऽक्रन्दनिर्भराः ।
भीमीलितदृशो नार्यो निरदह्यन्त वह्निना ॥९८५॥

तदन्तरात् साहसिका ये केचिन्निरयासिषुः ।
बहिस्ते निहताः क्रूरैर्डामरैर्मृत्युचोदितैः ॥९८६॥

तावन्तो जन्तवस्तत्र व्यपद्यन्त तदा क्षणात् ।
स्विन्ना एव न ये दग्धास्तावताऽपि कृशानुना ॥९८७॥

अन्तश्शान्तेषु सर्वेषु बहिश्शान्तेषु हन्तृषु ।
क्षणादेव प्रदेशः स निश्शब्दः समजायत ॥९८८॥

वह्नेः कहकहाशब्दो ह्रस्वीभूतार्चिषः परम् ।
स्विद्यतश्च शवौघस्य श्रुतः सिमसिमाध्वनिः ॥९८९॥

विलीनासृग्वसामेदोनिष्ष्यन्दाः सरणीशतैः ।
प्रसस्रुर्विस्रगन्धश्च योजनानि बहून्यगात् ॥९९०॥

एकः सुश्रवसः कोपाद् द्वितीयो दस्युविप्लवात् ।
ईदृग्घुतवहाबाधो घोरश्चक्रधरेऽभवत् ॥९९१॥

भूतग्रामस्य संहारः संवर्त इव वह्निना ।
तादृक् त्रिपुरदाहे वा खाण्डवे तत्र वाऽभवत् ॥९९२॥

---

984. b) C S′ P_3 °कोशा°; P_2 °शौका° (for °शोका°). —c) P_2 मानुष्यै° (for मानुषै°).

988. b) C $P_{1,2}$ I_3 हर्तृषु (for हन्तृषु).

989. a) S′ °कहो°; P_3 °कका° (for °कहा°). —c) S′ शत्रौ°; P_3 शिवौ° (for शवौ°).

990. b) C °निःस्पन्दाः (for °निष्ष्यन्दाः).

991. a) cf *vv.* i. 224–270 (for सुश्रवसः). —c) P_{1-3} I_3 SA ईदृग्घु° (for ईदृग्घु°). —d) D भवत् ⌊sic⌋ (for ⌊अ⌋भवत्).

992. a) I_3 om. मस्य in °ग्रामस्य. SA °ग्रामसंहार°; C S′ °ग्रामादिसंहारः; $P_{1,2}$ °ग्रामससंहारः (for °ग्रामस्य संहारः). —d) I_3 खण्डवे (for खाण्डव).

पुण्येऽह्नि शुक्लद्वादश्यां नभसः कुकृतं महत्।
तद्भिक्षुः कृतवान् राज्यलक्ष्म्या भाग्यैश्च तत्यजे ॥९९३॥

सकुटुम्बेषु दग्धेषु तदानीं गृहमेधिषु।
पुरग्रामसहस्रेषु गृहाः शून्यत्वमाययुः ॥९९४॥

मल्लाख्यो डामरश्चिन्वञ्शवान् नौनगरोद्भवः।
प्रीतिं प्रातैस्तदीयार्थैः कापालिक इवाऽऽययौ ॥९९५॥

अवरूढोऽथ विजयक्षेत्रं भिक्षाचरस्ततः।
लब्ध्वा नागेश्वरं पापं यातनाभिरमीमरत् ॥९९६॥

गर्ह्यं पैतामहे देशे किं नाऽऽसीत् तस्य चेष्टितम्।
पितृद्रुहः स तु वधः सर्वप्रीतिकरोऽभवत् ॥९९७॥

गृहिणी हर्षमित्रस्य पत्यौ त्यक्त्वा पलायिते।
पृथ्वीहरेण संप्राप्ता विजयेशाङ्गनान्तरात् ॥९९८॥

निमित्तभूतमेतादृक्प्रजासंहारवैशसम्।
स्वं निन्दन् सुस्सलो राजा ततो योद्धुं विनिर्ययौ ॥९९९॥

संवेगात् पाप्मनः शीघ्रं निरयक्लेशभुक्तये।
प्राप्तो जनकराजेन वधोऽवन्तिपुरान्तिके ॥१०००॥

यत्कृते क्रियते कर्म लोकान्तरसुखान्तकम्।
स मूढैः सुलभापायः कायश्चित्रं न गण्यते ॥१००१॥

---

993. a) P_2 शुक्ले (for शुक्ल°).
995. b) P_3 संख्या° (for मल्ला°). D $P_{2,3}$ °न्नौना°; C °न्नन्ना°; P_1 °न्नौन्ना°; SA °न्नौग°; S′ °न्नगन्ना°; (for °न् नौन° suggested with St, cf. v. vii. 358). —c) C S′ प्राप्तः (for प्रातैः).
996. a) C S′ °रोद्धा° (for °रूढो°). —c) P_2 °श्वरे (for °श्वरं).
999. b) D suggests °वैशसे (for °वैशसम्).
1000. d) P_3 °पुरान्तरे (for °पुरान्तिके).

कम्पनाधिपतिं सिम्बं कृत्वा डामरमण्डलम् ।
चकर्ष विजयक्षेत्रादन्यतोऽपि ततो नृपः ॥१००२॥

शमालां प्रययौ पृथ्वीहरो मडवराज्यतः ।
विजित्य मल्लकोष्ठेन त्याजितो निजमण्डलम् ॥१००३॥

क्षिप्ताः केचिद् वितस्तायां केचिच्चक्रधराङ्गने ।
अक्रियन्ताऽग्निसात्क्रष्टुमशक्या बहवः शवाः ॥१००४॥

क्रमराज्येऽथ कल्याणवाडादीन् रल्हणोऽजयत् ।
आनन्दोऽनन्तजस्तत्र ततो द्वाराधिपोऽभवत् ॥१००५॥

शूले प्रमापितं सिंहं नयन् पृथ्वीहरो बली ।
सार्धं जनकसिंहाद्यैरयुध्यत् क्षितिकातटे ॥१००६॥

तीर्थं प्रस्थाप्यमानेषु विपन्नास्थिष्विहाऽस्त्यहः ।
भाद्रे मास्येकमबलाक्रन्दिताक्रान्तदिक्पथम् ॥१००७॥

हतवीराबलाक्रन्दमुखरे नगरान्तरे ।
पृथ्वीहराहवे सर्वैर्दिवसैरन्वकारि तत् ॥१००८॥

अथाऽऽयातो यशोराजस्यालः शूरो दिगन्तरात् ।
श्रीवको विदधे राज्ञा खेरीकार्याधिकारभाक् ॥१००९॥

1002. [a]) P_2 विंबं (for सिम्बं).

1003. [c]) SA (without indicating a *lacuna*) I_3 om. कोष्ठे.

1004. [d]) C °शक्तया (for °शक्या).

1005. [b]) D °वाड्या°; C S' P_1 °वारा°; SA °वाळा°; P_3 °वाऽधा° (for °वाडा°, cf. *v.* viii. 824). C S' St रिल्ह° (for रल्ह°).

1006. [a]) P_3 शूलप्र° (for शूले प्र°).

1008. [a]) D (before suggestion) C S' P_{1-3} I_3 SA °क्रान्त°; St (before corr. in corrigenda) °क्रान्द° (for °क्रन्द° suggested with D). After this *v.* युग्मम्.

1009. [a]) All Mss. read अथ यातो (for अथाऽऽयातो suggested with St D). —[b]) D C S' °श्यालः (for °स्यालः).

अप्रियं स लवन्यानां तेऽपि वा तस्य नाऽऽचरन् ।
कालं तु गूढसौहार्दैरन्योन्यस्याऽत्यवीवहन् ॥१०१०॥

पुनराश्वयुजे राजा शमालां निर्गतस्ततः ।
परैर्मनीमुषग्रामे युधि भङ्गमनीयत ॥१०११॥

नित्याभ्यासेन युद्धानां लब्धोत्कर्षो न्यदर्शयत् ।
सर्ववीराग्रणीर्भिक्षुस्तत्पूर्वं तत्र विक्रमम् ॥१०१२॥

तुक्कद्विजादयो मुख्या भिक्षुपृथ्वीहरादिभिः ।
आसारापातविवशा निहताः सौस्सले बले ॥१०१३॥

प्रधानवीरभूयिष्ठे सैन्यद्वन्द्वे न कोऽप्यभूत् ।
स वीरश्चरतः संख्ये भिक्षोरैक्षिष्ट यो मुखम् ॥१०१४॥

पृथ्वीहरस्य भिक्षोश्च संग्रामे भूरिवार्षिके ।
कादम्बरीपताकाख्ये द्वे अश्वे पीतपाण्डुरे ॥१०१५॥

आस्तामत्यद्भुते याभ्यामनेकतुरगक्षये ।
न विपन्नं प्रहृतिभिर्नाऽन्वभाव्यथवा क्रमः ॥१०१६॥

सैन्यानां संकटे त्राणमश्रान्तिरविकत्थनः ।
अभूत् क्लेशसहो वीरो नाऽन्यो भिक्षाचरात् क्वचित् ॥१०१७॥

योधानां सौस्सले सैन्ये विद्रवेषु न कश्चन ।
त्राणं बभूव तेनैते बहवो बहुधा हताः ॥१०१८॥

नवेषु डामरानीकाः केचिद् भङ्गेषु सैनिकाः ।
भिक्षाचारगजेन्द्रेण कलभा इव पालिताः ॥१०१९॥

1010. [d]) D C S′ °स्य न्यवी°; P_{1-3} I_3 °स्यान्यवी° (for °स्याऽत्यवी°).
1011. [b]) C °मालान्नि (for °मालां नि°).
1014. [a]) S′ $P_{1,2}$ I_3 °यिष्टे (for °यिष्ठे). —[d]) C S′ °रक्षिप्रियोन्मुखः (for °रैक्षिष्ट यो मुखम्).
1017. [c]) I_3 °महो (for °सहो).
1019. [a]) D suggests °नीकात् (for °नीकाः found in all Mss.).

नाऽन्यस्योत्थानशीलत्वं दृष्टं पृथ्वीहरात् तदा ।
स्वयं यो भैक्षवे द्वारे जजागार प्रतिक्षपम् ॥१०२०॥

ततः प्रभृत्यभूद् गोता पुरः पश्चाच्च सर्वदा ।
विश्वेदेवा इव श्राद्धे युद्धे भिक्षुर्महाभटः ॥१०२१॥

आहवे साहसं कुर्वन् सर्वतः सोऽभ्यधान्निजान् ।
एवमस्खलितस्थैर्यमुपपत्तिमसंत्यजन् ॥१०२२॥

न मे राज्याय यत्नोऽयं पर्याप्तं दुर्यशः पुनः ।
कृत्ये प्रसक्तं पूर्वेषां व्यवसायो व्यपोहितुम् ॥१०२३॥

अनाथा इव ते नाथा विशां व्यापादनक्षणे ।
ज्ञात्वा नष्टं कुलं नाथवद्भ्यो नूनं स्पृहां दधुः ॥१०२४॥

इति मत्वा सोढकष्टश्चेष्टे सुदृढनिश्चयः ।
दूयमानोऽस्मि दायादुःखदायी दिने दिने ॥१०२५॥

नास्त्येवाऽप्राप्तकालस्य विपत्तिरिति जानतः ।
कस्य साहसवैमुख्यमुत्पद्येत यशोऽर्थिनः ॥१०२६॥

किं कार्यगतिकौटिल्यैरुक्तैस्तान्यथवा कथम् ।
न वदामः प्रतिज्ञाय स्वयमार्षेऽध्वनि स्थितिम् ॥१०२७॥

सोत्कर्षपौरुषाद् भिक्षोरशङ्किषत डामराः ।
ततो दायादविच्छेदं नाऽस्याऽकृषत जातुचित् ॥१०२८॥

1020. [a]) S′ °दीनत्वं (for °शीलत्वं). —[d]) S′ °क्षय° (for °क्षप°).
1021. [c]) D St $P_{1,3}$ °देव इव (for °देवा इव). P_3 श्रान्ते (for श्राद्धे). —[d]) P_2 I_3 °भटाः (for °भटः).
1022. [c]) P_2 °स्खलितं (for °स्खलित°).
1023. [c]) I_3 St SA प्रसक्तुं (for प्रसक्तं also found in SL). —[d]) All Mss. read व्यवसायं (for व्यवसायो suggested with St. Tr.).
1025. [a]) SA_1 gloss स्वयं (for सोढकष्टश्चेष्टे).
1026. [a]) P_{1-3} I_3 SA °वप्राप्त° (for °वाऽप्राप्त°).
1027. [b]) C °रुत्थै° (for °रुक्तै°).
1028. [d]) St जातु चित् (for जातुचित्).

प्राग्राज्याधिगमाद् राज्ञामन्येषां राजबीजिनः ।
चिन्तयन्तो व्यवहृतिं व्युत्पद्यन्ते शनैः शनैः ॥१०२९॥

पितुः पितामहस्याऽथ न दृष्टं तेन किंचन ।
अत एवाऽभजन्मोहं राज्यं संप्राप्तवान् पुरा ॥१०३०॥

तत् स भूयोऽपि चेदाप्स्यत् कैव वार्ता विपाटने ।
साक्षेपं वीक्षितुं जाने न दैवेनाऽप्यशक्यत ॥१०३१॥

जानंल्लवन्यकौटिल्यं प्रमादात् स हतेऽहिते ।
प्राप्नुयां राज्यमित्याशां बद्ध्वाऽहान्यत्यवाहयत् ॥१०३२॥

दस्यूनां सुस्सलो राजा मेने तत्स्वहितं मतम् ।
जिगीषुर्नीतिविक्रान्त्योः प्रयुक्तौ लिप्सुरन्तरम् ॥१०३३॥

युद्धे स्वान्स स्मरन्वैरं नाऽपासीत् तेन तेऽभजन् ।
नाऽस्मिन् विश्वासमेतस्माद्धेतोर्नाऽस्याऽभवज्जयः ॥१०३४॥

इत्थं नानामतैः पक्षप्रतिपक्षैरुपेक्षितम् ।
राष्ट्रं निखिलमेवाऽगात् सर्वतः शोचनीयताम् ॥१०३५॥

यत्संबन्धाद् विटपिनिवहैर्निग्रहव्यग्रवन्य-
व्याधप्रत्तानलपरिभवः कोऽपि नन्वन्वभावि ।
हा धिग् दन्ती विघटनपरः सोऽपि माद्यन्नमीषां
लभ्यं श्रेयो विधिविधुरितैर्नाऽन्यतो न स्वतोऽपि ॥१०३६॥

1031. [a]) D C S′ °दीक्षेत् ; $P_{1,2}$ °दाक्ष्येत् ; I_3 SA °दाप्स्येत् (for °दाप्स्यत्). —[c]) All Mss. except SL read सापेक्षं (for साक्षेपं). After this *v.* चक्कलकम् .

1032. [b]) C S′ हितेऽहितम् (for हतेऽहिते).

1033. [c]) All Mss. read जिगीषो° (for जिगीषु° suggested with St). —[d]) D SA $P_{1,2}$ I_3 प्रयुक्तो लिप्तरन्तरम् ; C प्रयत्नो लिप्यनन्तरः; S′ प्रयत्नो लिप्तनन्तरम् ; P_3 प्रयुक्तेर्लिप्सुरन्तरम् (for प्रयुक्तौ लिप्सुरन्तरम् suggested with St).

1035. [a]) C S′ पक्षैः (for पक्ष°).

1036. [c]) C S′ धात्रा (for दन्ती). —[d]) D C श्रेयोवि° (for श्रेयो वि°).

द्वैराज्ये प्रभवत्येवमकाण्डपतितैर्हिमैः ।
विवशं सुस्सलक्ष्माभृदजयद् भैक्षवं बलम् ॥१०३७॥

पुष्याणनाडं भूयोऽपि भिक्षुपृथ्वीहरौ गतौ ।
अन्यैर्लवन्यैर्भूभर्तुर्नतिर्दत्तकरैः कृता ॥१०३८॥

सिम्बोऽपि कम्पनाधीशो व्यधाद् विजितडामरः ।
सर्वां मडवराज्योर्वीं वीरः शमितविप्लवाम् ॥१०३९॥

तावत्याऽपि विपक्षाणां शान्त्या शीतलतां गतः ।
पूर्ववैरं स्वपक्षाणां प्रादुश्चक्रे स भूपतिः ॥१०४०॥

जिघांसौ कथिते राजन्युल्हणेन पलायितः ।
मल्लकोष्ठः सोऽपि कोपाद् राज्ञा राष्ट्रात् प्रवासितः ॥१०४१॥

अनन्तात्मजमानन्दं बद्ध्वा द्वाराधिकारिणम् ।
व्यधत्त सैन्धवं प्रज्जिनामानं राजबीजिनम् ॥१०४२॥

गतोऽथ विजयक्षेत्रं सिम्बेन सहितोऽविशत् ।
नगरं तं च विश्वस्तं बद्ध्वा कारागृहेऽक्षिपत् ॥१०४३॥

अनुस्मृतिमहावात्याप्रेरितोऽमर्षपावकः ।
आचचाम क्षमावारि तस्य भृत्यान् दिधक्षतः ॥१०४४॥

सिंहथक्कनसिंहाभ्यामनुजाभ्यां सहाऽवधीत् ।
शूलेऽधिरोप्य सिम्बं स रोषावेशविलुप्तधीः ॥१०४५॥

1037. b) D C S′ °मकाण्डाप°; I_3 °सकाण्डप° (for °मकाण्डप°).

1038. a) P_{1-3} I_3 SA पुष्यान°; D C S′ पुष्पाण° (for पुष्याण°).

1040. c) S′ पूर्वापरं (for पूर्ववैरं). St P_1 I_3 °पक्ष्याणां (for °पक्षाणां).
—d) St $P_{2,3}$ I_3 °क्रेथ (for °क्रे स).

1041. a) C S′ जिघांसु° (for जिघांसौ).

कम्पने श्रीवकं चक्रे सुज्जि प्रज्ञेः सहोदरम् ।
बद्ध्वा जनकसिंहं च राजस्थाने न्ययोजयत् ॥१०४६॥

आप्ताश्च मन्त्रिणश्चाऽऽसंस्तस्य वैदेशिकास्ततः ।
स्वदेशजस्तु सोऽभूद् यो लोहरस्थं तमन्वगात् ॥१०४७॥

अथ सर्वेऽपि साशङ्कास्तं त्यक्त्वाऽशिश्रियन्रिपून् ।
शतैकीयः कश्चिदासीद् राजधान्यां नृपाश्रितः ॥१०४८॥

तेनाऽप्रतिसमाधेयो भूयः शान्तेऽप्युपद्रवे ।
इत्थमुत्थापितोऽनर्थो न पुनर्यः शमं ययौ ॥१०४९॥

एकाक्षेपे परेऽपि स्युर्यत्र भृत्या विशङ्किताः ।
तत्राऽपराधे प्राज्ञस्य राज्ञोऽवज्ञैव शस्यते ॥१०५०॥

माघेऽथ मल्लकोष्ठाद्यैराहूताः पुनराययुः ।
ते शूरपुरमार्गेण भिक्षुपृथ्वीहरादयः ॥१०५१॥

वितस्तापरिखाक्षिप्ता भूरगम्या द्विषामियम् ।
इति प्रायान्नवमठं त्यक्त्वा राजगृहं नृपः ॥१०५२॥

वर्षेऽष्टानवते चैत्रे डामरेषु युयुत्सुषु ।
अभ्येत्य मल्लकोष्ठेन प्रागेवाऽग्राहि संगरः ॥१०५३॥

सोऽश्ववारैः सह रणं चकार नगरान्तरे ।
नृपावरोधैः सौधाग्रादालोकितमथाऽऽकुलैः ॥१०५४॥

1048. b) St त्यक्त्वाध्यश्र°; P_{1-3} I_3 त्यक्त्वाधिश्र°; SA त्यक्ताधिश्र° (for त्यक्त्वाऽशिश्रि°).

1049. b) C S′ $P_{1,2}$ I_3 भूयश्चा° (for भूयः शा°).

1050. a) D °क्षेपेप° (for °क्षेपे प°).

1051. ab) SA P_2 °कोष्ठाद्ये आहू°; C °कोष्टाद्या आहू°; P_1 I_3 कोष्टाद्यै आहू° (for °कोष्ठाद्यैराहू°). —c) C S′ शूराः पु° (for शूरपु°).

1053. b) C S′ रुरु° (for युयु°).

भिक्षुणा क्षितिकातीरे स्कन्धावारो न्यबध्यत।
रामेण वानरी सेना यथा पाथोनिधेस्तटे ॥१०५५॥

नृपोद्यानाद् द्रुमान् निन्युरिन्धनाय महानसे।
दूर्वाङ्कुरान्मन्दुराभ्यो वाहभोज्याय डामराः ॥१०५६॥

पृथ्वीहरस्तु संगृह्णन् दस्यून् मडवराज्यजान्।
चकार विजयक्षेत्रे यावत् कटकसंग्रहम् ॥१०५७॥

तावत् प्रज्जिमुखान्मल्लकोष्ठयुद्धाय भूपतिः।
आदिश्याऽदादवस्कन्दं वैशाखे साहसोन्मुखः ॥१०५८॥

अकस्मात् पतिते तस्मिन् हतावष्टम्भविक्षताः।
प्रययुः सेतुमुल्लङ्घ्य जीवाश्वस्ताः कथंचन ॥१०५९॥

नगरं मल्लकोष्ठाजिव्यग्रे प्रज्जावथाऽविशत्।
पृथ्वीहरानुजः सुज्जिं निर्जित्य मनुजेश्वरः ॥१०६०॥

परं पारं वितस्तायाः सेतुच्छेदादनाप्नुवन्।
अर्वाचि तीरे स गृहान् दग्ध्वाऽगात् क्षितिकां ततः ॥१०६१॥

लवन्यैर्नगरं प्राप्तं मत्वा सुस्सलभूपतिः।
आययौ विजयक्षेत्रात् सैन्यमुत्थाप्य विह्वलः ॥१०६२॥

1055. [b]) St (before corr. in corrigenda) P_{1-3} I_3 SA स्कन्दावारं; St (after suggestion) स्कन्धावारं; S′ स्कन्धवारं (for स्कन्धावारो). SA (without indicating a *lacuna*) D St P_{1-3} I_3 om. *cd*.

1056. [c]) I_3 om. न्मन्दु.

1058. [c]) SA $P_{1,3}$ I_3 C S′ °दावव°; P_2 °दवव° (for °दादव°).

1059. [b]) $P_{1,2}$ I_3 SA °विक्षतः (for °विक्षताः). —[d]) D C S′ जीव° (for जीवा°).

1060. [b]) P_2 I_3 प्रज्ञा°; S′ प्रजा°; P_3 प्राज्ज° (for प्रज्जा°).

1061. [a]) St P_{1-3} I_3 °स्तायां (for °स्तायाः). —[d]) $P_{1,2}$ I_3 SA दग्ध्वाग्रा° (for दग्ध्वागा°).

अहंपूर्विकयाऽरातिशङ्कार्तैश्च निजैर्बलैः ।
पीडितस्तस्य गम्भीरासिन्धुसेतुरभज्यत ॥१०६३॥

स कृष्णषष्ठ्यां ज्यैष्ठस्य तस्याऽसंख्यश्चमूचयः ।
यथाऽग्निना चक्रधरे तथा तत्राऽम्भसा मृतः ॥१०६४॥

भुजमुद्यम्य शमयन् सैन्यानां संभ्रमं नृपः ।
त्रस्तैर्भ्रष्टैस्तथा पृष्ठे पतितः सरिदन्तरे ॥१०६५॥

अनभ्यस्ताम्बुतरणैराश्लिष्य ब्रुडितोऽसकृत् ।
तरदायुधविद्धाङ्गः स निस्तीर्णः कथंचन ॥१०६६॥

अनुत्तीर्णं बलं त्यक्त्वा पारे सामन्तसंकुलम् ।
सहस्रांशेन सैन्यस्य तीर्णेनाऽनुगतो ययौ ॥१०६७॥

संत्यक्तानन्तसैन्योऽपि सोऽवष्टम्भमयो नृपः ।
प्रविश्य नगरं मल्लकोष्ठमुख्यान् रणेऽग्रहीत् ॥१०६८॥

विजयस्याऽथ जननी सिल्लाख्या स्वामिनोज्झितम् ।
निनाय देवसरसं सैन्यं तद् विजयेश्वरात् ॥१०६९॥

साऽथ पृथ्वीहरेणैत्य हता तत्रोपवेशने ।
टिक्कश्च दत्तो भूपालसैन्यं विद्रावितं च तत् ॥१०७०॥

परं व्यायामविद्याविद् विद्रुते निखिले बले ।
द्विजः कल्याणराजाख्यः समरेऽभिमुखो हतः ॥१०७१॥

मन्त्रिडामरसामन्तसंकुलात् सौस्सलाद् बलात् ।
पृथ्वीहरेणाऽगृह्यन्त बद्ध्वा वृन्दानि शस्त्रिणाम् ॥१०७२॥

1063. [b]) C S′ °संक्रान्तै°; P_2 I_3 °शंकातै° (for °शङ्कार्तै°). —[d]) C S′ गम्भीरः (for गम्भीरा°)

1065. [a]) C S′ सुजावु°; P_1 सुवासु° (for भुजमु°). —[c]) P_3 °भ्रंष्टं (for °भ्रष्टै°). S′ P_1 I_3 पृष्टे (for पृष्ठे).

1066. [c]) C S′ तरसायुद्ध° (for तरदायुध°).

1068. S′ om. *ab*. —[b]) D C ययौ (for नृपः).

1069. [b]) C S′ मिल्ला° (for सिल्ला°). C S′ °नोर्ज्जि° (for °नोज्झि°).

अन्वगात् स वितस्तान्तं यावत्तान्विद्रुतान् बलात्।
ओजानन्दद्विजादींश्च बद्ध्वा शूले व्यपादयत् ॥१०७३॥

मन्त्रिणो जनकश्रीवकाद्या राजात्मजास्तथा।
तीर्त्वाऽद्रिं विषलाटायां शरणं प्रययुः खशान् ॥१०७४॥

इत्थं पृथ्वीहरो लब्धजयः संगृह्य डामरान्।
जिगीषुर्भिक्षुणा साकं नगरोपान्तमाययौ ॥१०७५॥

भूयोऽपि मानुषाश्वौघसंहर्ता सर्वतस्ततः।
रणः प्रववृते प्राग्वत् पुरे रुद्धस्य भूपतेः ॥१०७६॥

निर्निरोधः पथाऽनेन नृपावसथ इत्यभूत्।
सैन्ये मडवराज्यानां स्वयं पृथ्वीहरोऽग्रणीः ॥१०७७॥

तत्तत्सामन्तकुलजैर्वीरैः काश्मीरकैर्भटैः।
समेतं डामरकुलं दुर्जयं सर्वतोऽभवत् ॥१०७८॥

काश्मीरकाः शोभकाद्याः काकवंश्याः सहस्रशः।
प्रख्याता भैक्षवे पक्षे रत्नाद्याश्चाऽपरेऽस्फुरन् ॥१०७९॥

नदतः स्वबलाद् वाद्यं तुमुलं शृण्वतोन्मिषत्।
पृथ्वीहरेणाऽगण्यन्त वाद्यभाण्डानि कौतुकात् ॥१०८०॥

हित्वा भूर्यथ तूर्यादि परिच्छेत्तुं स कौतुकी।
श्वपाकदुन्दुभीभाण्डशतानि द्वादशाऽशकत् ॥१०८१॥

1073. [ab]) C S′ °स्तान्तर्या°; P_3 °स्तान्तया° (for °स्तान्तं या°).
1074. [d]) C S′ स्वशान् (for खशान्).
1078. [d]) C S′ सर्वता° (for सर्वतो°).
1079. [a]) P_3 काश्मीरि° (for काश्मीर°).
1080. [a]) D P_2 वाद्य° (for वाद्यं). —[b]) C S′ °ता मिषात् (for °तोन्मिषत्).
1081. [c]) P_3 °द्वन्द्व° (for °दुन्दु°).

तथा विनष्टसैन्योऽपि त्रिंशद्विंशैर्नृपात्मजैः ।
मितैः स्वदेशजैश्चाऽरीन् प्रतिजग्राह सुस्सलः ॥१०८२॥

राजन्याविच्छटिकुलोद्भूतावुदयधन्यकौ ।
चम्पावल्लापुराधीशावुदयब्रह्मजज्जलौ ॥१०८३॥

ओजो मल्हणहंसानां धुर्यो हरिहडौकसः ।
क्षत्रिकाभिञ्जिकास्थानसव्यराजादयस्तथा ॥१०८४॥

विडालपुत्रा नीलाद्या भावुकान्वयसंभवाः ।
रामपालः सहजिको युवा तस्य च नन्दनः ॥१०८५॥

नानावंश्याः परेऽप्युग्रसंग्रामव्यग्रताजुषः ।
पुरोपरोधसंनद्धानरुन्धन् सर्वतो रिपून् ॥१०८६॥

तनूजनिर्विशेषेण रिल्हणेन महीभुजः ।
रणाग्रेसरताऽग्राहि विजयाद्यैश्च सादिभिः ॥१०८७॥

स्वयमुद्यमिना राज्ञा वर्मणेव निजौ भुजौ ।
सुज्जिप्रज्जी पाल्यमानावभूतां रणकर्मठौ ॥१०८८॥

ताभ्यां साधारणीकुर्वन् राज्योत्पत्तिं महीपतिः ।
स महाव्यसने तस्मिन् सम्यगूढधुरोऽभवत् ॥१०८९॥

तत्पक्षा भागिकशरद्भासिमुम्मुनिसङ्गटाः ।
कलशाद्याश्च कुशला विपक्षक्षोभणेऽभवन् ॥१०९०॥

1083. b) C °धान्यकौ; S′ °दान्यकौ (for °धन्यकौ).

1084. a) SA_1 D तेजोमल्ह°; C S′ तेजःसल्ह°; I_3 P_{1-3} ओजोसल्ह° (for आजा मल्ह° also found in SA_1 in marg. SL). —c) St (after corr. in corrigenda) क्षत्रिकाभिञ्जिका°; SL क्षत्रियभिङ्क्षिका°; S′ क्षत्रि.भिज्जिका°; P_2 क्षत्रिकाभिञ्शिका°; P_3 क्षत्रिकाभिञ्जिका° (for क्षत्रिकाभिञ्जिका°).

1085. c) P_3 साह° (for सह°).

1086. c) P_3 °संरु° (for °संन°). After this *v.* P_3 adds चक्कलकम्.

1090. b) St (before suggestion) D C S′ P_{1-3} I_3 °मुङ्गटाः; St suggests °मुङ्गजाः; SL °सुंगटाः (for °सगटाः suggested with St. Tr. cf. *vv.* vii. 589; viii. 2178, 2183).

भूभर्तुष्टकविषये लवराजस्य नन्दनः ।
आसीत् कमलियश्चाऽस्य संग्रामाग्रेसरः प्रभोः ॥१०९१॥

प्रहारं बलिनस्तस्य चामरध्वजशोभिनः ।
प्रभिन्नस्येव नागस्य हयारोहा न सेहिरे ॥१०९२॥

अनुजः सङ्गिकः पृथ्वीपालो भ्रातुः सुतोऽस्य च ।
पाञ्चालाः फाल्गुनस्येव पार्श्वरक्षित्वमाययुः ॥१०९३॥

एतावद्भिर्भृत्यरत्नै राष्ट्रेऽपि कुपितेऽजयत् ।
भूरिस्वर्णार्पणोपात्तैर्वाजिभिश्च महीपतिः ॥१०९४॥

तत्र तत्राऽऽहवे सोऽपि बभ्रामाऽसंभ्रमो नृपः ।
उत्सवे गृहमेधीव मण्डपे मण्डपे स्वयम् ॥१०९५॥

तस्य हि व्यसनं त्रासहेतुः प्राभूदुपक्रमे ।
प्रवृद्धिं प्राप्तमभवद् धैर्यादाय्यथ धीमतः ॥१०९६॥

क्लैब्यकृद्भयमापाते मध्यपाते न तादृशम् ।
करक्षिप्तं यथा शीतं मज्जने न तथा पयः ॥१०९७॥

वैरिसैन्यतमो यत्र यत्र ज्योत्स्नेव निर्ययौ ।
सितासिता च भूभर्तुस्तत्र तत्राऽस्य वाहिनी ॥१०९८॥

एकदा कृतसंकेतास्तुल्यमाहवमेलके ।
महासरितमुत्तीर्य डामरा नगरेऽपतन् ॥१०९९॥

1091. c) C S′ कमल° (for कमलि°).
1093. c) D C S′ $P_{1,3}$ SA पाञ्चालौ; I_3 P_2 पांचालो (for पाञ्चालाः suggested with St). St SA फल्गु° (for फाल्गु°).
1094. c) P_1 I_3 °पांतै° (for °पात्तै°).
1096. c) C प्रवृद्धि° (for प्रवृद्धिं).
1097. b) C °पातेन (for °पाते न). —d) C मज्जनेन (for मज्जने न).

असीमनगरस्थानविभक्तकटको नृपः।
परिमेयाश्ववारस्तान् विशतः स्वयमाद्रवत् ॥११००॥

नाऽभजड्डामरानीकस्तेन विद्रावितो धृतिम्।
हेमन्तमरुता कीर्णपर्णराशिरिवेरितः ॥११०१॥

श्यानन्दः काककुलजो लोष्टशाह्यनलादयः।
अन्ये च डामरानीके ख्याता भूभृद्भटैर्हताः ॥११०२॥

लग्नाभिघातानानीतान् राज्ञः क्रूरस्य दृक्पथम्।
बहून् निजघ्नुश्चण्डाला इव राजोपजीविनः ॥११०३॥

भयाद् गोपाद्रिमारूढाश्चाऽपरे भैक्षवास्ततः।
आसन्नमृत्यवोऽभूवन् कटकैर्वेष्टिता द्विषाम् ॥११०४॥

यो मार्गो दुर्गमः पत्रिणोऽपि त्रातुं ततः स तान्।
तत्र व्यापारयामास भिक्षुर्मानी तुरंगमान् ॥११०५॥

कथंचित् पत्रिणा विद्धग्रीवस्तस्याऽग्रहीन्मुहुः।
पार्श्वे पृथ्वीहरो रूढिं छिन्नाश्चाऽन्ये महाभटाः ॥११०६॥

वेलाद्रिभिरिवोद्वृत्तैः सिन्धौ तैर्द्विषतां बले।
रुद्धे गोपाचलं त्यक्त्वा तेऽन्यानारुरुहुर्गिरीन् ॥११०७॥

अथोदतिष्ठद् वामेन राजानीकस्य वाहिनी।
मल्लकोष्ठस्य पत्यश्वक्षोभिताशेषदिक्तटा ॥११०८॥

1102. a) D C S′ I_3 $P_{1,2}$ आनन्दः (for श्यानन्दः). —b) C °शाख्य° (for °शाह्य°). C S′ °ह्रयः; P_1 I_3 °ह्यः (for °दयः).
1103. a) C S′ लग्नाभिधाना नानीता (for लग्नाभिघातानानीतान्). —c) C S′ °श्चाण्डाला (for °श्चण्डाला).
1104. b) St P_{1-3} अपरं (for °श्चाऽपरं). —d) C S′ P_{1-3} SA_1 दिशाम् (for द्विषाम्).
1108. a) C S′ °तिष्ठत् सुस्सेन; D (before suggestion) SA °तिष्ठ···मेन; P_{1-3} I_3 °तिष्ठ···सेन (for °तिष्ठद् वामेन suggested with St D).

अरिपृष्ठग्रहव्यग्रैस्तिष्ठन् स्वैर्वर्जितो बलैः ।
तदाऽज्ञाय्यखिलैरेष हतो राजेत्यसंशयम् ॥११०९॥

आपातं सुस्सलो राजा यावत् तस्याऽविसोढवान् ।
तावत् सावरजः प्रज्जिराजगाम रणाङ्गनम् ॥१११०॥

आषाढबहुलाष्टम्यां स हयारोहमेलकः ।
निजशस्त्रध्वनिप्रत्तसाधुवादो महानभूत् ॥११११॥

ताभ्यां स शमितो युद्धे ससूनुः ससमीरणः ।
दावो नभोनभस्याभ्यामिव प्राप्ताम्बुवृष्टिभिः ॥१११२॥

संग्रामबहले काले तादृगन्यो न कोऽप्यभूत् ।
यादृक् स दिवसो वीर्यशौटीर्यनिकषोपलः ॥१११३॥

अनीकिनी लाहरी सा विलम्बेनाऽऽययाविति ।
तेषामुत्पाटनेच्छूनां नाऽभवद्धस्तमेलकः ॥१११४॥

अन्योन्यस्य परिज्ञाता दिवसे तत्र संकटे ।
भिक्षोर्भूमिभृता शक्तिर्भूमिभर्तुश्च भिक्षुणा ॥१११५॥

ततो मडवाराज्यांस्तान् योद्धुं तत्रैव निर्दिशन् ।
क्षितिकारोधसा युद्धमेत्य पृथ्वीहरोऽग्रहीत् ॥१११६॥

दिगन्तरादथाऽऽयातो यशोराजो महीभुजा ।
मण्डलेश्वरतां निन्ये रिपून् प्रतिजिहीर्षुणा ॥१११७॥

1110. b) D तस्या (for तस्या°). —c) C S′ °वरज° (for °वरजः). P_1 I_3 SA प्राज्जि° (for प्रज्जि°).

1111. c) P_1 I_3 °शस्त्रा° (for °शस्त्र°).

1112. a) St P_{1-3} I_3 SA SL शमिते; St. Tr. suggests शमितां (for शमितो). —c) D °नमस्या° (for °नभस्या°). —d) All Mss. read प्रापांबु° (for प्राप्ताम्बु° suggested).

1113. a) S′ संग्रामे (for संग्राम°). C S′ °हुले (for °हले). —b) P_2 °गन्ये (for °गन्यो).

1114. b) P_1 I_3 SA विलम्भे° (for विलम्बे°).

1117. d) D C प्रति जि° (for प्रतिजि°). D suggests °जिगीषुणा (for °जिहीर्षुणा).

खेरीकार्ये पुरा तस्य लवन्या दृष्टविक्रमाः ।
रणेषु मुखमालोक्य शतशः प्रचकम्पिरे ॥१११८॥

कुङ्कुमालेपनच्छत्रहयादिप्रतिपत्तिदः ।
सर्वेषामभिनन्द्यत्वं तं राजा स्वमिवाऽनयत् ॥१११९॥

दीर्घोपप्लवयाप्येन दुस्स्थितः स्वास्थ्यलिप्सया ।
जनो बबन्ध तत्राऽऽस्थां नववैद्य इवाऽऽतुरः ॥११२०॥

ज्यायांसं पञ्चचन्द्राख्यं शेषाणां गर्गजन्मनाम् ।
नृपतिर्मल्लकोष्ठस्य प्रातिपक्ष्ये न्ययोजयत् ॥११२१॥

शिशुश्छुड्डाख्यया मात्रा पालितः स शनैः शनैः ।
आश्रीयमाणोऽनुचरैः पित्र्यैः किंचित् प्रथां ययौ ॥११२२॥

यशोराजानुयातेन राज्ञा जन्येषु निर्जिताः ।
केचित् तत्पक्षमभजन् भग्नाः केचिच्च डामराः ॥११२३॥

सभिक्षुः प्रययौ पृथ्वीहरः स्वमुपवेशनम् ।
मल्लकोष्ठोन्मुखो राजा निर्जगामाऽमरेश्वरम् ॥११२४॥

अत्रान्तरे मल्लकोष्ठो विसृज्य निशि तस्करान् ।
सदाशिवान्तिके शून्यां राजधानीमदाहयत् ॥११२५॥

पृथ्वीहरेण भूयोऽपि योद्धुमागच्छताऽसकृत् ।
प्रज्जिसुज्जिमुखा युद्धमकुर्वन् क्षितिकातटे ॥११२६॥

1120. a) C S′ °प्येष (for °प्येन).
1121. d) P_2 SA प्रातिपक्षे (for प्रातिपक्ष्ये).
1122. a) St °श्छुडा° (for °श्छुड्डा°).
1123. P_2 om. *cd*. —c) P_1 I_3 SA तान्पक्ष° (for तत्पक्ष°).
1124. P_2 om. *ab*. —a) D स भिक्षुः (for सभिक्षुः).

वारं वारं लवन्यः स नगरे निर्दहन् गृहान् ।
प्रायः शून्यत्वमनयद् वितस्तातीरमुत्तमम् ॥११२७॥

तत्र तत्र रणान् कुर्वन् प्राणसंदेहदायिनः ।
आचक्रामाऽथ नृपतिर्लहरं बहलैर्बलैः ॥११२८॥

सिन्धुं तरन्तो निस्सेतुं दृतिभङ्गाद् ययुर्जले ।
मन्दिरं कन्दराजाद्यास्तदीयाः समवर्तिनः ॥११२९॥

दरद्देशं ययौ मल्लकोष्ठो राज्ञा निराकृतः ।
सपुत्राऽप्यभजच्छुड्ढा प्रारोहं लहरान्तरे ॥११३०॥

आनिन्यिरे जय्यकेन लवन्येन नृपान्तिकम् ।
विषलाटान्तरात् तेऽथ जनकश्रीवकादयः ॥११३१॥

लहरारब्ध्यतिक्रान्तनिदाघः शरदागमे ।
शमालां निर्ययौ राजा यशोराजान्वितस्ततः ॥११३२॥

भग्नं पृथ्वीहरत्रासात् सैन्यं रक्षन् मनीमुषे ।
आजौ सज्जात्मजो डोम्बनामा राजसुतो हतः ॥११३३॥

युद्धं सुवर्णसानूरग्रामशूरपुरादिषु ।
कुर्वञ्शश्वन्नृपः प्राप पर्यायेण जयाजयौ ॥११३४॥

श्रीकल्याणपुराद् भङ्गं नीते पृथ्वीहरादिभिः ।
श्रीवके नागवट्टाद्या युधि प्रापुः प्रमापणम् ॥११३५॥

1127. c) P_2 °नयन् (for °नयद्).

1128. a) P_2 रणात् (for रणान्). —d) P_2 °हरे (for °हरं). C S′ °हलं ब° (for °हलैर्ब°).

1129. a) St P_{1-3} I_3 निःसेतुं तरतः सिन्धुं (for सिन्धुं तरन्तो निस्सेतुं). —b) C S′ °दयु° (for °द् ययु°).

1130. a) P_2 °देशे (for °देशं). —d) $P_{1,2}$ प्रारोहे (1or प्रारोहं).

1133. b) C S′ मुनी° (for मनी°). —c) C S′ डम्भ° (for डोम्ब°). —d) S′ हृतः (for हतः).

पौषे सुवर्णसानूराज्ञिहन्तुं मातुरन्तिकम् ।
टिक्कं स देवसरसं व्यसृजद् गर्गवल्लभाम् ॥११३६॥

स्वेन राज्ञश्च सैन्येन सहिता सा जिताहिता ।
अकस्मात् तत्र टिक्केन निपत्य निहता युधि ॥११३७॥

स स्त्रीवधं व्यधात् पापो द्वितीयमपि निर्घृणः ।
विशेषः कोऽथवा तिर्यङ्म्लेच्छतस्कररक्षसाम् ॥११३८॥

अबलां स्वामिनीं हन्यमानां त्यक्त्वा पलायिताः ।
चित्रं पशूपमाः शस्त्रं स्त्रीचक्रुर्लोहराः पुनः ॥११३९॥

ईषत् प्रागागतं शय्यां भूय एवोल्बणं नृपः ।
ज्ञात्वा मडवराज्यं स प्रययौ विजयेश्वरम् ॥११४०॥

मल्लराजतनूजानां निजा जिह्वेव दुर्जना ।
बभूव प्रभविष्णुत्वे व्यापदापातदूतिका ॥११४१॥

प्रायश्चाऽद्यतने काले भृत्यास्तितउवृत्तयः ।
दर्शयन्ति समुत्सार्य सारं दोषतुषग्रहम् ॥११४२॥

आबाल्यात् संस्तुताश्लीलवचःपरुषभाषितैः ।
निर्गौरवैर्यशोराजो राज्ञि तस्मिन् व्यरज्यत ॥११४३॥

स दुर्जातिर्महासैन्ययुतोऽवन्तिपुरस्थितः ।
अभजत् तत उत्थाय प्रतिपक्षसमाश्रयम् ॥११४४॥

1136. b) St °रन्तकम् (for °रन्तिकम्, cf. St. Tr. fn.).
1138. b) P_{1-3} I_3 SA द्वितीयामपि (for द्वितीयमपि).
1139. b) P_1 I_3 SA °यितः (for °यिताः).
1140. a) P_2 °गतां (for °गतं). —c) C मडर° (for मडव°).
1143. a) C °तः शील° (for °ताश्लील°).

वैरिपक्षगते तस्मिन् बलैः सर्वोत्तमैः समम् ।
विट्ठलो विजयक्षेत्रात् पलायिष्ट महीपतिः ॥११४५॥

धिग्राज्यं यत्कृते सोऽपि सेहे प्राणान् रिरक्षिषुः ।
मुष्णद्भिश्चौरचण्डालप्रायैः परिभवं पथि ॥११४६॥

माघे पलाय्य नगरं प्रविष्टः स वथाभिधे ।
भृत्ये द्रोग्धर्यशङ्किष्ट स्वेषामपि तनूरुहाम् ॥११४७॥

काश्मीरिके जनेऽशेषे निराशो नितरां ततः ।
अङ्कन्यस्तोत्तमाङ्गोऽभूत् प्रज्जिपक्षे क्षमापतिः ॥११४८॥

मुद्रिता रुद्रपालादिपूर्वराजात्मजप्रथा ।
प्रज्जिना विक्रमत्यागनयाद्रोहादिभिर्गुणैः ॥११४९॥

तेनैव वर्धिताऽमुत्र देशे विशदकीर्तिना ।
कालदौरात्म्यलुठिता प्रतिष्ठा शस्त्रशास्त्रयोः ॥११५०॥

अमन्त्रयत संगम्य यशोराजस्तु भिक्षुणा ।
नेच्छन्ति डामरा राज्यं तव विक्रमशङ्किताः ॥११५१॥

उत्पाद्य पुनरुत्पिञ्जं साधिष्ठानबला वयम् ।
राज्यं स्वयं ग्रहीष्यामो यास्यामो वा दिगन्तरम् ॥११५२॥

इति तैर्मन्त्रिते छुड्डां हतां श्रुत्वा दरत्पुरात् ।
आगत्य मल्लकोष्ठोऽपि प्राविशत् स्वोपवेशनम् ॥११५३॥

1146. a) C S' यद्गतः (for यत्कृते).
1147. b) P_2 सर्वथा (for स वथा°).
1148. a) St (before corr. in corrigenda) काश्मीरके (for काश्मीरिके). —b) All Mss. read निराशं (for निराशो suggested with St).
1153. a) P_2 I_3 SA °तैच्छुड्डां°; C S' °त च्छुड्डां; P_3 °तैः श्रुत्वा (for °ते छुड्डां). —b) P_3 च्छुड्डां हतां (for हतां श्रुत्वा).

वर्षोऽथ दुस्तरः ख्यात एकान्नशतसंख्यया।
सर्वभूतान्तकृल्लोके प्रावर्तत सुदारुणः ॥११५४॥

वसन्ते डामराः सर्वे प्राग्वन्मार्गैर्निजैर्निजैः।
आगत्य भूयो भूपालं नगरस्थमवेष्टयन् ॥११५५॥

धीरः सुस्सलदेवोऽपि पुनरासीद् दिवानिशम्।
निस्सीमसमरस्तोमारम्भसंरम्भभाजनम् ॥११५६॥

दाहलुण्ठनसंग्रामकर्मशौण्डैः स डामरैः।
प्राग्विप्लवेभ्योऽप्यधिको विप्लवः पर्यवर्धत ॥११५७॥

महासरित्पथे निर्निरोधे तस्थुर्विविक्षवः।
नगरं ते यशोराजभिक्षुपृथ्वीहरादयः ॥११५८॥

ततः कतिषुचिद् युद्धाहेषु यातेषु संगरे।
निजेनैव यशोराजः परकीयभ्रमाद्धतः ॥११५९॥

कल्यात्मजेन हि समं विजयाख्येन सादिना।
सौस्सलेन तु संग्रामे परावृत्तीः प्रदर्शयन् ॥११६०॥

विप्रलब्धैः सवर्णाश्वकवचावेक्षणान्निजैः।
शूलायुधिभिरुद्दामैः शूलाघातैरहन्यत ॥११६१॥

भिक्षो राज्यं समर्थोऽयं दातुं हर्तुं ततश्च नः।
भीत्या तैर्डामरैरेव स घातित इति श्रुतिः ॥११६२॥

यथैव तेन विश्वस्तः स्वामी द्रोहेण वञ्चितः।
तथैव प्राप विश्वस्तः क्षिप्रमेव वधं मृधे ॥११६३॥

1154. b) P_2 एको° (for एका°).
1157. d) SA_1 (before corr.) ......भूत् (for पर्यवर्धत).
1160. c) D °ले न (for °लेन).
1161. P_3 om. *ab*. —a) C S′ सुवर्णा°; D स वर्णा° (for सवर्णा°).
1162. b) St C S′ P_2 हन्तुं (for हर्तुं).
1163. b) C स्वामि° (for स्वामी).

पृथ्वीहरस्तत्र तत्र योधयित्वाऽथ डामरान् ।
क्षितिकारोधसा भूयोऽभ्येत्य संग्राममग्रहीत् ॥११६४॥

तत्राऽधिष्ठानयोधानां भिक्षुपक्षोपजीविनाम् ।
पौरुषं स्वपरोत्कर्षपरिभावि व्यभाव्यत ॥११६५॥

वह्निदानमहायोधसंहाराद्यैरुपद्रवैः ।
एकमेकमहस्तत्राऽनेहस्यासीद् भयावहम् ॥११६६॥

अतपत् तरणिस्तीक्ष्णमभीक्ष्णं भूरकम्पत ।
ववुर्द्रुमादीन् भञ्जन्तो महोत्पातप्रभञ्जनाः ॥११६७॥

पवनोत्थापितैः पांसुकूटैर्दध्रे महोद्धतैः ।
व्योम्नि प्रोत्तम्भनस्तम्भभङ्गिर्निर्घातदारिते ॥११६८॥

ज्येष्ठस्य शुक्लैकादश्यां प्रवृत्तेऽथ महारणे ।
काष्ठीले डामरा वह्निमेकस्मिन् प्रददुर्गृहे ॥११६९॥

सोऽग्निर्वा मारुतोद्धूतः प्रसरन् वैद्युतोऽथ वा ।
जज्वालैकपदे कृत्स्नं नगरं निरवग्रहः ॥११७०॥

दृष्टस्तदानीमेतावद् गजव्यूह इवाऽपतन् ।
माक्षिकस्वामिनो धूमो बृहत्सेतौ यदुत्थितः ॥११७१॥

अथेन्द्रदेवीभवनविहारं सहसाऽगमत् ।
ततो नगरमुज्ज्वालं क्षणात् सर्वमदृश्यत ॥११७२॥

1165. c) St. Tr. SL सुपरो° (for स्वपरो°). C S′ °रोत्कर्षं (for °रोत्कर्ष°).

1168. b) C S′ मुदोद्धतैः; St SA SL मदोद्धतैः (for महोद्धतैः also found in SL).

1169. a) St C S′ $P_{2,3}$ ज्यैष्ठस्य (for ज्येष्ठस्य).

1170. a) St C S′ SA SL $P_{2,3}$ मारुतोद्भूतः (for मारुतोद्धूतः).

1171. b) SA_1 (before corr.) D C S′ $P_{1,3}$ I_3 °वापतत् (for °वाऽपतन्).

1172. a) C °देवो (for °देवी°).

न भूमिर्न दिशो न द्यौर्धूमध्वान्ते व्यभाव्यत ।
हुडुक्कामुखचर्माभो दृश्यादृश्योऽभवद् रविः ॥११७३॥

धूमान्धकारसंच्छन्नास्तत प्रज्वलताऽग्निना ।
अपुनर्दर्शनायेव मुहुराविष्कृता गृहाः ॥११७४॥

वितस्ताऽदृश्यतोज्ज्वालवेश्माश्लिष्टतटद्वया ।
रक्ताक्तोभयधारेव कृतान्तस्याऽसिवल्लरी ॥११७५॥

ब्रह्माण्डोर्ध्वकवाटान्तसंस्पर्शात् पतितोन्नतैः ।
ज्वालाकलापैः संवृद्धैर्हैमच्छत्रवनायितम् ॥११७६॥

उच्चावचैर्युतो ज्वालाशृङ्गैर्हैमाद्रिसंनिभः ।
वह्निर्धूमच्छलान्मूर्ध्नि बभाराऽम्बुधरावलिम् ॥११७७॥

आविर्भवन्तो ज्वालाभ्यो गृहाश्चक्रुर्मुहुर्मुहुः ।
अदग्धा एत इत्याशां विमुग्धगृहमेधिनाम् ॥११७८॥

ज्वलितैस्तापितजला वितस्ता पतितैर्गृहैः ।
और्वोष्मवेदनाक्लेशं विवेद सरितां प्रभोः ॥११७९॥

दीप्तपक्षैः खगैः साकं ज्वलिता बालपल्लवाः ।
उद्यानद्रुमषण्डानां व्योमोड्डयनमादधुः ॥११८०॥

सुधासिताः सुरगृहा ज्वालासंवलिता व्यधुः ।
क्षयसंध्याम्बुदाश्लिष्टहिमाद्रिशिखरभ्रमम् ॥११८१॥

1174. b) C S′ P_3 °लिता° (for °लता°). —c) C S′ °यैव (for °येव).
1175. P_2 *om. bc.*
1177. a) C S′ °र्यतो; P_2 °र्हतो (for °र्युतो).
1178. a) P_{1-3} I_3 SA °भवन्त्यो (for °भवन्तो). —c) St (before suggestion) D C S′ $P_{1,2}$ I_3 SA °यत (for एत found in P_3).
1180. d) C S′ °माययुः (for °मादधुः).
1181. c) C S′ °समाश्लिष्ट° (for °म्बुदाश्लिष्ट°).

मज्जनावासनौसेतुकदम्बैः प्लोषशङ्कया ।
अपास्तैर्नगरस्याऽन्तर्ययुर्नद्योऽपि शून्यताम् ॥११८२॥

किमन्यन्मठदेवौकोगृहाट्टादिविवर्जितम् ।
नगरं क्षणमात्रेण दग्धारण्यमजायत ॥११८३॥

लोष्टावशेषे नगरे धूमश्यामो निरास्पदः ।
उच्चैरेको बृहद्बुद्धो दृष्टो दग्धद्रुमोपमः ॥११८४॥

सैन्येषु ज्वलितावासत्राणाय चलितेष्वथ ।
शतमात्रेण योधानां युतो भूभृदजायत ॥११८५॥

पारं गन्तुं वितस्तायाश्छिन्नसेतुं तमक्षमम् ।
लब्धरन्ध्रा द्विषोऽनन्ता निहन्तुं पर्यवारयन् ॥११८६॥

पुरं दग्धं स्वसुत्सन्नं प्रजा नष्टाश्च चिन्तयन् ।
आसन्नं मरणं राजा निर्विण्णो बह्वमन्यत ॥११८७॥

प्रस्थास्नुमथ तं प्रत्यङ्मुखमाशङ्क्य विद्रुतम् ।
संज्ञितोऽन्यैः क्मलियः क्व देवेत्यब्रवीद् वचः ॥११८८॥

संरम्भस्मितविद्योति चन्दनोल्लेखमाननम् ।
परिवर्त्य निरुद्धाश्वो धीरः स तमभाषत ॥११८९॥

तदद्य करवै भूमेः कृते हम्मीरसंगरे ।
चकार राजा भिज्जो यत् सोऽभिमानी पितामहः ॥११९०॥

1185. d) P_2 यतो (for युतो).
1187. a) D P_2 समुत्पन्नं; $P_{1,3}$ I_3 SA स्वमुत्पन्नं; C S′ स्वमत्यन्तं (for स्वमुत्सन्नं suggested with St).
1188. c) C S′ °मल° (for °मलि°). —d) C S′ द्रवे° (for देवे°).
1189. c) P_3 रुद्धाध्वो (for रुद्धाश्वो).
1190. a) C S′ तदन्यं (for तदद्य). —c) C S′ भिज्ञो (for भिज्जो).

कुतस्त्योऽप्येष दायादो यञ्ज्ञाताऽस्माकमस्मि वा।
स हर्षदेवोऽपश्यन्नः कार्यशेषं पलायितः ॥११९१॥

को नाम मानिनां पङ्क्तौ प्रविष्टोऽन्ते निजां भुवम्।
असिक्तां स्वाङ्गरक्तेन व्याघ्रः कृत्तिमिवोज्झति ॥११९२॥

इत्युक्त्वोदश्रयन् वल्गामुत्क्षिप्ताग्रमुखं हयम्।
संस्प्रष्टुमिच्छुः पाणिभ्यां कृपाणमुदनामयत् ॥११९३॥

ततो निगृह्य वल्गायां वाजिनं लवराजजः।
ऊचे भृत्येषु सत्स्वग्रे प्रवेशार्हो न भूभुजः ॥११९४॥

प्रहारविक्लवस्तिष्ठन् गृहादेकोऽभ्युपाययौ।
संकटे तत्र भूभर्तुः पृथ्वीपालोऽन्तिकं परम् ॥११९५॥

कौलपुत्र्यं स्तुवंस्तस्य वात्सल्यादेष भूपतिः।
स्वस्याऽऽत्तनिष्क्रियां मेने सेवाविष्कृत्युपक्रियाम् ॥११९६॥

अथ स्थितास्त्रिभिर्व्यूहैरहितास्तेऽकिरञ्शरान्।
हन्तुं वामेन ते योधाः सर्वे वाहनदुर्मदाः ॥११९७॥

स प्रेरयंश्च तुरगं दैवात् तस्य च तादृशः।
सहस्राण्यपि भूरीणि व्यधीयन्त विरोधिनाम् ॥११९८॥

अल्पसैन्यो द्विषत्खड्गमण्डलप्रतिबिम्बितः।
नृपः साहायकायातविश्वरूप इवाऽऽबभौ ॥११९९॥

1191. a) P_2 I_3 SA कुतस्त्येप्येष (for कुतस्त्योऽप्येष).
1192. c) D P_3 °रक्तां···; P_1 SA °रक्तां; C S′ St °रक्तात्कां; SL °रक्तां वा; P_2 °रक्तां च; I_3 °रक्तांगः (for °रक्तेन suggested with St. Tr.). —d) C S′ व्यालः (for व्याघ्रः).
1193. c) All Mss. read संप्रष्टु° (for संस्प्रष्टु° suggested with St).
1194. a) D P_{1-3} I_3 SA निर्गृह्य (for निगृह्य).
1196. a) C S′ °पुत्रं (for °पुत्र्यं). —c) SA °स्यात्तन्नि° (for °स्याऽऽत्तनि°).
1197. ab) D °व्यूहै राहि° (for °र्व्यूहैराहि°).

कलविङ्कानिव श्येनः कुरङ्गानिव केसरी ।
एको व्यद्रावयद् भूरीनरीन् सुस्सलभूपतिः ॥१२००॥

निपत्य पत्तीन् रुन्धानान् खुराग्राण्यपि वाजिनाम् ।
प्राहरंस्ते हयारोहा व्यूहव्याहतरंहसः ॥१२०१॥

बिम्बितज्वलनज्वालाः सर्व एव महाभटाः ।
हन्तव्याश्च हताश्चाऽऽसन्नस्रस्रोतोरुणा इव ॥१२०२॥

स द्विषां कदनं कृत्वा दिनस्याऽन्ते न्यवर्तत ।
बाष्पायमाणस्स्तोकाशं हव्याशेनोज्झितं पुरम् ॥१२०३॥

तादृशेऽप्यजिते तस्मिञ्जयाशागौरवं द्विषः ।
स चौज्झीद् रमणीयस्य विनाशाज्जीवितादरम् ॥१२०४॥

जाग्रन् स्वपंश्चलंस्तिष्ठन् स्नानश्नन्नथ सोऽरिभिः ।
निर्गच्छन्नित्यमाहूतो न कैरुद्वाष्पमीक्षितः ॥१२०५॥

वह्निनिर्दग्धसर्वान्नसंभारे मण्डलेऽखिले ।
दुस्सहः सहसैवाऽथ घोरो दुर्भिक्ष आययौ ॥१२०६॥

दीर्घविप्लवसंक्षीणसंचया डामरैर्वहिः ।
उत्तब्धोत्पत्तयो रुद्धसंचारा दग्धमन्दिराः ॥१२०७॥

अनाप्नुवन्तो विधुरे राज्ञि राजकुलाद् धनम् ।
दुर्भिक्षे तत्र सामन्ता अपि क्षिप्रं विपेदिरे ॥१२०८॥

1203. c) D C S′ P_2 °माणस्तोकाशं; $P_{1,3}$ I_3 °मानोस्तकाशं; St SA °माणोस्तकाशं (for °माणस्स्तोकाशं suggested). —d) C S′ °नोर्जितं (for °नोज्झितं).

1205. a) D C S′ P_{1-3} जाग्रत् (for जाग्रन्). —b) St P_{1-3} I_3 C S′ स्नन्न° (for स्नान°). —cd) C S′ °तोऽनेकै° (for °तो न कै°).

1206. d) C घोरं (for घोरो). C दुर्भिक्षम् (for दुर्भिक्षः).

1207. c) C तत्तुच्छो°; S′ तत्तोद्ध्रो°; P_1 I_3 तत्तब्धो° (for उत्तब्धो°).

1208. d) All Mss. read प्रपेदिरे (for विपेदिरे suggested with St).

वह्निनिष्ठ्यूतशेषाणि वेश्मान्यन्नाभिलाषिभिः ।
बुभुक्षार्तैर्जनैर्दत्तो ददाहाऽग्निर्दिने दिने ॥१२०९॥

सरितां सेतवो वारिसंसेकोच्छूनविग्रहैः ।
दुर्गन्धाः कुणपै रुद्धघ्राणैस्तीर्णास्तदा जनैः ॥१२१०॥

निर्मांसनरकङ्कालकपालशकलाकुला ।
उवाह सर्वतः श्वेता क्षितिः कापालिकव्रतम् ॥१२११॥

कृच्छ्रसंचारिणोऽकांशुश्यामक्षामोच्चविग्रहाः ।
व्यभाव्यन्त बुभुक्षार्ता दग्धस्थाणुनिभा जनाः ॥१२१२॥

अथ प्रबन्धयुद्धेन दिनैः कापीषुणा क्षतः ।
पृथ्वीहरो मृत इति श्रुतिर्मिथ्यैव पप्रथे ॥१२१३॥

गाढप्रहारविवशे तस्मिन् प्रच्छादिते जनैः ।
तां वार्तां श्रुतवान् राजा ननन्दाऽयुद्ध चोद्धतम् ॥१२१४॥

धीरेव पुंश्चली व्याजौत्सुक्यसंदर्शनेन तम् ।
जयश्रीर्लोभयन्त्यासीन्न तु भेजे समुत्सुकम् ॥१२१५॥

एकान्तवामहृदयो विधिरानुकूल्यं
मिथ्या प्रदर्श्य विशिनष्ट्यनुबन्धि दुःखम् ।
अन्धीकरोति भृशमभ्रमगं ज्वलन्तं
भास्वन्महौषधिभिदे प्रकटय्य वज्रम् ॥१२१६॥

दीर्घदुःखानुभूत्यन्ते यदीयागमनोत्सवम् ।
तपःफलमिव क्षमाभृत् काङ्क्षन्नासीन्मनोरथैः ॥१२१७॥

1209. [a]) C °निष्ठूत° (for °निष्ठ्यूत°). $P_{1,3}$ °शेषेण (for °शेषाणि).
1211. [b]) $P_{2,3}$ I_3 SA °कुलाः (for °कुला).
1212. [c]) $P_{1,3}$ I_3 °क्षान्ता (for °क्षार्ता).

वात्सल्येनाऽन्वितं प्रेम गौरवेण प्रियं वचः।
औचित्येन च दाक्षिण्यं साऽपत्यमिव या दधे ॥१२१८॥

तस्योपकरणीभूतविभूतिगृहिणी प्रिया।
तस्मिन् काले महादेवी विपेदे मेघमञ्जरी ॥१२१९॥

विनोदशून्यनिर्विण्णलोकयात्रं जगद्विदन्।
प्राणै राज्येन वा कृत्यं न स किंचिन्निरैक्षत ॥१२२०॥

सा भर्तुर्व्यसनोदन्तैः कृशा काश्मीरसंमुखी।
औत्सुक्याद् दत्तयात्राऽऽसीच्छान्ता फुल्लपुरान्तिके ॥१२२१॥

पूर्वं तद्दर्शनाशाया दुर्वार्तायास्ततोऽतिथिः।
भवन्नतोऽधिकं राजा दुःखावेगेन पस्पृशे ॥१२२२॥

राज्ञीमज्ञातपारुष्यतयाऽदूषितभक्तयः।
अनुसस्रुश्चतस्रस्ताः परिवारवरस्त्रियः ॥१२२३॥

अप्रत्यक्षे क्षयेऽप्यस्या भक्त्युद्रिक्तत्वमत्यजन्।
तेजो नामाऽभवत् सूदो वन्द्यो भृत्यान्तरेऽधिकम् ॥१२२४॥

स ह्यसंनिहितोऽन्यस्मिन्नह्नयायातो निजं शिरः।
तच्चितोपान्तरूढेन भङ्क्त्वा ग्राव्णाऽविशन्नदीम् ॥१२२५॥

आहवाह्वानसंरम्भैः शोकविस्मृतिकारिणः।
राज्ञो द्विषः कार्यवशादुपकारित्वमाययुः ॥१२२६॥

1219. After this *v.* तिलकम् .

1220. a) A_1 om. °ण्ण in निर्विण्ण.

1221. b) P_3 कश्मीर° (for काश्मीर°). —d) SA SL St C S′ P_{1-3} °च्छ्रांता (for °च्छान्ता). C S′ फल° (for फुल्ल°).

1225. d) C S′ P_1 भक्तया (for भङ्क्त्वा).

स राज्यमथ निक्षेप्तुकामो निर्विण्णमानसः ।
व्युत्क्रान्तशैशवं पुत्रमानिन्ये लोहराचलात् ॥१२२७॥

मण्डलेश्वरतां प्रज्जेर्भ्रातृव्यं भागिकाभिधम् ।
नीत्वा च गुप्तिमकरोल्लोहरे कोषदेशयोः ॥१२२८॥

वराहमूलं संप्राप्तमग्रायातः प्रियं सुतम् ।
आश्लिष्य विषयो राजा बभूवाऽऽनन्दशोकयोः ॥१२२९॥

राजसूनुस्त्रिभिर्वर्षैः प्रत्यायातः स्वमण्डलम् ।
स पश्यन् पितरं चाऽन्तरसुस्थितमतप्यत ॥१२३०॥

खेदनम्राननो लोष्टावशेषं सोऽविशत् पुरम् ।
अम्बुलम्बोऽम्बुदो दावनिर्दग्धमिव काननम् ॥१२३१॥

राज्येऽभ्यषिञ्चदाषाढस्याऽऽद्येऽह्नि जनकोऽथ तम् ।
अवादीद् राज्यतन्त्रं स कृत्स्नमुक्त्वास्रुगद्गदः ॥१२३२॥

श्रान्ताः पितृपितृव्यास्ते न यां वोढुमशक्नुवन् ।
धुरमुद्वह तां वीर त्वयि भारोऽयमर्पितः ॥१२३३॥

साम्राज्यप्रक्रियामात्रपात्रं पुत्रं नृपो व्यधात् ।
न त्वार्पिपदधीकारं तस्मिन् दैवविमोहितः ॥१२३४॥

अभिषेकविधावेव राजसूनोः शमं ययुः ।
पुरोपरोधावग्राहव्याधिचौराद्युपद्रवाः ॥१२३५॥

संपन्नसस्या च तथा देवी संववृते मही ।
दुर्भिक्षं श्रावणे मासि यथावत् प्रशमं ययौ ॥१२३६॥

1228. d) St $P_{2,3}$ कोश° (for कोष°).
1232. d) C °मुक्ता° (for °मुक्त्वा°). P_3 °गद्गदम् (for °गद्गदः).
1234. c) C नत्वा° (for न त्वा°).
1236. a) C S' °शस्या; P_3 °मस्यां (for °सस्या).

अत्राऽन्तरे सिंहदेवो रणे कुर्वन्नरिक्षयम् ।
कर्णेजपैर्जनयितुर्द्रोग्धाऽयमिति सूचितः ॥१२३७॥

कोपादविमृशंस्तत्त्वं स बन्द्धुं तं व्यसर्जयत् ।
कय्यात्मजं राजसूनुस्तत्तु प्रागेव बुद्धवान् ॥१२३८॥

कोपस्मितोत्कटस्याऽग्रे स तस्याऽप्रतिभोऽभवत् ।
निनाय रक्षामात्रेण पार्थिवाज्ञाममोघताम् ॥१२३९॥

अभुक्तवान् मनस्तापात् प्रत्ययोत्पत्तये पितुः ।
साकं तेन सुतोऽन्येद्युर्गन्तुं प्रावर्तताऽन्तिकम् ॥१२४०॥

आक्षेप्तुं शङ्कितोऽशक्य इति मत्वा स मन्त्रिभिः ।
मार्गान्न्यवर्तयत तं पिता मिथ्या प्रसादयन् ॥१२४१॥

अन्तस्तु निश्चिकायेति प्रविश्याऽतर्कितागमः ।
बद्ध्वैनं स्थापयिष्यामि कारायामिति सोऽनिशम् ॥१२४२॥

धिग् राज्यं यत्कृते पुत्राः पितरश्चेतरेतरम् ।
शङ्कमाना न कुत्राऽपि सुखं रात्रिषु शेरते ॥१२४३॥

पुत्रपत्नीसुहृद्भृत्या येषां शङ्कानिकेतनम् ।
विस्रम्भभूर्भूपतीनां कस्तेषामिति वेत्ति कः ॥१२४४॥

साह्याभिधानप्रख्यातकुग्रामोपान्तवासिनः ।
खलपालस्य तनयः स्थानकाख्यस्य कस्यचित् ॥१२४५॥

शैशवे पाशुपाल्येन वर्धितो डामरोद्धवैः ।
गृहीतशस्त्रस्तन्नित्यं क्रमाट्टिक्कस्य लब्धवान् ॥१२४६॥

1238. a) All Mss. read °विमृषं° (for °विमृशं° suggested with St). —d) C °स्ततः (for °स्तत्तु).

1242. b) C S' प्रविश्य° (for प्रविश्या°).

1243. P_1 om. *cd*.

1246. c) D C S' °शस्त्रं तन्नित्यं; °स्सान्निध्यं or °स्साहित्यं is suggested (for °स्तन्नित्यं).

प्रथमाब्दात् प्रभृत्यात्तदूत्यो भूभर्तुरासताम् ।
प्रययावुत्पलो नाम वैरिविच्छेदमिच्छतः ॥१२४७॥

स हि भिक्षाचरं टिक्कमथ व्यापादयेत्यमुम् ।
जगादाऽङ्गीकृतैश्वर्यदानष्टिकोपवेशने ॥१२४८॥

कृतप्रतिश्रवं तस्मिन्नर्थे तं च महर्द्धिभिः ।
दानैरुपाचरद् गञ्जपतिनाम्नाऽप्ययोजयत् ॥१२४९॥

भोगलोभप्रभुद्रोहचिन्तादोलायमानधीः ।
स कार्यं परिहार्यं वा न कृत्यं निश्चिकाय तत् ॥१२५०॥

प्रासोष्टाऽपत्यमत्रान्तस्तद्वधूः कार्यतो नृपः ।
ततश्च प्राहिणोत् तस्यै पितेव प्रसवोचितम् ॥१२५१॥

सा तस्याऽत्युपचारस्य कारणं परिशङ्किता ।
पतिं पप्रच्छ निर्बन्धात् सोऽपि तस्यै व्यवर्णयत् ॥१२५२॥

न कार्यः स्वामिनो द्रोहः कृते वाऽस्मिन् स सुस्सलः ।
त्वामेव शनकैर्हन्याद् द्रोग्धायमिति चिन्तयन् ॥१२५३॥

वरं स एव विश्वास्य व्यापाद्यस्तत्र चेद्वधः ।
भवेत् ते स्वामिपुत्रादिकुटुम्बं स्याद् विभूतिभाक् ॥१२५४॥

भार्ययेति प्रेर्यमाणः स निश्चयविपर्यये ।
टिक्कं विदितवृत्तान्तं कृत्वा बद्धोद्यमः कृतः ॥१२५५॥

1247. After this *v.* P_8 adds तिलकम्.
1249. b) I_3 °हर्षि° (for °हर्द्धि°).
1251. c) St ततच्च (for ततश्च). $P_{1,2}$ SA प्रहिणो° (for प्राहिणो°).
1254. b) C S′ चेद्बुधः; D I_3 चेदधः (for चेद्वधः).
1255. c) D C S′ विहित° (for विदित°).

गतागतानि कुर्वाणे द्रुह्युक्षावथ पार्थिवः।
स पुत्र इव विश्वासं ययौ दैवविमोहितः ॥१२५६॥

विपर्यस्ता मतिः पुत्रे विश्वासो वैरिसंश्रिते।
जायते क्षीणभाग्यानां को नाम न विपर्ययः ॥१२५७॥

वैधेयैः स्वार्थलोभान्धैर्यद्वानर्थसमागमः।
सरघोपद्रवः क्षौद्रलुब्धैरिव न चिन्त्यते ॥१२५८॥

तं पीडितं प्रज्जिना च राज्ञा चाऽवनतिं ततः।
उत्पलोऽकारयट्टिक्कं नीविं चाऽदापयत् सुतम् ॥१२५९॥

राजाऽथ देवसरसं जितं संत्यज्य कार्तिके।
वाष्ट्रकाख्यमगाद् ग्रामं खेरीविषयवर्तिनम् ॥१२६०॥

स कल्याणपुराभ्यर्णे रणैस्तैस्तैर्विलक्षताम्।
भिक्षुकोष्ठेश्वरमुखानपि निन्ये महाभटान् ॥१२६१॥

मध्याद् भिक्षाचरादीनां सुज्जिः काककुलोद्भवम्।
जीवग्राहं महावीरं युधि जग्राह शोभकम् ॥१२६२॥

भवकीयस्य कृत्वाऽऽदौ विजयस्य पराभवम्।
भूभुजा तद्गृहा दग्धाः कल्याणपुरवर्त्तिनः ॥१२६३॥

दग्धे वडोसके भिक्षाचरो नष्टाश्रयो व्यधात्।
त्यक्त्वा तां क्ष्मां शमालायां ग्रामे काकरुहे स्थितिम् ॥१२६४॥

1258. c) SA_2 gloss सरघा मधुमक्षिका (for सरघो°).
1259. b) C S′ °वनतं (for °वनतिं). —d) D C S′ $P_{1,3}$ नीवीं (for नीविं).
1260. c) C S′ वाष्टु°; I_3 राष्ट्र° (for वाष्ट्र°).
1262. b) All Mss. read सुज्जि (for सुज्जिः suggested with St D).
1263. a) C S′ कृत्या° (for कृत्वा°).
1264. a) D C $P_{1,2}$ वडौसके; SA वळोसके; P_3 S′ वडोकसे; St suggests वडोत्सके cf. viii. 1306 (for वडोसके). —d) $P_{1,2}$ I_3 SA स्थितम् (for स्थितिम्).

अनुजो भवकीयस्य विजयस्य भयान्नृपम् ।
संश्रितस्तेन तूग्रेण बद्ध्वा कारागृहेऽर्पितः ॥१२६५॥

भूरिसैन्यानुगं शूरपुरे विन्यस्य रिल्हणम् ।
आस्कन्दाशङ्किनीं राजा चक्रे राजपुरीमपि ॥१२६६॥

इत्थमुद्दण्डया वृत्त्या खण्डितोच्चण्डडामरः ।
स्तोकावशेषं सोऽपश्यत् कर्तव्यमरिनिर्जयम् ॥१२६७॥

भिक्षाचरो लवन्याश्च शक्तिक्षयमुपागताः ।
विदेशगमनं भीता रिपौ बलिनि मेनिरे ॥१२६८॥

किमप्यभाग्यविस्तारैर्भिक्षुपक्षजुषां यतः ।
जीवतामप्यनुल्लासान्निर्जीवत्वमिवाऽऽययौ ॥१२६९॥

स सोमपालकौटिल्यं स्मरन् कुर्यां हिमात्यये ।
श्मशानोर्वीं राजपुरीमिति ध्यायन् न्यवर्तत ॥१२७०॥

शान्तप्रायस्वदेशोर्वीविप्लवस्य महीपतेः ।
तस्याऽर्णवान्तक्रमणप्रतीतिः समभाव्यत ॥१२७१॥

शतैकीयो योऽवशिष्टो विप्लवक्षयिते जने ।
वर्षं वर्षं स तद्राज्ये युगदीर्घं त्वमन्यत ॥१२७२॥

असुखत्रासदारिद्र्यप्रियनाशादिवैशसैः ।
स राज्यकालः सर्वस्य परितापावहो ह्यभूत् ॥१२७३॥

1265. b) P_3 नृपाद्भयम् (for भयान्नृपम्).
1267. b) C °ताश्च°; P_3 °तश्च°; $P_{1,2}$ I_3 °तोश्च° (for °तोच्च°). C S′ °मराः (for °मरः).
1268. c) C S′ भीत्या (for भीता).
1269. a) All Mss. read °भाग्यावतारै° (for भाग्यविस्तारै° suggested).
1272. a) P_3 °कीये (for °कीयो). —b) St $P_{2,3}$ °क्षपिते (for °क्षयिते).
1273. b) C °नादा° (for °नाशा°).

नरः पौरुषनैष्ठुर्यशठत्वेन करोति किम् ।
विधातृवृत्तिवैचित्र्यपराधीनासु सिद्धिषु ॥१२७४॥

पुरोभूतं कंचित् परिहरति राशिं तम इव
व्यतीते कस्मिंश्चिद्धरिरिव विवृत्याऽऽस्यति दृशम् ।
समुल्लङ्घ्याऽऽसन्नं क्वचन नृपतिं दर्दुर इव
क्रमेत् स्रष्टुर्दृष्टः स्फुटमिति गतीनामनियमः ॥१२७५॥

विश्वासनिहतान् निन्दन्नुच्चलादीन् पुराऽवसत् ।
नित्यं विकोशशस्त्रो यः पुराविद्धयो निशम्य च ॥१२७६॥

विदूरथादिवृत्तान्तं नादात् केलिक्षणे ब्रुवन् ।
स्त्रीषु संभुज्यमानासु विश्वासविशदां दृशम् ॥१२७७॥

स बन्धाविव निर्बन्धाद् विशश्वास यदुत्पले ।
तत्र संभाव्यते केन दैवादन्यो विमोहकृत् ॥१२७८॥

टिकादयो भूमिपतेः सुज्जेर्वाऽन्यतरे हते ।
त्वां तुल्यकार्यकर्तारं विद्म इत्यूचुरुत्पलम् ॥१२७९॥

सुज्जिर्न व्यश्वसीत् तस्मिन् स जिघांसुस्तु भूभुजम् ।
तत्र तत्राऽभवत् सज्जः प्रसङ्गं नाऽऽसदत् पुनः ॥१२८०॥

प्रतिश्रुतविलम्बेन समन्योरथ भूपतेः ।
प्रत्ययोत्पत्तये देवसरसाम्नीविमात्मजम् ॥१२८१॥

1274. c) SA °वैचित्य° (for °वैचित्र्य°).

1275. c) P_2 I_3 St SA स्वमु° (for समु°).

1276. c) C S' °शस्त्रौघः (for शस्त्रो यः).

1277. a) P_2 SA विडूर° (for विदूर°). —c) C °मानः स; SA °मानास्व° (for °मानासु suggested with St D).

1278. a) C संबन्धा° (for स बन्धा°). After this v. P_3 adds तिलकम् .

1279. a) C ढिका° (for टिका°). —b) All Mss. read °न्यतमे (for °न्यतरे suggested with St D).

व्याघ्रप्रशस्तराजादींस्तीक्ष्णांश्चाऽऽत्मसमान् परान् ।
आदाय कार्यमेतैर्मे सिध्येदित्युक्तवान् नृपम् ॥१२८२॥

उच्चित्योच्चित्य सेनाभ्यो गृहीतैः साहसक्षमैः ।
शतैः समं त्रिचतुरैः पत्तीनामेकदाऽऽययौ ॥१२८३॥

समयान्वेषिणो हन्तुस्तस्याऽऽसन्नस्य सर्वदा ।
प्रियाहारादिदानेन हन्तान्तःप्रीतिकार्यभूत् ॥१२८४॥

तुरंगं मन्दुराचक्रवर्त्याख्यं नगरस्थितम् ।
अस्वस्थमुल्लाघयितुं तुरगव्यसनी नृपः ॥१२८५॥

स लक्ष्मकप्रतीहारकल्यात्मजमुखान् निजान् ।
पार्श्वाद् विसृष्टवानासीत् क्षणे तस्मिन् मितानुगः ॥१२८६॥

शृङ्गारो लक्ष्मकापत्यं निशम्याऽऽतैर्निवेदितम् ।
व्यधाच्छ्रुतिपथे राज्ञस्तदुत्पलचिकीर्षितम् ॥१२८७॥

विरुद्धे बन्धुधीर्दृष्टहिंसारम्भेऽपि संभवेत् ।
आसन्नजीवितान्तस्य जन्तोः सूनापशोरिव ॥१२८८॥

स शापो गान्धार्यास्तदपि सरुषो भाषितमृषे-
स्त उत्पाताश्चक्षुः स्वमपि तदभौमं प्रकटयत् ।
कुलान्तं तत्त्राणाक्षममकृत वैकुण्ठमपि तः
छिदन्नप्यन्यत्वं क इव भवितव्यस्य कुरुताम् ॥१२८९॥

1282. b) All Mss. read °सरान्परान् (for °समान् परान् suggested with St).

1283. c) C स मंत्रि° (for समं त्रि°). —d) St C ययौ (for ⌊आ⌋ययौ). After this *v* तिलकम्.

1284. d) C °तःप्राति° (for °न्तः प्रीति°).

1285. d) C S′ °सने (for °सनी).

1286. a) SA_3 पक्ष्मक° (for लक्ष्मक°). —c) SA_1 om. वा in विसृष्टवान्.

1288. a) D C S′ $P_{1,3}$ °धीदृष्ट°; P_2 °धीर्दष्ट° (for °धीर्दृष्ट°).

1289. a) C S′ सन्धा° (for गन्धा°). —b) C S′ °स्तदु° (for °स्त उ°). D C P_{1-3} I_3 SA प्रकटयन् (for प्रकटयत्). —c) D P_2 I_3 कुलान्ते (for कुलान्तं).

मिथ्यैतदित्यधिक्षिप्य क्षितिपालः प्रदर्शयन्।
तमङ्गुल्योत्पलादींस्तानग्रस्थानेवमब्रवीत् ॥१२९०॥

द्रोग्धुः सुतोऽभवद्योगादनिच्छन् स्वास्थ्यमेष मे।
त्वां दुष्टमुत्पलाऽऽचष्टे स्वेनाऽन्यैर्वाऽथ चोदितः ॥१२९१॥

ते छादयन्तः स्मेरास्या धार्ष्ट्येन भयवैकृतम्।
वक्ति देवो यदस्माभिर्वाच्यमित्येवमूचिरे ॥१२९२॥

निर्यातेष्वथ तेष्वीषत्साशङ्क इव निश्चलान्।
द्वास्स्थेनाऽकारयद् द्वित्राननन्तिके मुख्यशस्त्रिणः ॥१२९३॥

उन्मनाश्च किमप्यासीद् विनिश्श्वस्य स चिन्तयन्।
सास्त्रुश्च न रतिं लेभे नृत्तगीतादिदर्शने ॥१२९४॥

मेने वैदेशिकप्रायानाप्तानपि धृतभ्रमः।
पुण्यक्षये पिपतिषुर्वैमानिक इवाऽम्बरात् ॥१२९५॥

राजान्तरङ्गाः साशङ्काः प्रभौ शाठ्येन मोहिते।
पूत्कारमैच्छन् दातारमन्यं कंचिद्चेतनाः ॥१२९६॥

अयमेव स कालस्य बलात् कवलनग्रहः।
विदन्तोऽपि यदाऽऽयान्ति जन्तवः कृत्यमूढताम् ॥१२९७॥

सर्वान्तरक्षणेष्वस्तचक्षुषो दिवसद्वयम्।
उत्पलाद्याश्च साशङ्काः कथमप्यत्यवाहयन् ॥१२९८॥

1291. a) St. Tr. suggests सुतो भव° (for सुतोऽभव°). —c) C S′ तां (for त्वां).

1293. d) C S′ P_1 °नन्तिको (for °नन्तिके).

1294. d) C S′ नृत्य° (for नृत्त°).

1295. c) C S′ °क्षयेऽपि (for °क्षये पि°).

1296. d) All Mss. read केचि° (for कंचि° found in SL).

रहःक्षणप्रार्थिनस्तांस्तृतीयेऽह्नयब्रवीन्नृपः ।
स्नात्वा प्रत्यूषे तद्यूयं भोक्तुं यात मुहुर्गृहम् ॥१२९९॥

देवतार्चनपर्यन्तमवसायाह्निकं विधिम् ।
आजुहावोत्पलं दूतैर्मध्याह्नेऽथ रहस्स्थितः ॥१३००॥

कार्यसिद्धिं श्रद्दधानो वैजन्याद् राजसद्मनः ।
राज्ञोऽभ्यर्णं स साशङ्कं द्वास्स्थरुद्धानुगोऽविशत् ॥१३०१॥

प्रावेशयद् द्वारि रुद्धं व्याघ्रं तदनुजं नृपः ।
शेषाणामपि भृत्यानामादिदेश बहिस्स्थितिम् ॥१३०२॥

बिलम्बमानष्वातेषु केषुचित् सरुषो वचः ।
सत्यं तस्योद्ययावास्तां सोऽत्र द्रोग्धा य इत्यपि ॥१३०३॥

ताम्बूलदायकः प्रौढवयास्तेनाऽवशेषितः ।
सांधिविग्रहिको विद्वान् राहिलश्चाऽन्तिके परम् ॥१३०४॥

दूतौ टिक्कस्याऽर्धदेवतिष्यवैश्याभिधावुभौ ।
तत्र प्रसङ्गादासातामज्ञातोत्पलसंविदौ ॥१३०५॥

वाडौत्सः सुखराजाख्यो डामरो भिक्षुसंमतः ।
प्रयास्यति प्रभोर्दृष्ट्वा पादौ तत्कार्यसिद्धये ॥१३०६॥

इत्युक्तवांस्तेष्वहस्सु तं नृपं नातिदूरगम् ।
ससैन्यं डामरं चक्रे स्वस्य त्राणार्थमुत्पलः ॥१३०७॥

1299. [a]) St रहः क्षण° (for रहःक्षण°).

1301. [c]) D C S′ P_1 °शङ्क°; P_3 °शङ्कां (for °शङ्कं). —[d]) All Mss. read द्वास्थ° (for द्वास्स्थ° suggested with St).

1303. [c]) C S′ °स्योत्प्रथावास्तं (for °स्योद्ययावास्तां).

1304. [a]) C °यिक° (for °यकः). —[d]) D S′ °लाश्चा° (for लश्चा°).

1305. [ab]) D $P_{1,2}$ I_3 °धदेवतिष्टवैश्या°; C S′ °स्याघदेवनिष्टवैश्या°; SA St (before suggestion) °स्याघदेवातिष्ठवैश्य° (for °र्धदेवतिष्यवैश्या° found in P_3, also cf. *v.* viii. 1543).

1306. [a]) C वाड्डौत्सः; SA वाळौत्सः; S′ वाडवौत्सः (for वाडौत्सः). P_3 दुःख°; SA सुःख° (for सुख°).

1307. [c]) SA I_3 डमरं; C S′ ढामरं (for डामरं).

तथा चैनं तस्थिवांसं कृत्यमस्त्यमुनेति च।
उक्त्वा प्रशस्तराजं तं पार्श्वे प्रावेशयद् द्रुतम् ॥१३०८॥

प्रविष्टो निर्जनं बाह्यमाकलय्य स मण्डपम्।
अलक्ष्यमाणव्यापारो द्वारमर्गलितं व्यधात् ॥१३०९॥

स्नानार्द्रकेशं शीतालुतया प्रावारवेष्टितम्।
कृत्वा कृत्स्नं वपुः कृष्टशस्त्रीकं विष्टरोपरि ॥१३१०॥

आसीनं वीक्ष्य नृपतिं प्रसङ्गो नेदृशो भवेत्।
विज्ञप्तिं कुरु भूभर्तुरित्यूचे व्याघ्र उत्पलम् ॥१३११॥

स तया संज्ञया व्यग्रः पादप्रणतिकैतवात्।
राज्ञोऽग्रमेत्य तच्छस्त्रीं विष्टरस्थामपाहरत् ॥१३१२॥

विकोशां चाऽकरोत् पश्यंस्तां तथोद्भ्रान्तलोचनः।
प्राह स हा धिक् किं द्रोह इति यावद् वचो नृपः ॥१३१३॥

प्राहरत् प्रथमं तावत् सव्ये पार्श्वे तथैव सः।
तस्य प्रशस्तराजेन मूर्धनि प्रहृतं ततः ॥१३१४॥

व्याघ्रेणाऽथ क्षतं वक्षस्ताभ्यामेवाऽसकृत् तदा।
प्रहृतं तत्र स पुनः प्राहरन्न द्विरुत्पलः ॥१३१५॥

पूर्वयैव प्रहृत्या हि छिन्नपार्श्वास्थिमालया।
मेने कृष्टान्त्रतन्त्रीकं स तं प्रोषितजीवितम् ॥१३१६॥

1309. b) C S′ °लय्यास्य (for °लय्य स).

1312. a) C S′ व्याघ्रः (for व्यग्रः).

1313. a) $P_{2,3}$ SA विकोशं; I_3 विशोकं (for विकोशां).

1314. After this *v.* युग्मम् ।

गत्वा तमोरिं पूत्कर्तुमिच्छन् व्याघ्रेण राहिलः ।
पृष्ठे कृताहतिर्द्वित्रा नालिका नोज्झितोऽसुभिः ॥१३१७॥

ताम्बूलदायकस्त्यक्त्वा कङ्कोलाद्यञ्जको व्रजन् ।
दीनो निजेभ्यः कारुण्यादुत्पलेनैव रक्षितः ॥१३१८॥

अन्तः समुत्थिते क्षोभे बाह्यमण्डपवर्तिभिः ।
टिक्काद्यैः कृता लुण्ठिर्द्रोहगृह्यैरुदायुधैः ॥१३१९॥

उत्पलो निहतो राज्ञेत्यवेत्य कटकस्थितैः ।
बहिस्स्थान् हन्यमानान् स्वान् समाश्वासयितुं ततः ॥१३२०॥

रक्तार्द्रशस्त्रं संदर्श्य तमोरेर्वपुरुत्पलः ।
ऊचे मया हतो राजा न त्याज्या तच्चमूरिति ॥१३२१॥

तच्छ्रुत्वा दुश्श्रवं राजभृत्याः काऽपि भयाद् ययुः ।
द्रोहानुगास्त्वङ्गनान्तर्लब्धोल्लासा व्यधुः स्थितिम् ॥१३२२॥

निर्यान्तो मण्डपात् तीक्ष्णा निजघ्नुर्नागकाभिधम् ।
द्वारात् प्रविष्टं निष्कृष्टकृपाणीकं नृपानुगम् ॥१३२३॥

भूपालशय्यापालस्य त्रैलोक्याख्यस्य सेवकः ।
निन्दन् द्रोहं टिक्काद्यैर्द्वास्स्थश्चैको विपादितः ॥१३२४॥

उत्कृष्टं नष्टसत्त्वानां मध्ये राजानुजीविनाम् ।
सखेटकासिं धावन्तं भावुकान्वयभूषणम् ॥१३२५॥

1317. a) C S′ °रिपुंक° (for °रिं पूत्क°).
1318. a) C S′ °दायि° (for °दाय°). —b) All Mss. read कङ्काल°; D suggests करङ्का° (for कङ्कोल° suggested with St).
1321. a) C रक्ताग्र° (for रक्तार्द्र°). —b) C S′ P_3 तोम° (for तमो°). —d) D C S′ $P_{1,2}$ I_3 °तश्च° (for तच्च°).
1323. a) $P_{2,3}$ निर्यातो (for निर्यान्तो). —b) C °तीक्ष्णान्नि° (for तीक्ष्णा नि°).
1324. a) D SA P_{1-3} I_3 °शक्यापालस्य; C S′ °शाक्यपालस्य (for °शय्यापालस्य suggested with St). —d) P_{1-3} I_3 D SA °द्वास्थ°; C S′ °द्वास्थै° (for °द्वास्स्थ° suggested with St). D C S′ P_1 SA व्यपादितः (for विपादितः).

दृष्ट्वा सहजपालाख्यं पार्श्वद्वारेण निर्ययुः।
तीक्ष्णाः स त्वपतद् भूमौ तद्भृत्यप्रहृतिक्षतः ॥१३२६॥

जाते कुकीर्तिकालुष्यपात्रे राजात्मजव्रजे।
वैलक्ष्यक्षालनं सिद्धं तस्य स्वक्षतजैः परम् ॥१३२७॥

हतो दैशिकसंवादिदेहो राजात्मजभ्रमात्।
विद्वान् द्विजन्मा नोनाख्यस्तीक्ष्णपक्षैः पुरो गतः ॥१३२८॥

अक्षतान् व्रजतो वीक्ष्य तीक्ष्णान् ग्रामान्तरोन्मुखान्।
चित्रार्पिता इव क्रोधान्नाऽधावन् केऽपि शस्त्रिणः ॥१३२९॥

राजवंश्या महीपालप्रीतिपात्रमथाऽऽययुः।
स्थगयन्तोऽङ्गनं स्थूलकाया जनविवर्जितम् ॥१३३०॥

तांस्तान् कापुरुषान् हर्षदेवोदन्तात् प्रभृत्यलम्।
स्मृत्वा च कीर्तयित्वा च कृतभारग्रहा इव ॥१३३१॥

जातदुष्कृतसंस्पर्शाः खेदात् कर्तुं न शक्नुमः।
पापात् पापीयसां येषां नामग्रहणसाहसम् ॥१३३२॥

अङ्गनान्मण्डपारूढिं मन्वानाः पौरुषं महत्।
पापिनः केऽपि तन्मुख्या ददृशुः स्वामिनं हतम् ॥१३३३॥

अधरेणाऽस्त्रसंस्कारलेशावेशप्रकम्पिना।
वदन्तं दन्तदष्टेन स्वान्तस्याऽन्तेऽनुतप्तताम् ॥१३३४॥

1326. c) C तीक्ष्णः (for तीक्ष्णाः).

1328. a) D (before suggestion) C P_{1-3} I_3 SA हतदैशि°; S′ हृतदैशि° (for हतो दैशि° suggested with St D). —b) St (before corr.) °जातमभ्रज° (for °जातमजभ्र°).

1330. b) C °प्रथां ययुः; D P_2 °पथा ययुः; S′ $P_{1,3}$ I_3 °प्रथा ययुः (for °मथाऽऽययुः).

1331. d) P_3 I_3 च (for इव).

1332. a) St $P_{1,2}$ I_3 जाता (for जात°). C S′ St $P_{2,3}$ I_3 °स्पर्शात् (for °स्पर्शाः).

1333. b) P_2 I_3 संधानाः (for मन्वानाः). —d) S′ हृतं (for हतम्).

1334. b) C S′ °लेशं (for °लेशा°). —c) D P_3 I_3 °दृष्टेन (for °दष्टेन).

वञ्चितः कथमेषोऽहमिति नामेति चिन्तया ।
निस्स्पन्दे जीवितान्तेऽपि तथैव दधतं दृशौ ॥१३३५॥

श्यामायमानं बाष्पेण व्रणवक्त्रैरुदश्नुता ।
अन्तःप्रशान्तामर्षाग्निशेषधूमलतात्विषा ॥१३३६॥

आननस्याऽस्फुटीभूतचन्दनोल्लेखकुङ्कुमम् ।
सक्तया लिखितस्येव घनक्षतजलाक्षया ॥१३३७॥

आश्यानास्रजटीभूतकेशं नग्नं भुवि च्युतम् ।
पर्यस्तपाणिचरणं स्कन्धाग्रालम्बिकंधरम् ॥१३३८॥

तं वीक्ष्य नोचितं किंचिदाचेरुस्ते नराधमाः ।
वैजन्यस्य फलं भुङ्क्ष्वेत्यावेगादधिचिक्षिपुः ॥१३३९॥

बद्ध्वा तुरङ्गे युग्ये वा न तैर्नीतश्चिताग्निसात् ।
कर्तुं न वा पारितः स प्राणत्राणाय धावितैः ॥१३४०॥

आस्तां विलम्बसाध्यं वा कर्मैतद् भ्राष्ट्रदारुसात् ।
सज्जाग्निश्चाऽग्निसाद्देहमपि कश्चन नाऽकरोत् ॥१३४१॥

राजवाजिनमेकैकं तेऽध्यारुह्य पलायिताः ।
निर्लुण्ठितस्तु कटको व्रजन् ग्रामेषु डामरैः ॥१३४२॥

न पुत्रः पितरं पुत्रं पिता वा प्रत्यपालयत् ।
मृतं हतं लुण्ठितं वा प्रचलन् सहिमेऽध्वनि ॥१३४३॥

1335. a) C S′ वंचिता (for वञ्चितः). —c) C S′ St P_2 निस्पन्दे (for निःस्पन्दे). —d) C S′ ददतं (for दधतं).

1337. a) C S′ आननस्य (for आननस्या°).

1338. d) C S′ $P_{1,3}$ SA °कंदरम् (for °कंधरम्). After this *v.* $P_{2,3}$ add कुलकम् ।

1340. a) C वद्धा (for बद्ध्वा).

1341. c) All Mss. read सज्जाग्नि चा° (for सज्जाग्निश्चा° suggested). D St P_{1-3} I_3 °साद्रेह° (for °साद्देह°). —d) $P_{1,3}$ कश्चिच्च; St I_3 SA SL कश्चिन्न; P_2 कश्चन्न (for कश्चन).

1343. d) C स (for स°).

न कोऽपि शस्त्रभृत्सोऽभूत् स्मृत्वा मानोन्नतिं पथि ।
पैराक्षिप्यमाणो यः शस्त्रं वस्त्रं च नाऽत्यजत् ॥१३४४॥

लवराजयशोराजद्विजौ व्यायामवेदिनौ ।
कान्दश्च राजा निहता वीरवृत्त्या त्रयः परम् ॥१३४५॥

अदूरादुत्पलाद्यास्तु कटकं वीक्ष्य विद्रुतम् ।
प्रविष्टा वाष्टुकं छित्त्वा शिरो निन्युर्महीपतेः ॥१३४६॥

गतेषु देवसरसं तेषु छिन्नशिरा नृपः ।
हतश्चौर इव प्राप ग्राम्याणां प्रेक्षणीयताम् ॥१३४७॥

एवं द्रोहैस्तृतीयाब्दामावास्यायां स फाल्गुने ।
पञ्चपञ्चाशतं वर्षानायुषोऽतीतवान् हतः ॥१३४८॥

विलासशयनस्थस्य सिंहदेवस्य सा श्रुतौ ।
प्रेमाख्येनैत्य दुर्वार्ता धात्रेयेण व्यधीयत ॥१३४९॥

संभाव्यते योऽनुभावः सशस्त्रस्याऽप्रियश्रुतौ ।
हृतशस्त्रोऽपि तं प्राप स तदा पितृवत्सलः ॥१३५०॥

मोहलुप्तस्मृतिः स्मृत्वा चिरादुद्गतचेतनः ।
तत्तद्दुःखाहतधृतिर्विललाप स्फुटास्फुटम् ॥१३५१॥

मदर्थं कुर्वता राज्यं प्रयत्नादपकण्टकम् ।
अधमे किं महाराज त्वयाऽऽत्मा परिभावितः ॥१३५२॥

1346. [c]) C S′ °वाष्टुकां; D St P_{1-3} I_3 °वाष्टुवं (for वाष्टुकं found in SL, cf. *v.* viii. 1459).

1348. [b]) C S′ P_1 I_3 फाल्गुणे; P_2 हाल्गुने (for फाल्गुने).

1349. [c]) C S′ °नैव (for °नैत्य). —[d]) S′ SA धात्रीयेन; D C P_{1-3} I_3 धात्रीयेण (for धात्रेयेण suggested with St).

1350. [a]) SA_1 om. नुभाव with a space.

अर्हेतेः पश्यतः शत्रूनन्ते वैरविशुद्धये।
अपि तेऽमानिनोऽगच्छंस्तात संभावनाभुवम् ॥१३५३॥

त्वया निषेधिते वैरे पिता भ्राता च ते दिवि।
निर्मन्युः संप्रति त्वं तु वर्तसे मन्युदुस्स्थितः ॥१३५४॥

अनरण्यकृपद्रोणजमदग्न्यादिषु स्पृहाम्।
कुल्यक्षालितवैरेषु मा कार्षीः कांचन क्षणम् ॥१३५५॥

शोच्यस्त्वदाश्रयो मन्युरहं शोधयिता नृप।
दूये न तत्र यातं यत् त्रैलोक्यमभियोज्यताम् ॥१३५६॥

वात्सल्योत्पुलकस्मेरं स्निग्धोक्तिमधुरं मुखम्।
मद्दर्शने यदासीत् ते तन्मे पुर इवाऽधुना ॥१३५७॥

इति चाऽन्यच्च विलपन् गाम्भीर्यालक्ष्यवैकृतः।
ह्रीशोकभयमूकान् स ददर्शाऽऽप्तान् पितुः पुरः ॥१३५८॥

अशिक्षयत यन्मन्युर्दाक्षिण्यं निरुरोध तत्।
तथाऽप्येवं स तानूचे किंचिदाक्षेपकर्कशम् ॥१३५९॥

कोशैः सद्वंशतां वीक्ष्य कुर्वतः सत्क्रियां गताः।
धिग् भवन्तश्च शस्त्रं च तातस्याऽन्ते विपर्ययम् ॥१३६०॥

यन्मतिपतृव्ये निहते कृतमुच्छिष्टजीविभिः।
मान्यानां भवतां सिद्धं हा धिक् तदपि नाऽधुना ॥१३६१॥

1353. [a]) SL अर्हेतः; P_2 अर्हतैः (for अर्हेतेः).

1355. [b]) All Mss. read °जामदग्न्या° (for °जमदग्न्या° suggested with St. Tr.).

1358. [a]) P_{1-3} चान्यश्च (for चाऽन्यच्च).

1360. [b]) D P_{1-3} I_3 SA कुरुतः; C S′ कुरुतां (for कुर्वतः suggested with St).

1361. [a]) P_{1-3} I_3 SA न हते (for निहते).

इत्युपालम्भमानस्तान् द्वित्रैरन्तिकमागतैः ।
स्वकैरमात्यैः कर्तव्यश्रुतयेऽवहितः कृतः ॥१३६२॥

प्रस्थानं लोहरे केचिदूचुः संत्यज्य मण्डलम् ।
त्वरां च तत्र रात्र्यन्ते वदन्तो भैक्षवं भयम् ॥१३६३॥

गर्गात्मजं पञ्चचन्द्रमालम्ब्य लहरस्थितम् ।
द्वैराज्याचरणायाऽन्ये धीरप्राया बभाषिरे ॥१३६४॥

नहि स्वगृहवद् भिक्षोर्विविक्षोर्नगरान्तरम् ।
अज्ञायि प्रत्यवस्थानं केनाऽप्यसति सुस्सले ॥१३६५॥

आत्मन्यसंभावनया तादृशां मन्त्रिणां नृपः ।
सान्तःखेदं श्वो विधेयं द्रक्ष्यथेत्यब्रवीद् वचः ॥१३६६॥

कालापेक्षापरिव्यक्तपितृव्यापत्तिदुस्स्थितः ।
स कोशादिष्वथाऽदिक्षद् रक्षिणस्त्राणदीक्षितान् ॥१३६७॥

इतश्चेतश्च बम्भ्रम्यमाणैः प्रोद्यत्प्लुतस्वरम् ।
अन्योन्याख्यायिभिर्लोकैः पुरं मुखरतामगात् ॥१३६८॥

मत्तवेतालमालेव कालरात्र्याकुलेव च ।
बभूव सा यामवती सर्वभूतभयावहा ॥१३६९॥

दीपैर्निर्वातनिष्कम्पैश्चिन्तास्पन्दैश्च मन्त्रिभिः ।
तिष्ठन् परिवृतो राजा त्वन्तरेवमचिन्तयत् ॥१३७०॥

1362. c) C S′ $P_{1,2}$ I_3 St द्वित्रै° (for स्वकै°). C S′ कर्तव्ये (for कर्तव्य°). —d) C S′ एव हित: (for °येऽवहित:).

1364. b) C S′ P_2 I_3 SA °लम्भ्य (for °लम्ब्य). —c) P_1 वैराज्या° (for द्वैराज्या°).

1366. b) SA_1 om. तादृशां with a space.

1367. a) D °त्यक्त°; P_3 °व्यक्तं (for °व्यक्त°).

1368. b) P_{1-3} I_3 °मानै: (for °माणै:). C S′ पांशूत्प्लुताम्बरम् ; P_1 प्रोद्यत्प्लुताम्बरम् (for प्रोद्यत्प्लुतस्वरम्).

निर्द्वारे सतमस्युग्रमारुते शून्यवेश्मनि ।
तातोऽपि निहतः शून्ये मयि जीवत्यनाथवत् ॥१३७१॥

कष्टमेतादृशासह्यवैशसक्षालनावधि ।
कथं गोष्ठीषु शक्ष्यामि द्रष्टुं मानवतां मुखम् ॥१३७२॥

विरोधिवशवर्तिभ्यो देशेभ्यः सैन्यनायकाः ।
सहिमैरेव दुर्लङ्घ्यैः कथमेष्यन्ति वर्त्मभिः ॥१३७३॥

इत्थं विमृशतस्तस्य तत्तत्तीव्राभिषङ्गिणः ।
ययौ भीतिमतो भीमा कथंचित् सा निशीथिनी ॥१३७४॥

प्रातश्चतुष्किकां पौरसमाश्वासाय निर्गतः ।
नष्टं कटकमन्वेष्टुं सोऽश्वारूढान् व्यसर्जयत् ॥१३७५॥

मार्गानसूचीसंचारैस्तुषारैर्विवरोज्झितान् ।
आश्लिष्टवसुधामेघाः कर्तुं प्रारेभिरे ततः ॥१३७६॥

नामाऽप्यलब्ध्वा सैन्यस्य मोघसैन्येषु दूरतः ।
निवृत्तेषु नियुक्तेषु विमृश्य नृपतिः क्षणम् ॥१३७७॥

यद्यद्येनाऽऽहृतं तत्तत्परित्यक्तं मयाऽधुना ।
दत्तं चाऽरीञ्श्रितवतामभयं सागसामपि ॥१३७८॥

इत्याज्ञां भ्रमयामास पटहोद्घोषणैः पुरे ।
साशीर्घोषास्ततः पौरास्तत्राऽरज्यन्त सर्वतः ॥१३७९॥

1371. a) C स (for स°).

1373. b) D C S′ $P_{1,2}$ I_3 SA °नायक: (for °नायकाः). —d) D S′ °ष्यति (for °ष्यन्ति).

1374. a) All Mss. read विमृषत° (for विमृशत° suggested with St). —b) C S′ St $P_{1,2}$ I_3 °षङ्गिनः (for °षङ्गिणः). —d) $P_{1,2}$ I_3 SA निषीथिनी; P_3 निधीथिनी (for निशीथिनी).

1376. c) St °धा मेघाः (for धामेघाः).

1377. b) मोघदैन्येषु is suggested with St (for मोघसैन्येषु found in all Mss. cf. St. Tr. fn.). —d) SA D P_{1-3} S′ विमृष्य नृ°; C विमृश्यन्नृ° (for विमृश्य नृ°).

1379. After this *v.* तिलकम्.

अनन्तरनृपाचारवैधर्म्यौंकारकल्पया ।
तया सोऽनघया वृत्त्या फलं सद्योऽनुभावितः ॥१३८०॥

शतादप्यूनसंख्यैर्यः स्थितवाननुगैः समम् ।
अनुरागहृतैर्लोकैस्तत्कालं पर्यवार्यत ॥१३८१॥

प्रियोक्त्यावेदनं प्रीतिदायोपायं प्रभोः पुरः ।
भजंल्लोकस्याऽग्र्यमन्त्रिपदवीं लक्ष्मकोऽग्रहीत् ॥१३८२॥

राज्यं शय्यां नयत्येवं प्राज्ञे राज्ञि नयक्रमैः ।
याति मध्यन्दिने भिक्षुर्विविक्षुः पुरमाययौ ॥१३८३॥

तस्य डामरपौराश्ववारलुण्ठाकसंकुलः ।
अदृष्टपूर्वो ददृशे सैन्यव्यतिकरस्तदा ॥१३८४॥

हतं श्रुत्वा रिपुं राज्योत्सुकः स नगरं व्रजन् ।
राजा काकात्मजेनेति तिलकेनाऽभ्यधीयत ॥१३८५॥

हतः समस्तविद्वेष्यः स दैवाद् यदि सुस्सलः ।
कथं प्रकृतयो जह्युर्गुणवन्तं तदात्मजम् ॥१३८६॥

पुरप्रवेशे का राजंस्तस्मादेकमहस्त्वरा ।
एहि पद्मपुरं यामो मार्गं रोद्धुं विरोधिनाम् ॥१३८७॥

आगच्छन्तो नष्टसैन्याः सुज्जिमुख्या महाभटाः ।
निहता यदि वा रुद्धास्तत्र सायुधवाहनाः ॥१३८८॥

1380. [b]) C S′ °वैधर्म्मौं° (for °वैधर्म्यौं°).

1382. [b]) All Mss. read °योपायः (for °योपायं suggested).

1383. [a]) C नयत्वेवं (for नयत्येवं). —[c]) St मध्यं दिने (for मध्यन्दिने).

1387. [a]) C °प्रवेशका (for °प्रवेशे का).

1388. [a]) $P_{2,3}$ °सैन्यः (for °सैन्याः).

प्रविष्टोऽसि ततो न्यस्तशस्त्रो द्वित्रैर्दिनैर्ध्रुवम् ।
नगरं नगरौकोभिः स्वयमभ्यर्थितागमः ॥१३८९॥

अलमेतैर्जरन्मन्त्रैर्वदन्त इति चक्रिरे ।
स च कोष्ठेश्वराद्याश्च स्मेरास्तस्याऽवधीरणाम् ॥१३९०॥

राज्यं विदद्भिः संप्राप्तं तांस्ताञ्शासनपट्टकान् ।
द्रुतमर्थयमानैश्च विलम्बं कारितो निजैः ॥१३९१॥

अतो बहुहिमापातविवशाशेषसैनिकः ।
आसदन्नगरोपान्तं समयेन स तावता ॥१३९२॥

[illegible]न्तरे लब्धे निस्सैन्यस्य ससैनिकः ।
गर्गात्मजः पञ्चचन्द्रो नृपतेः पार्श्वमाययौ ॥१३९३॥

हतस्वामिपरित्यागमन्युक्षालनकाङ्क्षिभिः ।
राजपुत्रैः समं सोऽथ वीरो योद्धुं विनिर्ययौ ॥१३९४॥

असंभावितसंग्रामान् वीक्ष्य तान् भिक्षुसैनिकाः ।
यावत् प्रारेभिरे योद्धुं तावत् किमपि सर्वतः ॥१३९५॥

क्षणेनैव ययुर्भङ्गं तांस्तान् वीक्ष्य हतान् निजान् ।
न संस्तम्भयितुं शेकुः स्वचमूश्च पलायिनीः ॥१३९६॥

सेनानाथाश्च ये मुख्या भिक्षुपृथ्वीहरादयः ।
अदृष्टपूर्वं संत्रासं तेऽप्यशस्त्रिवदाययुः ॥१३९७॥

1389. After this *v.* D adds युग्मम् .

1391. a) P_1 I_3 विद्वद्भिः (for विदद्भिः). —ab) D (before suggestion) C S′ P_{1-3} I_3 SA संप्राप्तांस्तां° (for संप्राप्तं तां° suggested with St D).

1395. a) All Mss. read असंभावन° (for असंभावित° suggested).

1396. P_3 om. *b-d*.

1397. P_3 om. *a* and adds युग्मम् after this *v.* —d) C तेऽपि श° (for (तेऽप्यश°).

विद्रवन्तोऽनुयाताः स्युस्ते चेद् दूरं नृपानुगैः ।
तन्नूनमवशिष्येत क्षणादेव न किंचन ॥१३९८॥

वैमुख्यं तेषु यातेषु चिरात् सांमुख्यमाययौ ।
नवभूभृत्प्रभावेण नगरे विधुरे विधिः ॥१३९९॥

अन्यथा कलितो लोकैरन्यथा दैवयोगतः ।
इत्थं राज्ञोर्द्वयोरासीद् विजयावजयक्रमः ॥१४००॥

कंचिन्निपातयति बद्धपदं क्षणेन
कंचित् परं पिपतिषुं नयति प्ररूढिम् ।
संकल्पनिर्विषयचित्रतरानुभाव
ओघोऽम्भसामिव तटं पुरुषं विधाता ॥१४०१॥

अथ तत्तद्भयस्थानशान्तः सुज्जिर्दिनात्यये ।
दावव्यात्ताद्रिनिष्क्रान्तो निस्सहोऽहिरिवाऽऽययौ ॥१४०२॥

मेधाचक्रपुरग्रामस्थितः श्रुत्वा हतं नृपम् ।
स हि संमन्त्र्य रात्र्यन्तर्नौत्तस्थाववसत् परम् ॥१४०३॥

रिल्हणादीन् स्थिताञ्शूरपुरादौ सैन्यनायकान् ।
प्रतीक्षमाणस्तैः साकं निर्बाधं नगरेऽविशत् ॥१४०४॥

तमिस्रायां प्रत्यभिज्ञाकृते तेषामनश्वरान् ।
स्वावासपृष्ठे ज्वलतो दीपानास्थापयत् ततः ॥१४०५॥

वैमत्यात् ते तु पत्तीनां विद्रुतानां पृथक् पृथक् ।
निशि काऽपि परिभ्रष्टा न तत्कटकमाययुः ॥१४०६॥

1398. c) P_{1-3} SA तान्नू° (for तन्नू°).

1399. c) P_{1-3} °वेन (for °वेण).

1402. a) C S′ °द्भटस्था° (for °द्भयस्था°).

1403. a) C S′ I_3 SA मेधाचक्रं पुर° (for मेधाचक्रपुर°).

1404. c) C °तीक्ष्य° (for °तीक्ष°).

प्रत्यूषे प्रचलंस्तैस्तैः पृष्ठलग्नैः स डामरैः ।
न मुहूर्तमपि त्यक्तः प्रहरद्भिरितस्ततः ॥१४०७॥

वृद्धस्त्रीबालभूयिष्ठान् सहप्रस्थायिनो जनान् ।
ययौ रक्षन् पुरः कृत्वा पशुपालः पशूनिव ॥१४०८॥

पञ्चशत्या हयारोहैः सह व्यावृत्य तिष्ठता ।
कंचित् क्षणं तेन रक्षा तेषां कर्तुमशक्यत ॥१४०९॥

द्राक्षाषण्डद्रुमव्यूहसंबाधेऽध्वन्यसाध्वसैः ।
बाध्यमानोऽरिभिर्लीकं सोऽत्याक्षीत् तु पदे पदे ॥१४१०॥

हतस्य स्वामिनः स्वामिसूनोश्च व्यसनस्थितेः ।
आनृण्यकाङ्क्षिणा तेन तत्र ह्यात्मैव रक्षितः ॥१४११॥

येषां प्राणपरित्यागे निश्चयं बध्नतामपि ।
न योग्यकालापेक्षाऽस्ति किं तैर्हिंस्रपशूपमैः ॥१४१२॥

हन्तुं तं नष्टमायान्तं रुद्ध्वा पद्मपुरान्तिकम् ।
अवसण्डामराः क्रूराः खड्वीविषयौकसः ॥१४१३॥

खेरीतलालशाग्रामादुत्थाय पृथुसैनिकः ।
व्रजंस्तेनाऽऽययौ तत्र प्रसङ्गे श्रीवकः पथा ॥१४१४॥

तमनष्टानुगं सुज्जिरसाविति विशङ्किताः ।
निपत्य ते विदधिरे हतलुण्ठितसैनिकम् ॥१४१५॥

1408. c) C S′ पुरस्कृत्य (for पुरः कृत्वा).
1409. a) St P_2 I_3 पञ्चाशत्या (for पञ्चशत्या).
1411. c) St °नृण्या°; P_3 °नृण्यं (for °नृण्य°).
1413. d) C S′ P_3 खण्डूवी° (for खड्वी°).
1414. c) C S′ व्रजन्नन्वा° (for व्रजंस्तेना°).
1415. a) C S′ °नुष्ठा° (for °नष्टा°).

मेरुश्च सज्जनश्चाऽश्ववारौ तत्राऽऽहवे हतौ ।
क्षतो वट्टात्मजो मल्लो दिवसैर्यो व्यपद्यत ॥१४१६॥

उदीपविहितश्वभ्रवहत्सलिलसंकटम् ।
उदीपपूरवालाख्यं स्थानं तत्र क्षणेऽभवत् ॥१४१७॥

युद्ध्वा युद्ध्वा प्रचलतस्तत्र पद्मपुराद् बहिः ।
रुद्धसैन्यस्य विशिखः श्रीवकस्याऽविशद् गलम् ॥१४१८॥

प्रहारविवशो नाऽसौ सुज्जिर्ज्ञात्वेति डामरैः ।
स निर्लुण्ठ्य परित्यक्तः पूर्वमैत्र्यनुरोधतः ॥१४१९॥

लुण्ठितश्रीवकानीककोशभारग्रहानतैः ।
तैः कैश्चिच्चलितैरासीत् सुज्जेर्मार्गोऽनुपद्रवः ॥१४२०॥

प्रस्थिते पथिकेऽकस्माद् यन्त्रेषूत्सादयन् वने ।
आयुश्शेषो मृगेन्द्रस्य विदध्यादध्वशोधनम् ॥१४२१॥

निश्शब्दसैन्यो निर्यातः सुज्जिः पद्मपुरान्तरे ।
उदीपश्वभ्रसविधं संप्राप्तोऽज्ञायि डामरैः ॥१४२२॥

पदातिकोशशस्त्रादि मुष्णतः सोऽनवेक्ष्य तान् ।
तीर्त्वा श्वभ्रं वाजिगम्यां साश्ववारो भुवं ययौ ॥१४२३॥

ततः पुरं प्रशान्तारिभयं दूराद् विरोधिनः ।
भ्रूभङ्गतर्जनीकम्परूक्षालापैरतर्जयत् ॥१४२४॥

1417. a) D C S' I_3 °विहत° (for °बिहित°). —c) C S' °पुर°; P_1 °मूर° (for °पूर°).

1419. c) C S' निर्लुण्ठि (for निर्लुण्ठ्य).

1420. a) $P_{2,3}$ I_3 SA लुण्ठितः श्री° (for लुण्ठितश्री°). C °बको° (for °वका°). —b) C S' °शोक° (for °कोश°).

1423. a) P_2 I_3 SA °कोष° (for °कोश°). —b) P_1 I_3 SA सोनवीक्ष्य; P_2 सोनवीक्षि [sic] (for सोऽनवेक्ष्य).

1424. a) St P_2 ततः परं (for ततः पुरं).

संत्रस्तैश्छत्रमात्रं तैस्त्यक्तमादाय च द्रुतम् ।
प्रविश्य नगरं [illegible] पार्श्वमाययौ ॥१४२५॥
ज्यायसि [illegible] तस्मिन् याते जहौ नृपः ।
[illegible]भिः सार्धं वैरिव्यापातसाध्वसम् ॥१४२६॥
महत्तमोऽनन्तसूनुरानन्दस्तत्र वासरे ।
लोचनोड्डारकग्रामे डामरैः प्रचलन् हतः ॥१४२७॥
तत्तन्मङ्गल्यदण्डादिदुस्सहायासकारणात् ।
स विपत्पतितो नाऽभूत् कस्याऽपि करुणावहः ॥१४२८॥
भासाभिधः सुज्जिभृत्यो लोकपुण्यात् पलायितः ।
श्रान्तोऽवन्तिपुरेऽविक्षदवन्तिस्वामिनोऽङ्गनम् ॥१४२९॥
कम्पनोद्ग्राहकः क्षेमानन्दः स च तदन्तरे ।
अमर्षणैरवेष्ट्येतां डामरैर्होलडोद्भवैः ॥१४३०॥
इन्दुराजोऽपि सेनानीः कुलराजकुलोद्भवः ।
टिक्कं तद्वेष्टितो ध्यानोड्डारे व्याजादशिश्रियत् ॥१४३१॥
पिश्वदेवादयोऽन्येऽपि बहवः सैन्यनायकाः ।
अतिष्ठन् क्रमराज्यान्तर्डामरैः कृतवेष्टनाः ॥१४३२॥
पाते वनस्पतेः शावा इव तन्नीडविच्युताः ।
इत्थं हताः क्षताश्चासंस्तत्र तत्र नृपानुगाः ॥१४३३॥

1428. a) C S′ तत्तु म° (for तत्तन्म°).
1430. a) C S′ °द्द्रोहकः; P_1 SA °द्ग्रौहकः (for °द्ग्राहकः). —e) St (before suggestion) SA D $P_{1,2}$ °वेष्ट्येत; C वेष्टेतां; P_3 °वेष्ट्यतां; I_3 °वेष्ट्यैतां (for °वेष्ट्येतां found in S′).
1431. cd) All Mss. read °नोड्डारं (for °नोड्डारे suggested with St).
1432. c) D C S′ अत्यजन्; P_1 I_3 अतिष्ठत् (for अतिष्ठन्). —cd) C °राज्यं तड्डा° (for °राज्यान्तर्डा°).
1433. a) S′ P_2 दावाः (for शावा). —c) SA (with diplography) °श्राश्रा° (for °श्रा°).

निष्पादत्रा हिमप्लुष्टचरणा नग्नविग्रहाः ।
क्षुत्क्षामा बहवोऽभूवन् मार्गेषु गलितासवः ॥१४३४॥

न व्यलोक्यत मार्गेषु तदा नगरगामिषु ।
पलालच्छन्नदेहेभ्यो मानुषेभ्यः परः कश्चित् ॥१४३५॥

घासं विलासवासस्त्वं तेऽपि चित्ररथादयः ।
निन्युर्यैरचिरेणैव महामात्यैर्भविष्यते ॥१४३६॥

द्वितीयेऽपि दिने रुद्धसंचाराः पत्रिणामपि ।
तुषारवर्षिणो मेघा न मुहूर्तं व्यरंसिषुः ॥१४३७॥

वनपूर्वाभिधग्रामस्थितस्य कटकान् निजान् ।
भिक्षोर्निक्षिप्य धन्योऽथ सिंहदेवमशिश्रियत् ॥१४३८॥

निशम्य कृतसत्कारं नृपं तदनुयायिनाम् ।
सर्वेऽपि भैक्षवास्तस्थुः सैनिका नगरोन्मुखाः ॥१४३९॥

मन्दप्रतापे दायादे संप्राप्तावसरास्ततः ।
राज्यश्चतस्रो राजानमनुमर्तुं विनिर्ययुः ॥१४४०॥

परापातभयाच्छीतापाताच्च विवशैर्जनैः ।
न ता नेतुमशक्यन्त दूरस्थं पितृकाननम् ॥१४४१॥

चक्रिरे स्कन्दभवनोपान्ते देहांश्चिताग्निसात् ।
ते सत्वरं ततस्तासामदूरे राजसद्मनः ॥१४४२॥

1435. P_1 om. from मार्गेषु to देहेभ्यो.

1436. a) D P_3 °वासत्वं; $P_{1,2}$ °वासात्वं; C °वासार्थं; S′ °वासार्थे (for °वासस्त्वं).

1438. b) St I_3 °काद् भटान्; P_2 °कान् भटान् (for °कान् निजान्). —d) P_2 SA °श्रयत् (for °श्रियत्).

1439. b) D C S′ P_2 °यायिनम् (for °यायिनाम्).

1441. a) C S′ °भयच्छिन्ना° (for °भयाच्छीता°). —b) C S′ °याताश्च; P_1 °पाताश्च; P_3 °पातश्च (for °पाताच्च). —d) SA_1 (after correction) तान्नेतु°; I_3...ग्नेतु (for ता नेतु°).

राज्ञी चम्पोद्भवा देवलेखा तरललेखया ।
स्वस्रा सहाऽविशद् वह्निं रूपोल्लेखावधिर्विधेः ॥१४४३॥

गुणोज्ज्वला जज्जला सा मृता वल्लापुरोद्भवा ।
गग्गात्मजा राजलक्ष्मीरपि वह्नौ व्यलीयत ॥१४४४॥

मत्वा हिमव्यपायान्तं राज्यरोधं निजप्रभोः ।
डामरा नवभूभर्तुर्हिमराजाभिधां व्यधुः ॥१४४५॥

ददर्श सौस्सलं मुण्डमथ भिक्षुरुपागतम् ।
गाढामर्षाग्निसंदीप्तैर्दृक्पातैर्निर्दहन्निव ॥१४४६॥

कोष्ठेश्वरज्येष्ठपालादयस्तत्सत्क्रियोद्यताः ।
अमहासन्नतां वैराद् भजता तेन वारिताः ॥१४४७॥

नगरं हिमवृष्ट्यन्ते स यियासुर्युयुत्सया ।
ताटस्थ्येनाऽहिताक्रुष्टान्भृत्याञ्ज्ञात्वाऽब्रवीद् वचः ॥१४४८॥

प्रसह्य प्राप्नुयां राज्यमिति पृथ्वीहरे सति ।
हते तु तस्मिन् दायादे विपन्ने स्यां पतिर्भुवः ॥१४४९॥

इत्यचिन्तयमेतत्तु दैवात् संजातमन्यथा ।
राज्यस्याऽऽशाऽपि विरता हते प्रत्युत यद्रिपौ ॥१४५०॥

किं राज्येनाऽथ वा कृत्यं भोगमात्रोपयोगिना ।
जिगीषोरुचितं कस्य ममेवाऽन्यस्य सेत्स्यति ॥१४५१॥

1444. a) St SA om. सा. —c) C गर्ग्गा° (for गग्गा°).
1445. b) C S′ राज्यं तस्य (for राज्यरोधं). St (before corr. in corrigenda) °प्रभाः (for प्रभोः).
1447. c) All Mss. except SL read असहासन्नतां (for अमहासन्नतां found in SL).
1449. cd) St °विपन्नः; SA D $P_{1,2}$ I_3 विपन्नां; C S′ P_3 विपन्नः (for विपन्ने suggested with St. Tr.). —d) C S′ स्यात् (for स्यां).
1450. a) C S′ इति (for इत्य°).
1451. d) C S′ मम वा° (for ममेवा°).

मुण्डं न्यपातयद् भूमौ यः पूर्वेषां पुरा मम ।
सिंहद्वारे मदीयेऽद्य तन्मुण्डं वर्तते लुठत् ॥१४५२॥

दशमासान्मदाद्यानां सुखच्छेदं व्यधत्त यः ।
तत्तद्दुःखं स तु मया दशाब्दाननुभावितः ॥१४५३॥

एवं निर्व्यूढकर्तव्यतया नेष्याम्यवन्ध्यताम् ।
उपशान्तमनस्तापः सुस्थित्या शेषमायुषः ॥१४५४॥

इत्याद्युक्त्वा गतष्टिकाभ्यर्णे तं प्रणतं व्यधात् ।
प्रीत्या स हेमघटिकश्वेतच्छत्रादिभाजनम् ॥१४५५॥

तद्विस्रम्भेण राज्याशापिशाच्योदितया पुनः ।
गृहीतोऽभ्येत्य शीतार्तस्तस्थावन्तर्विचिन्तयन् ॥१४५६॥

अत्यन्तानुचितं चाऽन्यल्लवन्यैः संविधित्सुभिः ।
रक्षितं रक्षिणो न्यस्य हतक्ष्माभृत्कलेवरम् ॥१४५७॥

विपक्षाश्रयणेऽप्यस्मिन् स्वामिनोऽन्ते किमीदृशी ।
दशा शरीरस्येत्यन्तः कृतज्ञत्वेन चिन्तयन् ॥१४५८॥

दिदृक्षाव्याजतः सज्जकाख्यो नगरशस्त्रभृत् ।
आयातो वाष्टुकं गोप्तॄन्युद्धैर्जित्वाऽग्निसाद् व्यधात् ॥१४५९॥

स चतुर्नवताद् वर्षादारभ्याऽऽसादितच्छलैः ।
भूतैरधिष्ठितस्तिष्ठन् प्रजासंहारकार्यकृत् ॥१४६०॥

1453. b) $P_{2,3}$ मुख° (for सुख°). —d) P_2 °जान्वितः (for °भावितः).
1454. d) C S′ सुस्थितः; P_2 स्वस्थित्या (for सुस्थित्या).
1455. S′ om. *ab.* —c) D C सद्देम° (for स हेम°). C S′ घटिका° (for घटिक°).
1456. c) SA शीर्तार्त° [sic]; P_1 शीतातु° [sic] (for शीतार्त°).
1457. c) C S′ रक्षिणा (for रक्षिणो).
1458. a) P_3 °श्रयिणो° (for °श्रयणे°).
1459. c) C S′ D $P_{1,3}$ I_3 वाष्टुकां (for वाष्टुकं). After this *v.* तिलकम्.
1460. d) St C S′ I_3 P_2 °कार्यभूत् (for °कार्यकृत्).

देवताधिष्ठिताविष्टदेहिवाक्यादिति श्रुतिः ।
भावितद्व्यसंवादजनितप्रत्ययोचयौ ॥१४६१॥

तदीयानन्यथात्वेन छेत्ता भ्रामयिता च यः ।
तन्मुण्डस्याऽस्य स पुमांल्लब्धः सुतो मृतस्तथा ॥१४६२॥

भिक्षुः कापुरुषाचारहतौचित्यो व्यसर्जयत् ।
प्राचण्ड्याख्यातये मुण्डमथ राजपुरीं रिपोः ॥१४६३॥

उच्चलात्मजया तत्र देव्या सौभाग्यलेखया ।
नेतॄन् पितृव्यमुण्डस्य जिघांसन्त्या निजानुगैः ॥१४६४॥

राजपुर्यामाकुलत्वं नीतायामाससाद तत् ।
तद्भर्तुः सोमपालस्य दूरस्थस्याऽन्तिकं चिरात् ॥१४६५॥

अधीनस्य मधुक्षैव्यग्राम्यधर्मादिकर्मसु ।
तिरश्च इव शोच्यस्य नेयबुद्धेः खशप्रभोः ॥१४६६॥

सभ्यैरुच्चावचं तत्र कर्तव्यं परिचिन्तितम् ।
स्वोचितं व्यञ्जितौचित्यानौचित्यं निरवग्रहैः ॥१४६७॥

नागपालस्तु सौभ्रात्रं लब्ध्वा भ्रातुः स्थितोऽन्तिके ।
सेहे मुण्डावशेषस्य नोपकर्तुर्विमाननाम् ॥१४६८॥

सुदीर्घदर्शिनोऽप्यन्ते कश्मीरेभ्यः पराभवम् ।
विशङ्क्योचुः सर्वथेदं सत्कार्यं वः शिरः प्रभोः ॥१४६९॥

1461. b) $P_{2,3}$ °देह° (for °देहि°). —d) C S′ °यो ययौ (for °योचयौ).

1462. b) C P_2 St भ्रमयिता (for भ्रामयिता). After this *v.* तिलकम्.

1463. c) St प्राचण्ड्य°; S′ प्राचण्डा° (for प्राचण्ड्या°).

1465. c) P_2 मद्भर्तुः (for तद्भर्तुः). After this *v.* युग्मम्.

1466. a) All Mss. read आदीनास्य; St suggests आदीनस्य (for अधीनस्य suggested).

1469. a) S′ °र्थं ते° (for °प्यन्ते). —b) C काश्मी° (for कश्मी°). —d) I_3 नः (for वः).

क्रियते येन नियतेरन्यथात्वं सनाथताम् ।
विनिहस्य हरेर्द्दंष्ट्राः कुर्वन्तो यत्र जम्बुकाः ॥१४७०॥

तद्गोपालपुरे कालागुरुचन्दनदारुभिः ।
काष्ठैर्निष्ठां शिरो निन्ये वीतिहोत्रेऽथ शत्रुभिः ॥१४७१॥

यथा प्राप्तिभ्रंशा धरणिपतिभावस्य विविधा
यथा ह्रासोल्लासा अपि समरसीमासु बहुशः ।
यथा तत्तद्दीर्घव्यसनविनिपातानुभवनं
तथा दृष्टस्तस्य प्रमयसमयोऽप्यद्भुततरः ॥१४७२॥

कस्याऽपरस्य तस्यैव लेभिरे वह्निसत्क्रियाम् ।
एकत्रेतरगात्राणि मुण्डमन्यत्र मण्डले ॥१४७३॥

टिक्कादयोऽथ नगरं यान्तोऽवन्तिपुराध्वना ।
तत्र हन्तुं व्यलम्बन्त भासादीन् पूर्ववेष्टितान् ॥१४७४॥

युद्धाग्न्युद्दीपनग्रावप्रहारच्छेदकारिभिः ।
न ते जेतुमशक्यन्त तैः प्रयत्नपरैरपि ॥१४७५॥

स्थितैर्महाश्मप्राकारगुप्ते सुरगृहाङ्गने ।
तैर्हन्यमानास्ते स्थातुं गन्तुं वा नाऽभवन् क्षमाः ॥१४७६॥

एवं प्राप्तविलम्बेषु तेषु लब्धान्तरः सुधीः ।
स्वीचकार प्रदानेन खड्गवीडामरान्नृपः ॥१४७७॥

गृहीतनीविना तेषां सुज्जिः प्रायोजि सत्वरम् ।
तेन भासादिमोक्षाय पञ्चचन्द्रादिभिः समम् ॥१४७८॥

1470. a) D $P_{1,3}$ ये तु; P_2 यो; SA ये; SL योन्य° (for येन). —c) निहतस्य or निवहस्य is suggested (for विनिहस्य found in all Mss.). The whole verse does not give any clear sense.

1472. c) P_2 °भवने (for °भवनं).

1473. a) I_3 SA om. र in एकत्रेतर without indicating a *lacuna*.

1475. d) C S′ °यत्नैः (for °यत्न°).

प्रापाऽवन्तिपुरं यावन्न स तावत् तदग्रगान् ।
कय्यात्मजादीनालोक्य भङ्क्तं टिक्कादयो ययुः ॥१४७९॥

देवागाराद् विनिर्याता भासाद्यास्ते च विद्विषाम् ।
भग्नानामनुगान् हत्वा सुज्जेरन्तिकमाययुः ॥१४८०॥

लब्धप्रतापे नगरं प्रविष्टे कम्पनापतौ ।
आययाविन्दुराजोऽपि टिक्कं संत्यज्य सानुगः ॥१४८१॥

चक्रे चित्ररथश्रीवभासादीनपि भूपतिः ।
पादाग्रद्वारखेर्यादिकर्मस्थानाधिकारिणः ॥१४८२॥

यथापूर्वमधीकारानजहत् सुज्जिरप्यभूत् ।
प्रतीहारमुखप्रेक्षी का कथेतरमन्त्रिणाम् ॥१४८३॥

प्रतीहारोऽपि निस्सीमडामरग्रामसंमतः ।
तद्भेदचक्रिकां कुर्वन्नगाद् राज्ञः प्रतीक्ष्यताम् ॥१४८४॥

स नासीदसुहृद्व्यूहे कोऽपि तत्प्रेरणेन यः ।
नाऽशिश्रियन्नृपं नो वा बभूवाऽऽश्रयणोन्मुखः ॥१४८५॥

निह्नुतेशित्वसद्दशस्फूर्तिर्धूर्तो महीपतिः ।
आहारमप्यनासाद्य तन्मतं न न्यषेवत ॥१४८६॥

इत्थं नगरमात्रान्तर्लब्धपादप्रसारिकः ।
सोऽवर्तिष्ट समासन्नफलं कन्दलयन्नयम् ॥१४८७॥

1482. d) C S′ °कार्य° (for °कर्म°).
1483. ab) C S′ °रान् न ज° (for °रानज°).
1485. c) SA °श्रय° (for °श्रिय°).

संघट्य्याऽखिलान् भिक्षुर्डामरान् विजयेश्वरे ।
अथाऽतिष्ठदधिष्ठानं जिघृक्षुः शिशिरात्यये ॥१४८८॥

अदृष्टपूर्वं स्वचमूचक्रैक्यं वीक्ष्य डामराः ।
भिक्षोर्हस्तगतं राज्यं मत्वाऽशङ्किषताऽथ ते ॥१४८९॥

एकैकस्यैष धीशौर्यमित्रामित्रादि दृष्टवान् ।
नोत्तिष्ठेत् प्राप्तराज्यः किमास्कन्देषु गृहान्तरात् ॥१४९०॥

इति संमन्त्र्य ते राज्यं सोमपालाय दित्सवः ।
दूतान्निगूढं प्राहिण्वन् सोऽपि दूतं व्यसर्जयत् ॥१४९१॥

आकाराचारवैक्लव्यैः पशुतुल्यस्य तस्य तैः ।
राज्यभोगा अभङ्गा नो भविष्यन्तीत्यचिन्त्यत ॥१४९२॥

भोगलोभोज्झितौचित्यदस्युसंघचिकीर्षितम् ।
देशेऽत्र पापात् पापीयो दैवान्न समपादि तत् ॥१४९३॥

दास्येऽप्ययोग्यो यो राज्ये स इत्यास्तां त्रपान्यतः ।
शक्येत पातुं देशोऽयं किमीषदपि तादृशा ॥१४९४॥

शालीन् पलालपुरुषोऽवति यः कृशानु-
दग्धाननश्चटकपेटकभीतिदानैः ।
त्रातुं स काननतरून् विहितो विदध्यात्
किं तत्र भञ्जनकृतां वनकुञ्जराणाम् ॥१४९५॥

1488. [ab]) SA C S′ $P_{1,2}$ I_3 भिक्षून्डा° (for भिक्षुर्डा°). —[c]) $P_{1,2}$ SA I_3 अथाधिष्ठ°; St अथाध्यष्ठा° (for अथाऽतिष्ठ°).

1490. [a]) C S′ P_{1-3} I_3 SA °कस्यौषधी°; D कस्येष धी° (for °कस्यैष धी° suggested with St).

1492. [a]) D C S′ P_1 I_3 °कारचा° (for °काराचा°). —[b]) P_3 तेस्य (for तस्य). —[c]) C S′ °भोगाश्च (for °भोगा अ°).

1493. [a]) D P_1 °भोजि°; C S′ °भोर्जि° (for °भोज्झि°). —[c]) All Mss. read पापीये (for पापीयो suggested with St).

1494. [b]) C S′ सदभ्यासे त्रपान्वितः (for स इत्यास्तां त्रपान्यतः).

1495. [c]) C S′ निहितो (for विहितो).

भिक्षोर्नैदिष्ठतां दिष्टवृद्धिव्याजात् ततो भजन् ।
तद्दूतो डामरान् गूढं नीविदानोद्यतान् व्यधात् ॥१४९६॥

वैशाखेऽथ कृतारम्भस्तदा संभावितत्वरः ।
निर्गत्य नगरात् सुज्जिर्गम्भीरातीरमाययौ ॥१४९७॥

तस्याऽभियोगः श्लाघ्योऽभूद् योद्धुं यत्समवायिनः ।
एकाकी तावतो वीरानूरीकृत्य स निर्ययौ ॥१४९८॥

अन्तःपाते साहसानां नाऽद्भुतं तद्विधेर्वशात् ।
जीयते लक्षमेकेन लक्षेणैकोऽथवा युधि ॥१४९९॥

पारं तरीतुं निस्सेतोः सरितोऽपारयन्नसौ ।
पारे परस्मिन्नहितानपश्यच्छरवर्षिणः ॥१५००॥

द्वित्रा निशाः स ते चाऽऽसंस्तस्याः सिन्धोस्तटद्वये ।
रुद्धाः संनाहिनोऽन्योन्यरन्ध्रावेक्षणदीक्षिताः ॥१५०१॥

अथाऽवन्तिपुरान्नौभिरानीताभिरबन्धयत् ।
सेतुं साश्वोऽतरत् सुज्जिरारुह्य तरणीं स्वयम् ॥१५०२॥

तरन्तमेव तं दृष्ट्वा योधैः कतिपयैः समम् ।
द्विषच्चमूर्मरुल्लोला द्रुमालीवाऽभवच्चला ॥१५०३॥

दृष्टं मुहूर्तादेतावदारूढः स च यत्तटम् ।
बद्धश्च सेतुस्तीर्णाश्च योधा भग्नाश्च विद्विषः ॥१५०४॥

1496. a) C S′ °र्नांनिष्टतां; P_1 °र्नोंसिष्टतां; P_3 I_3 °र्नोंमिष्टतां (for °र्नैदिष्ठतां).

1498. a) C S′ °स्यापि योगः (for °स्याऽभियोगः). —b) C S′ वोद्धुं [sic] (for योद्धुम्).

1501. d) $P_{1,3}$ I_3 SA °वीक्षण° (for °वेक्षण°).

1503. c) $P_{1,2}$ I_3 द्विषश्चमू° (for द्विषच्चमू°).

न खड्गी न हयारोहो नाऽपि शूली न चापभृत् ।
व्यावृत्य प्रेक्षितुं कश्चिदशकद् विद्रुताद् बलात् ॥१५०५॥

निबद्धवध्रशैथिल्याल्लोलपल्ययने हये ।
कोष्ठेश्वरस्याऽश्ववारा व्यलम्बन्ताऽन्तरे क्षणम् ॥१५०६॥

निर्यन्त्र्य तेऽपि पर्याणं सुजौ पश्चात् प्रधाविते ।
वातोद्धूतं रजश्चक्रमिव क्षिप्रं तिरोदधुः ॥१५०७॥

हतलुण्ठितविध्वस्तध्वजिनीका विरोधिनः ।
ध्यानोड्डारादिषु ग्रामेष्वमिलन्खण्डशो गताः ॥१५०८॥

विजयेशाग्रगं तीर्त्वा वितस्तासेतुमागतः ।
भासोऽपि दस्यून् विदधे पलायनपरायणान् ॥१५०९॥

उषित्वा विजयक्षेत्रे तदाऽन्येद्युरुपागते ।
कम्पनेशे ययुस्त्यक्त्वा ध्यानोड्डारं विरोधिनः ॥१५१०॥

तत्र स्थित्वा दिनैः कैश्चित् स देवसरसोन्मुखः ।
शिश्रिये भेदनिर्यातैरेत्य टिक्कस्य गोत्रिभिः ॥१५११॥

जयराजयशोराजौ तन्मुख्यौ भोजकात्मजौ ।
प्रविश्य देवसरसं व्यधाट्टिक्कोपवेशने ॥१५१२॥

ययुर्विनष्टसंघातास्तस्मिन् पश्चात् प्रधाविते ।
भिक्ष्वादयः शूरपुरं स्वोर्वीं कोष्ठेश्वरादयः ॥१५१३॥

1505. c) P_1 प्रेक्षितः; I_3 SA प्रेक्षितुः (for प्रेक्षितुं).
1507. a) $P_{1,2}$ I_3 SA निर्यन्त्य; C S′ निर्यत्य (for निर्यन्त्र्य). —c) St P_2 I_3 वात्यो° (for वातो°).
1508. S′ om. this *v.*
1509. a) SA_1 (after corr.) C S′ St $P_{1,3}$ °मग्रगः; SA_1 (before corr.) °मग्रतः (for °मागतः). —c) P_3 transposes दस्यून् विदधे.
1510. c) C S′ I_3 $P_{1,3}$ SA कम्पनेशं (for कम्पनेशे).

गर्हां महाभये सोमपालदूतः पलायितः ।
दास्याः सुतेन प्रहितः कुत्राऽस्मीति प्रभोर्व्यधात् ॥१५१४॥

स हि तादृङ्महारम्भक्षोभसाध्योन्नतीच्छुताम् ।
तस्य सिंहीस्पृहाक्रान्तगोमायुवदमन्यत ॥१५१५॥

प्रमादात् स्वामिनो राज्यं चिरं नष्टं मितैर्दिनैः ।
सुज्जिः प्रसाध्य प्रददावेवं स स्वामिसूनवे ॥१५१६॥

शमालादीनपि व्यूढान् दानोपायेन डामरान् ।
पौरांश्च भिक्षाश्रयिणो राजा भेत्तुं प्रचक्रमे ॥१५१७॥

राज्ञः परीक्ष्य सामर्थ्यमथ कुर्मो यथोचितम् ।
इति सर्वाभिसारेण ते संमन्त्र्य रणं ददुः ॥१५१८॥

रजोजवनिकालक्ष्यभटौघनटताण्डवः ।
दामोदरेऽभूत् संग्रामः स वीरग्रामघस्मरः ॥१५१९॥

कोष्ठेश्वरवशं यातं रक्षता पितरं क्षतम् ।
लब्धाः सहजपालेन श्लाघाः प्रकृतिभिः समम् ॥१५२०॥

श्रमस्तत्राऽविशेषोऽभूद् राज्ञो भिक्षाचरस्य च ।
भिक्षुस्त्वहन्यसंवेद्यं विवेदाऽऽत्मपराजयम् ॥१५२१॥

ततः प्रभृति यः प्रातः स न सायमदृश्यत ।
योऽद्य वा न परेद्युः स सैनिको भैक्षवे बले ॥१५२२॥

1516. [a]) C S′ P_{1-3} प्रसादात् (for प्रमादात्). —[c]) St C P_{1-3} I_3 प्रसाद्य; S′ प्रसादा (for प्रसाध्य).

1517. [d]) C S′ P_3 I_3 °भ्येत्तुं; P_1 °ब्येत्तुं; St °भ्येतुं (for भेत्तुं).

1518. [d]) St C S′ SA P_{1-3} I_3 तं (for ते). C S′ St $P_{1,2}$ I_3 दधुः; P_3 व्यधुः (for ददुः).

1519. [a]) P_{1-3} I_3 SA °जवनिकां (for °जवनिका°).

1521. [c]) D P_1 I_3 °स्त्वनन्य°; P_3 °स्तदन्य°; P_2 °स्त्वदन्य° (for °स्त्वहन्य°).

एवं त्यक्त्वा परान् पौरडामरेषु नृपान्तिकम् ।
प्रयात्सु लाभसत्कारानुचितान् प्राप्नुवत्सु च ॥१५२३॥

काप्यहंपूर्विकोत्तस्थौ मनुजेश्वरकोष्ठयोः ।
प्रयातुं पार्थिवाभ्यर्णं लाभसौख्याभिलाषिणोः ॥१५२४॥

ज्ञात्वाऽथ तत् काकरुहाद् गृहीतस्वपरिच्छदः ।
देशान्तरोन्मुखो भिक्षुराषाढे मास्यवाचलत् ॥१५२५॥

अनुयाद्भिः स दाक्षिण्यशेषाद् विहितसान्त्वनैः ।
तदाद्यैर्डामरैः क्रुध्यन् न निरोद्धुमपार्यत ॥१५२६॥

अकरोत् स्वैरिणीसूनुतया शीलबहिष्कृतः ।
अतिरूपेषु दारेषु तस्य कोष्ठेश्वरः स्पृहाम् ॥१५२७॥

सटां हरेः फणारत्नमहेर्ज्वालां हविर्भुजः ।
बालां च तस्य संस्प्रष्टुं कोऽप्रशान्तस्य शक्नुयात् ॥१५२८॥

समं सौस्सलिना बद्धसंधिराश्रयकाङ्क्षिणः ।
सोमपालः स्वविषये नाऽदात् तस्य प्रतिश्रयम् ॥१५२९॥

उद्वेजितः प्राणहरैः प्रयत्नैस्तस्य सर्वतः ।
तद्देशदुर्गममहीसीमान्तं सुल्हरीं ययौ ॥१५३०॥

त्रिगर्तेषु दया शीलं चम्पायां मद्रमण्डले ।
त्यागो दार्वाभिसारेषु मैत्री नाऽमर्त्यधर्मिणाम् ॥१५३१॥

1524. d) S′ P_2 °षिणौ; P_3 I_3 °षिणैः (for °षिणोः).
1525. a) For काकरुह cf. *v*. viii. 1264. —b) C S′ °तस्य° (for °तस्व°).
1527. c) I_3 हारेषु (for दारेषु).
1528. a) P_3 सतां (for सटां). —c) P_{1-3} I_3 SA सम्प्रष्टुं (for संस्प्रष्टुं).
1530. a) D उद्विजेतः; C S′ तद्विजेतुः; I_3 तत्वेजितः (for उद्वेजितः). —c) P_1 I_3 SA तदेश° (for तद्देश°). —d) P_1 सुल्यरीं; P_3 मुल्हरीं; I_3 स्वल्हरीं (for सुल्हरीं).
1531. b) P_2 °रुद्रम°; I_3 मश्रम° (for मद्रम°). —c) I_3 दार्वाडि° (for दार्वाभि°).

पीडयेत् त्यक्तभीर्भूभृद् दूरस्थे त्वयि डामरान् ।
त्वामेवाऽभ्यर्थ्य राजानं ततः कुर्युः क्रमेण ते ॥१५३२॥

क्ष्मां तद्व्रजामोऽर्थयितुं साम्प्रतं नरवर्मणः ।
मन्त्रिभिर्युक्तमित्युक्तमपि मन्त्रं न चाऽग्रहीत् ॥१५३३॥

वसाल्पपरिवारोऽसद्गृह इत्यथ गृह्यतः ।
श्वशुरप्रार्थनां तस्य भृत्याः पार्श्वादवाचलन् ॥१५३४॥

प्रावर्तताऽथ नगरे विशद्भिर्विभवोज्ज्वलैः ।
सुलग्नसुलभे काले वरयात्रेव डामरैः ॥१५३५॥

वीक्ष्याऽश्वच्छत्रतुरगैरेकैकं पार्थिवाधिकम् ।
सुस्सलक्ष्मापतेर्धैर्यनैष्ठुर्यं तुष्टुवुर्जनाः ॥१५३६॥

औदार्याकारतारुण्यवेषसौन्दर्यमन्दिरम् ।
कोष्ठेश्वरोऽधिकं स्त्रीणां प्रययौ प्रेक्षणीयताम् ॥१५३७॥

प्रशान्तविप्लवे देशे ययावुत्सववाद्यताम् ।
विशद्भूरिलवन्यौघतूर्यघोषो दिवानिशम् ॥१५३८॥

क्षीराद्या लक्ष्मकेणाऽपि सर्वे मडवराज्यतः ।
आनीताः पार्थिवाभ्यर्णं सैन्यार्णवभयंकराः ॥१५३९॥

1533. [a]) C S′ I_3 तद्व्रजा सोऽर्थ° (for तद्व्रजामोऽर्थ°).
1534. [a]) C S′ वात्सल्य° (for वसाल्प°). —[b]) D P_1 इत्यप°; S′ इत्यर्थ° (for इत्यथ).
1536. [b]) C S′ P_{1-3} I_3 °कैकंपा° (for °कैकं पा°). —[cd]) St C $P_{2,3}$ I_3 °धैर्यं नै° (for °धैर्यनै°).
1537. [b]) C S′ P_3 °वेश° (for °वेष°).
1538. [a]) SG °प्लवो देशो; (for °प्लवे देशे). —[b]) C S′ P_3 °वश्यताम्; SA P_2 °वाच्यताम् (for °वाद्यताम्). —[d]) C S′ P_{1-3} SG °घोषा°; SA °घोषा (for °घोषो). C S′ °दिकोऽनि° (for दिवानि°).
1539. [c]) P_1 अनीताः (for आनीताः).

अपि भूपालवाल्लभ्यादभूद् राजोपजीविनाम्।
प्रतीहारगृहद्वारप्रवेशो बहुमानकृत् ॥१५४०॥

लवन्यलुण्ठितग्रामतया दुर्भिक्षदुस्सहः।
व्ययोत्तरङ्गः कालोऽभूत् स राज्ञो धनदश्रियः ॥१५४१॥

डामरेभ्यो नृपः पारात् संगृह्णन् कृतवेतनः।
निनायाऽभ्यन्तरं वृद्धिं बाह्यं चाऽपचयं जनम् ॥१५४२॥

तिष्यवैश्यार्घदेवाद्या ज्ञातयो जनकद्रुहाम्।
राजद्रोहोचितां राज्ञा विपत्तिमनुभाविताः ॥१५४३॥

मासैश्चतुर्भिः स पितृप्रमयाहादनन्तरम्।
अनन्यशासनं राष्ट्रं स्वमेव समपादयत् ॥१५४४॥

निर्धाम नगरं पौराः सर्वसामर्थ्यवर्जिताः।
अनन्तै राष्ट्रमाकीर्णं डामरैः पार्थिवोपमैः ॥१५४५॥

बद्धमूलो नातिदूरे सर्वभारसहो रिपुः।
सबाह्याभ्यन्तरा मन्त्रिसामन्ता वैरिसंश्रिताः ॥१५४६॥

मन्त्रोपदेशो वृद्धस्य नैकस्याऽपि नृपास्पदे।
अधर्मबहुलाः सर्वे भृत्या द्रोहैकवृत्तयः ॥१५४७॥

1542. [a]) C S′ पौरान्; St. Tr. suggests सारान् (for पारात्).

1543. [a]) For तिष्यवैश्यार्घदेवा cf. *v.* viii. 1305. —[c]) $P_{1,3}$ I_3 °द्रोचिता (for °द्रोचितां).

1545. [a]) D C S′ P_{1-3} I_3 SR निवासन° (for निर्धाम न° found in SA_1).

1547. [a]) D सत्तो°; C S′ $P_{1,3}$ I_3 SA मत्तो° (for मन्त्रो°). All Mss. read °देश° (for °देशो suggested with St). —[c]) St $P_{1,3}$ I_3 °बहल: (for °बहुलाः).

राज्यारम्भे बभूवेयं या सामग्र्यस्य भूपतेः ।
सा सर्तव्याऽन्तरा ज्ञातुं प्रत्युदन्तं विवेक्तृभिः ॥१५४८॥

प्राप्तप्रसङ्गात् तदिदं गुणग्रामोपवर्णनम् ।
वक्ष्यमाणं सुबहुशोऽप्यत्र लेशात् प्रदर्श्यते ॥१५४९॥

पूर्वापरानुसंधानवन्ध्यैर्दृष्टान्तवत्कथाः ।
नाऽबुद्ध्वाऽतिगभीराणां शक्या रसयितुं गुणाः ॥१५५०॥

प्रत्यक्षस्य गुणान् राज्ञो विचिन्वन्तो यथास्थितान् ।
अनीर्ष्यस्य भविष्यामो विवेकस्याऽनृणा वयम् ॥१५५१॥

स्थितस्य तत्त्वविज्ञाने नाऽन्यस्य हि पटुर्जनः ।
अमानुष्यानुभावस्य राज्ञः किं पुनरीदृशः ॥१५५२॥

हितानां दाराणां सदृशसुखदुःखस्य सुहृदः
कवेः सोल्लेखस्य प्रियसकललोकस्य नृपतेः ।
स्थितानां कोऽप्यत्र व्यवहितविवेकः स्वकुकृतै-
रसामान्यं ज्ञातुं सुभगमनुभावं न कुशलः ॥१५५३॥

भवेत् प्राप्तप्रसरणा परिणामेऽथवा मतिः ।
कथं सर्वस्याऽद्भुतायां निष्ठायां गुणदोषयोः ॥१५५४॥

सन्त्येवाऽस्याऽपि विषमाः स्वभावा दोषतां जनः ।
येषां विपाकभव्यत्वमजानन् गणयत्ययम् ॥१५५५॥

1548. c) St C °न्तराज्ञातुं (for °न्तरा ज्ञातुं). —d) C °दन्तविवे° (for °दन्तं विवे°).

1550. b) C °बन्धै°; D °बन्ध्यै° (for °बन्ध्यै°). SA1 om. दृष्टान्त with a space. —c) C °बुद्धा°; I3 °बुध्या° (for °बुद्ध्वा°).

1552. b) P2 °जना: (for °जन:). —c) St P1–3 I3 °नुषा° (for °नुष्या°).

1553. a) S′ सुहृदं (for सुहृद:). —d) P1 स्वभ° (for सुभ°).

1554. c) C S′ °र्वस्य भूता° (for °र्वस्याऽद्भुता°).

1555. b) P3 दोषता (for दोषतां). —c) P3 °जन्यत्व° (for °भव्यत्व°).

विकासः केषांचिन्नयनविषमैर्विद्युदुदयैः
परेषामुद्भूतिः श्रवणकटुभिर्दीर्घरसितैः ।
न चेष्टा काऽप्यन्योपकृतिपरिहीना जलमुचो
जडो वर्षादन्यं गणयति गुणं नाऽस्य तु जनः ॥१५५६॥

गुणांल्लोकोत्तराञ्श्रृण्वन्नस्याऽनुभवगोचरान् ।
भविता पूर्वभूपालकृत्ये सप्रत्ययो जनः ॥१५५७॥

अनुच्चलन्नपि स्थानाद् भ्रूभङ्गेन चकार सः ।
विलोलांल्लोमकम्पेन दिङ्नाग इव भूधरान् ॥१५५८॥

विरुद्धग्राहिनीवृन्दा गूढं यद्भयसंभवम् ।
वहन्ति तापं भूपाला और्वाग्निमिव सिन्धवः ॥१५५९॥

भूमिभृद्भास्वतस्तस्य तेजसाऽऽप्यायितो गतः ।
पूर्वराजयशश्चन्द्रो भुवनेष्वप्रकाशताम् ॥१५६०॥

यो यस्तं पश्यति स्वात्मसंमुखं स स सर्वतः ।
जानात्यवक्रोल्लिखितं देवबिम्बमिवेश्वरम् ॥१५६१॥

स्थिरप्रसादो दत्ते यत् तदादत्ते न स क्वचित् ।
भयं पुनः प्रणमतां दत्तं हरति विद्विषाम् ॥१५६२॥

कृष्टासेः प्रतिबिम्बं स्वं हित्वा नाऽन्योऽस्य संमुखः ।
नाऽपरः प्रतिशब्दाच्च गर्जतः प्रतिगर्जति ॥१५६३॥

1556. a) P_1 विकासं (for विकासः). P_1 °विशसै°; P_2 °विषदै°; I_3 °विषशे° (for °विषमै°). S' P_3 °दय: (for °दयैः). —b) $P_{1,3}$ °द्भूतिं (for °द्भूतिः). —c) S' °हीनां (for °हीना).

1557. d) C S' °कृते (for °कृत्ये).

1558. b) SA भृभङ्गेन; P_2 भ्रूभृङ्गेन (for भ्रूभङ्गेन).

1559. a) C S' °रुध° (for °रुद°).

1560. d) D भुवनेषु (for भुवनेष्व°).

1561. c) C S' जानाति वक्त्रो° (for जानात्यवक्रो°).

1562. b) I_3 कश्चित् (for क्वचित्).

1563. c) C S' P_1 °शब्दश्च; $P_{2,3}$ I_3 °शब्दाश्च (for °शब्दाच्च).

तस्य नाऽतिशितं कोपे प्रसादे निशितं पुनः ।
धत्ते तीक्ष्णैकधारस्य तरवारेस्तुलां वचः ॥१५६४॥

तस्याऽकुजन्मनो नित्याम्लानलक्ष्मीविकासिनः ।
प्रभवन्त्याश्रिताः कल्पशाखिनः पल्लवा इव ॥१५६५॥

राज्ञि गाम्भीर्यदुर्लक्ष्यमाहात्म्यप्रभविष्णुताम् ।
विवेद मन्त्रिणां लोकः सिषेवे तांश्च सर्वतः ॥१५६६॥

प्ररूढस्तु प्रतीहारो न विषेहेऽन्यमन्त्रिणाम् ।
पार्श्वद्रुमाणामेपाख्यौषधिस्तम्भ इवोद्गतिम् ॥१५६७॥

तस्योत्पाटयतः सर्वांस्तृणानीवाऽवहेलया ।
स्फूर्जज्जनकसिंहोऽभूदशक्योन्मूलनः परम् ॥१५६८॥

आबाल्यात् संस्तुतो राज्ञः स कृत्स्नव्यवहारवित् ।
अधृष्यस्तरुणीभूततनयो ह्यास्त सर्वतः ॥१५६९॥

अद्वैधं यौनसंबन्धादिच्छतस्तत्सुतो मदात् ।
छुड्डाभिधस्तस्य ततः कृतावज्ञोऽतनोत् त्रपाम् ॥१५७०॥

रन्ध्रान्वेषी स तद्रोषादुपजापैः क्षणे क्षणे ।
ससूनौ जनके यत्नान्नृपं द्वेषमजिग्रहत् ॥१५७१॥

राज्ञस्तुल्यवयस्थौ हि जननीगाढसंस्तवात् ।
राज्यकाले हि सोत्सेकावास्तां तदवकाशदौ ॥१५७२॥

1564. c) I_3 दत्ते (for धत्ते). —d) C S′ °वाले° (for °वारे°).
1566. c) I_3 विवेश (for विवेद).
1567. b) C S′ नो (for न). —c) P_1 °ख्योषधि° (for °ख्यौषधि°).
1569. c) C S′ °स्तरणी° (for °स्तरुणी°). —d) C S′ °हस्त° (for °ह्यास्त°).
1571. d) D_SA C S′ I_3 $P_{2,3}$ °न्नृपो; P_1 °न्नृप (for °न्नृपं suggested with St).
1572. a) P_1 राज्ञा तु° (for राज्ञस्तु°).

तुरङ्गयुग्योपस्कारस्नानाहारादि राजवत् ।
अकालज्ञावकुरुतां राजधान्यन्तरेव तौ ॥१५७३॥

सह स्ववृद्धैः समशीर्षिका प्रभो-
र्न युज्यते प्राप्तसमुन्नतेः क्वचित् ।
श्रितोन्नतेर्दर्दुरवृन्दलङ्घनं
सरोजषण्डस्य महाविडम्बना ॥१५७४॥

तद्भित्तिलाभसंरूढपैशुनालेख्यकल्पनाः ।
तद्वर्गेऽप्यखिले चक्रुस्तद्द्विषः कलुषं नृपम् ॥१५७५॥

अथ राजा विजयिनं सत्कर्तुं कम्पनापतिम् ।
कृतज्ञः श्रावणे मासि जगाम विजयेश्वरम् ॥१५७६॥

अत्राऽन्तरे पिञ्चदेवादागच्छन् गिरिगह्वरे ।
प्राप शूरपुरद्रङ्गाधीश्वरादुत्पलो वधम् ॥१५७७॥

पुष्याणनाडादुत्पिञ्जकृतये पुनरागतः ।
द्रङ्गाधिपेन गुटिकान्वेषिणा स ह्यवाप्यत ॥१५७८॥

क्षितौ निपतितः पार्श्वप्राप्तमेकं द्विषद्भटम् ।
मुमूर्षुर्विशिखाविद्धजानुमर्मापि सोऽवधीत् ॥१५७९॥

प्रत्यावृत्तस्य सत्कृत्य कम्पनेशं महीपतेः ।
द्वार्यवन्तिपुरस्थस्य द्रङ्गेशोऽरिशिरो व्यधात् ॥१५८०॥

1573. a) All Mss. read °योग्यो° (for °युग्यो° suggested with St. Tr.).
1575. b) P_2 C S′ °कम्पनाः (for °कल्पनाः). —d) C °स्तद्वि° (for °स्तद्द्वि°).
1577. c) St पिञ्ज°; S′ पञ्च°; P_2 पिंच्छ° (for पिञ्च°).
1578. a) C S′ D $P_{1,2}$ I_3 पुष्पाण° (for पुष्याण°). —c) C S′ °नागुटि°; D °नागुटि°; P_2 I_3 नातटि° (for °न गुटि°).
1580. c) SA °पुरस्स्थस्य (for °पुरस्थस्य). —d) C S′ °शूरः (for °शोरि°).

स दृढद्राढिकामुष्टिरसुहृन्मुण्डमुद्गरः ।
चक्रे तस्य दृढामर्षशोकशङ्कुविपाटनम् ॥१५८१॥

आद्यायामेव यात्रायां जातारातिक्षयो जनैः ।
स निश्शेषयिताशेषकण्टकानामगण्यत ॥१५८२॥

तस्मिन् प्रविष्टे नगरं विद्रुताः केऽपि सागसः ।
प्रापुर्जनकसिंहाद्याः केऽपि कारागृहस्थितिम् ॥१५८३॥

कैश्चित् पालायितैः शङ्कां ग्राहिताः पृथिवीपतेः ।
ततः कोष्ठेश्वरमुखाः प्रातिलोम्यं प्रपेदिरे ॥१५८४॥

शमालां निर्गतः श्रीमान् कार्तिकेऽथ कृती नृपः ।
तत्र तत्राऽसुहृद्ग्रामं संग्रामोग्रमबाधत ॥१५८५॥

यत्र सुस्सलभूपाद्याः प्रापुर्भग्नप्रतापताम् ।
तं हाडिग्राममदहत् सुज्जिरूर्जितविक्रमः ॥१५८६॥

महीभुजा पीड्यमानैराहूतः कोष्ठकादिभिः ।
अथ भिक्षाचरो राज्यगृध्नुर्भूयोऽप्युपाययौ ॥१५८७॥

एकेनाऽह्ना योजनानि प्रोल्लङ्घ्य दश पञ्च च ।
शिलिकाकोट्टनामानं गिरिग्राममवाप सः ॥१५८८॥

क्षुत्पिपासाक्रमारातिभीतिमार्गश्रमोद्भवम् ।
क्लेशं नाऽजीगणन्मानी धावितः स जिगीषया ॥१५८९॥

1581. d) C S′ P_{1-3} I_3 SA °पाद° (for °पाट°).

1582. d) C S′ P_{1-3} I_3 °कण्ठ° (for °कण्ट°).

1584. a) P_1 SA कैचित् [sic]; P_2 I_3 केचित् (for कैश्चित्).

1588. c) D C S′ $P_{1,3}$ °कोष्ट° (for °कोट्ट°).

कार्यमायाति वैमुख्यं जिगीषोर्विधुरे विधौ ।
प्रस्थितस्य पुरोवाते रथस्येव ध्वजांशुकम् ॥१५९०॥

आरम्भमात्रमपि कस्यचिदेव सिद्ध्यै
कश्चित् प्रयत्नपरमोऽप्यफलप्रयासः ।
मन्थाद्रिणाऽमृतमवाप्युदधेर्मुहूर्तात्
सक्तिं चिराद् विदधता न हिमाद्रिजेन ॥१५९१॥

भ्रष्टा सरित्स्ववसतेर्जलधिप्रवेशे
वेलोर्मिवेल्लनवशेन विवर्तमाना ।
मिथ्यैव यच्छति धियं पुनरुद्गतेति
नोत्थानमस्ति तु विधिव्यपरोपितानाम् ॥१५९२॥

तस्य तावन्महायत्नकठोरस्योदयक्षणे ।
सिद्धेर्विबन्धो विधिना विधुरेण व्यधीयत ॥१५९३॥

आयातं तमबुद्ध्वा तु तस्मिन्नेव क्षणेऽश्रयत् ।
पृथ्वीहरानुजः प्राप्तभङ्गः कृत्ताङ्गुलिर्नृपम् ॥१५९४॥

कोष्टेश्वरः स चाऽवेत्य संप्राप्तं तमतिष्ठताम् ।
कृत्याक्षमौ ततः सर्पाविव मन्त्रनियन्त्रितौ ॥१५९५॥

ताभ्यां स्थानेऽथ सोऽन्यस्मिंस्त्याजितोऽध्वपरिश्रमम् ।
कार्कोटद्रङ्गमार्गेण निर्गतः सुल्हरीं ययौ ॥१५९६॥

आसीच्च तत्र प्रोच्चण्डदर्पकण्डूलदोर्द्रुमः ।
ऊष्मायमाणः कश्मीराक्रान्तिसंततचिन्तया ॥१५९७॥

1591. c) D P_1 °र्मुहूर्ता° (for °र्मुहूर्तात्).

1593. c) $P_{2,3}$ I_3 °बद्धो; C S′ °बुद्धो (for °बन्धो).

1594. b) SA om. तु.

1595. c) D P_{1-3} हत:; C S′ हतौ; I_3 हित: (for तत:).

उदीपसलिलस्येव तस्य रन्ध्रगवेषिणः ।
पुरं प्रविष्टो राजाऽपि प्रतीकारमचिन्तयत् ॥१५९८॥

अद्वितीयस्त्वमात्येषु प्रतीहारो मदोग्रताम् ।
सुज्जेरसहमानोऽभूच्छलान्वेषणतत्परः ॥१५९९॥

आययावथ विस्रम्भावष्टम्भं वल्गतः प्रभोः ।
धन्याग्रजः पूतमूर्तिर्जाह्नवीजलमज्जनात् ॥१६००॥

तदाद्याः संस्तुता राज्ञश्चिरसंभावितास्ततः ।
अनाप्नुवन्तोऽधीकारान् पर्यतप्यन्त चिन्तया ॥१६०१॥

कुर्वाणे कार्यतस्तस्मिन् भरं पित्र्येषु मन्त्रिषु ।
कालप्रतीक्षाक्षमतामूहुस्ते गहनाशयाः ॥१६०२॥

प्रतीहारस्तु दुर्लक्ष्यसुज्जिनिर्लोठनोद्यतः ।
अप्रियानपि तान् प्रीत्या जग्राहोग्रोपयोगिनः ॥१६०३॥

व्यतीतेष्वथ मासेषु केषुचिद् दैवयोगतः ।
अकस्मादभवद् भूभृत् स्फीतलूतामयातुरः ॥१६०४॥

विस्फोटशोफातीसारवह्निमान्द्याद्युपद्रवैः ।
संदिग्धाभ्युदये तस्मिन् देशः पर्याकुलोऽभवत् ॥१६०५॥

इत्थं स्थितः कुलस्यैकभर्तुः स्वामी बली रिपुः ।
तत्पक्षा डामरा राष्ट्रं दुष्टमेव व्यचिन्तयन् ॥१६०६॥

1598. c) C S′ राजाति° (for राजाऽपि).
1600. c) P_2 धान्या° (for धन्या°).
1601. ab) C S′ राज्ञश्चिरं; P_3 राज्ञा चिर° (for राज्ञश्चिर°).
1602. cd) All Mss. read °क्षमतां मुहुस्ते (for क्षमतामूहुस्ते suggested with St).
1606. a) SA_1 (before corr.) C S′ I_8 कुलेस्यै° (for कुलस्यै°).

आयत्यां च तदात्वे च हितकृत्यं विचारयन् ।
राज्ञः श्रीगुणलेखाया जातमेकं सुतं शिशुम् ॥१६०७॥

पञ्चाब्ददेश्यं पर्माण्डि सुजिर्भूमिपतिं तदा ।
चिकीर्षुर्मन्त्रायामास मातुलेनाऽस्य गार्गिणा ॥१६०८॥

इत्थं भूतस्य दुध्रुक्षुः ससूनुः सुजिरद्य ते ।
पञ्चचन्द्रादिभिः सार्धं युक्त्या मन्त्रयतेऽनिशम् ॥१६०९॥

लब्धरन्ध्रः प्रतीहारो धन्याद्याश्च तदीरिताः ।
इत्यवोचंस्ततो भूपं स तथेत्यग्रहीच्च तत् ॥१६१०॥

पूर्वप्रजासृज इवाऽद्भुतवस्तुतत्त्व-
व्यावर्णनेन कुतुकं जनयन्ति तज्ज्ञाः ।
बाला इवाऽल्पमतिहार्यधियश्च सन्ति
प्रायो नृपा नियमशून्यमनोऽनुभावाः ॥१६११॥

शौचस्थाने कृतवसतिभिः स्त्रीव्यवायालये वा
निश्शङ्को यश्छलनकुशलैर्मानसं संप्रविश्य ।
नीतो भूतैरिव विवशतां निर्भरं गर्भचेटै-
र्भद्रं भूपात् कथमिव ततः स्यादवष्टब्धचेष्टात् ॥१६१२॥

निर्हेतु प्रहसन् विटः प्रविशति क्षोणीपतेरन्तिकं
प्रीत्युत्फुल्लदृगेष किं किमिति तं पृच्छत्यनच्छाशयम् ।
ब्रूते किंचिदसौ कचानथ कषन्सर्वंकषं मानिनां
मानप्राणगुणेषु यत्सरभसं दम्भोलिपातायते ॥१६१३॥

1607. c) S′ P_1 राज्ञा:; C राज्ञ्या: (for राज्ञः). —d) St P_2 I_3 °मेक° (for °मेकं).
1608. d) C S′ SA गर्गिणा (for गार्गिणा).
1610. b) $P_{1,2}$ धान्या° (for धन्या°). C S′ $P_{1,2}$ उदीरिता: (for तदीरिता:).
1611. a) D C S′ $P_{1,2}$ I_3 SA °स्रज (for °सृज). P_{1-3} I_3 SA °तत्त्वं (for °तत्त्व°).
1612. a) C S′ शोच° (for शौच°). —b) D C S′ P_{1-3} I_3 यच्छ° (for यश्छ°). —d) C S′ °मितरत: (for °मिव तत:).
1613. c) C कदाप्यथ; S′ कदापथ; P_1 कदानथ (for कचानथ).

सविभ्रमगतागतः किमपि भाषमाणः श्रुतौ
प्रभोर्वलितलोचनं जगदवज्ञयाऽऽलोकयन् ।
निजस्य मुखविक्रियाप्रणयताडनाद्यैर्विद-
न्ननुग्रहमिवाऽहितं नृपतिवल्लभो दुस्सहः ॥१६१४॥

अपि जातु स दृश्येत निस्संक्षोभमतिर्नृपः ।
यो यन्त्रपुत्रक इव व्यक्तं धूर्तैर्न नर्त्यते ॥१६१५॥

यतो भृत्यान्तराज्ञानाज्जातः सर्वस्वसंक्षयः ।
तत् प्रजादुष्कृतै राज्ञां हा धिङ्नाऽद्याऽपि शाम्यति ॥१६१६॥

सुजिरारोग्यमन्वेष्टुमागच्छन् पूर्ववत्प्रभोः ।
विन्यस्तरक्षिणः पश्यन्नविश्वासमखिद्यत ॥१६१७॥

दाक्षिण्यं वामतां यातमाशये प्रतिबिम्बितम् ।
दर्पणस्येव राज्ञः स विभाव्याऽभूत् पराङ्मुखः ॥१६१८॥

तस्मिन् राजगृहे खेदान्मन्दीकृतगतागते ।
नृपतेस्तद्गतां प्रीतिं निश्शेषां जह्निरे खलाः ॥१६१९॥

भृत्यः सुजेश्चित्ररथोऽप्यास्थानद्विजभूः शठः ।
प्रातिलोम्यावहैर्भर्तुर्मन्त्रैरासीच्छ्रियोऽन्तकृत् ॥१६२०॥

नीरोगे राज्ञि दृष्टः स दिष्टवृद्ध्यै नृपास्पदे ।
वसुवर्षी विनिर्याय प्रार्थनार्थी गृहान् ययौ ॥१६२१॥

1619. [a]) C S′ जह्निरेऽखिलाः; $P_{2,3}$ I_3 SA जह्निरेखिलाः (for जह्निरे खलाः).

1621. [b]) C S′ $P_{1,3}$ शिष्ट° (for दिष्ट°).

न तं प्रासादयद् राजा विशालबलवाहनः।
आक्रम्योऽसौ कथं नः स्यादित्युपायं त्वचिन्तयत् ॥१६२२॥

त्यज्येत हृतकार्योऽसौ निराशैरनुजीविभिः।
मत्वेति तदधीकारानन्येभ्यस्तूर्णमार्पयत् ॥१६२३॥

राजस्थानात् स्रजं धन्यमुदयं कम्पनादपि।
अजिग्रहन्नरपतिः खेरीकार्यं च रिल्हणम् ॥१६२४॥

हृताधिकारे प्रव्यक्तवैकृते नृपतौ ततः।
अल्पावशेषानुचरः सुज्जिरासीद् विशङ्कितः ॥१६२५॥

विमानितः पुराद् गङ्गायात्रामुद्दिश्य मानवान्।
सोऽथ सुस्सलभूभर्तुरस्थीन्यादाय निर्ययौ ॥१६२६॥

औत्सुक्यात् प्रार्थनाकाङ्क्षी राजधान्यन्तिके न सः।
निर्गच्छन् राजपुरुषैर्न राज्ञा वाऽन्वरुध्यत ॥१६२७॥

तन्निर्वासनगर्वस्य स्थापनायाऽनुयात्रिके।
प्रतीहारस्तस्य गुप्त्यै कोशादेः स्वात्मजं व्यधात् ॥१६२८॥

निग्रहानुग्रहावस्मदायत्ताविति रक्षिणम्।
पुत्रं प्रादाल्लक्ष्मको म इति ध्यायन् स विव्यथे ॥१६२९॥

निवृत्तो लक्ष्मको द्वारात् पर्णोत्सं शनकैर्गतः।
अवारोपयदद्रोहो भागिकं लोहराचलात् ॥१६३०॥

1622. c) D C S′ P_{1-3} I_3 SA आक्रम्यासौ (for आक्रम्योऽसौ suggested with St). SA (before corr.) S′ न (for नः). —d) C P_3 विचिन्तयन्; S′ विचिन्तयत् (for त्वचिन्तयत्).

1624. a) $P_{1,2}$ I_3 S′ SA धान्य° (for धन्य°).

1625. a) C S′ $P_{1,2}$ I_3 SA हिता° (for हृता° suggested with St).

1628. cd) P_1 om. after प्रतीहा.

1629. a) P_1 om. निग्राहनुग्र. —c) C S′ SR °कोथ; D P_{1-3} I_3 SA °कोष (for °को म suggested with St).

1630. a) St. Tr. suggests लाक्ष्मको (for लक्ष्मको).

प्रतीहारविसृष्टाय धात्रेयाय महीभुजः ।
प्रेमाभिधाय तत्कोट्टाधीकारं च समार्पयत् ॥१६३१॥

उत्खाय लोहरत्यागाच्छङ्काशङ्कुं महीपतेः ।
स ग्रीष्मविषमं कालं राजपुर्यामलङ्घयत् ॥१६३२॥

अमात्यकन्दुकव्रातपातनोत्पातनक्षमः ।
आयत्तडामरः प्राप प्रथां कामपि लक्ष्मकः ॥१६३३॥

द्वारेऽथाऽकारयत् सुज्जिप्रतिमल्लविधित्सया ।
कृष्यमाणो राजवंशपौरुषं राजमङ्गलम् ॥१६३४॥

अनन्यदेशजः सुज्जेः शूरो मत्कोशपोषितः ।
कीर्तिमेष हरेद्दध्यावितीर्ष्याकलुषो हि सः ॥१६३५॥

खड्गग्राहिसहायः स क्षुण्णः पर्यटितुं पथि ।
निस्सुखश्चोपहास्यश्च तेन कार्यार्पणात् कृतः ॥१६३६॥

कर्तुं पदव्यां योग्यानामयोग्यान् प्रभवेन्न कः ।
तेषां गुणैस्तान् संयोक्तुं न शक्यं कारणैरपि ॥१६३७॥

पदे श्रीखण्डस्याऽनुचितमुचिते वर्ष्मणि निजे
वृषाङ्कः प्रक्षेप्तुं प्रभवति चिताभस्म रभसात् ।
न तत्स्वेच्छायत्तत्रिजगदुदयापायघटनोऽ-
प्यसौ तद्गन्धेन स्फुटमिह पट्टः सङ्घटयितुम् ॥१६३८॥

1631. b) C S′ धात्री° (for धात्रे°). —d) $P_{2,3}$ SA सम° (for समा°).
1632. d) C राजा (for राज°).
1633. b) P_3 I_3 SA_2 °नोत्थापन°; P_1 °नोर्थापन° (for °नोत्पातन°).
1635. a) D C S′ $P_{1,3}$ I_3 SA_3 सुज्जिः (for सुज्जेः). —b) SA_1 मत्केश° (for मत्कोश°). —cd) SA_1 स्पर्धामेष वहे···विती° (for कीर्तिमेष हरेद्दध्याविती°).
1637. b) C S′ $P_{2,3}$ I_3 °ग्यात् (°ग्यान्).
1638. d) SA_1 om. पट्टः with a space.

78641B

तस्मिन् सुज्जिप्रतिस्पर्धामप्रौढे वोढुमक्षमे ।
दूतानसृजदानेतुं सज्जपालं दिगन्तरात् ॥१६३९॥

निर्वीरे मण्डले द्वेष्योऽप्यवापत्कार्यगौरवात् ।
कोष्ठेश्वरो नरपतेर्नितरामन्तरङ्गताम् ॥१६४०॥

प्रीतिदायैस्तोष्यमाणस्तैस्तैस्तुष्टेन भूभुजा ।
विस्रब्धो नगरे तस्थौ सोऽपि लूतामयातुरः ॥१६४१॥

एवं दमकदम्बैक्यं राज्ञि कुर्वति कार्यतः ।
चालकैः सोमपालाद्यैः सुज्जिर्निन्येऽथ वैकृतम् ॥१६४२॥

प्रतिज्ञाय लतामात्रसाध्यं कश्मीरनिर्जयम् ।
सोमपालाय तद्राज्यं सोऽङ्गीचक्रेऽवमानितः ॥१६४३॥

प्रतिशुश्राव तस्मै च भागिनेयीं स कन्यकाम् ।
धीमानत्राऽन्तरे सामदाने प्रयुयुजे नृपः ॥१६४४॥

द्वौ तावल्पाशयौ राजकन्ययोः स्वीक्रियां तदा ।
रभसाद् यावकुर्वाणावदत्तामन्तरं द्विषाम् ॥१६४५॥

उपायैर्जयसिंहस्य शाकुनैश्च निरीक्षितैः ।
प्रेरितः सोमपालोऽथ सुज्जेर्मन्दादरोऽभवत् ॥१६४६॥

स्वयमेत्य प्रतीहारस्तत्र राजपुरीपतिम् ।
सीमान्तर्भुवमानिन्ये कन्यकोद्वाहसिद्धये ॥१६४७॥

जातां कल्हनिकाख्यायां महादेव्यां महीपतेः ।
उपयेमे नृपसुतां सोमोऽम्बापुत्रिकाभिधाम् ॥१६४८॥

1639. [b]) C S′ °प्रौढां (for °प्रौढे).
1642. [c]) I_3 °पालाद्य:; P_3 °पालान्यैः (for °पालाद्यैः).
1643. [cd]) P_1 om. after सोमपालाय.
1644. [a]) P_1 om. प्रतिशुश्राव.
1647. [c]) D C S′ P_{1-3} I_3 °न्तुसुव° (for °न्तर्भुव°).
1648. [a]) C S′ P_1 I_3 कल्प° (for कल्ह°).

यातें तस्मिन् कृतोद्वाहे नागलेखाभिधां सुधीः ।
तत्स्वस्त्रेयीं प्रतीहारो भूभुजे प्रत्यपादयत् ॥१६४९॥

इत्थं राष्ट्रद्वये बद्धसन्धौ निरवकाशताम् ।
प्राप्तः प्रतस्थे हेमन्ते सुजिस्त्रिपथगोन्मुखः ॥१६५०॥

जालन्धरे संघटितो ज्येष्ठपालो निनाय तम् ।
गाढावमाननिर्नष्टसौष्ठवं भिक्षुपक्षताम् ॥१६५१॥

त्वयि भिक्षाचरे चैकसैन्यनायकतां गते ।
नोपेन्द्रो वा महेन्द्रो वा समर्थौ प्रत्यवस्थितौ ॥१६५२॥

राज्यप्रदस्य ते यश्च चक्रे राजा विमाननाम् ।
तस्थुषो यश्च विषये प्रतिकुर्मस्तयोर्द्वयोः ॥१६५३॥

इति संप्रेरितस्तेन देङ्गपालान्तिकस्थितेः ।
यियासुः सोऽन्तिकं भिक्षोर्भागिकेन न्यषिध्यत ॥१६५४॥

अनिक्षिप्तवतोऽस्थीनि स्वामिनो जाह्नवीजले ।
न युक्तमेतत् ते कृत्यमित्यावेगादशासि च ॥१६५५॥

ज्ञात्वा ध्रुवन्धामेष्यामि पार्श्वं व इति निश्चयम् ।
स पीतकोशः कृत्वाऽस्य ययौ प्रस्तुतसिद्धये ॥१६५६॥

प्रतीहारकरन्यस्तसर्वभारस्तु भूपतिः ।
मन्दाक्रान्तितया राज्यमसुस्थितममन्यत ॥१६५७॥

1649. [a]) C S′ जाते (for याते). —[c]) I_3 SA °स्वस्रेयी (for °स्वस्रेयीं).

1655. [d]) D P_{1-3} I_3 SA °शाधि (for °शासि).

यो यो हि व्यग्रहीत् तं तं संधाय सविधस्थितः ।
तमन्वहं प्रतीहारः सानुग्रहमिवैक्षत ॥१६५८॥

प्रगल्भमाने शास्त्येवमुदयः कम्पनापतिः ।
अवधीच्छद्मना दृप्तं प्रकटं कालियात्मजम् ॥१६५९॥

अविश्वासोल्बणान् सर्वलावन्यानथ लक्ष्मकः ।
निर्मर्यादान् कम्पनेशमीषत्सान्त्वमजिग्रहत् ॥१६६०॥

स्नात्वाऽभ्येष्यति गङ्गायां यावत् सुज्जिर्विसूत्रताम् ।
यावत् कथं मया नेयाः कश्मीरा इति चिन्तयन् ॥१६६१॥

तावन्मात्रान्तरव्याप्त्या राज्ञो विज्ञाय डामरान् ।
भिन्नान् भिक्षाचरोऽविक्षद् विषलाटां हिमागमे ॥१६६२॥

मण्डलस्याऽन्तरे तस्य विविक्षो रुद्धडामरः ।
प्रतीहारो हिमर्तुश्च निषेद्धा समपद्यत ॥१६६३॥

स टिक्केन पितृद्रोहादेकान्तद्वेषिणा रिपोः ।
आनीतः संमतैर्दत्ताप्यायः सर्वैश्च डामरैः ॥१६६४॥

प्रतीक्षमाणो राज्याप्तिहेतुं सुज्जिसमागमम् ।
निर्भयष्टिक्कजामातुर्भागिकस्य खशप्रभोः ॥१६६५॥

बाणशालाभिधे दुर्गे वसन्नल्पोच्छ्रितावपि ।
दूतैर्विभेदमनयत् सर्वडामरमण्डलम् ॥१६६६॥

प्रमोदं सुहृदां त्रासं द्विषां च विसृजन् पुरः ।
व्यावर्तताऽथ गङ्गायाः सुज्जिर्विहितमज्जनः ॥१६६७॥

1659. a) St suggests शास्त्यैव° (for शास्त्येव° found in all Mss.).

1661. b) S′ P_{1-3} यावत् (for तावत्). —d) C S′ काश्मीर; P_1 कश्मीर (for कश्मीरा). C S′ °येत् (for °यन्).

1663. c) C S′ P_1 I_3 हि मन्तु° (for हिमर्तु°).

पूर्वविप्रकृते भिक्षावस्मिंश्चाऽभेदमागते ।
यथाऽमुष्य महीभर्तुस्तथाऽस्माकं भयं भवेत् ॥१६६८॥

ध्यात्वेति सिंहदेवेन प्रार्थितो व्याजमाददे ।
सुज्जिस्वीकरणोद्योगे सोमपालो भयाकुलः ॥१६६९॥

सुज्जिर्जालन्धरं प्राप्तः प्रातर्भिक्षाचरान्तिकम् ।
यावद्यास्यति तं सायं तद्दूतस्तावदासदत् ॥१६७०॥

प्रेरितो ज्येष्ठपालेन निषिद्धो भागिकेन च ।
विरराम स तस्योक्त्या विपक्षाश्रयणग्रहात् ॥१६७१॥

ऋणं देशान्तरोपात्तं तव भूपोऽपनेष्यति ।
स्वं च दास्यत्यधीकारं मन्मुखप्रहितार्थनः ॥१६७२॥

इति दूतमुखेनोक्तः सोमपालेन चाऽन्वहम् ।
विपक्षौत्सुक्यमुत्सार्य तद्देशाभिमुखो ययौ ॥१६७३॥

उदयः कम्पनाधीशो वैशाखे तीर्णसंकटः ।
खशान्वितेन संग्रामं प्रत्यपद्यत भिक्षुणा ॥१६७४॥

प्राक्तस्थुष्यल्पपृतने जाते पृथुबले ततः ।
तस्मिन् कोट्टान्तरं भिक्षुः प्राविशत् प्राप्तवेष्टनः ॥१६७५॥

राजाऽथ विजयक्षेत्रं निर्यातः प्रत्यपूरयत् ।
कम्पनेशस्य कटकं तास्ताः संप्रेषयंश्चमूः ॥१६७६॥

यन्त्रोपलशरासारविविधायुधवर्षिणी ।
दुर्गस्थितैर्नृपचमूः प्रत्ययोध्यश्मवर्षिभिः ॥१६७७॥

1669. b) St C S′ P_2 I_3 °दधे (for °ददे).
1676. d) C S′ P_2 SA संप्रैषयच्चमूः; $P_{1,3}$ I_3 संप्रैषयश्चमूः (for संप्रेषयंश्चमूः).
1677. d) C S′ प्रतियो° (for प्रत्ययो°).

पतत्स्वश्मसु भिक्षोश्च नामलक्ष्मसु पत्रिषु ।
ग्रहीतुं दुर्गगान् राजसेना दीर्घाऽपि नाऽशकत् ॥१६७८॥

दिनैरभ्यधिके मासमात्रे यातेऽग्रहीत् ततः ।
विदार्य मूलं दुर्गस्य धन्यः खाताम्बु संभृतम् ॥१६७९॥

दुर्गभाजो बलासाध्या राज्ञ्युपायपरे धियम् ।
जाततद्वैरिबाधेच्छा धनलुब्धामदर्शयन् ॥१६८०॥

विससर्ज प्रतीहारमथ तद्वस्तुसिद्धये ।
राजा डामरसामन्तमन्त्रिराजात्मजैः समम् ॥१६८१॥

कोष्ठेश्वरत्रिल्लकाद्याः कृच्छ्रस्थस्य विमोक्षणम् ।
करिष्यामो वयं भिक्षोरिति बुद्ध्या तमन्वयुः ॥१६८२॥

पश्यन् संकटशैलाग्रादधः कोट्टं मितोन्नति ।
जितं मेने प्रतीहारो वीक्ष्याऽनन्ताः स्ववाहिनीः ॥१६८३॥

पूर्वस्थितैः प्रतीहारानुगैश्चाऽन्यत्र वासरे ।
अयोधि सर्वसैन्यस्य बलात् कोट्टं जिघृक्षुभिः ॥१६८४॥

ते तावन्तोऽप्यश्मवृष्ट्या तथा तैः प्रतिचक्रिरे ।
नास्तीदं विक्रमेणेति यथाऽगृह्णन् विनिश्चयम् ॥१६८५॥

1678. b) C पात्ति° (for पत्रि°). —c) All Mss. read दुर्गजान् (for दुर्गगान् suggested).

1679. c) C विहार्यं ⌊sic⌋ (for विदार्य). —d) C S′ धान्य°; SA धान्यः; SL धा···; $P_{1,3}$ धान्यां; P_2 धान्याः; D suggests धान्यं (for धन्यः suggested with St; cf. VIII. 1624).

1680. a) C S′ P_1 °ऽबलासख्या (for बलासाध्या). —c) C °धेच्छां (for °धेच्छा).

1681. c) C S′ $P_{1,2}$ I_3 SA राज्ञां (for राजा).

1682. b) SA_1 कृच्छ्रात्तस्य; $P_{2,3}$ कृच्छ्रास्थस्य (for कृच्छ्रस्थस्य).

वीरदेहद्रुमाग्रेभ्यो न्यपतन्नश्मभिर्हताः ।
निर्यदस्रौघसरघाः शीर्षभ्रमरगोलकाः ॥१६८६॥

कोष्ठेश्वरस्य मूढत्वं निर्व्यूढं तत्र किंचन ।
स्वस्य भिक्षोर्लवन्यानामन्येषां च विनाशकृत् ॥१६८७॥

नास्त्यत्र मत्समो वीर इत्येतावत्प्रसिद्धये ।
स ह्ययुद्धोद्धतं भिक्षोर्यत्प्राणक्षयकार्यभूत् ॥१६८८॥

दुभ्रुक्षूणां खशानां स संकटे धैर्यमादधे ।
कोष्ठेश्वरोऽस्मि चाऽभिन्नौ तद्वश्या डामराः परे ॥१६८९॥

यदेतद् दृश्यते भूरि सैन्यमस्मद्धिताय तत् ।
पर्यवस्येदिति वदन् समभाव्यन्यथा च तत् ॥१६९०॥

विस्रम्भभूरमुष्यारिर्यत्र कोष्ठेश्वरोऽप्यसौ ।
अन्येषु तत्र कैवास्थेत्यथ ते निश्चयं दधुः ॥१६९१॥

भूभृत् पितृद्रुहः कार्यवशेन स्वोपवेशने ।
अङ्गीकृताधिकारस्तु धीमांष्टिक्कस्य लक्ष्मकः ॥१६९२॥

खशाधीशं महाग्रामस्वर्णादित्यागसंश्रयात् ।
स्वीकृत्य भिक्षुदुभ्रुक्षाबद्धकक्ष्यमकारयत् ॥१६९३॥

आनन्दाख्यः खशाधीशस्यालः कृतगतागतः ।
नीत्वा टिक्कं प्रतीहाराभ्यर्णं भूयोऽप्यरोपयत् ॥१६९४॥

1686. b) P_3 °श्मसन्निभाः (for °श्मभिर्हताः).
1688. c) C °द्धते (for °द्धतं).
1689. a) D च (for स). —c) C °भिन्नः (for °भिन्नौ).
1693. a) C यशा° (for खशा°). —c) D (before suggestion) C S′ P_{1-3} I_3 SA °दुभ्रुक्षु° (for °दुभ्रुक्षा° suggested with St D).

प्रतीहारस्य टिक्केन सहैक्यं वीक्ष्य डामरैः ।
निस्संशयं हतोऽज्ञायि भिक्षुः कोष्ठेश्वरादिभिः ॥१६९५॥

संरब्धास्तद्विमोक्षाय प्राहिण्वंस्ते खशान्तिकम् ।
दूतानूरीकृतस्वर्णदाना भूरिधनैः समम् ॥१६९६॥

खशास्तु दध्यावुत्कोचं गृहीत्वाऽस्माभिरुज्झितः ।
जानाति रक्षितान् प्राणान् भिक्षुः कोष्ठेश्वरादिभिः ॥१६९७॥

समन्युः प्राप्तराज्योऽथ देङ्गपालोऽथ दूरगः ।
हन्यान्मां जयसिंहस्तद्रक्ष्यः पक्ष्यः प्रयत्नतः ॥१६९८॥

मत्वेति तेन प्रत्युक्ता भिक्षुं शौचस्थितं गृहात् ।
विपाट्याऽन्तः फलहकं निर्गच्छेत्यूचिरेऽपि ते ॥१६९९॥

स त्वमेध्योपलिप्ताङ्गः श्वेवाऽवस्करवर्त्मना ।
यात इत्ययशो लोके ध्यायन्मानी न निर्ययौ ॥१७००॥

कोष्ठेश्वरोऽव्यक्तकृत्यः सैन्यक्षोभेच्छया क्षिपन् ।
रूक्षं कालविदा प्राह्णे प्रतीहारेण सान्त्वितः ॥१७०१॥

नीवौ खशाद्यैर्दत्तायामाप्रत्यूषादगृह्यत ।
व्यवसायः प्रतीहारमुख्यैर्भिक्षुप्रमापणे ॥१७०२॥

1695. c) C हतो° (for हतो°).

1697. a) C I_3 SA दद्यादु° (for दध्यावु°).

1698. d) D C S′ P_1 पक्षः (for पक्ष्यः).

1699. b) C $P_{2,3}$ SA भिक्षुशौ° (for भिक्षुं शौ°). —c) St C S′ P_{1-3} I_5 विपाट्यातः (for विपाट्याऽन्तः).

1701. b) St °च्छयाक्षिपन् (for °च्छया क्षिपन्). —c) C S′ I_3 प्राक्ष्णोत् (for प्राह्णे).

गच्छद्भिरानयद्भिश्च राजा दूतैः प्रतिक्षणम् ।
अन्विष्यन् विजयक्षेत्रे वार्तां पर्याकुलोऽभवत् ॥१७०३॥

तावद्भिराहवैस्तैस्तैः साहसे दश वत्सरान् ।
कृतयत्नस्य साध्योऽभून्न यो वृद्धमहीभुजः ॥१७०४॥

डिम्बो राजानुगा डिम्बास्तस्य भिक्षोः प्रमापणम् ।
साध्यमेते हि मन्यन्ते हन्त किं केन संगतम् ॥१७०५॥

विहस्य नीयते वित्तं खशैरेत्य क्षणादमी ।
भग्ना नूनं प्रयास्यन्ति मुषिताश्चाऽखिलाः परैः ॥१७०६॥

पृथग्भूतः कोष्ठकोऽयं त्रिल्लकोऽस्यैव बान्धवः ।
एते भिक्षाचरोच्छिष्टपुष्टा आभ्यन्तरा अपि ॥१७०७॥

को नूतनोऽत्र संप्राप्तो यो राज्ञः साधयेद्धितम् ।
सामग्री नूनमायाता सेयमस्यैव सिद्धये ॥१७०८॥

इत्यूचुः शिबिरे यावज्जनास्तावदवेष्टयत ।
कटकैर्मन्त्रिणां दुर्गं विकोशायुधवाहिभिः ॥१७०९॥

एकाकी चिरसंक्लिष्टो हन्तव्यस्तत्कृतोऽखिलैः ।
हा धिक् परिकरो बद्धो निर्लज्जैः सर्वशस्त्रिभिः ॥१७१०॥

त एवेत्यूचुरासीच्च कचच्छस्त्रोर्मिनिर्मलः ।
स्फुरद्योधाक्षिशफरो निश्शब्दः सैन्यसागरः ॥१७११॥

1703. a) All Mss. read °रागच्छद्भि° (for °रानयद्भि° suggested).
1704. c) C S′ P_{1-3} I_3 SA °यन्त्रस्य (for °यत्नस्य).
1707. b) D C S′ P_{1-3} त्रिल्लकस्यैव (for त्रिल्लकोऽस्यैव). P_2 बांधवाः (for बान्धवः).
1710. a) P_1 °लिष्टो (tor °क्लिष्टो). —c) $P_{1,2}$ परिकरे (for परिकरो).

व्योम्नोड्डीयेत वा सैन्यं लङ्घयेद् वा मृगप्लुतैः।
दुष्टाभ्रवृष्टिरिव वा निखिलांस्ताडयेत् समम् ॥१७१२॥

साश्चर्यशौर्यः पर्यन्ते स्वीकुर्वन् भिक्षुरायुधम्।
संभ्रान्तश्चकितश्चाऽऽसीदित्यन्तश्चिन्तयञ्जनः ॥१७१३॥

एतावन्मन्त्रिणां सिद्धमथ प्रत्यूहसंभवः।
तच्छान्तिः कार्यसिद्धिश्च प्रतापैर्नृपतेरभूत् ॥१७१४॥

सैन्ये भिक्षाचरापातं पश्यत्यूर्ध्वार्पितेक्षणे।
कोट्टान्निष्कृष्टशस्त्रीकः पुमानेको विनिर्ययौ ॥१७१५॥

रुदतीभिः परीतस्य नारीभिस्तस्य चिक्षिपुः।
पृष्ठे केऽपि वपुर्लोलकौसुम्भाधरवाससः ॥१७१६॥

बद्धः पलायमानोऽत्र सोऽयं भिक्षुरिति ब्रुवन्।
उन्मुखः स जनोऽश्रौषीट्टिक्कं तमथ निर्गतम् ॥१७१७॥

स हि भिक्षोः कृतद्रोहः तुमुले प्रस्तुते वधम्।
तस्माद् राजानुगेभ्यो वा स्वस्याऽऽशङ्क्य विनिर्ययौ ॥१७१८॥

अद्रोहोऽस्मीति लोकस्य प्रत्ययाय चकर्ष च।
कृपाणीमुदरं हन्तुं रक्ष्यमाणो निजानुगैः ॥१७१९॥

सानुगस्त्यक्तमार्गो स विलङ्घ्य नृपवाहिनीम्।
अद्रिप्रस्रवणोपान्ते नातिदूरेऽभ्युपाविशत् ॥१७२०॥

1712. b) St P_{1-3} I_3 °प्लुतेः; C S′ °प्लुते (for °प्लुतैः).

1715. a) C S′ °रायातं (for °रापातं).

1717. c) C S′ तन्मुखात् (for उन्मुखः).

1718. a) C S′ P_2 I_3 SA सह (for स हि). All Mss. read °द्रोह° (for °द्रोहः suggested with St). —b) All Mss. read प्रस्तुतो (for प्रस्तुते suggested with St).

उच्छ्वसंश्चिरसंप्राप्तैरम्भोभिर्दुर्गनिर्गतः ।
मायां प्रयोक्तुं प्रारेभे प्रेरितः सोऽन्यडामरैः ॥१७२१॥

संजातं लम्बमानार्कमहस्तद्रक्ष्यतां क्षणम् ।
भिक्षुः क्षपायामास्कन्दमपनेष्यन्ति डामराः ॥१७२२॥

इति तद्वाचिकात् तीक्ष्णान्नीविभिर्मन्त्रिणां समम् ।
खशैस्त्यजद्भिर्द्वैषदो न्यरुध्यन्तारुरुक्षवः ॥१७२३॥

ततः किलकिलारावमुखरैः करतालिकाः ।
योधैर्ददद्भिः सचिवा व्यगृह्यन्ताऽऽकुलाशयाः ॥१७२४॥

मुक्ताः स्वामिद्रुहः कृच्छ्रगता राज्यं प्रसाधितुम् ।
द्विषतो मन्त्रिभिः स्वार्थी दत्त्वाऽर्थान् को नु साधितः ॥१७२५॥

राजकार्ये च भानौ च लम्बमानेऽथ लक्ष्मकः ।
किमेतदिति तं नीविं खशस्यालमभाषत ॥१७२६॥

सोऽभ्यधात् कुम्भदास्याऽपि रोद्धुं शक्यं चिकीर्षितम् ।
खशानां प्रत्यवस्थाता कथं तत्राऽस्म्यसंनिधिः ॥१७२७॥

स हन्तुं वैपरीत्यं तं खशानां त्वं व्रजेत्यथ ।
उक्त्वा व्यसृजदानन्दं जहसे चाऽन्यमन्त्रिभिः ॥१७२८॥

सुदूरदर्शिना राज्ञा विषलाटाध्वपाततः ।
देङ्गपालगृहादस्मादारम्भः समभाव्यत ॥१७२९॥

1721 d) C सैन्य°; P_3 पौर° (for सोऽन्य°).

1723. ab) St I_3 तीक्ष्णा नी° (for तीक्ष्णान्नी°). —d) SA $P_{2,3}$ I_3 न्यरुधन्ता° (for न्यरुध्यन्ता°).

1725. c) C S′ P_{1-3} I_3 SA स्वार्था (for स्वार्थी).

1727. d) D C S′ P_1 तत्रास्य° (for तत्राऽस्म्य°).

1728. a) SL हर्तुं (for हन्तुं).

1729. c) D St P_{1-3} I_3 SA_1 om.; St suggests °भ्यर्णा° (for °दस्मा° found in C S′).

अतः प्रधानकोट्टेशस्यालः स समगृह्यत ।
प्रागेवाऽथैरेतदर्थं ग्रथ्नता दीर्घवागुराम् ॥१७३०॥

संक्षोभावसरे क्षत्ता ततो निस्संभ्रमोऽभवत् ।
शिक्षितं पक्षिणमिव त्यक्तं प्राप्यं विवेद तम् ॥१७३१॥

स तानूचे न हास्यं मे नष्टे कार्येऽत्र साहसम् ।
सर्वनाशो हतेऽमुष्मिन् खशस्यालेऽपि किं भवेत् ॥१७३२॥

अकुण्ठया भाग्यशक्त्या राज्ञः स्यालः खशस्य सः ।
सर्वान् नियन्त्र्य दुर्गाग्रात् तीक्ष्णादीनाजुहाव तान् ॥१७३३॥

दस्यूनामसवः कण्ठे संदेहं मन्त्रिणां धियः ।
स्वःस्त्रीणां प्रीतयः काष्ठां तीक्ष्णाश्चाऽऽरुरुहुर्गिरिम् ॥१७३४॥

स चर्मकौपीनपटीबन्धस्तत्स्वाभिधाङ्कितैः ।
इषुभिः स्वामिवत्स्वस्य ख्यापनं सर्वतो युधि ॥१७३५॥

स ताम्बूलाधरः सक्तिः सा केशश्मश्रुयोजने ।
याऽभूदनुमुमूर्षूणां भिक्षुराजोपजीविनाम् ॥१७३६॥

निश्चितान्ते ततस्तस्मिन् स तेषामन्ववर्तत ।
कोष्ठेश्वरादिशिबिरं तूर्णं शरणमीयुषाम् ॥१७३७॥

एकैकशो लक्ष्मकेण युक्त्या स्वैः प्रेरितैर्भटैः ।
टिक्कः स्वं वीक्ष्य वलितं निचकर्ताङ्गुलिं भयात् ॥१७३८॥

1730. b) St P_{1-3} I_3 समम° (for स सम°).

1733. c) C S′ °ग्रान् (for °ग्रात्).

1734. b) P_3 सन्देहे (for संदेहं). —c) D C S′ P_{1-3} I_3 स्वस्त्री° (for स्वःस्त्री°).

1735. b) D (before suggestion) °बद्ध° (for °बन्ध°).

1736. a) D °लादरः (for °लाधरः). —d) P_2 I_3 SA °राज्ञोप° (for °राजोप°).

1737. b) St संन्य°; P_2 I_3 SA सन्य° (for °मन्व°). After this *v.* तिलकम्.

खशैरस्मिन्नवसरे स पलायनशङ्किभिः ।
रक्ष्यमाणस्तेष्वहस्सु मनस्तापादभुक्तवान् ॥१७३९॥

वीरस्ताम्यन्विलम्बेन तीक्ष्णानामाहवोत्सुकः ।
तस्थौ भिक्षाचरः स्वान्तमक्षवत्या विनोदयन् ॥१७४०॥

हर्म्यप्राङ्गनमायाते तीक्ष्णलोके युयुत्सया ।
उत्तिष्ठता तेन दायः स्तोकशेषः समाप्यत ॥१७४१॥

दीव्यतः कान्तया साकं कामिनः सुहृदागमे ।
प्रत्युत्थास्नोरिव क्षोभो नाऽन्तस्तस्य व्यजृम्भत ॥१७४२॥

किमद्यापि वधेन स्याद् बहूनामिति चिन्तयन् ।
स विहाय शरावापं सासिधेनुर्विनिर्ययौ ॥१७४३॥

सुदीर्घचिन्तागलितायामश्यामलिभिः कचैः ।
चञ्चच्चित्रपताकाङ्कमिव वीरपटाञ्चलैः ॥१७४४॥

गण्डताण्डविताच्छिद्रशङ्खताडङ्करोचिषा ।
चन्दनोल्लेखकान्त्या च द्योतिताहंक्रियास्मितम् ॥१७४५॥

वितीर्णं चित्रचार्यन्ते विपर्यस्ताङ्घ्रिताडनम् ।
द्योतयन्तमिवालातैः स्वःस्त्रीनेत्राधरांशुकैः ॥१७४६॥

कौसुम्भाधरवासोऽग्रबद्धधौताधराञ्चलैः ।
लोलैर्वीरहरिं बद्धसटाटोपमिवांसयोः ॥१७४७॥

1742. a) P_{1-3} I_3 SA दीव्यन्त: (for दीव्यत:).

1743. c) C S′ शरं चापं (for शरावापं).

1744. a) C S′ P_2 स्वदी° (for सुदी°).

1746. d) D St P_{1-3} I_3 शस्त्री°; C S′ स्वस्त्री° (for स्वःस्त्री°).

1747. b) C S′ °म्बरा° (for °धरा°).

दृङ्मनःपाणिपादैक्यचारुप्रचुरचारिभिः ।
चरन्तं मण्डलैश्चित्रैर्लघुचित्रस्थिरक्रमैः ॥१७४८॥

औचित्यस्योचितां चर्यामलंकारमहंकृतेः ।
अभिमानविभूतीनां नित्योत्सेकमनत्ययम् ॥१७४९॥

अलक्षितक्षिप्रपातं स सर्वोऽप्युन्मुखो जनः ।
विचरन्तं तमैक्षिष्ट भिक्षुमग्रे विरोधिनाम् ॥१७५०॥

राजबीजी मघोर्नप्ता तं प्रवीरः कुमारियः ।
भ्राताऽपि ज्येष्ठपालस्य निर्यातो रक्किकोऽन्वगात् ॥१७५१॥

हर्म्यैर्निम्नोन्नतैस्तैस्तैर्विंशतः परिपन्थिनः ।
रुरोधैकः शरासारैर्गार्गिको भिक्षुसंश्रितः ॥१७५२॥

ते धावन्तो व्यभाव्यन्त शरैस्तच्चापनिर्गतैः ।
वर्षोपलैः पुरोवातप्रेरितैरिव दन्तिनः ॥१७५३॥

स रोद्धा प्रतियोधानां पापैः क्षिप्ताश्मभिः खशैः ।
क्षताङ्गो भग्नचापश्च चिरेण विमुखीकृतः ॥१७५४॥

तस्मिन् प्रचलिते मार्गैः प्रविश्योच्चावचैर्भटाः ।
ते च भिक्षाचरादीनां सर्वे गोचरमाययुः ॥१७५५॥

भिक्षोरेकं क्षणालक्ष्यधैर्यं पार्श्वधृतायुधम् ।
अधावत् तूर्णमादाय शूलमेको बृहद्भटः ॥१७५६॥

1748. b) C S′ $P_{2,3}$ °वारिभिः (for °चारिभिः).
1750. a) C °यातं (for °पातं).
1753. a) C S′ $P_{1,2}$ I_3 SA न्यभा° (for व्यभा°).

तस्य प्रहरतः शूलं भिक्षुराश्रितवत्सलः ।
क्षिप्त्वाऽपहस्तेनाऽऽवेगात् केशाञ्जग्राह धावितः ॥१७५७॥

प्रजहार कृपाण्या च निर्यत्प्राणे पतिष्यति ।
तस्मिन् प्राहरतां भूयस्तौ कुमारियरक्तिकौ ॥१७५८॥

निर्विभागैर्हते तस्मिन् विविधायुधवाहिभिः ।
विरोधियोधैः संनद्धैस्त्रयो युयुधिरेऽथ ते ॥१७५९॥

अजायन्त विविक्ताश्च शस्त्रसंत्रासिताहिताः ।
कोटराजगरापास्तसरघौघा इव द्रुमाः ॥१७६०॥

अशुक्नुवन्तस्तान् हन्तुं खड्गशूलादिभिर्द्विषः ।
अपसृत्य शरासारैस्ततो दूरादवाकिरन् ॥१७६१॥

भिक्षाचरमृगेन्द्रस्य भञ्जतः शरपञ्जरान् ।
ततो हर्म्यात् खशैर्मुक्ताः पुष्टाः पाषाणवृष्टयः ॥१७६२॥

धावतस्तस्य घोराश्मवृष्टिकुण्ठितवर्ष्मणः ।
निममज्ज यकृत्पिण्डं भञ्जन् पार्श्वे शिलीमुखः ॥१७६३॥

क्रान्त्वा त्रीणि पदान्याशु स पपात दिशन् क्षितेः ।
ततश्चिरप्ररूढं तु कम्पं विद्विषतां हरन् ॥१७६४॥

कुमारियोऽपि बाणेन विद्धवङ्क्षणवर्त्मना ।
व्रणितोऽप्यपतद् भर्तुः पादोपान्तेऽपजीवितः ॥१७६५॥

1757. c) C S′ क्षिप्रा° (for क्षिप्त्वा°).
1758. c) D प्रहरतो; C S′ P_{1-3} I_3 SA प्रहरतां (for प्राहरतां suggested with St).
1760. cd) P_1 om.
1763. b) St C $P_{1,2}$ I_3 °कुट्टिता° (for °कुण्ठित°).
1765. d) All Mss. read °पान्तो° (for °पान्ते° suggested with St).

रक्तिकस्तु शरेणैव विद्धो मर्मणि विह्वलः ।
सजीवितोऽपि निर्जीव इव भूमावुपाविशत् ॥१७६६॥

महाकुलीनैः सहितो हतो भिक्षुरशोभत ।
वज्रावभुग्नः शिखरी पुष्पितैरिव पादपैः ॥१७६७॥

इयतो राजचक्रस्य मध्ये हर्षनृपात्परम् ।
नाऽवमानस्य मानस्य त्वभूद् भिक्षोः परं पदम् ॥१७६८॥

विधाता नित्यविधुरस्तेनान्तेऽप्यपमानितः ।
अकुण्ठेन ध्रुवं चक्रे गृहीतात्मपराजयः ॥१७६९॥

को वराको महर्द्धीनां सोऽग्रे पूर्वमहीभृताम् ।
उदात्तेन तु कृत्येन ते त्वस्याऽग्रे न किंचन ॥१७७०॥

आहोपुरुषिकाग्रस्तैरारोहद्भिर्द्विषद्भटैः ।
तदवस्थस्तदार्तोऽपि शस्त्र्यायुद्ध कुमारियः ॥१७७१॥

स्फुरन् योद्धव्यमित्येव स प्रहारावशस्तथा ।
विज्ञाततत्त्वैररिभिर्वितत्य बहुशो हतः ॥१७७२॥

विपन्नेऽस्मिन्नलं मूढाः प्रहारैरतिनिन्दिताः ।
खशैः प्रजह्रुर्बहुशो हते भिक्षौ द्विषद्भटाः ॥१७७३॥

अविधेयायुधस्तीव्रव्रणवेदनयाऽधमैः ।
कैश्चिन्निर्जीवितप्रायो रक्तिकः शस्त्रिभिर्हतः ॥१७७४॥

1766. a) P_1 I_3 SA भक्ति° (for रक्ति°).

1768. b) C °त्मजः; D (before suggestion) St S′ P_{1-3} I_3 SA °त्मनः; D suggests °पातपरः (for °पात्परम् suggested). —d) St fn. suggests भिक्षुः (for भिक्षोः).

1769. b) D C S′ °स्तेजोधैर्याभिमा° (for °स्तेनान्तेऽप्यपमा°).

1770. a) C S′ वरः (for वरा°). —c) D (before suggestion) SR C S′ P_{1-3} °नात्त°; St SA °नान्त° (for °न तु found in I_3).

1771. a) St P_2 अहो° (for आहो°). —c) D C S′ P_{1-3} I_3 °स्तदात्तो° (for °स्तदार्त्तो°).

1773. b) All Mss. read °रिति नि° (for °रातिनि° suggested with D)

वयसस्त्रिंशतिं वर्षान्नव मासांश्च भुक्तवान्
स षष्ठाब्दासितज्यैष्ठदशम्यां नृपतिर्हतः ॥१७७५॥

निदानं विप्लवे दीर्घे सर्वनाशेऽपि कारणम् ।
येषां बभूव तेऽप्येवं तुष्टुवुः सत्त्वविस्मिताः ॥१७७६॥

नेत्रस्पन्दं भ्रुवोः कम्पं स्मेरास्यत्वं च नाऽमुचत् ।
सजीवमिव तन्मुण्डं कियतीरपि नालिकाः ॥१७७७॥

एकं व्योम्न्यविशच्चित्रभानुं भूमौ पुनः परम् ।
तद्देहमप्सरस्सङ्गं धराम्बु च विदज्जडम् ॥१७७८॥

सचिवा विजयक्षेत्रस्थितस्याऽग्रे महीपतेः ।
तेषां त्रयाणां मुण्डानि ततोऽन्येद्युरुपाहरन् ॥१७७९॥

श्रीसुधारत्नदन्त्यश्वशशाङ्कादिप्रकाशने ।
दृष्टचित्रस्वभावोऽब्धिर्यथाऽयं पार्थिवस्तथा ॥१७८०॥

तत्र तत्राऽद्भुतं भावं दर्शयन् भुवनाद्भुतम् ।
परिच्छेद्याऽनुभावत्वं न केषामपि गच्छति ॥१७८१॥

नादृप्यन्निहतोऽसाध्यः पितुर्मे योऽप्यभूदिति ।
न जहर्ष विनष्टोऽयं राजकण्टक इत्यपि ॥१७८२॥

नाऽकुप्यन्मतिपितुर्मुण्डमेष भ्रमितवानिति ।
वीक्ष्य भिक्षोः शिरोव्याजभावादार्यस्त्वचिन्तयत् ॥१७८३॥

1775. c) P_{1-3} I_3 °ज्येष्ठ° (for °ज्यैष्ठ°).

1776 d) SA P_1 I_3 °विस्मित: (for °विस्मिता:).

1778. d) All Mss. read धाराम्बु (for धराम्बु suggested with St). C S′ चिरा° (for विद°).

1781. a) After this *v.* युग्मम् .

1783. a) SA_1 (before corr.) D I_3 नाकुप्यत्स पितु°; SA_1 (after corr.) नाकुप्यत्मतिपितु°; C S′ नाक्रुध्यत्स पितु° (for नाऽकुप्यन्मतिपितु°). —d) D SR SG C S′ P_{1-3} °भावादायस्त्व°; SA_1 I_3 °भावो···स्त्वचि°; SA_1 in marg. °भावादायस्त्व°; St (after suggestion) °भावौदार्यस्त्व° cf. III. 308; VIII. 2217 (for °भावादायस्त्व° suggested). After this *v.* युग्मम् .

आकारस्याऽस्य संभाव्यं सत्त्वं न द्वेषवैकृतम्।
वैशद्यं स्फटिकस्येव नाऽर्काऽऽलोकोपतप्तता ॥१७८४॥

उत्कर्षात् प्रभृति व्यक्तममुं यावन्महीभुजम्।
हा धिक् सुमृत्युना दृष्टं नेह देहविसर्जनम् ॥१७८५॥

प्रसादवित्ता येऽप्यासन् पूर्वमस्योर्वराभुजः।
तटस्था इव वीक्षन्ते तेऽद्य मुण्डावशेषताम् ॥१७८६॥

इति क्षितीशोऽसामान्यसौजन्योऽन्तर्विचारयन्।
आदिदेश रिपोः शीघ्रं तादृशस्यान्तसत्क्रियाम् ॥१७८७॥

निद्राच्छेदे च निशि स ध्यायंस्तस्योदयात्ययौ।
भवस्वभाववैचित्र्यं मुहुर्मुहुरचिन्तयत् ॥१७८८॥

अपि वर्षसहस्रेण देशे दायाददुस्स्थितिः।
नूनं न भविता भूय इति लोकोऽप्यमन्यत ॥१७८९॥

दग्ध्वा तृणं तनु घनं प्रतनोति शष्पं
वृष्टिं सृजत्युपचितोष्म दिनं प्रदर्श्य।
वैचित्र्यसंस्पृशि विधेर्नियमेन कृत्ये
न प्रत्ययः क्वचन चञ्चलनिश्चयस्य ॥१७९०॥

1784. d) All Mss. read °तप्तताम् (for °तप्तता suggested with St).

1785. c) St $P_{2,3}$ स्वमृत्युना; C S′ च मृत्युना (for सुमृत्युना).

1786. c) C S′ वीक्ष्यन्ते (for वीक्षन्ते).

1787. b) C S′ °न्यान्त° (for °न्योन्त°).

1788. a) SA D P_{1-3} I_3 om. स. St C S′ च (for स suggested). —b) $P_{2,3}$ SA °यान्ययौ (for °यात्ययौ).

1790. a) C S′ शस्यं (for शष्पं). —b) SA_1 (before corr.) चिरं (for दिनं). —c) C तेन (for कृत्ये). —d) C S′ क (for न).

कृत्यं निर्वर्त्य विश्रान्त्यै धीरस्याऽबध्नतो मनः ।
विधिर्विधत्ते दीर्घान्यकार्यभारसमर्पणम् ॥१७९१॥

आरोढुः प्रथमस्य दीर्घदमनप्रत्तक्रमस्याऽङ्घ्रिणा
नो संत्यज्यत एव पादकटको यावद् द्वितीयोऽखिलः ।
वाहस्याऽऽसनरक्षिणः कलयतो भारावतारात् सुखा-
न्यारोहेण परेण तावदसहाऽधिष्ठीयते पृष्ठभूः ॥१७९२॥

एवमेव क्षपामात्रं राज्ये निश्शत्रुतां गते ।
शोकमूको नृपस्याऽग्रं प्राविशल्लेखहारकः ॥१२९३॥

पृष्टः सभ्यैः स संभ्रान्तैर्यस्मिन्नेवाऽह्नि भूपतेः ।
यातो भिक्षाचरः शान्तिमरातिर्दत्तदुःस्थितिः ॥१७९४॥

भ्रातरौ लोहरगिरौ बद्धौ द्वैमातुरौ पुरा ।
न्यस्तौ सुस्सलभूपेन यौ तौ सल्हणलोठनौ ॥१७९५॥

ज्येष्ठे मृते कोट्टभृत्यैः कनिष्ठं लोठनं हठात् ।
तमिहाऽद्य त्रियामायामभिषिक्तमभाषत ॥१७९६॥

सुतभ्रातृसुतैर्दृप्तै राज्यार्हैः सह पञ्चभिः ।
निर्यातं बन्धनादूचे कोशेषु स तमीश्वरम् ॥१७९७॥

दूयेत मुह्येदाक्रन्देत् प्रसारितभुजः पतेत् ।
स्वप्याद् विसूत्रो निस्स्पन्दस्तक्त्वं गच्छेदथ ध्रुवम् ॥१७९८॥

1792. [a]) All Mss. read आरोढुं (for आरोढुः suggested with D). All Mss. read °मदन° (for °दमन° suggested with St D). —[d]) C S′ I_3 °त्यारो° (for °न्यारो°).

1795. [d]) S A P_2 सुल्ह° (for सल्ह°).

दीर्घदौःस्थ्यशमक्षिप्रमृदूकृतमना नृपः ।
असौ तत्कालनिपतद्दुर्वार्तावज्रचूर्णितः ॥१७९९॥

इति संभाव्य दिक्पालैरपि साकूतमीक्षितः ।
नाऽऽकाराचारचेष्टाभिः प्रागवस्थां जहौ नृपः ॥१८००॥

नह्यनन्याभिभूतेन सर्वतोऽसह्यवर्तिना ।
तादृशा वैशसेनान्यः स्पृष्टपूर्वो हि भूपतिः ॥१८०१॥

पित्राऽस्य यद्बलान्नष्टं राज्यं भूयः प्रसाधितम् ।
अनेनाऽपि हताराति विहितं पैतृकं पदम् ॥१८०२॥

हारितौ दुर्गकोशौ तौ नष्टनामापि दारकः ।
दायादशेषो यत्रैको निर्धनो वीतबान्धवः ॥१८०३॥

धनमानान्तकृद् भूरिवर्षान् व्यसनमादधे ।
उपप्लवप्रिये देशे तत्रैकस्मिन् हतेऽहिते ॥१८०४॥

मित्रदुर्गार्थसंपन्नाः प्रोद्भूताः षड्विरोधिनः ।
भिन्नप्रकृतिकं कोशशून्यमेतच्च मण्डलम् ॥१८०५॥

तादृङ्निकषनिस्तीर्णमाहात्म्यस्य महीपतेः ।
धैर्येण स्पर्धितुं जाने राघवोऽपि सलाघवः ॥१८०६॥

प्राक्पोषितं हि साम्राज्यदाने निर्वासने च तम् ।
तुल्यानुभावमस्मार्षीत् पितैवं गणयन् गुणान् ॥१८०७॥

1803. a) SA °कोषौ; P_3 °कोशा (for °कोशौ).
1804. c) C S′ $P_{1,3}$ °प्लवा° (for °प्लव°). —d) C S′ हिते (for [अ]हिते).
1805. d) P_{1-3} I_3 SA ° मेतं च (for °मेतच्च).
1807. cd) P_1 om.

आहूतस्याऽभिषेकाय विसृष्टस्य वनाय वा ।
न मया लक्षितस्तस्य स्वल्पोऽप्याकारविप्लवः ॥१८०८॥

कान्तेषु काननान्तेषु सकान्तं सानुजं च तम् ।
भूयः श्रियं प्रतिश्रुत्य स्थातुं सावधि सोऽभ्यधात् ॥१८०९॥

एकक्षणानुभूतेऽस्मिन् संघट्टे सुखदुःखयोः ।
ईदृक्तद्दशाभेदादनयोरन्तरं महत् ॥१८१०॥

नियतं निरुपादानां शक्तिं दर्शयितुं जने ।
नानोपकरणग्रामं संनद्धोऽस्याऽच्छिनद् विधिः ॥१८११॥

अत्यद्भुतानि कृत्यानि वक्ष्यमाणानि भूपतेः ।
कोऽमुष्य बहु मन्येत सामग्र्ये सति संपदाम् ॥१८१२॥

धैर्याब्धिना कार्यशेषं ज्ञातुं राज्ञा सविस्तरम् ।
पृष्टोऽथ कोट्टवृत्तान्तमाचख्यौ लेखहारकः ॥१८१३॥

उत्सृज्य भागिके कोट्टं प्रयाते मण्डलेश्वरः ।
लुप्तोद्योगोऽभवद् गुप्तौ प्रेमा संपत्प्रमत्तधीः ॥१८१४॥

मण्डनाभ्यवहारस्त्रीभोगैकाग्रो मदोग्रया ।
स वृत्त्या भृत्यवैमुख्याधात्र्याभव्यं व्यवाहरत् ॥१८१५॥

कुल्यानुकम्पिना दृष्ट्युत्पाटनादेः स वारितः ।
देवेन नाऽऽदाद् बद्धानां कांचिद् रक्षाक्षमां क्रियाम् ॥१८१६॥

1808. P_1 om.

1809. ab) P_1 om.

1813. c) SA I_3 कोट° (for कोट्ट°).

1815. c) D C भय° (for भृत्य°). —d) C भव्यं (for °भव्यं).

1816. c) C S′ दैवेन (for देवेन).

मायाव्युदयनो नाम कायस्थः स्थूलवाञ्छितः ।
माणिकश्च प्रतीहारो बद्धमूलस्य मन्त्रिणः ॥१८१७॥

पुत्रो भीमाकरस्येन्द्राकरश्चाऽत्रान्तरे समम् ।
डुधुक्षवस्तत्र तत्र वधं प्रेम्णो व्यचिन्तयन् ॥१८१८॥

अलब्धो हन्तुमप्राप्तावसरैस्तैः कदाचन ।
कोट्टादट्टालिकां कार्यवशादवरुरोह सः ॥१८१९॥

कश्मीरेभ्यो नृपेणाऽल्पावशेषप्राणवृत्तिना ।
प्रैषि शासनमेतादृगिति प्रत्ययसिद्धये ॥१८२०॥

कोट्टौकसामशेषाणां गूढलेखान् विधाय ते ।
निबद्धसंविदः पूर्वमभिषेच्यस्य भार्यया ॥१८२१॥

दृष्ट्वा दुर्गान्निर्निगडं कृत्वा च निशि लोठनम् ।
सिंहराजस्वामिविष्णुप्रासादाग्रेऽभ्यषेचयन् ॥१८२२॥

शारदाख्या वधूरेका कापि सुस्सलभूपतेः ।
तत्र स्थिताऽभवत् क्षुद्रा तेषामनुमतप्रदा ॥१८२३॥

तदर्पितैरयोयन्त्रभञ्जनैरर्गलानि ते ।
कोशान्निवार्य पर्याप्तं कोशरत्नादि जह्रिरे ॥१८२४॥

सभृत्यैः सप्तभिस्तत् तत् साहसं सुमहत् कृतम् ।
दानेन त्याजिताऽऽयासा चण्डालैः प्रतिकूलता ॥१८२५॥

1817. [a]) C S′ मायाभ्यु (for मायाव्यु°).

1818. [a]) St I_3 °स्येन्दा° (for °स्येन्द्रा°). —[d]) SA P_2 °न्तयत्; I_3 °न्तयेत् [sic] (for °न्तयन्).

1819. [ab]) P_1 om.

1822. [d]) SA C S′ P_{1-3} I_3 °यत् (for °यन्). after this *v.* तिलकम्

1824. [b]) C S′ तैः (for ते).

1825. [a]) C S′ °स्तद्वत् (for °स्तत्तत्). —[c]) St त्याजिता या सा; All other Mss. read त्याजितायामा (for त्याजिताऽऽयासा emended).

भेरीतूर्यादिनिर्घोषैर्निर्निद्राः कोट्टवासिनः ।
कृतराजोचिताकल्पमपश्यन्नथ लोठनम् ॥१८२६॥

अदृष्टपूर्वतादृक्षोदात्तवेषः स विस्मयम् ।
निन्ये जनान्नृपामात्ययोगो दीपैः प्रकाशितः ॥१८२७॥

प्रेम्णः पार्श्वस्थितस्ताभ्यामानयेद् दारकोऽन्तिकम् ।
ससैन्यौ स्वभुवश्शर्मपासिकाख्यौ च ठक्कुरौ ॥१८२८॥

तदास्थयाऽहितास्कन्दभङ्गस्तेषामशेषतः ।
रात्रिशेषश्च चन्द्रांशुस्पर्शपाण्डुरशीर्यत ॥१८२९॥

प्रातः प्रेमाऽथ दुर्वार्ताश्रवणेनोष्णदारुणः ।
संताप्यमानश्चोष्णांशुकरै रोद्धुमुपाययौ ॥१८३०॥

तं प्रतोलीतलप्राप्तं निर्यातैर्वैरिसैनिकैः ।
पराङ्मुखीकृतं वीक्ष्य चलितोऽस्म्यन्तिकं प्रभोः ॥१८३१॥

श्रुत्वेति भूभृत् त्वरया लुब्धं लोहरमन्त्रिणम् ।
विससर्जोदयं द्वारपतिमानन्दवर्धनम् ॥१८३२॥

भूमिज्ञौ तौ हि कोट्टस्य विवेदाऽनन्यदेशजौ ।
सोऽल्पान्नत्वादिरन्ध्राणां लक्षणाद् ग्रहणक्षमौ ॥१८३३॥

प्रविष्टश्च पुरं दृष्ट्वा प्रीतिदायार्थिभिः शिरः ।
भ्राम्यमाणं भटैर्भिक्षोराक्षिप्यैतानदाहयत् ॥१८३४॥

1826. c) S′ St $P_{1,2}$ I_3 कृता रा° (for कृतरा°).

1828. b) C S′ द्वारको° (for दारको°).

1830. d) D suggests योद्धु° (for रोद्धु°).

1832. c) All Mss. read °दयद्वार° (for °दयं द्वा° suggested). —d) St. Tr. suggests °वर्धनिम् (for °वर्धनम्).

राजादेशादसंरुद्धैः स्त्रीभूयिष्ठैरसौ जनैः ।
नप्ता पैतामहे देशे दह्यमानोऽन्वशोच्यत ॥१८३५॥

काले ग्रीष्मोदयोद्रिक्तभानौ स्वविषये नृपः ।
सिद्धिमश्रद्दधानोऽपि प्रहिणोति स्म रिल्हणम् ॥१८३६॥

स शौर्यस्वामिभक्त्यर्थनैस्पृह्यादिगुणोज्ज्वलः ।
तेन ह्यमोघप्रारम्भः समभावि जिगीषुणा ॥१८३७॥

भवितव्यतया दत्तव्यामोहः प्रेरितोऽथवा ।
शठामात्यैरभूद् भूभृत् स व्यक्तायुक्तमन्त्रितः ॥१८३८॥

हीनोऽर्थदुर्गामात्यैर्यन्निर्वैक्लव्यस्य वैरिणः ।
अनुमेने कृतारब्धीन् भृत्यान् ग्रीष्मोल्बणे क्षणे ॥१८३९॥

उदयः कम्पनाधीशो राज्ञोऽग्रे पर्यशिष्यत ।
सर्वामात्याः प्रतीहारमन्वगच्छन् पुनः परे ॥१८४०॥

राजात्मजहयारोहडामरामात्यमिश्रया ।
दैर्घ्यं तत्सेनयाऽवापि सर्वसामग्र्युदग्रया ॥१८४१॥

संवेष्टयन्नट्टालिकानिविष्टकटको दिशः ।
संग्रहीतुं प्रववृते सर्वोपायैर्विरोधिनः ॥१८४२॥

लुल्लादयः फुल्लपुरे कोट्टोपान्ताश्रये स्थिताः ।
भयभेदाहवव्यग्रान् प्रकम्पमनयन् रिपून् ॥१८४३॥

1836. b) St $P_{2,3}$ सुविषमे; P_1 I_3 स्वविषमे (for स्वविषये).
1837. a) $P_{2,3}$ I_3 SA चौर्य° (for शौर्य°).
1840. c) C S′ °मात्य° (for °मात्याः). —d) C S′ परं (for परे).
1841. d) P_{1-3} SA सर्वे (for सर्व°).
1842. a) All Mss. read °ट्टलिका° (for °ट्टालिका° suggested, cf. *v.* viii. 1945 fn.). —d) All Mss. read °पायवि° (for °पायैर्वि° suggested with St).
1843. a) C S′ लल्ला° (for लुल्ला°).

सुस्सलक्ष्मापतिर्बद्धे लोठने तत्सुतामदात् ।
यस्मै प्राक् पद्मलेखाख्यां बहुस्थलधराभुजे ॥१८४४॥

साहायकाय प्राप्तस्य तस्य सैन्यैर्द्विषच्चमूः ।
शूराभिधस्य युद्धेषु प्रत्यग्राहि प्रतिक्षणम् ॥१८४५॥

तेषूपरुद्धराष्ट्रेषु भयदोलायमानधीः ।
अङ्गीचक्रे नरपतेर्नीतिं दण्डं च लोठनः ॥१८४६॥

एतावत्सिद्धमफलारब्धीनामत्र दुस्सहे ।
काले व्यावृत्तिरस्माकमुचिताऽस्मिन्नलाघवा ॥१८४७॥

शारदारम्भसुभगे क्रमात् काले बलोर्जिताः ।
अथाऽऽरब्धिं विधास्यामः सर्वारम्भेण शोभनाम् ॥१८४८॥

इत्यन्वहं लक्ष्मकेण प्रहितं नादधे नृपः ।
अन्ये च मन्त्रिणो मन्त्रं शाठ्यादभ्यर्णवर्तिनः ॥१८४९॥

सर्वाधिकार्युदयनः प्रतिश्रुत्य धनं बहु ।
साहायकार्थमानिन्ये सोमपालमपि प्रभोः ॥१८५०॥

अपाङ्क्तेयः स संबन्धबद्धोऽपि धनलुब्धधीः ।
द्रुह्यति स्म महाव्यापन्निमग्नाय महीभुजे ॥१८५१॥

बह्वर्थदो लोठनश्चेत् किं मे सम्बन्ध्यपेक्षया ।
अन्यथा भवतामस्मीत्यन्यान् वक्ष्यामि कैतवात् ॥१८५२॥

1844. a) C S′ P_{1-3} I_3 °र्बद्धो (for °र्बद्धे).

1847. d) D C S′ P_{1-3} I_3 °लाघवः; SA °लावव (for °लाघवा suggested with St).

1849. a) All Mss. read प्रत्य° (for इत्य° suggested with St D).
After this *v.* तिलकम्.

1851. c) C S′ द्रुह्यते (for द्रुह्यति).

दम्भमित्यभिसंधाय सोमपालोऽभ्युपाययौ ।
समर्थने हेतुरासीत् सुज्जेर्व्याजे कियानपि ॥१८५३॥

स हि भिक्षाचरौन्मुख्यान् निवार्यानायितो यदा ।
सोमपालमुखेनोर्वीभुजा राजविसर्जितः ॥१८५४॥

दूतः प्रार्थयमानस्य तस्याऽर्थान् प्राक्प्रतिश्रुतान् ।
ऋणिकस्योत्तमर्णेभ्यः प्रदातुमनुबध्नतः ॥१८५५॥

तदा भिक्षाचरं जानन् हृतकल्पमनेन नः ।
व्यसनप्रशमे कोऽर्थ इत्यवज्ञां प्रकाशयन् ॥१८५६॥

मदेन न ददौ किंचित् सोऽथ भिक्षाचरं हृतम् ।
श्रुत्वा निरुपयोगं स्वं राज्ञो ज्ञात्वा सशोकताम् ॥१८५७॥

यावदेकाहमभजल्लोहरव्यसने भयम् ।
तावन्निरस्य संप्राप्तोत्सेको भूयोऽपि मन्युभाक् ॥१८५८॥

लोठनं बद्धसंधिं वः करिष्यामीति भूभुजः ।
उक्त्वा दूतं लोठनेन दापयिष्यामि काञ्चनम् ॥१८५९॥

युष्मभ्यं कथयित्वेति सोमपालं चिकीर्षितुम् ।
बलितामबलत्वं च सर्वेषां स्वार्थसिद्धये ॥१८६०॥

समं सोमेन तत्सैन्यमध्ये प्रस्थित्यलक्षितैः ।
मितैरनुगतो भृत्यैर्घोरमूलकमासदत् ॥१८६१॥

1853. d) St. Tr. suggests सुज्जिर्व्याजे or सुज्जेर्व्याजो (for सुज्जेर्व्याजे found in all Mss.). After this *v.* युग्मम् .

1855. ab) D SA $P_{1,3}$ °नस्या···र्थान् ; I_3 °नस्य···र्थान् ; C S′ °नस्य तानर्थान् (for °नस्य तस्याऽर्थान् found in P_2).

1861. b) All Mss. read °मन्य°; St °मध्य° (for °मध्ये suggested). P_3 S′ °स्थिति° (for °स्थित्य°). After this *v.* कुलकम् .

यद्वाऽनौचित्यदुष्पांसुवर्षदूषितकीर्तिना ।
भोगलुब्धतया तेन हता विततसत्त्वता ॥१८६२॥

तुषारशर्कराशुक्लजलपानाददुर्जरम् ।
त्यक्तुं भोज्यं मृदु स्निग्धं काश्मीरं न शशाक सः ॥१८६३॥

सतुषं शुष्कसक्त्वादि बहिर्भोक्तुमपारयन् ।
यैस्तैरुपायैः कश्मीरान् प्रविविक्षुरतोऽभवत् ॥१८६४॥

काश्मीरकाः कार्यशेषमदृष्ट्वा ग्रीष्मशोषिताः ।
आकर्ण्य च तदापातमाकुलत्वमशिश्रियन् ॥१८६५॥

भुञ्जानैर्भृष्टमांसानि पिबद्भिः पुष्पगन्धि च ।
प्रतीहाराग्रतो हारि मार्द्वीकं लघु शीतलम् ॥१८६६॥

आनेष्यामो जवात् सुज्जिमाकृष्य श्मश्रु संयुगे ।
इत्थं विकत्थनैस्तैस्तैराहोपुरुषिकाः कृताः ॥१८६७॥

काश्मीरकैर्मितैर्युक्तं खशैः सैन्धवकैरपि ।
अभिषेणयितुं शेकुर्न तेऽत्युद्यमिनोऽपि तम् ॥१८६८॥

भ्रातृव्याय च मुख्याय भूभुजां च करार्पणम् ।
विदध्यां जयसिंहाय वरमित्यभिमानिना ॥१८६९॥

बह्वर्थमर्थ्यमानेन लोठनेन तिरस्कृतः ।
सोमपालः प्रियं किंचिद् राजपक्षे न्यदर्शयत् ॥१८७०॥

1862. a) C S′ °ष्पांशु°; P_2 °ष्पांमु° (for °ष्पांसु°).

1865. c) C S′ °यात° (for °पात°). —d) P_2 SA °शिश्रयन् (for °शिश्रियन्).

1868. d) All Mss. read तेऽप्यु° (for तेऽत्यु° suggested with St)..

1869. d) All Mss. except D read °मानिनाम् (for °मानिना).

मयि श्वशुरसैन्यानां व्यग्राणां वैरिविग्रहे ।
सज्जे हिताय त्वं रन्ध्रमन्विष्यसि किमाश्रितः ॥१८७१॥

इति निर्भर्त्सितस्तेन सुज्जिः स्वाहंक्रियोचितः ।
सर्वानुल्लङ्घ्य सन्नद्धो राजसैन्यग्रहेऽभवत् ॥१८७२॥

जरठाषाढसंजातशीतज्वरमहाभयः ।
वरूथिनीमथोत्थाप्य विदद्रौ निशि लक्ष्मकः ॥१८७३॥

विसृष्टदूताः कटकं नष्टं वक्तुं प्रभोर्द्रुतम् ।
केचिदन्वसरन् सुज्जिं सैनिकास्ते जिघांसवः ॥१८७४॥

पारेणैकेन भूपालसैन्यमन्येन वैरिणः ।
वर्त्मनः श्वभ्रदुर्गस्य तुल्यमेव प्रतस्थिरे ॥१८७५॥

शारम्बरपथं वैरिवश्यं त्यक्त्वा यियासवः ।
स्वोर्वीं कालेनकाख्येन संकटेन तदन्तिके ॥१८७६॥

तस्मिन्नहन्यस्खलिता वनिकावासनामनि ।
ग्रामे सैन्या न्यविक्षन्त लोकैरुच्चावचैः समम् ॥१८७७॥

अनुप्रस्थायिनोऽभ्यर्णग्रामकेष्वपि बुब्रुडुः ।
भुक्त्वा पीत्वाऽथ ते निन्युर्निशार्धमकुतोभयाः ॥१८७८॥

1871. c) D C S′ P_1 सुज्जेहिं°; P_2 I_3 सुज्जे हि° (for सज्जे हि°).

1873. a) D C SA P_{1-3} I_3 जरढा°; S′ जरदा° (for जरठा° suggested with St).

1876. c) D C S′ P_{1-3} I_3 °लेनाख्येन; I_3 °लेनाख्याने; SA_1 °ले···ख्येन (for °लेनकाख्येन found in SA_3).

1877. c) $P_{2,3}$ I_3 SA °विक्ष्यन्त; C S′ °वैक्ष्यन्त (for °विक्षन्त). After this *v.* युग्मम्.

1878. b) D C S′ दुद्रुवुः; P_1 दुध्रुदुः; $P_{2,3}$ वुव्रुदुः (for बुब्रुडुः).

अथाऽऽपातं विद्विषद्भ्यः स्वस्य श्रावयितुं द्रुतम् ।
क्षोभभृत् सुजिरभ्येत्य तूर्यघोषमकारयत् ॥१८७९॥

क्षणदाशेष एवाऽऽशु पलायां चक्रिरे ततः ।
तैस्तैः शैलपथैः सेना निरवष्टम्भनायकाः ॥१८८०॥

चित्राम्बराणि मुष्णद्भिः प्राक्षेऽत्यज्यन्त मन्त्रिणः ।
भूप्रकम्पैर्गण्डशैला नानाधातुद्रवैरिव ॥१८८१॥

लुण्ठ्यमानाश्चमूस्त्रातुं नाददे कश्चिदायुधम् ।
तदा तु येन वा तेन स्वात्मा नान्यस्तु रक्षितः ॥१८८२॥

उत्प्लुत्य लङ्घयन्तोऽद्रीन् केऽपि शोणाधरांशुकाः ।
रक्तस्फिजो गतौ प्रापुर्मर्कटा इव पाटवम् ॥१८८३॥

केऽप्यम्बरपरित्यागविकचद्गौरविग्रहाः ।
हरितालशिलाखण्डा इव वातेरिता ययुः ॥१८८४॥

शूलवेणुवनाकीर्णैः शैलैरक्षतविग्रहाः ।
केऽपि श्वासोत्थपूत्काराः करिपोता इवाऽव्रजन् ॥१८८५॥

किं नामोदीरणैर्मन्त्री स नासीत् तत्र कश्चन ।
तिरश्चेव विपर्यस्तधैर्यैर्यैर्न पलायितम् ॥१८८६॥

भृत्यस्कन्धाधिरूढोऽथ गच्छन्मूढः प्रधावितुम् ।
प्रतीहारो द्विषद्योधैर्दूरात् कैश्चिद् व्यलोक्यत ॥१८८७॥

1879. a) All Mss. read विद्विषद्भिः (for विद्विषद्भ्यः suggested with St. Tr.).

1881. d) SA नानातुधातु° (for नानाधातु°).

1882. b) St P_{1-3} S' I_3 नादधे (for नाददे). —c) D C S' P_1 तदान्वयेन (for तदा तु येन). —d) All Mss. [SA स्वत्म°] read स्वात्म° (for स्वात्मा suggested with St).

1886. c) P_2 I_3 SA तिरश्चैर्य (for तिरश्चेव).

1887. a) P_2 I_3 SA °स्कन्दा° (for °स्कन्धा°).

निरंशुकः स सूर्यांशुकचत्केयूरकुण्डलः ।
प्रतिज्ञायाऽनुसस्रे तैः सर्वप्राणप्रधावितैः ॥१८८८॥

अश्माहतेन भृत्येन त्यक्तः स्कन्धाद् दृषत्क्षतः ।
स निस्पन्दवपुस्तिष्ठंस्तैरग्राहि महाजवैः ॥१८८९॥

नवबन्धनशोकार्तशारिकाकृशविग्रहः ।
स वल्गुलिरिव व्यञ्जद्विषः संकुचितेक्षणः ॥१८९०॥

बद्धस्य मे मानधनप्रहर्तुर्वैशसान्तरम् ।
इतोऽधिकं ध्रुवं सुज्जिर्विदध्यादिति चिन्तयन् ॥१८९१॥

स्कन्धेऽधिरोप्य निश्शेषीकृतप्रावारभूषणः ।
नदद्भिः सोपहासं तैः सुज्जेरग्रं व्यनीयत ॥१८९२॥

प्रच्छाद्य सत्त्ववान् वक्त्रं सोंऽशुकेनैष नोऽर्चितः ।
बृहद्राज इवेत्युक्त्वा तस्मै स्वान्यंशुकान्यदात् ॥१८९३॥

प्रावारिताम्बरं कृत्वा हयारूढं च तं पुनः ।
धैर्येणाऽयोजयत् स्निग्धैर्वचोभिः परिसान्त्वयन् ॥१८९४॥

निर्लुण्ठिततुरंगासिकोशैः परिवृतः खशैः ।
ततो गृहीत्वा तं श्रीमान् सोमपालान्तिकं ययौ ॥१८९५॥

इमा व्योमाङ्गनाक्रीडत्तडित्तरलविभ्रमाः ।
भाग्यमेघानुयायिन्यः स्थायिन्यः कस्य संपदः ॥१८९६॥

1889. [b]) $P_{2,3}$ स्कन्दा° (for स्कन्धा°).

1890. [b]) P_2 I_3 SA °कृष° (for °कृश°). —[c]) D P_{1-3} गग्गालि°; St ···ल्गालि°; SA ल्गालि°; C S′ गल्लालि°; St (after suggestion in fn.) P_2 I_3 गल्गालि° (for वल्गुलि° suggested with St. Tr.). —[cd]) St व्यञ्जद्द्वि°; SA व्यञ्जन्मि°; P_3 व्यञ्जन्द्वि° (for व्यञ्जद्वि°).

1892. [a]) C S′ निश्वष्टी° (for निश्शेषी°). After this *v.* तिलकम्.

1893. [d]) P_3 om.

1894. [a]) P_3 om.

आराधनधिया स्वैरं यस्याऽग्रेऽभोजि भृत्यवत् ।
गात्राणि कुङ्कुमालेपैरुपाचर्यन्त च स्वयम् ॥१८९७॥

सोमपालादिभिः प्रह्वैः स मासैरेव पञ्चषैः ।
तेषामग्रे तथाभूतस्तिष्ठंल्लोकैर्व्यभाव्यत ॥१८९८॥

लुल्लोऽपि पलितश्वेतोपान्तश्यामाननः परैः ।
वनौका इव बद्धोऽभूच्छोकमूको वनान्तरे ॥१८९९॥

अर्पितं सुज्जिना सोमपालः स्वीकृत्य लक्ष्मकम् ।
जानन् गृहीतान् कश्मीरान् निजराष्ट्रं न्यवर्तत ॥१९००॥

लोठनस्याऽन्तिकादेत्य स शूरैर्माञ्जिकादिभिः ।
प्रतिश्रुतप्रभूतार्थैः प्रतीहारमयाच्यत ॥१९०१॥

कश्मीरा हि प्रतीहारशिक्षापक्षानुयायिभिः ।
तदा न कैरमन्यन्त संप्राप्या डामराण्डजैः ॥१९०२॥

लुब्धेनाऽपि प्रतीहारायत्तं राष्ट्रं जिघृक्षुणा ।
भूरि चादित्सुना वित्तं राज्ञोऽकारि न तेन तत् ॥१९०३॥

भग्नमानेष्वमात्येषु प्राप्तेषु नगरं नृपः ।
हारिते च प्रतीहारे न धैर्यात् पर्यहीयत ॥१९०४॥

यैः सैन्यसारैर्द्वैराज्यं पुरा भिक्षाचरोऽकरोत् ।
यैश्चाऽप्युत्कुपिते राष्ट्रे वृत्त्याऽवर्तिष्ट सुस्सलः ॥१९०५॥

1897. [d]) P_{1-3} I_3 SA °पच° (for °पाच°).

1901. [b]) C S′ P_2 °जिका° (for °ञ्जिका°). —[c]) St $P_{2,3}$ I_3 C S′ प्रतिश्रुत्य (for प्रतिश्रुत°). C S′ $P_{1,3}$ °ताक्षैः (for °तार्थैः).

1903. [a]) C S′ SA $P_{2,3}$ I_3 लब्धे° (for लुब्धे°).

भूभृता संगृहीतानां शीतज्वररुजा ततः ।
तेषां दश सहस्राणि योधानां निधनं ययुः ॥१९०६॥

विरराम तदा देशे न मुहूर्तमपि क्वचित् ।
बान्धवाक्रन्दतुमुलं प्रेतवाद्यमहर्निशम् ॥१९०७॥

घोरघर्मघृणिश्रान्ताशेषव्यवहृतिस्थितिः ।
सोऽनुत्साहहतः कालो नष्टराज्य इवाऽभवत् ॥१९०८॥

नानादिगन्तरायातैः प्राप्तैः काश्मीरकैरपि ।
लोहरेऽथ प्रवृद्धर्द्धि राजद्वारमजायत ॥१९०९॥

काकतालीयसंप्राप्तलोकोत्तरनृपश्रियः ।
अकुण्ठा लोठनस्याऽऽसीत् स्फूर्तिर्वित्तपतेरिव ॥१९१०॥

तस्याऽऽकारपरिक्लेशवैशसाभिन्नवृत्तयः ।
भोगेष्वबाह्या भ्रातृव्यभृत्यपुत्रादयोऽभवन् ॥१९११॥

नास्थानवर्षी स्थाने वा बद्धमुष्टिर्विभूतिमान् ।
स वयःपाकनिष्कर्मव्यवहारो व्यभाव्यत ॥१९१२॥

छायानिरङ्कुशगतिः स्वयमातपस्तु
छायान्वितः शतश एव निजप्रसङ्गम् ।
दुःखं सुखेन पृथगेवमनन्तदुःख-
पीडानुवेधविधुरा तु सुखस्य वृत्तिः ॥१९१३॥

तादृगभ्युदयावाप्तेर्मासे न्यूनेऽधिके गते ।
एकसूनोः सुतो दिल्हो लोठनस्य व्यपद्यत ॥१९१४॥

तमेकपुत्रा शोचन्ती शोकशङ्कुहताशया ।
ततः प्रपेदे प्रलयं मल्ला लोठनवल्लभा ॥१९१५॥

1909. b) P_3 °रिकै° (for °रकै°).
1912. d) P_3 °परिवारो (for °व्यवहारो).
1913. d) D C S′ °बोध° (for °वेध°).

पत्न्यामभिन्नभावायां गुणज्येष्ठे तथाऽऽत्मजे ।
विपन्ने स तया लक्ष्म्या न कृत्यं किंचिदैक्षत ॥१९१६॥

निस्स्नेहत्वस्य भूपालसुलभस्य विजृम्भितम् ।
मोहनी वा श्रियः शक्तिर्यदज्ञासीत् पुनः सुखम् ॥१९१७॥

अकारयन्निर्धनोऽपि तथा वृद्धस्य कालवित् ।
लक्षैः षट्त्रिंशता मोक्षं लक्ष्मकस्य क्षमापतिः ॥१९१८॥

दिष्टवृद्धिपरिक्षिप्तपुष्पवृष्टौ जनैः पथि ।
तस्मिन् प्राप्ते न कोऽज्ञासीद् राज्ञा प्रत्याहृतां श्रियम् ॥१९१९॥

स लक्ष्मीमहिमक्षिप्रविस्मृताभिभवप्रथः ।
प्रभवन् पुनरेवाऽऽसीन्निग्रहानुग्रहक्षमः ॥१९२०॥

धनप्रलोभनिर्नष्टसर्वावष्टम्भपाटवः ।
सुज्जिः साचिव्यमव्याजं भेजे लोठनभूपतेः ॥१९२१॥

दत्तवान् भागिकसुतामविश्वासमपाहरत् ।
स तस्याऽऽद्यप्रियापायदुस्स्थितिव्यथया समम् ॥१९२२॥

अभ्यर्थ्य पार्थिवं पद्मरथं चाऽऽनीतवान् कृती ।
तस्य सोमलदेव्याख्यामुद्वाहाय तदात्मजाम् ॥१९२३॥

एवं प्रधानसंबन्धैर्बद्धमूलं विधाय तम् ।
सोऽव्याहतस्य साचिव्यग्रहस्याऽऽनृण्यमाययौ ॥१९२४॥

अचिन्तयच्च कश्मीरप्रवेशं डामरादिभिः ।
बहुशः प्रार्थ्यमानेन प्रेरितो नवभूभुजा ॥१९२५॥

1921. b) SA °सर्वाष्ट° (for °सर्वावष्ट°).
1923. c) P_2 I_3 °देवा° (for °देव्या°).

इत्थंभूतं कृतैक्यं च समं सीमान्तभूमिपैः ।
अथ छलयितुं शत्रुं नीतिं प्रायुङ्क्त सौस्सलिः ॥१९२६॥

तत्रोदयद्वारपतिस्तस्याऽऽरम्भे गभीरधीः ।
अलुप्तसत्त्वः स्तुत्यत्वं सारेतरविदामगात् ॥१९२७॥

तत्रत्यः स हि निर्नष्टसर्वस्वोऽप्यर्थितोऽहितैः ।
दानमानादिभिः स्वामिकृत्ये नित्योद्यतोऽभवत् ॥१९२८॥

वनप्रस्थाभिधे स्थाने लोहरादूरगे स्थितः ।
अखिन्नोऽच्छिन्नसंग्रामैर्भेदं निन्ये द्विषद्बलम् ॥१९२९॥

कटाक्षिताभिप्रायेऽस्मिन् मिथ्या तथ्येन वा दधुः ।
भयं लोठनभूपालान्मानिकेन्दाकरादयः ॥१९३०॥

हन्तव्यांश्चाक्रिकानस्मान् सुज्जौ न्यस्ताशयो नृपः ।
वेत्ति तत्प्रेरणाऽसौ तदाशङ्किषतेति ते ॥१९३१॥

संजातं सहजाख्यायां राज्ञ्यां सुस्सलभूपतेः ।
कुर्मो मल्लार्जुनं भूपं लोहरेऽस्मिन् हिताय वः ॥१९३२॥

तत्प्रेमाणमिवाऽकस्मादभिसंधत्त लोठनम् ।
संदिदेशाऽथ तान् धीमाञ्जयसिंहो महीपतिः ॥१९३३॥

व्याजेन राज्ञा संदिष्टं तत्कोट्टं स्वीचिकीर्षुणा ।
प्रतिश्रुतमविश्वस्तैस्तस्मिंस्तैश्च तथैव तत् ॥१९३४॥

1928. d) All Mss. read °दितो° (for °द्यतो° suggested with St fn.).

1930. d) D C S′ P_{1-3} I_3 °कंदारका°; SA_1 (before corr.) °केन्दाका°; SA_1 (after corr.) St SL °केन्दारका° (for °केन्दाकरा° suggested with St. Tr., cf. *vv.* viii. 1818, 2019).

1933. b) P_1 SA °संधात्त; $P_{2,3}$ I_3 °संधातु (for °संधत्त).

मल्लार्जुनं लोठनोऽथ ज्ञात्वा प्रारब्धचाक्रिकम् ।
तदाद्यान् भ्रातृसूनूंस्तांश्चाक्रिकानप्यबन्धयत् ॥१९३५॥

अवरुद्धातनूजेन शङ्कां सौस्सलिना भजन् ।
परं विग्रहराजेन प्रातिहार्यमजिग्रहत् ॥१९३६॥

राजा व्याजात् पितृव्येण बद्धसंधिरुपायवित् ।
तत्वरे हारितं राज्यं यैस्तैः स्वीकर्तुमुद्यमैः ॥१९३७॥

विसृज्य शूरं निष्कम्पराज्यः सुज्जेः परिश्रमात् ।
मासान् कांश्चिदसंक्षोभो वृत्त्याऽवर्तिष्ट लोठनः ॥१९३८॥

सुज्जिः पद्मरथापत्यं प्राक्कन्यामानिनाय याम् ।
अनूढाया विवाहाय तस्या मातरमागताम् ॥१९३९॥

आकर्ण्य तेजलादीनां प्रसङ्गेऽस्मिन् सगौरवाम् ।
सामात्यो दर्पितपुरं कृतप्रत्युद्गमो ययौ ॥१९४०॥

माणिक्याद्यैरथ प्राप्तरन्ध्रैर्निर्गत्य बन्धनात् ।
मल्लार्जुनः कोट्टराज्ये संहतैरभ्यषिच्यत ॥१९४१॥

ठक्कुरैः प्राग्वदानीतैः प्रतोलीतलमागतान् ।
भृत्यांस्ते सिंहभूभर्तुः प्रविविक्षून् न्यवारयन् ॥१९४२॥

1936. a) All Mss. read °रुद्ध° (for °रुद्धा° suggested with St).
1937. d) St C S′ $P_{2,3}$ I_3 तैस्तैः (for यैस्तैः).
1939. d) $P_{2,3}$ I_3 SA तस्य (for तस्या).
1940. a) C S′ °र्ण्यंत जला° (for °र्ण्य तेजला°). —c) C S′ SA $P_{2,3}$ I_3
सामान्यो (for सामात्यो). —d) St D C P_{1-3} I_3 °त्युद्गतो; S′ °त्युद्गतौ
(for °त्युद्गमो suggested).
1941. c) $P_{1,2}$ I_3 C S′ SA कोष्ठ° (for कोट्ट°).
1942. d) C S′ P_{1-3} I_3 SA °वारयत् (for °वारयन्).

षष्ठेऽब्दे लोठनः शुक्लत्रयोदश्यां स फाल्गुने।
यथाऽयुज्यत राज्येन तथैवाऽऽशु व्ययुज्यत ॥१९४३॥

अनूढां कन्यकां मूढः संपदं चाऽव्ययीकृताम्।
प्राप्तां परस्य भोग्यत्वं भाग्यहीनः शुशोच सः ॥१९४४॥

अटित्वाऽट्टालिकादिभ्यो देशेभ्यो नष्टशक्तिना।
तेन सुज्जिबलात् कोशशेषः कश्चिदवाप्यत ॥१९४५॥

पुर्वाहृतान् सिंहभूभृद् भृत्यान् न्यक्कृत्य माञ्जिकः।
निनायाऽप्रतिमल्लत्वं मल्लार्जुनमहीभुजम् ॥१९४६॥

तेनाऽतिव्ययिना नव्यवयसा भूभुजा कृतम्।
मौक्तिकैः पूगविच्छेदे ताम्बूलार्पणमेकदा ॥१९४७॥

वर्षतो विषयौत्सुक्याद्धाटकं कुट्टनादिषु।
त्यागित्वं तस्य तत्त्वज्ञैः सदोषमुदघोष्यत ॥१९४८॥

प्रजोपतापोपचितः कोशः सुस्सलभूपतेः।
तेनाऽतिव्ययिना स्वैरमनुरूपव्ययः कृतः ॥१९४९॥

गणिकाचारणद्रोग्धृविटचेटादिपेटकम्।
साधून् विधूय सोऽपुष्णाद् दर्पोष्णः कुमतिर्यतः ॥१९५०॥

सपत्नसादहितसाद्यद्वि वा वह्निसाद्भवेत्।
द्रविणं क्षोणिपालानां जनतोपद्रवार्जितम् ॥१९५१॥

1943. b) $P_{1,2}$ I_3 S′ SA फाल्गुणे (for फाल्गुने).
1945. a) D C S′ $P_{1,5}$ SA_2 °टिल्लिका° (for °ट्टालिका° found in SA_1 P_2, cf. *vv*. viii. 1842, 1991, 1994).
1946. b) C S′ I_3 माजिकः (for माञ्जिकः). —c) $P_{1,3}$ प्रति° (for [अ] प्रति°).
1950. a) C S′ गणका° (for गणिका°). —cd) D C S′ °ष्णाद्धर्मों°; SA_1 °ष्णाद्धर्मों°; P_2 °ष्णाद्रमों°; P_3 °ष्णद्धर्मों° (for °ष्णाद्दर्पों°). SA_1 (before corr.) कुपति° (for कुमति°).

प्रजापीडनजं वित्तं जयापीडमहीभुजः ।
दास्याः पुत्रैरुत्पलाद्यैर्विलुप्तं नप्तुरन्तकैः ॥१९५२॥

लोकसंक्लेशनोद्भूतः कोशः शंकरवर्मणः ।
प्रभाकरादिभिः स्वैरं जायाजारैरभुज्यत ॥१९५३॥

अनङ्गवशगाः पङ्गोरङ्गना वृजिनाऽर्जितम् ।
ददुः सुगन्धादित्याय धनं संभोगभागिने ॥१९५४॥

राज्ञो यशस्करस्याऽर्थान् व्ययीचक्रेऽतिसंचितान् ।
अङ्गनाऽनङ्गवैवश्यादालिङ्गितजनंगमा ॥१९५५॥

पूर्वराजार्जितं पार्वगुप्तिः प्राप्य धनं मृतः ।
दाता जायौपपत्येन तुङ्गादीनामजायत ॥१९५६॥

संग्रामराजः श्रीलेखामुखाब्जमधुपैर्धनी ।
मुषितो व्यड्डसूहाद्यैर्निविडोपार्जनस्पृहः ॥१९५७॥

अप्रत्यवेक्षाक्षपितप्रजस्य जगदूर्जिता ।
अन्तेऽनन्तमहीभर्तुर्विभूतिर्भस्मसादभूत् ॥१९५८॥

पुत्रेणाऽपात्रसान्नार्या जारसात्तरसा कृतः ।
कुकलाकौशलोद्भूतः कोशः कलशभूपतेः ॥१९५९॥

सह गेहैः समं स्त्रीभिः सत्रा पुत्रैरभूद्धनम् ।
अश्रान्तार्जनतर्षस्य हर्षदेवस्य वह्निसात् ॥१९६०॥

1952. d) SA_2 in marg. (before being struck out) नप्तृनर्तकैः; SA_1 नप्तुरत्तकैः (for नप्तुरन्तकैः).

1953. b) C S′ शोकः (for कोशः).

1954. a) C S′ °नङ्क° (for °नङ्ग°).

1959. d) C S′ SA कोषः (for कोशः).

चन्द्रापीडोच्चलावन्तिवर्माद्यैर्धर्मनिष्ठुरैः ।
निष्ठा न्याय्यस्य कोशस्य नाऽवाप्यनुचिता क्वचित् ॥१९६१॥

चौरचाक्रिकसीमान्तभूभृद्वेश्याविटादयः ।
लुण्ठिं प्रारेभिरे पुष्टां नवे मल्लार्जुनोदये ॥१९६२॥

वञ्चयित्वाऽप्यरीन् भूभृत्तास्यन्विघटितेप्सितः ।
अथ चित्ररथं तूर्णमास्कन्दाय व्यसर्जयत् ॥१९६३॥

द्वारपादाग्रयोस्तुल्याधीकारेण प्रवर्धितः ।
सोऽनन्तसामन्तयुतः पदं फुल्लपुरे व्यधात् ॥१९६४॥

उत्सेहिरे न वितता अपि दुर्गसमाश्रयात् ।
मल्लार्जुनचमूर्जन्ये जेतुं तदनुजीविनः ॥१९६५॥

भेदाय कोट्टमारूढस्तद्भृत्यो राजसंमतः ।
मल्लार्जुनानुगै रात्रौ हतः संवर्धनाभिधः ॥१९६६॥

युद्धासाध्येऽपि तिष्ठन्तः कोट्टे भयविधेयताम् ।
कोष्ठेश्वरेऽन्वगायाते तत्राऽमित्राः प्रपेदिरे ॥१९६७॥

प्रतिश्रुतकरो बद्धसंधिः स व्यसृजत् ततः ।
सभाजनाय जननीं तेषां मल्लार्जुनोऽन्तिकम् ॥१९६८॥

सा वैधव्यविविक्तेन वेषेणैश्वर्यशोभिना ।
कोष्ठेश्वरादीन् सोत्कण्ठांश्चक्रे चपलचेतसः ॥१९६९॥

1961. d) C S′ नवाप्या° (for नाऽवाप्य°).

1966. P_1 om. *vv.* 1966 *c* to 1968 *b*.

1969. a) C S′ $P_{1,2}$ I_3 SA वैधव्यं वि° (for वैधव्यवि°). —b) C S′ P_{1-3} I_3 SA वेषेनै° (for वेषेणै°).

तस्यां गृहीतविस्रम्भं व्यावृत्तायां तदन्तिकात् ।
द्वारेशाय ददावूरीकृतं मल्लार्जुनः करम् ॥१९७०॥

आकृष्टो राजजननीचक्षूरागेण कोष्ठकः ।
दिदृक्षाकपटात् कोट्टमारुरोह मितानुगः ॥१९७१॥

अवरूढेन सहितस्तेन चित्ररथस्ततः ।
संभृतप्राभृतो भूमिभर्तुः सविधमाययौ ॥१९७२॥

राजा तु संमन्त्र्य ततः प्रायुङ्क्ताऽऽहृतिशालिना ।
उदयद्वारपतिना नीतिं जेतुमरीन् पुनः ॥१९७३॥

वीतास्कन्दो लोठनेऽपि गते पद्मरथान्तिकम् ।
लेभेऽभिनवभूपालः किंचित्पादप्रसारिकाम् ॥१९७४॥

उदूढवान् सोमलाख्यां तां पद्मरथकन्यकाम् ।
उपयेमे धृतायामो नागपालात्मजामपि ॥१९७५॥

तस्मादहंक्रियामूढाल्लेभिरे गूढकैतवाः ।
भूभुजः सोमपालाद्या भृत्यभावेन वेतनम् ॥१९७६॥

कविगायनजल्पाकयोधचारणचेष्टितैः ।
वहवो मुमुषुर्धूर्तास्तेऽपि तं राजबीजिनः ॥१९७७॥

स वाल्यान्निष्परीपाकप्रज्ञो दृष्टो रटन् बहु ।
जज्ञे वाक्प्रौढिमात्रेण बालिशैः कुशलाशयः ॥१९७८॥

1972. [a]) All Mss. read अर्धरू° (for अवरू° suggested with St). —[c]) All Mss. read संभूत° (for संभृत° suggested with D).

1973. [b]) St. Tr. suggests [आ]द्दति° (for [आ]हृति°).

केतोरिवाऽभद्रहेतोः प्रदीप्तं वदनं विना ।
अनिष्ठुराकृतेर्दृष्टं तस्याऽन्यत्र न सौष्ठवम् ॥१९७९॥

अत्रान्तरे नृपः सुज्जिं संजग्राहोग्रविक्रमम् ।
मा भून्मल्लार्जुनेनाऽपि श्रितोऽसाविति चिन्तयन् ॥१९८०॥

निर्वासने प्रवेशे च प्रभुः सुज्जेस्ततोऽधिकम् ।
तात्कालिकीं प्रतीहारः शक्तिं कांचिददर्शयत् १९८१॥

स कम्पनाद्यधीकारस्रजं राजविसर्जिताम् ।
वितरन् सुज्जये राजस्थानकार्यस्रजं विना ॥१९८२॥

निस्तोषाय गृहायातसोमपालानुरोधतः ।
प्रसीदन् वामहस्तेन निजजूटस्रजं मदात् ॥१९८३॥

आकृष्य प्रददौ तस्य तत्प्राप्तिपरितोषिणः ।
आप्यायं सान्द्रया दृष्ट्या यत्संपद् वीरुधो व्यधात् ॥१९८४॥

भर्त्रे हिताय सौहार्दं विधूयोदयधन्ययोः ।
अभजद् रिल्हणः सुज्जेः प्रवेशेऽप्रतिलोमताम् ॥१९८५॥

प्रत्युद्गमेन संमान्य सुज्जिं प्रावेशयन्नृपः ।
देशान्निरास्थद् धन्यादीन्मानसान्न तु तद्गिरा ॥१९८६॥

कृतागाः क्ष्मापतौ लब्धक्षणे तीक्ष्णैर्जिघांसति ।
कोष्ठेश्वरः पलायिष्ट ज्ञातोदन्तस्तदन्तिकात् ॥१९८७॥

1984. c) D P_3 °यमार्द्रं°; St C S′ I_3 SA SL °यसान्द्र°; P_1 °यसाद्रय°; P_2 °यसार्द्रं° (for °यं सान्द्र° suggested with St. Tr.). After this *v.* D suggests तिलकम् (for चक्कलकम्).

1985. d) All Mss. read प्रवेशे प्रति° (for प्रवेशेऽप्राति° suggested with St. Tr.).

1986. c) C S′ °रास्थाद् (for °रास्थद्).

आस्कन्दायाऽऽगते राज्ञि गृहीतमनुजेश्वरे ।
स्वपक्षभेदोपहतः सोऽथ देशान्तरं ययौ ॥१९८८॥

लोठनस्तु निजग्राह कांश्चिदालम्ब्य ठक्कुरान् ।
बप्पनीलाभिधे स्थाने वसन् मल्लार्जुनं बलात् ॥१९८९॥

तत्र दृष्टमसंभाव्यमेवाऽस्य खलु पौरुषम् ।
परिभ्रष्टोऽपि यद्बद्धपदं तमजयत् सदा ॥१९९०॥

जहार तुरगांल्लुण्ठि चकाराऽट्टालिकापणे ।
मार्गद्रङ्गादिभङ्गं च तदा सर्वत्र सोऽकरोत् ॥१९९१॥

राजराजाभिधानेन डामरेणाऽर्थितस्ततः ।
कश्मीरराज्यसंप्राप्त्यै क्रमराज्यमगाहत ॥१९९२॥

तदवेत्य समीपस्थे हते चित्ररथेन सः ।
तस्मिंल्लवन्ये प्रययौ बप्पनीलभुवं पुनः ॥१९९३॥

तस्मिन्नास्कन्दमसकृद् ददत्यट्टालिकामपि ।
अवरोद्धुमशक्तोऽभूत् कोट्टे मल्लार्जुनो वसन् ॥१९९४॥

भ्रातृव्येण पितृव्यस्य दापयित्वा धनं बहु ।
ततः कोष्ठेश्वरो यात्रासज्जः संधिं न्यबन्धयत् ॥१९९५॥

लोहरे विहितस्थैर्यो गृहीत्वा लोठनं ततः ।
कश्मीरोर्व्यां पपाताऽसौ विजिघृक्षुः क्षमाभुजा ॥१९९६॥

1991. b) D St $P_{1,2}$ I_3 °ट्टिलिका°; P_3 °ट्टलिका° (for °ट्टालिका°). —d) D St P_{1-3} I_3 SA_1 om. तदा with a *lacuna*.

1994. b) D P_2 °त्यट्टिलिका°; St SA $P_{1,3}$ I_3 °त्यट्टलिका° (for °त्यट्टालिका°). —d) S′ P_{1-3} I_3 SA °वसत् (for वसन्).

1995. a) P_{1-3} I_3 भ्रातृव्येन (for भ्रातृव्येण).

1996. a) All Mss. read °स्थैर्यें° (for °स्थैर्यो suggested with St). —d) $P_{2,3}$ SA °गृक्षुः (for °घृक्षुः).

गिरीनुल्लङ्घ्य कार्कोटद्रङ्गे विहितवान् पदम् ।
निपत्य मार्गेऽनुद्धाते यावदन्यैश्च डामरैः ॥१९९७॥

नाऽवाप योगं निर्गत्य क्षिप्रकारी क्षमापतिः ।
सर्वोद्योगेन तं तावदुत्थानोपहतं व्यधात् ॥१९९८॥

अत्रान्तरे प्रतीहारः प्रापाऽस्तमपपीडया ।
न संपत्स्वल्पपुण्यानामनपायित्वमायुषः ॥१९९९॥

उत्सारणप्रियतया परिरुद्धसर्व-
द्वारे गृहे निरनुरोधतया वसन्तः ।
संपल्लघूकृतधियोऽप्रतिघप्रवृत्ते-
र्धिग्जानते न रभसान्नियतेर्निपातम् ॥२०००॥

कुर्वाणोत्सारणं तस्य गृहजा सततं नृणाम् ।
नाऽज्ञासीत् सुखसुप्तस्य पृष्ठे पतितमन्तकम् ॥२००१॥

ज्वरितः स हि निष्ठ्यूतज्वरः स्वपिति विज्वरः ।
विदित्वेति न विज्ञातः स्वपन्नेव मृतस्तदा ॥२००२॥

सलोठने कोष्ठकेऽथ प्रयाते नृपतिः पुनः ।
न स मल्लार्जुनो नापि कोष्ठको न स लोठनः ॥२००३॥

छद्मनोदयनं पार्श्वस्थितं मल्लार्जुनोऽवधीत् ।
तस्मै चुक्रोध माध्यस्थ्ये स्थापितस्तेन कोष्ठकः ॥२००४॥

1998. d) C S′ °हृतं (for °हतं).

1999. ab) P_2 °रप्राप्ता°; SA °रप्रापा° (for °रः प्रापा°). D S′ P_{1-3} I_3 SA °मय° (for °मप°).

2000. b) St P_{1-3} I_3 °द्वारं (for °द्वारे).

2003. ab) P_1 om.

2004. c) C S′ P_3 माध्यस्थे; P_1 मध्यस्थे (for माध्यस्थ्ये).

अनुनिन्ये न तं खिन्नं स संभृतबलस्ततः ।
अभिषेणयितुं क्रोधादधावत् सहलोठनम् ॥२००५॥

कोष्ठको मल्लकोष्ठाद्यैर्मितैर्युक्तोऽपि सादिभिः ।
तीर्त्वा परोष्णीं तत्सेनां निर्ममाथाऽप्रमाथिनीम् ॥२००६॥

हतेषु तेषु संग्रामे खशसैन्धवकादिषु ।
वधं प्राप्तः सिंहभूभृद् द्वेषान्न स नृपो हतः ॥२००७॥

आरूढः कोट्टमूर्धानं मानमूर्ध्नः परिच्युतः ।
भग्नप्रतापो भूयोऽपि समधत्त स कोष्ठकम् ॥२००८॥

विसृज्य लोठनं तिष्ठन्निर्वैरमगमत् पुनः ।
अनिर्वाहितदेयेन तेन द्वैधं स डामरः ॥२००९॥

वद्ध्वाऽधिकारिणः शुल्कं गृह्णताऽकारि राजवत् ।
तेन स्वनाम्ना भाण्डेषु द्रङ्गे सिन्दूरमुद्रणम् ॥२०१०॥

जतुसंहतयोः काचकलशीदलयोरिव ।
क्षणे क्षणे संधिभङ्गस्तयोः समुदपद्यत ॥२०११॥

निर्व्यूढिशून्यैर्वाग्रौक्ष्यैर्विरागं लोहरेश्वरः ।
निन्ये लवन्यं सोऽप्येनं स्पर्धाबन्धैरनङ्कुशैः ॥२०१२॥

डामरेण ततो दत्त्वाऽऽस्कन्दं तत्कटकान्तरम् ।
पराध्यायुधधुर्याश्वहरणात् सुतरं कृतम् ॥२०१३॥

2008. a) C S′ $P_{1,2}$ I_3 कोष्ट°; SA कोष्ठ° (for कोट्ट°).

2010. d) P_1 SA °णाम् ; C S′ $P_{2,3}$ °णा (for °णम्).

2013. d) D St P_{1-3} I_3 SA सु˙˙˙रं ; C S′ सुस्थिरं (for सुतरं suggested).

दत्त्वाऽनुकूलैरायत्यां विषमैर्हठपौरुषैः।
एवं तं कोष्ठको मूढः सुखोच्छेदं व्यधाद् द्विषाम् ॥२०१४॥

तनयादानसंबन्धाच्छ्वशुरं मुख्यमन्त्रिणम्।
अत्राऽन्तरे नृपो हन्तुं माणिकं स व्यचिन्तयत् ॥२०१५॥

आसीत् कठोरतारुण्यतरङ्गितमनोभवः।
सुव्यक्तं स हि तन्मातुरौपपत्येन संमतः ॥२०१६॥

आहारावसरे तीक्ष्णाः कृतसंज्ञाः क्षमाभुजा।
दत्तप्रहरणाः प्राणैर्भुञ्जानं तं व्ययोजयन् ॥२०१७॥

धुन्वन्नसिपटं बद्धवीरपट्टो रटन् बहु।
निर्लुण्ठयन् स तत्सेनां तां तामारभटीं व्यधात् ॥२०१८॥

अवाशिष्यत न द्रोहमध्यादिन्दाकरोऽप्यहो।
राज्ञा विशमितस्तेन रसदानेन स स्वयम् ॥२०१९॥

दैवेनोत्सारितारातिस्ततः सिंहमहीपतिः।
संदधे कोष्ठकं सुज्जि प्राहिणोद् विजयाय च ॥२०२०॥

मार्गस्य याममात्रेण गम्यस्याऽन्तिकमाप सः।
यावत् तुरंगहरणात् कोष्ठकेनाऽऽकुलीकृतः ॥२०२१॥

अन्तर्भेदाकुलस्तावत् प्रत्यवस्थातुमक्षमः।
गृहीतकोशः संत्यज्य कोट्टं मल्लार्जुनो ययौ ॥२०२२॥

2014. [a]) D P_2 I_3 SA_1 °त्वा त्व···रा°; St °त्वा द्व···रा°; C S′ °त्वा भयं तैरा°; P_1 °त्वानु···रा°; P_3 °त्वान्व···रा° (for °त्वाऽनुकुलैरा° or °त्वानुरूपैरा° suggested). —[bc]) P_3 om.

2015. [b]) St P_2 °णाम् ; P_1 यत् ; P_3 °णा (for °णम्).

2019. [b]) C S′ °द्दिद्दारको°; D °दिन्दारको°; $P_{1,3}$ °दिर्दारको° (for °दिन्दाकरो° cf. vv. viii. 1818. 1930). —[c]) St C S′ P_2 विषमि° (for विशमि°).

2020. [a]) St $P_{1,2}$ I_3 देवतो°; P_3 देवता° [sic] (for दैवेनो°). —[c]) C S′ सन्ददे (for सन्दधे).

2022. [d]) C S′ SA P_{1-3} कोट्टे (for कोट्टं).

राज्यभ्रष्टः स निर्लुण्ठ्यमानो मार्गेषु तस्करैः ।
अवनाहोन्मुखो रक्षन् कोशशेषं कथंचन ॥२०२३॥

भ्रष्टमष्टादशशरद्देश्येनाऽष्टमवत्सरे ।
राज्यात्तेन द्वितीयस्यां वैशाखस्याऽसितेऽहनि ॥२०२४॥

दत्वा शिवोऽमृतरुचेरमृतं विलुब्ध-
कार्पण्यकृत्समिति लूनशिराः कृतश्च ।
ईशेन यत्र तदकार्युपकर्तुरस्तु
तत्राऽपरः क इव संनिहितद्विजिह्वः ॥२०२५॥

मुक्ता इमा इति जलं नलिनेषु लीनं
ज्ञातृत्वमेतदिति जाड्यमिनेषु लग्नम् ।
यज्जायते किमपि हन्त विमोहिनी सा
शक्तिः श्रियः स्फुरति काऽपि तदाश्रयायाः ॥२०२६॥

घ्नन्त्यद्भुतप्रहरणा विपिनेषु केऽपि
घ्राणेन केचन दृशाऽथ रसज्ञयाऽन्ये ।
ते केऽपि सन्ति तु नरेन्द्रगृहेषु हिंस्रा
वाचैव ये विरचयन्ति किलोपघातम् ॥२०२७॥

ज्योती रसाश्मन इवाऽऽश्रितमीश्वरस्य
निर्दग्धुमिन्धनमिवाऽग्रगतं न शक्ताः ।
पश्चाद्भवेद् यदि स तत्प्रसृतावकाशाः
कुर्युः खला रविकरा इव भस्मशेषम् ॥२०२८॥

2024. b) All Mss. read °श्यश्चाष्ट°; St fn. suggests °श्यस्याष्ट° (for °श्येनाऽष्ट° suggested with D). —d) SA_1 (before corr.) °हितेहनि; C S′ °न्वितेहानि; P_3 °मितेहनि; (for °सितेऽहनि).

2025. a) All Mss. read दाता शिखामृत° (for दत्वा शिवोऽमृत° suggested). —ab) St SA_1 °लब्ध···ण्यकृ°; P_2 I_3 °लुब्ध···ण्य··कृ°; St fn. suggests °लुब्धकारुण्यकृ° (for °लुब्धकार्पण्यकृ°).

2026. c) St D C S′ P_2 I_3 °हनी; P_3 °हिती (for °हिनी found in P_1).

2028. a) St (before corr. in corrigenda) D C S′ P_{1-3} I_3 ज्योतीर° (for ज्योती र°).

कापिलं हर्षटं कोट्टं नीतवान् मण्डलेशिताम् ।
उदयै कोट्टभृत्यानां संग्रहं कम्पनाधिपः ॥२०२९॥

कुर्वञ्शय्यां पुनर्नेतुं मण्डलं तद्व्यलम्बत ।
दिनानि कतिचित् तत्र यावत्प्रकृतिदुर्जनैः ॥२०३०॥

विटैरसूयाविषमैः प्रसादावसरो नृपः ।
तावत्कलुषतां तस्मिन्नुपजापैरनीयत ॥२०३१॥

राजा भवन् परः कोऽस्तु स्वविचारदृढक्रियः ।
एषोऽपि शिशुवद् भूभृद् यत्र धूर्तैः प्रनर्त्यते ॥२०३२॥

शैशवे बालिशप्रायैः संस्तुतैर्जाड्यमर्पितम् ।
प्रौढावपि न वा यायाद् राज्ञः कार्ष्ण्यं मणेरिव ॥२०३३॥

भृत्यान्तरापरिज्ञानमात्रेण जगतीभुजाम् ।
निरागसो वज्रपातः कष्टं राष्ट्रस्य जायते ॥२०३४॥

कृत्ये व्यवसितेऽसाध्ये हास्यः स्याल्लक्ष्मकादिवत् ।
सुज्जिः प्रायोजि राजातैर्निर्जेतुमिति लोहरम् ॥२०३५॥

निर्व्यूढाद्भुतकार्येऽथ तस्मिन् ब्रह्मास्त्रतुल्यया ।
अमोघया प्रजह्रुस्ते पापाः पैशुन्यविद्यया ॥२०३६॥

2031. After this *v*. SA_1 D P_3 add चक्कलकम् (for तिलकम्).

2032. b) C S′ D सुविचार° (for स्वविचार°). —d) C S′ प्रवर्त्य° (for प्रनर्त्य°).

2033. a) SA P_{1-3} I_3 वालि° (for बालि°). —d) SA_1 (before corr.) कार्श्यं (for कार्ष्ण्यं).

2034. d) C S′ काष्ठं (for कष्टं).

2036. a) P_1 °येष; P_3 °येव (for °येऽथ). —d) St $P_{2,3}$ I_3 पैशुन° (for पैशुन्य°).

गाम्भीर्यालक्ष्यविकृतेः प्रीत्यालापैर्महीपतेः ।
प्रत्यायातः कलुषतां नाऽज्ञासीत् कम्पनापतिः ॥२०३७॥

प्रकृत्या तस्य निर्द्रोहतया शङ्काऽस्य तादृशम् ।
प्रियं कृतवतश्च स्यादविश्वासोऽथवा कथम् ॥२०३८॥

प्रीतिरासीन्न नृपतेस्तत्कृत्यैरुचितैरपि ।
अप्रियप्रमदालापैर्विरक्तस्येव कामिनः ॥२०३९॥

जित्वा राष्ट्रद्वयं प्रादां हारितं नृपतेरिति ।
बहुमानेन दर्पाच्च स्वच्छन्दं स व्यवाहरत् ॥२०४०॥

पौरानगारहरणाद्यपकारैर्निरङ्कुशाः ।
तद्बन्धवो बाधमाना विरागमनयञ्जनम् ॥२०४१॥

निजागः स्मरणात् कोष्ठेश्वरो न व्यश्वसीन्नृपे ।
न पितृव्येऽपि भूपालकोपाविष्कृतविक्रिये ॥२०४२॥

कोशं प्रजोपतापेन संचिन्वन् सुज्जिना समम् ।
संबन्धकृच्चित्ररथो नाऽभूदभिमतः प्रभोः ॥२०४३॥

धन्योदयौ नृपः सुज्जिदाक्षिण्यालक्ष्यसौहृदः ।
अपुष्णाद् द्रविणैर्गूढं राजपुर्यां कृतस्थिती ॥२०४४॥

तौ चाऽवालगतां शीतज्वरनष्टपरिच्छदौ ।
मल्लार्जुनस्य साम्राज्यभ्रंशेऽपि विपुलश्रियः ॥२०४५॥

2037. a) D (before suggestion) St C S′ $P_{1,3}$ I_3 °कृतैः (for °कृतेः found in P_2).

2044. a) C S′ P_2 SA °दयो (for °दयौ). —d) C S′ P_1 SA राज्य° (for राज°).

2045. a) D C S′ P_{1-3} I_3 SA चावालगतौ; SG चारालगतौ (for चाऽवालगतां suggested).

सुज्जिद्वेषात् पुरा दूतैराहूतो लक्ष्मकेण यः।
आगच्छन् सञ्जपालः स प्राप राजपुरीं तदा ॥२०४६॥

सुज्जिचित्ररथाभ्यां तं रुद्धचेष्टेन भूभुजा।
अविसृष्टप्रवेशाज्ञं दूतैर्मल्लार्जुनोऽभजत् ॥२०४७॥

तन्निमित्तं स केनाऽपि सामन्तेन सहाऽध्वनि।
संजाते कलहे शस्त्रक्षतो लक्ष्म्या व्ययुज्यत ॥२०४८॥

तथाभूतमपि स्वर्णं भूर्युरीकृत्य नाऽशकत्।
यत्तं मल्लार्जुनो नेतुं कार्यज्ञैस्तदपूज्यत ॥२०४९॥

सोऽस्वतन्त्रेण राज्ञा सौजन्याद् रिल्हणेन च।
दूतैः प्रच्छन्नमाहूतो रभसादाययौ ततः ॥२०५०॥

न न्यघ्नन्नत्र चेद्धन्युर्मामसुत्रेति चिन्तयन्।
अमित्रविषमे मार्गे पुरं साहसिकोऽविशत् ॥२०५१॥

स कन्यकुब्जगौडादिमण्डलेषु महीभुजाम्।
स्पर्धया लब्धसत्कारो भूपतेर्मन्त्रियन्त्रिताम् ॥२०५२॥

अनवाप्य निजे देशे सत्क्रियां दुःखितोऽभवत्।
राजधान्यन्तिकैः पौरैः प्रस्नुतास्नु व्यलोक्यत ॥२०५३॥

भूपालोऽगणयित्वाऽथ मन्त्रिणो दत्तदर्शनः।
भेजे स्वहस्तताम्बूलदानप्रक्रिययैव तम् ॥२०५४॥

2046. c) C S′ St D P_1 आगछत्स° (for आगच्छन् स°).

2048. c) All Mss. read सञ्जातकलहे (for सञ्जाते कलहे suggested).

2049. c) St C S′ $P_{2,3}$ I_3 यत्तन्म° (for यत्तं म°)

2051. a) D P_{1-3} I_3 SA न्यघ्न···त्र (for न्यघ्नन्नत्र).

2052. d) C S′ P_2 I_3 °र्यन्त्रिय° (for °र्मन्त्रिय°).

2053. c) All Mss. read °न्तिकैः (°न्तिके suggested with D). —d) C S′ प्रसृतासु ; St $P_{1,2}$ प्रसृतास्नु; I_3 प्रसृतास्र (for प्रस्नुतास्नु). D suggests विलोकितः (for व्यलोक्यत).

निष्किंचनोऽपि सन् ख्यातिमात्रेणाऽनुगतो जनैः ।
यातायातं नृपगृहे कुर्वञ्शत्रूनकम्पयत् ॥२०५५॥

व्याहारव्यवहारादि व्यालोक्याऽलौकिकाकृतेः ।
पुरुषान्तरवित् सुज्जिस्तस्य स्वैरमवेपत ॥२०५६॥

दध्यौ सोऽथ ध्रुवं राष्ट्रेऽखर्वसर्वंकषक्रियम् ।
नैवमेवाऽद्भुतं भूतमेतादृक्शान्तिमेष्यति ॥२०५७॥

तांस्तान् देशान्तरे वीराननुत्सिक्तान्दृष्टवान् स च ।
तं पर्यालोच्य विश्रान्तिं सोत्सेकानाममन्यत ॥२०५८॥

भवितव्यतया दर्पेणाऽथ नीतः स्वतन्त्रताम् ।
परिवादावहं सुजिस्ततो यत्तद् व्यवाहरत् ॥२०५९॥

स्वानुगैर्लुण्ठितं रूक्षमाचक्षाणं रुषा द्विजम् ।
प्रासैर्मडवराज्यस्थः स सृगालमिवाऽवधीत् ॥२०६०॥

बाह्ये कुकर्मणा तेन विप्लाव्य जनमागतम् ।
तं प्रत्युग्रक्रियं लोको विरागं नगरेऽप्यगात् ॥२०६१॥

अत्रान्तरे बन्धुमेकं व्यधुः कमलियादयः ।
अगण्यप्रायमुत्सेकादुत्तमप्रक्रियास्पदम् ॥२०६२॥

मयि सत्यपरोऽपि स्यात् किमनुग्राहकः स्मयात् ।
अकारि चारणप्रायस्तादृक्कोऽपीति सुज्जिना ॥२०६३॥

संजातयौनसंबन्धबन्धः कमलियादिभिः ।
अथाऽस्याऽक्षिगतोऽत्यर्थं सामर्थ्याद् रिल्हणोऽप्यभूत् ॥२०६४॥

2055. a) D सत्° (for सन्). —c) I₃ यातं यातं (for यातायातं).
2063. a) P₂ °परे° (for °परो°). —c) C S′ P₁,₂ अर्कारि (for अकारि).

अल्पेन हेतुनोद्भूतं द्वैतं तेषां च तस्य च।
खलपैशुनसेकैस्तत् प्रापाऽऽशु शतशाखताम् ॥२०६५॥

प्रकृत्योत्सिक्तमुत्सेकावहैः समुददीपिपत्।
दुर्मन्त्रैर्विग्रहैश्चाऽग्रे साहदेविस्तमुल्हणः ॥२०६६॥

असमानां सहाऽस्माभिः क्षमते समशीर्षिकाम्।
कृतघ्नोऽयमिति स्वैरं मन्युं राज्यपि सोऽग्रहीत् ॥२०६७॥

बिभ्यत् तु भूपतिस्तस्माद् रिल्हणं बाह्यभृत्यवत्।
मन्त्रस्वैरकथाद्येषु विस्रम्भेषु व्यवर्जयत् ॥२०६८॥

स तु धूर्तत्वदुर्लक्ष्यताद्दक्षस्वामिवैकृतः।
स्वेषां धैर्यं परेषां तु संत्रासं मायया॒ऽतनोत् ॥२०६९॥

समग्रशक्तिराकाङ्क्ष्यसंस्तवः पक्षयोर्द्वयोः।
तस्य तु प्रययौ सज्जपालो दानेन मित्रताम् ॥२०७०॥

संनद्धयोः प्रविशतोरन्योन्यस्पर्धया तयोः।
क्षणे क्षणे राजधानी ययौ संभ्रमलोलताम् ॥२०७१॥

सुज्जिः सभूपानाक्षेप्तुं प्रतिपक्षान् युयुत्सया।
महीमानोत्सवास्थाने संक्षोभमुदपादयत् ॥२०७२॥

कृकाटिकान्यस्तहस्तो द्वास्स्थेनाऽऽवेदितो हि सः।
तं निर्भर्त्स्य शिलाक्षेपं क्रोधरूक्षाक्षरोऽकरोत् ॥२०७३॥

लिखितैरिव तान् सर्वैः सोढुं रक्षणमीशितुः।
मिथ्या तथ्यमिवोदीर्य संग्रश्चद्भिः समर्थताम् ॥२०७४॥

2066. b) St SA_3 °दिपत्; SA_1 °पित् (for °पिपत्). —c) I_3 om. श्चाग्रे. St $P_{1,2}$ °काङ्ये (for °श्चाग्रे).

2067. a) SA आसम°; C $P_{1,2}$ आसमा° (for असमा°).

2068. a) C S′ P_1 बिभृत् (for बिभ्यत्).

उपावेशयदभ्यर्णे भूपतिः परिसान्त्व्य तम् ।
सत्यस्मिन्नास्ति नः किंचिदित्यन्तस्तु व्यचिन्तयत् ॥२०७५॥

चक्रे मडवराज्यस्थैरथ प्रायो द्विजातिभिः ।
न सुज्जेः कम्पनेशत्वमिच्छाम इति वादिभिः ॥२०७६॥

अन्विष्य विद्विषः शङ्कां मन्त्रविन्निशि रिल्हणः ।
संनद्धसैन्यमानिन्ये पञ्चचन्द्रं तदप्रियम् ॥२०७७॥

शशाङ्के सज्जपालाच्च तस्माच्च बहुसैनिकात् ।
सुज्जिरन्यानगणयन्नबुद्धाऽस्य च तद्रिपुः ॥२०७८॥

आस्कन्दभीत्या निर्गत्य हयारोहैः समं गृहात् ।
व्यूढानीको निरुद्धातो जजागाराऽथ सोऽध्वनि ॥२०७९॥

भूपतिप्रातिलोम्येन वर्तमानस्तदाऽभवत् ।
कोष्ठेश्वरोऽपि संनद्धः सुज्जिना बद्धसौहृदः ॥२०८०॥

स्थितमप्रातिलोम्येन सोऽवधीन्मतुजेश्वरम् ।
इति द्वेष्योऽपि नितरां द्वेष्यतां नृपतेरगात् ॥२०८१॥

तथास्थितं निशीथिन्यामाचख्युस्तस्य विद्विषः ।
दुधुक्षाहेतुतां राज्ञः स्वगुप्त्यै तेन या कृता ॥२०८२॥

अतथ्यं तथ्यवद् वस्तु तथ्यं वाऽतथ्यवन्नृपः ।
यः पश्येन्मूढवत्सोऽर्थैस्त्यक्तोऽनर्थैः कदर्थ्यते ॥२०८३॥

2079. c) C S′ निरुद्धाश्वो (for निरुद्धातो).
2080. a) C S′ भूपतिः (for भूपति°).
2082. a) All Mss. read तथा स्थिते (for तथास्थितं suggested with St. Tr.). —b) SA J_3 °चाख्यु° (for °चख्यु°). —c) C S′ राज्ञा (for राज्ञः).
2083. a) C S′ P_1 अतथ्ये (for अतथ्यं).

रत्नज्योतिर्हुतवहधिया त्यज्यते दृष्टिपातः
श्यावाक्षाणामितरविषयः स्वस्य संभाव्यते च ।
वस्त्वेकैकं यदिह न मृषा तन्मृषा यन्मृषा तत्
तथ्येनेत्थं किमिव न जनैर्दृश्यते तत्त्वशून्यैः ॥२०८४॥

राजाऽथ तद्वधादन्यदजानन् दौस्थ्यभेषजम् ।
न्ययुङ्क्त तस्य तीक्ष्णत्वे सञ्जपालं महौजसः ॥२०८५॥

स कापुरुषवद्धीरः प्रहर्तुं छद्मनाऽक्षमः ।
काङ्क्षन्नाक्षिप्य तं हन्तुं तत्र तत्रैक्षत क्षणम् ॥२०८६॥

मायाप्रयोगानन्योन्यमुद्दिश्य स्पृशतोर्द्वयोः ।
क्षणे क्षणेऽभजद् राष्ट्रं त्रासोल्लासविलोलताम् ॥२०८७॥

प्रत्याशङ्क्योदयं रात्रौ सुज्जौ जाग्रति पूर्ववत् ।
अव्यग्रयक्षामिकग्रामं राजधामाऽप्यजायत ॥२०८८॥

राष्ट्रान्निर्वासने रिल्हणस्य सुज्जेरभीप्सिते ।
पार्थिवोऽप्यनुमन्ताऽभूदनीशः प्रत्यवस्थितौ ॥२०८९॥

स निर्यियासुरामन्त्र्य तत्खेदात् क्षुभिताः प्रजाः ।
संदर्श्य द्वारपतिना राज्ञो युक्त्या समर्थितः ॥२०९०॥

संमन्त्र्य नृपतिं मैत्रीप्रार्थिना सुज्जिना समम् ।
पीत्वा कोशं सञ्जपालः प्राप्तो रात्रौ व्यजिज्ञपत् ॥२०९१॥

प्रेरणादुल्हणादीनां स्वोत्सेकाच्चैष वर्तते ।
राजन् सुज्जेरभिप्रायः स्पर्धिनोऽन्यानिच्छतः ॥२०९२॥

2085. [a]) C S′ यत्प्रधनाद° (for °थ तद्वधाद°).
2090. [a]) SA P_2 निर्या° (for निर्यि°).
2092. [cd]) C S′ P_3 SA °प्रायस्पार्धि° (for °प्रायः स्पर्धि°).

निर्द्रोहस्योपकर्तुश्च मते स्याद्यदि मे नृपः ।
निर्वास्य रिल्हणं चित्ररथं बद्ध्वा महाधनम् ॥२०९३॥

लोहरारब्धिनिर्नष्टानश्वान् कोशं च भूपतेः ।
नयेयं संभृतो हन्यां दुर्वृत्तमपि कोष्ठकम् ॥२०९४॥

कार्योपरोधान्निर्बन्धः संबन्धेष्वेव नास्ति मे ।
दाक्षिण्यं स्वामिनः कृत्ये यस्य प्राणास्तृणोपमाः ॥२०९५॥

मय्येवं प्रतिराजादिनिर्जयस्वीकृतोद्यमे ।
युवा विश्रान्तचित्तोऽयं नृपश्रीभोगभाग् भवेत् ॥२०९६॥

साहायकाय द्वारेशमुल्हणं रिल्हणाश्रये ।
कार्यव्राते च मामीशमाकारयितुमिच्छति ॥२०९७॥

ब्रूते च मामुल्हणश्च त्वं चाऽहं चाऽविभेदिनः ।
मिलिता यत्र तत्राऽस्ति गण्यः को नु नृपास्पदे ॥२०९८॥

इहस्था नवदायादमेकमानीय कंचन ।
निदध्मोऽस्य पदे राज्ञो नाऽनुतिष्ठेदिदं यदि ॥२०९९॥

गुणान् प्रसरणत्रासाद् बन्धायेव गिरा सृजन् ।
द्विजांशुभङ्ग्या राजाऽथ विनिश्वस्याऽब्रवीद्वचः ॥२१००॥

यथाऽऽह स तथैवैतन्न द्रोहो नाऽसमर्थता ।
नौदासीन्यमथैतस्मिन् संभाव्यमभिमानिनि ॥२१०१॥

2093. b) C S′ $P_{1,3}$ सुते (for मते).

2096. a) All Mss. read मध्येथ; D suggests मय्येव; St. Tr. suggests मय्यथ (for मय्येवं suggested). —c) St युवावि° (for युवा वि°).

2098. a) C S′ D °मुल्हणं च (for °मुल्हणश्च).

2100. b) I_3 P_2 SA स्रजन् (for सृजन्).

2101. ab) C S′ P_{1-3} °तन्ना° (for °तन्न).

निष्प्रतिद्वन्द्वभावोऽस्य दुरुच्छेदो भवेदिति।
इयमप्यन्यतस्तावदस्त्वपायधियः कथा ॥२१०२॥

किं तु दूये यदाकोपप्राथम्यात् तथ्यतोऽपि वा।
निर्द्रोहस्य वधो ध्यातो योऽस्याऽसौ कार्य एव तत् ॥२१०३॥

अर्थोऽयमल्पसत्त्वानामग्रेऽस्माभिर्हि मन्त्रितः।
नूनं तेनोपलभ्येत तानावर्जयता धनैः ॥२१०४॥

पुण्यैरपरिहार्यैः स्वैर्जाड्यैर्वा मादृशाममी।
जानतामपि जायन्ते निर्गुणा भोगभागिनः ॥२१०५॥

बालिशान् गृह्णतां प्रायश्चित्तमेतन्महीभुजाम्।
तन्मौर्ख्यस्य फलं मूढैरेतैर्यदनुभूयते ॥२१०६॥

दुर्गमो भूमिभृन्मार्गो विटैर्हट्टवृषैरिव।
क्व स नीतिज्ञविज्ञेयः क्व च ते खलबुद्धयः ॥२१०७॥

तन्वाना व्रतवैमुख्यं रसनालौल्यशालिनः।
परपिण्डोपहर्तारः खलाः कौलेयका अपि ॥२१०८॥

इत्थं खलोपतापेन प्रयुक्तं तद्भयात् पुनः।
असंहार्यं कुकर्मेदं पश्चात्तापाय नो भवेत् ॥२१०९॥

इत्युदीर्य नृपः सुज्जेः सज्जो व्यापादसिद्धये।
तमजागरयच्छश्वज्जागरं चाऽग्रहीत् स्वयम् ॥२११०॥

विभ्रन्मन्त्रस्रुतेः शङ्कां जिघांसुः सुज्जिरित्यपि।
तथ्यं भृत्यवचो जानंस्तस्थौ दौस्स्थ्येन पार्थिवः ॥२१११॥

2103. a) D P_{1-3} I_3 C S′ SA य आकोप°; SG *Sec. Manu* यतः कोप° (for यदाकोप° suggested with St).
2106. a) P_{1-3} SA I_3 वालि° (for बालि°).
2107. cd) St D P_{1-3} I_3 om. with a *lacuna*.
2110. c) St D $P_{1,3}$ I_3 C S′ °जागारय° (for °जागरय° found in P_2).

गत्वा स्वयं गृहान् यौनसम्बन्धं कुरुतं युवाम् ।
इत्युक्त्वा रिल्हणेनाऽथ स सुज्जिं समयोजयत् ॥२११२॥

विश्वास्याऽपि तथा हन्तुं तं प्रसङ्गमनाप्नुवन् ।
उद्ताम्यद् दिवारात्रं तल्पोपर्यवशं लुठन् ॥२११३॥

सज्ञपाले गृहाद् बन्धुनाशदुःखिन्यनागते ।
आशङ्क्य साहसासिद्धिमधिकं पर्यतप्यत ॥२११४॥

निपत्य वीरशयने सुस्सलक्ष्मापसत्क्रियाम् ।
भ्रातरो यस्य कल्याणराजाद्या व्यस्मरन् युधि ॥२११५॥

सेनानीः कुलराजः स ख्यातो व्यायामविद्यया ।
प्राणैरानृण्यमिच्छंस्तमपृच्छच्छोककारणम् ॥२११६॥

स संस्थापयितुं हन्तुं वाऽप्यशक्यं न्यवेदयत् ।
तस्याऽप्रतिसमाधेयं कम्पनाधीश्वराद् भयम् ॥२११७॥

कियदेतन्निजप्राणमात्रलभ्यं महीभुजम् ।
इत्याभाष्य स जग्राह साहसाध्यवसायताम् ॥२११८॥

दिनद्वयमनायातो गृहेभ्यः कम्पनापतिः ।
न प्रातिभाव्यमभजत् तस्य मृत्योः श्रियोऽथवा ॥२११९॥

विस्रम्भभृत्यः शृङ्गारनामा चाऽप्यब्रवीत् प्रभोः ।
तं दृष्टवांस्तृतीयेऽह्नि शयनेऽवगणं स्थितम् ॥२१२०॥

शोभोपयोगिनो भर्तुर्नित्यं सततसेवकाः ।
कर्तुं साहससाचिव्यं विदूरेण तु पार्यते ॥२१२१॥

2112. [b]) All Mss. read कुरुतां (for कुरुतं suggested with St).
2116. [a]) P_3 °राजारक: (for °राजः सः). After this *v.* युग्मम्.
2118. [b]) All Mss. read °भुजाम् (for भुजम् suggested with St. Tr.).
2121. [a]) C S′ शोभेऽपि (for शोभोप°). —[b]) C S′ °वक: (for °वकाः). —[d]) C S′ विदा तेन न (for विदूरेण तु).

करे पिनाको मकराङ्कशत्रोः
शोभाविशेषाय सदानुषक्तः।
पुराऽऽहवे कार्मुककर्म तस्य
तत्कालमाप्तेन तु मन्दरेण ॥२१२२॥

ताम्बूलहारकव्याजात् ततो राजा व्यसर्जयत्।
कुलराजं तमव्याजधैर्यासंलक्ष्यविक्रियम् ॥२१२३॥

ध्रुवं मृत्युः पुनर्नाहमागन्ता तत्ततोऽस्य कः।
आनेतेति स निन्ये न ताम्बूलं स्वर्णभाजने ॥२१२४॥

व्यसनप्रशमं राज्ञः स्वदेहत्यागतोऽनुगाः।
एवं कर्तुं यतन्तेऽन्ये निर्व्यूढौ स्खलिताः पुनः ॥२१२५॥

सगणोऽवगणो वाऽस्तु निहतो नियतं मया।
जागर्त्वतः परं देव इत्युदीर्य विनिर्ययौ ॥२१२६॥

गतस्य साहसासिद्धौ शक्यं शङ्क्यं पलायनम्।
इति चिन्तयतस्तस्य मन आसीद् विश्रृङ्खलम् ॥२१२७॥

व्रजन् स्वामिहितं कर्तुं पुरः पश्चान्निनाय सः।
शस्त्रिणौ द्वौ मिषाच्छस्त्र्यौ बन्धस्थानेऽपरामृशन् ॥२१२८॥

2124. c) D I_3 SA P_2 आरेभेति; P_1 अभेरेति; P_3 आरभैति; St C S′ आरब्धेति (for आनेतेति suggested).

2125. b) C S′ $P_{1,2}$ I_3 SA °तोन्वगाः (for °तोऽनुगाः).

2126. c) D जानात्वतः (for जागर्त्वतः).

2127. cd) D St P_{1-3} I_3 om. with a *lacuna*.

2128. a) All Mss. read कृत्वा (for कर्तुं suggested). —b) All Mss. read पुनः (for पुरः suggested with St. Tr.). —d) All Mss. read °स्थाने परा° (for °स्थानेऽपरा° suggested). All Mss. read °मृष° (for °मृश° suggested with St).

स्वयं गृहीत्वा ताम्बूलं राज्ञा प्रहित इत्यथ ।
द्वास्स्थेनाऽऽवेदितः सुज्जेः पार्श्वं रुद्धानुगोऽविशत् ॥२१२९॥

ददर्शोच्चावचैस्तं च मितैः परिजनैर्युतम् ।
यूथनाथमिवाऽत्यल्पैर्द्विपैररहितान्तिकम् ॥२१३०॥

गृहीतवन्दितस्वामिताम्बूलः सस्मितं स तम् ।
पृष्ट्वा कृत्यादि नृपतेः सत्कृत्य व्यसृजत् क्षणात् ॥२१३१॥

जनप्रवेशाशङ्की स त्वरमाणस्तमब्रवीत् ।
कृतागाः कोऽपि कैवर्तशस्त्रभृन्मत्समाश्रितः ॥२१३२॥

तस्याऽऽक्षेपपरान् भृत्यान् स्वान्निवार्याऽधुना तव ।
संमान्या वयमित्यग्रेऽलक्षयन् प्रकृतिक्षणम् ॥२१३३॥

सोत्सेकामिव तां वाचं स दर्पादवधीरयन् ।
तस्य रूक्षाक्षरं नाऽहं कुर्यामित्यब्रवीद् वचः ॥२१३४॥

स रोषादिव निर्गच्छन्मान्योऽसाविति वादिभिः ।
तं सान्त्वयित्वा तद्भृत्यै रुद्ध्वा व्यावर्तितः पुनः ॥२१३५॥

तेनाऽवादि ततः कर्तुं विज्ञप्तिं वस्तुनोऽमुतः ।
सज्जयोरादिश द्वारप्रवेशं भृत्ययोर्मम ॥२१३६॥

अवशेनेव तेनाऽथ वीक्ष्य तौ संप्रवेशितौ ।
सहायलाभाद् दुध्रुक्षुः प्रजिहीर्षुरवर्तत ॥२१३७॥

2129. c) C S′ SA द्वास्थे° (for द्वास्स्थे°). C S′ $P_{1,2}$ I_3 °वेशितः (for °वेदितः).
2131. c) All Mss. read दृष्ट्वा (for पृष्ट्वा suggested with D St).
2132. c) C S′ °वर्त्तः (for °वर्त°).
2136. b) P_{1-3} I_3 °नासुतः; P_2 °नोमतः (for °नोऽमुतः). —c) $P_{2,3}$ I_3 सज्जये° [sic] (for सज्जयो°). C °दिशद् (for °दिश).

यातोऽद्य कुर्यां प्रातर्वो विधेयमिति तान् वदन् ।
दत्तपृष्ठो निदिद्रासुस्तल्पे सुज्जिर्जहौ वपुः ॥२१३८॥

गत्वाऽथ किंचिद् व्यावृत्तो निष्कृष्टक्षुरिको जवात् ।
प्राहरत् कुलराजोऽस्य वामे पार्श्वे कृतत्वरः ॥२१३९॥

तस्य धिक्कुर्वतो द्रोहमधावत् क्षुरिकां प्रति ।
यावत्पाणिः प्रहरणं तावत्सर्वेऽपि ते व्यधुः ॥२१४०॥

विमर्शः पश्यतां यावदाशङ्क्ये तत्र नोद्ययौ ।
स तावदेव सुचिरापेतश्वास इवाऽभवत् ॥२१४१॥

भयत्यक्ताभिमानेषु विद्रुतेष्वनुजीविषु ।
चकर्ष शस्त्रं तत्रैकः पिञ्चदेवः परं तदा ॥२१४२॥

प्रहरंस्तैस्त्रिभिस्तुल्यप्रतिप्रहृतिभिः क्षतः ।
भ्राम्यन् स्नुतासृक्तस्मात् स मण्डपान्निरवास्यत ॥२१४३॥

स्थितान् दत्तार्गले धाम्नि रुद्धद्वारतमोरयः ।
जिघांसवः सुज्जिभृत्यास्ततस्तान् पर्यवारयन् ॥२१४४॥

तमोरौ प्रतिकुर्वाणा भज्यमानेऽरिभिर्व्यधुः ।
ते द्वारे तूलशय्यां तां प्रोत्सार्य शवमुद्धृतम् ॥२१४५॥

2138. c) D विशिश्वसु°; C S′ विनिद्रासु°; $P_{1,2}$ विशिश्रमु°; P_3 विशश्राम (for निदिद्रासु°).

2139. c) P_1 I_3 SA कुजरा° (for कुलरा°).

2141. a) D C S′ P_{1-3} I_3 SA विमर्षः (for विमर्शः). —b) C S′ °शङ्के (for °शङ्क्ये).

2142. d) D P_1 P_3 पञ्चदेवः (for पिञ्चदेवः).

2145. a) All Mss. read तमोरिप्रति° (for तमोरौ प्रति° suggested).

खड्गेषुशूलपरशुक्षुरिकाश्माभिवर्षिणः ।
तान् समभ्रमयन् मार्गैरनेकैस्ते विविक्षवः ॥२१४६॥

नैराश्यहेतोर्विंशतां तेषां संकटवर्त्तिभिः ।
पृष्ठाच्छित्वा शिरः सुज्जेरङ्गनेऽक्षिप्यताऽथ तैः ॥२१४७॥

अस्रनिस्सरणाभीक्ष्णशुक्लेक्षणपुटश्रुति ।
उत्तरौष्ठकचच्छन्नसन्नघ्राणपुटद्वयम् ॥२१४८॥

अक्ष्णोर्बम्भ्रम्यमाणस्य लोकस्य प्रतिबिम्बकैः ।
संभाव्यमानसंस्पन्दस्तोकप्रव्यक्ततारकम् ॥२१४९॥

स्थपुटस्याक्रमच्छेदाद् गलमांसस्य संधिषु ।
हरिद्रार्द्रैरिवाऽश्यानमेदोग्रन्थिभिरुल्बणम् ॥२१५०॥

धूलिध्वस्तकचश्मश्रु तदेतदिति निश्चयम् ।
परं भालतलस्थेन ददत् कुङ्कुमबिन्दुना ॥२१५१॥

तद्वीक्ष्य तिर्यक्पतनव्यक्तसंध्यन्तरद्विजम् ।
उच्चलत्तुमुलाक्रन्दा भृत्याः क्वाऽपि विदुद्रुवुः ॥२१५२॥

तीक्ष्णान् प्रयुज्य क्ष्मापस्तु तिष्ठन् व्याकुलधीस्तदा ।
बहिर्वीक्ष्य जनक्षोभं साहसं निश्चिकाय तम् ॥२१५३॥

सुज्जौ हते क्षते वाऽपि कार्यमेतदिति द्रुतम् ।
संनह्य सैन्यस्याऽऽदिक्षत् स तन्मन्दिरवेष्टनम् ॥२१५४॥

2146. c) D C S′ $P_{1,2}$ I_3 SA तान्स सम्भ्रम° (for तान्समभ्रम°).
2148. a) C S′ अश्रु°; P_2 I_3 अस्र° (for अस्र°).
2152. After this *v.* कुलकम्.
2154. b) C S′ $P_{1,2}$ श्रुतं (for द्रुतं).

मिथ्यैव सुज्जिर्निस्तीर्ण इति श्रुतवता जनात् ।
स्वयमग्राहि भूपेन ततः समरसंभ्रमः ॥२१५५॥

निस्संशयं हतं ज्ञात्वा सुज्जिं राजोपजीविनः ।
तत्र स्थितं शिवरथं सर्वद्वेष्यमबन्धयन् ॥२१५६॥

हिल्लात्मजन्मनः सुज्जिभ्रातृस्यालस्य कौशलम् ।
कलशस्याऽद्य निर्वर्ण्य वाणीयं पुण्यभागिनी ॥२१५७॥

आक्षिप्यमाणैर्भिक्षवाद्यैरन्ते वीरोचितं कृतम् ।
तेन त्वसंशयस्थेन सदाचारान्न विच्युतम् ॥२१५८॥

राजौकस्यैव तां वार्तां श्रुत्वा स ह्यपलायितः ।
हतस्य स्वामिनोऽभ्यर्णं जिहासुर्जीवितं ययौ ॥२१५९॥

द्वारं पदप्रहृतिभिर्भञ्जन्तं राजसैनिकाः ।
अपसार्य कथंचित् तं तीक्ष्णाः कृच्छ्रादरक्षिषुः ॥२१६०॥

प्रविष्टेऽस्मिन्ननिर्व्यूढपीडिते मण्डपान्तरम् ।
लब्धप्राणा नृपाभ्यर्णं कुलराजादयो ययुः ॥२१६१॥

हठप्रविष्टो हतवान् स तत्रैकं महाभटम् ।
शरैरेव हतो दूरात् कथंचित् परिपन्थिभिः ॥२१६२॥

आयातं क्षुभिते देशे सज्जपालं महीपतिः ।
रिल्हणं चोल्हणं हन्तुं प्राहिणोद् विहितत्वरः ॥२१६३॥

यातो मार्गात् पलाय्याऽयं परिशङ्क्येति रिल्हणः ।
क्षिप्तिकातटपर्यन्तमटित्वा यावदाययौ ॥२१६४॥

2157. c) D P_{1-3} कलहस्या°; SA कल···स्या° (for कलशस्या°).

2159. a) St C S′ $P_{2,3}$ °कस्येव (for °कस्यैव).

पूर्वायातः सज्जपालो गृहद्वाराद् विनिर्यतः ।
उल्हणस्य पथो रुन्धन् सुबहून् प्रहरन् रणे ॥२१६५॥

तावदेकस्य खड्गेन निकृत्ते दोष्णि दक्षिणे ।
त्वङ्मात्रशेषे च्छिन्नास्थिस्नायुग्रन्थिरजायत ॥२१६६॥

अगण्यप्रायतां प्राप्ते वंशे यत्कौशलादसौ ।
दिगन्तरेषु स्वस्मिंश्च देशे प्राप प्रथां पुनः ॥२१६७॥

फलकाले समासन्ने शौर्यप्रतिभुवाऽभजत् ।
स तेन दोष्णा वैकल्यं धिगिच्छां विधुरां विधेः ॥२१६८॥

स प्राग्वदुदयावाप्तौ भवेदविकलो यदि ।
फलेन तस्य जानीयादिच्छां लोकोऽयमद्भुताम् ॥२१६९॥

पीतामृतस्य क्षतविग्रहत्वं
न प्राभविष्यद् यदि नाम राहोः ।
अज्ञास्यदिच्छां तदमुष्य लोकः
सामर्थ्यभाजः सुचिरप्ररूढाम् ॥२१७०॥

दृष्टः शीलाभिधो वृद्धः पितृव्यः साहदेविना ।
सस्पृहं निहतः संख्ये साधुर्जातव्रणार्तिना ॥२१७१॥

तस्यार्त्या विशतो वेश्म जज्जलाख्योऽग्रगो हतः ।
मान्योऽनुगो भटौ द्वौ च यामिकश्च जनंगमः ॥२१७२॥

2166. ab) P_1 om. After this *v.* तिलकम् .

2171. cd) SA $P_{1,2}$ I_3 ···साधुजात°; St साधु···जात°; C S′ साधु सम्यग्जात° (for संख्ये साधुर्जात° found in P_3 D).

बालं तनयमालोक्य निषण्णस्याऽङ्कनस्थितेः ।
तस्याऽनिर्गच्छतो गेहे रिल्हणोऽग्निमदापयत् ॥२१७३॥

आनीयमानो धूमान्धो बद्ध्वा मुख्यैः स सैनिकैः ।
गृहद्वारे हतः कैश्चित् प्राकृतैर्व्रणविक्लवः ॥२१७४॥

तस्य प्रधानप्रकृतिक्षयहेतोर्महीपतिः ।
मुण्डमप्यवलोक्याऽऽसीदशान्तक्रोधविक्रियः ॥२१७५॥

व्यापाद्यमानाः साकोपं भूपतिप्रेरितैर्भटैः ।
उच्चावचाः सुज्जिभृत्याः कृत्यं सत्त्वोचितं व्यधुः ॥२१७६॥

अनुजो लक्ष्मकः सुज्जेर्बद्ध्वा नीतः स विक्रियाम् ।
नृपं वीक्ष्याऽदयैः कैश्चिद् राजधान्यङ्गने हतः ॥२१७७॥

भ्राता पितृव्यजस्तस्य सङ्कटाख्यो नृपाङ्गने ।
अटन्नट इव प्राणानौचित्येनाऽमुचत् कृती ॥२१७८॥

प्रविष्टः शरणं बाणवंश्यैः पापैः प्रमापितः ।
उन्मत्तो मुम्मुनिस्तस्य भ्राता कैश्चित् स्वमन्दिरे ॥२१७९॥

सुज्जिस्यालस्तु शृङ्गारवृत्त्या भङ्गुरया हतः ।
महाकुलीनो विचरन्नौचित्येन च चित्रियः ॥२१८०॥

सङ्गिकाख्यः प्रतीहारो व्रणितः शनकैर्हतः ।
अन्येऽपि संश्रिताः सुज्जेस्तत्र तत्र प्रमिम्यिरे ॥२१८१॥

जात्यवाजिजवप्राप्तप्राणाः कोष्ठेश्वरान्तिकम् ।
आसाद्य वीरपालाद्या द्वित्रा मृत्युभयं जहुः ॥२१८२॥

2178. c) D C S′ P_{1-3} खुटन्न° (for अटन्न°).

2182. a) C S′ $P_{2,3}$ जात्या (for जात्य°). —b) P_1 om. कोष्ठेश्वरान्तिकम्.

पूर्वायातः सज्जपालो गृहद्वाराद् विनिर्यतः ।
उल्हणस्य पथो रुन्धन् सुबहून् प्रहरन् रणे ॥२१६५॥

तावदेकस्य खड्गेन निकृत्ते दोष्णि दक्षिणे ।
त्वङ्मात्रशेषे च्छिन्नास्थिस्नायुग्रन्थिरजायत ॥२१६६॥

अगण्यप्रायतां प्राप्ते वंशे यत्कौशलादसौ ।
दिगन्तरेषु स्वस्मिंश्च देशे प्राप प्रथां पुनः ॥२१६७॥

फलकाले समासन्ने शौर्यप्रतिभुवाऽभजत् ।
स तेन दोष्णा वैकल्यं धिगिच्छां विधुरां विधेः ॥२१६८॥

स प्राग्वदुदयावाप्तौ भवेदविकलो यदि ।
फलेन तस्य जानीयादिच्छां लोकोऽयमद्भुताम् ॥२१६९॥

पीतामृतस्य क्षतविग्रहत्वं
न प्राभविष्यद् यदि नाम राहोः ।
अज्ञास्यदिच्छां तदमुष्य लोकः
सामर्थ्यभाजः सुचिरप्ररूढाम् ॥२१७०॥

दृष्टः शीलाभिधो वृद्धः पितृव्यः साहदेविना ।
सस्पृहं निहतः संख्ये साधुर्जातव्रणार्तिना ॥२१७१॥

तस्यार्त्या विशतो वेश्म जज्जलाख्योऽग्रगो हतः ।
मान्योऽनुगो भटौ द्वौ च यामिकश्च जनंगमः ॥२१७२॥

2166. ab) P₁ om. After this *v.* तिलकम्.

2171. cd) SA $P_{1,2}$ I_3 ···साधुजात°; St साधु···जात°; C S′ साधु सम्यग्जात° (for संख्ये साधुर्जात° found in P_3 D).

बालं तनयमालोक्य निषण्णस्याऽङ्गनस्थितेः ।
तस्याऽनिर्गच्छतो गेहे रिल्हणोऽग्निमदापयत् ॥२१७३॥

आनीयमानो धूमान्धो बद्ध्वा मुख्यैः स सैनिकैः ।
गृहद्वारे हतः कैश्चित् प्राकृतैर्व्रणविक्लवः ॥२१७४॥

तस्य प्रधानप्रकृतिक्षयहेतोर्महीपतिः ।
मुण्डमप्यवलोक्याऽऽसीदशान्तक्रोधविक्रियः ॥२१७५॥

व्यापाद्यमानाः साकोपं भूपतिप्रेरितैर्भटैः ।
उच्चावचाः सुज्जिभृत्याः कृत्यं सत्त्वोचितं व्यधुः ॥२१७६॥

अनुजो लक्ष्मकः सुज्जेर्बद्ध्वा नीतः स विक्रियाम् ।
नृपं वीक्ष्याऽदयैः कैश्चिद् राजधान्यङ्गने हतः ॥२१७७॥

भ्राता पितृव्यजस्तस्य सङ्कटाख्यो नृपाङ्गने ।
अटन्नट इव प्राणानौचित्येनाऽमुचत् कृती ॥२१७८॥

प्रविष्टः शरणं बाणवंश्यैः पापैः प्रमापितः ।
उन्मत्तो मुम्मुनिस्तस्य भ्राता कैश्चित् स्वमन्दिरे ॥२१७९॥

सुज्जिस्यालस्तु शृङ्गारवृत्त्या भङ्गुरया हतः ।
महाकुलीनो विचरन्नौचित्येन च चित्रियः ॥२१८०॥

सङ्गिकाख्यः प्रतीहारो व्रणितः शनकैर्हतः ।
अन्येऽपि संश्रिताः सुज्जेस्तत्र तत्र प्रमिम्यिरे ॥२१८१॥

जात्यवाजिजवप्राप्तप्राणाः कोष्ठेश्वरान्तिकम् ।
आसाद्य वीरपालाद्या द्वित्रा मृत्युभयं जहुः ॥२१८२॥

2178. c) D C S′ P_{1-3} खुटन्न° (for अटन्न°).

2182. a) C S′ $P_{2,3}$ जात्या (for जात्य°). —b) P_1 om. कोष्ठेश्वरान्तिकम्.

व्रजञ्शरदियो दुष्टोत्थानरुद्धतुरंगमः ।
प्रपेदे सङ्कटभ्राता बन्धनं सुभटामठे ॥२१८३॥

सूनुश्च सज्जलः सुज्जेः श्वेतिकश्चाऽग्रजात्मजः ।
उल्हणस्य तनूजश्च कारागारं प्रपेदिरे ॥२१८४॥

इत्थं राजन्यमात्ये च प्राप्ते पिशुनवश्यताम् ।
नवमेऽब्दे शुचेः शुक्लपञ्चम्यां विप्लवोऽभवत् ॥२१८५॥

कार्ये काऽप्यविपर्यस्तसत्त्वं संस्मृत्य मन्त्रिणम् ।
तमद्याऽपि नृपस्तादृग्भृत्योपेतोऽनुतप्यते ॥२१८६॥

वेतालोत्थापनाच्छ्वभ्रलङ्घनाद् विषचर्वणात् ।
व्यालाश्लेषाच्च विषमं सत्यं राजोपसेवनम् ॥२१८७॥

अनात्मायत्तनिस्तीर्णगुणानां चक्रवर्तिनाम् ।
शकटानामिवाऽग्रस्थो विश्वस्तः को न भज्यते ॥२१८८॥

अयुक्तं नृपतिः सुज्जिवधं मेने प्रजाः पुनः ।
युक्तं ज्ञात्वा तमुद्रिक्तशक्तितां विविदुः प्रभोः ॥२१८९॥

भेजे राजा सज्जपालं कम्पनाधिपतिं कृतम् ।
कुलराजे च नगराधीकारित्वं समार्पयत् ॥२१९०॥

त्यक्त्वा मल्लार्जुनं धन्योदयौ नगरमागतौ ।
प्राग्वत्पुनर्जजृम्भाते प्रियौ विश्वंभराभुजः ॥२१९१॥

2183. a) D C S′ P_{1-3} I_3 °ञ्शरदि यो (for °ञ्शरदियो).

2185. a) P_2 SA °मान्ये (for °मात्ये).

2186. a) All Mss. read कापि विप° (for काऽप्यविप° suggested with D).

2189. d) D (before suggestion) C S′ P_{1-3} SA I_3 प्रजा: (for प्रभोः found in SG *sec. manu*).

2190. b) All Mss. read ददत् (for कृतम् suggested). —d) P_{1-3} I_3 SA समर्पयत् (for समार्पयत्).

2191 . a) C S′ P_{1-3} I_3 SA मल्लार्जुनो (for मल्लार्जुनं).

इतराश्रयविच्छेदाद् वीतपारिप्लवस्थितिः ।
श्रीः सर्वाकारमकरोत् स्थिरं चित्ररथे पदम् ॥२१९२॥

अद्भुतैश्वर्यधुर्योऽपि राष्ट्रं दण्डेन पीडयन् ।
शमं नेतुमशक्तोऽभूत् स भूपस्याऽप्यनङ्कुशः ॥२१९३॥

गन्धर्वानाभिधे ग्रामे टिक्कं हत्वा व्यसर्जयत् ।
पारेविशोकं कोट्टेशस्तच्छिरः पार्थिवान्तिकम् ॥२१९४॥

निसर्गद्वेषिणा प्राप्तप्रतापे नितरां नृपे ।
तदानीं तप्यमानेन दूतेनाऽऽप्यायितोऽसकृत् ॥२१९५॥

कोष्ठेश्वरेण रभसादल्पैः परिजनैर्युतः ।
निशि लौठनदेवः स हाठिग्रामं ततोऽविशत् ॥२१९६॥

महाकथितकन्थोऽन्यैः संरुध्ये राज्ञि सर्वतः ।
बद्धसंधिर्लवन्यस्तं विससर्ज यथागतम् ॥२१९७॥

उच्चलादिवदादातुं राज्यं स रभसं भजन् ।
निर्व्यूढिशून्यदार्ढ्योऽगान्मूढो लोकस्य हास्यताम् ॥२१९८॥

तीक्ष्णप्रयुक्तिभिः सैन्यभेदैरन्यैश्च कोष्ठकम् ।
उपायैर्नृपतिस्तैस्तैस्ततो हन्तुं व्यचिन्तयत् ॥२१९९॥

प्रतिद्वन्द्वीव तीक्ष्णानां पाटिताक्षः क्षमाभुजम् ।
न संप्रासादयत् क्रुद्धः प्रतियोद्धुं त्वचिन्तयत् ॥२२००॥

2192. a) All Mss. read °विच्छेदा (for °विच्छेदात् suggested with D).

2193. c) All Mss. read °मशक्यो° (for °मशक्तो° suggested).

2194. c) C S′ P_{1-3} I_3 पारं वि° (for पारेवि°).

2200. b) All Mss. read °भुजाम् (for °भुजम् suggested with St). —c) D (before suggestion) S′ P_{1-3} I_3 SA संप्रसादयत्; C संप्रसादयन् (for संप्रासादयत् suggested with St D).

व्रजञ्शरदियो दुष्टोत्थानरुद्धतुरंगमः ।
प्रपेदे सङ्कटभ्राता बन्धनं सुभटामठे ॥२१८३॥

सूनुश्च सज्जलः सुज्जेः श्वेतिकश्चाऽग्रजात्मजः ।
उल्हणस्य तनूजश्च कारागारं प्रपेदिरे ॥२१८४॥

इत्थं राजन्यमात्ये च प्राप्ते पिशुनवश्यताम् ।
नवमेऽब्दे शुचेः शुक्लपञ्चम्यां विप्लवोऽभवत् ॥२१८५॥

कार्ये काऽप्यविपर्यस्तसत्त्वं संस्मृत्य मन्त्रिणम् ।
तमद्याऽपि नृपस्तादृग्भृत्योपेतोऽनुतप्यते ॥२१८६॥

वेतालोत्थापनाच्छ्वभ्रलङ्घनाद् विषचर्वणात् ।
व्यालाश्लेषाच्च विषमं सत्यं राजोपसेवनम् ॥२१८७॥

अनात्मायत्तनिस्तीर्णगुणानां चक्रवर्तिनाम् ।
शकटानामिवाऽग्रस्थो विश्वस्तः को न भज्यते ॥२१८८॥

अयुक्तं नृपतिः सुज्जिवधं मेने प्रजाः पुनः ।
युक्तं ज्ञात्वा तमुद्रिक्तशक्तितां विविदुः प्रभोः ॥२१८९॥

भेजे राजा सज्जपालं कम्पनाधिपतिं कृतम् ।
कुलराजे च नगराधीकारित्वं समार्पयत् ॥२१९०॥

त्यक्त्वा मल्लार्जुनं धन्योदयौ नगरमागतौ ।
प्राग्वत्पुनर्जजृम्भाते प्रियौ विश्वंभराभुजः ॥२१९१॥

2183. a) D C S′ P_{1-3} I_3 °ञ्शरदि यो (for °ञ्शरदियो).

2185. a) P_2 SA °मान्ये (for °मात्ये).

2186. a) All Mss. read कापि विप° (for काऽप्यविप° suggested with D).

2189. d) D (before suggestion) C S′ P_{1-3} SA I_3 प्रजाः (for प्रभोः found in SG *sec. manu*).

2190. b) All Mss. read ददत् (for कृतम् suggested). —d) P_{1-3} I_3 SA समर्पयत् (for समार्पयत्).

2191 . a) C S′ P_{1-3} I_3 SA मल्लार्जुनो (for मल्लार्जुनं).

इतराश्रयविच्छेदाद् वीतपारिप्लवस्थितिः ।
श्रीः सर्वाकारमकरोत् स्थिरं चित्ररथे पदम् ॥२१९२॥

अद्‌भुतैश्वर्यधुर्योऽपि राष्ट्रं दण्डेन पीडयन् ।
शमं नेतुमशक्तोऽभूत् स भूपस्याऽप्यनङ्कुशः ॥२१९३॥

गन्धर्वानाभिधे ग्रामे टिक्कं हत्वा व्यसर्जयत् ।
पारेविशोकं कोट्टेशस्तच्छिरः पार्थिवान्तिकम् ॥२१९४॥

निसर्गद्वेषिणा प्राप्तप्रतापे नितरां नृपे ।
तदानीं तप्यमानेन दूतेनाऽऽप्यायितोऽसकृत् ॥२१९५॥

कोष्ठेश्वरेण रभसादल्पैः परिजनैर्युतः ।
निशि लौठनदेवः स हाठिग्रामं ततोऽविशत् ॥२१९६॥

महाकथितकन्थोऽन्यैः संरब्धे राज्ञि सर्वतः ।
बद्धसंधिर्लवन्यस्तं विससर्ज यथागतम् ॥२१९७॥

उच्चलादिवदादातुं राज्यं स रभसं भजन् ।
निर्व्यूढिशून्यदार्ढ्योऽगान्मूढो लोकस्य हास्यताम् ॥२१९८॥

तीक्ष्णप्रयुक्तिभिः सैन्यभेदैरन्यैश्च कोष्ठकम् ।
उपायैर्नृपतिस्तैस्तैस्ततो हन्तुं व्यचिन्तयत् ॥२१९९॥

प्रतिद्वन्द्वीव तीक्ष्णानां पाटिताक्षः क्षमाभुजम् ।
न संप्रासादयत् क्रुद्धः प्रतियोद्धुं त्वचिन्तयत् ॥२२००॥

2192. a) All Mss. read °विच्छेदा (for °विच्छेदात् suggested with D).

2193. c) All Mss. read °मशक्यो° (for °मशक्तो° suggested).

2194. c) C S′ P_{1-3} I_3 पारं वि° (for पारेवि°).

2200. b) All Mss. read °भुजाम् (for °भुजम् suggested with St). —c) D (before suggestion) S′ P_{1-3} I_3 SA संप्रसादयत्; C संप्रसादयन् (for संप्रासादयत् suggested with St D).

स्वैः स्वैः प्रदेशैरादिश्य प्रवेष्टुं पृतनापतीन् ।
स्वयमुच्चावचैः सैन्यैरवचस्कन्द तं पुनः ॥२२०१॥

स भूपं रभसाऽऽयातं ज्ञात्वाऽल्पपृतनं बली ।
प्राप्तश्छलयितुं तस्थौ प्रतापैः परिहारितः ॥२२०२॥

लग्ने रणे चित्ररथः पृथुसैन्योऽपि दैवतः ।
तस्य सैन्यैकदेशेन निन्ये जयविपर्ययम् ॥२२०३॥

भङ्गेनाऽमङ्गलोंकारकल्पेन किल तेन सः ।
ततः प्रभृत्यभूद् भ्रश्यदवष्टम्भो दिने दिने ॥२२०४॥

रिल्हणादीन् योधयित्वा व्यूढव्यस्ताखिलानुगः ।
लवन्यो न्यपतत् सायं कम्पनाधिपतेर्बले ॥२२०५॥

ऊनैः शतादपि भटैर्युतो विद्रुतसैनिकः ।
सेहे तत्सैन्यरोषं स गजक्षोभमिवाऽचलः ॥२२०६॥

किं वाच्यः स नरव्याघ्रः प्रवृद्धिं याति संगरे ।
निजवर्मतनुत्रादि यस्य मानि न वर्ष्मणि ॥२२०७॥

मन्दीकृतारिसंरम्भमवष्टम्भेन तादृशा ।
तं त्रिल्लकादयः प्रापुर्लवन्याः सैन्यशालिनः ॥२२०८॥

तैः सजातीयदाक्षिण्यात् तटस्थैरपि संकटे ।
तस्येषदुपयोगोऽभूत् स्ववीर्यापास्तविद्विषः ॥२२०९॥

2204. a) P_{1-3} I_3 SA D भङ्गनामङ्गलों°; C S′ अङ्गनामङ्गलौं°; D suggests भङ्गनां मङ्गलों° (for भङ्गेनाऽमङ्गलों°).

2205. d) All Mss. read °र्बली (for °र्बले suggested with St).

2206. c) D (before suggestion) C S′ P_{1-3} I_3 SA सह (for सेहे suggested with D St).

2207. d) St.Tr. D P_3 माति (for मानि).

काले संनहनं रात्रिजागरः सामतो बलैः ।
समये ग्रहणत्यागतत्तद्युक्तिविकल्पनम् ॥२२१०॥

लब्धभूम्यपरित्यागो जिगीषोरीदृशैर्गुणैः ।
चलेयुररयोऽप्यस्य का वैर्याक्रमणे स्तुतिः ॥२२११॥

अविश्वसन् भिन्नभृत्यस्तादृक्संरम्भपीडितः ।
पलायनोन्मुखः शैलात् कोष्ठकोऽथ व्यगाहत ॥२२१२॥

मार्गेष्वकालप्रालेयपातरुद्धेषु वाजिनाम् ।
गन्तुं तस्योद्यमं जघ्नुः पृष्ठलग्ना विरोधिनः ॥२२१३॥

अवमानोपतप्तोऽथ परिमेयपरिच्छदः ।
स ययौ जाह्नवीं स्नातुं राज्ञा राष्ट्रादपाकृतः ॥२२१४॥

सोमपालोऽथ भूपालनाम्ना पुत्रेण खेदितः ।
दीर्घद्वैराज्यदुःखार्तः शरणं नृपतिं ययौ ॥२२१५॥

पुत्रौ दत्तवतो नीवीं नागपालस्य तस्य च ।
अभयं प्रतिशुश्राव भूभृदाश्रितवत्सलः ॥२२१६॥

बृहद्राजस्य जिह्मोऽयं दौःस्थ्यहेतुरभूदिति ।
स तदापदि नाऽस्मर्षीदव्याजौदार्यधुर्यधीः ॥२२१७॥

साहायकाय स्वं सैन्यं दत्तवांस्तं महीपतिः ।
भूयः प्रतिष्ठामनयद् दर्पप्रशमनाद् द्विषाम् ॥२२१८॥

स्नात्वा द्युनद्यां व्यावृत्तः कोष्ठकोऽत्रान्तरे पुनः ।
मल्लार्जुनं गृहीत्वाऽभूद् द्वैराज्योत्थापनोद्यतः ॥२२१९॥

2211. a) C S′ °भूत्या परि° (for °भूम्यपरि°). —d) C S′ धैर्या° (for वैर्या°).
2216. a) St P_2 C S′ नीविं (for नीवीं).
2217. a) C S′ °राज्यस्य (for °राजस्य). —b) St C S′ P_3 दौरस्थ्य° (for दौःस्थ्य°).

अर्कोपरागे प्राप्तः स कुरुक्षेत्रमवाप तम् ।
लवन्यं कार्यतस्त्यक्तपूर्ववैरो नृपात्मजः ॥२२२०॥

आहूतो लोठनः पूर्वमायातस्तेन डामरम् ।
निशम्य तं संघटितं खिन्नः प्रायाद् यथागतम् ॥२२२१॥

विजयेशाग्रतः पीतकोशोऽपि नृपतिद्विषः ।
प्रविविक्षून् उपैक्षिष्ट सोमपालो दुराशयः ॥२२२२॥

आराधनाय भूभर्तुस्तत्पुत्रः कोष्ठकं पुनः ।
प्राप्तं स्वविषये तैस्तैष्टक्कुरैर्निरलुण्ठयत् ॥२२२३॥

अत्रान्तरे चित्ररथं संवृद्धायासदुर्ग्रहम् ।
अनिच्छन्तोऽवन्तिपुरे प्रायं चक्रुर्द्विजातयः ॥२२२४॥

उपेक्ष्यमाणास्ते दर्पात् तेनाऽगणितभूभुजा ।
ज्वलिते ज्वलने देहान् बहवो जुहुवुः शुचा ॥२२२५॥

चरके धर्मधेनूनामुत्तब्धेऽपि तदाश्रितैः ।
वह्निं गोपालकोऽप्येकः कारुण्यप्रवणोऽविशत् ॥२२२६॥

भट्टस्योद्भटवंशस्य पृथ्वीराजस्य नन्दनः ।
युवा विजयराजाख्यः सानुजो गाढदुर्गतः ॥२२२७॥

देशान्तरं जिगमिषुर्विषमं वीक्ष्य तत्र तत् ।
व्याजहाराऽनुजन्मानं कारुण्यास्रुकणान् किरन् ॥२२२८॥

2221. c) C S′ P_3 SA सङ्घटितुं (for संघटितं).

2223. c) All Mss. read °विषयैस्तैस्तै° (for °विषये तैस्तै° suggested with D).

2224. b) SA $P_{2,3}$ सवृद्धा° (for संवृद्धा°).

उपेक्ष्यमाणा दाक्षिण्यस्तम्भितेन महीभुजा ।
विशः सचिवपाशेन विवशाः पश्य नाशिताः ॥२२२९॥

छन्दानुवृत्त्याऽमात्यानां यत्र क्ष्माभृदुपेक्षते ।
कस्तत्राऽन्यस्तु दीनानामापच्छमयिता विशाम् ॥२२३०॥

यद्वा न्यायोऽयमन्योन्यस्पर्धया यदुपप्लुतम् ।
शमिता दण्डयेच्छास्यं शमितारं परोऽथवा ॥२२३१॥

विश्रृङ्खलं नयेच्छय्यां दार्ढ्यसारं विघट्टनैः ।
कदाचिल्लोहमश्मानमश्मा लोहं कदाचन ॥२२३२॥

दोषेणैकेन न द्वेष्यो राजा सर्वगुणोज्ज्वलः ।
वधाच्चित्ररथस्याऽन्यद्विधेयं नाऽवभाति मे ॥२२३३॥

धर्मः सर्वोपकार्यैकक्षुद्रक्षपणमुच्यते ।
जघानाऽजगरं सोऽपि जन्तूनामन्तकं जिनः ॥२२३४॥

दुर्वृत्तदमनेऽस्माभिः कृते तेजस्विनो जनात् ।
भूयोऽप्यधिकृतो बिभ्यन्न कश्चित् पीडयेत् प्रजाः ॥२२३५॥

कायस्याऽस्य परित्यागादनन्ता जन्तवो यदि ।
सुखिनः स्युरसौ भ्रातर्व्रणिज्या ज्यायसी न किम् ॥२२३६॥

संशुश्रुवांसं स तथेत्यथ तं कोशपीथिनम् ।
विधायाऽनुससारैत्य हन्तुं चित्ररथं तदा ॥२२३७॥

2230. a) P_2 I_3 SA °मान्यानां (for °मात्यानां).

2232. a) C S′ °च्छास्यं (for °च्छय्यां).

2235. a) C S′ P_{1-3} °हसने° (for °दमने°).

2237. b) C S′ कं (for तं).

कालेऽस्मिन् धर्मदौर्बल्यकलुषेऽपि कलेः किल ।
प्रभावो भूमिदेवानां द्योततेऽद्याऽप्यभङ्गुरः ॥२२३८॥

ब्राह्मणैरपरिक्षीणपूर्णपुण्यो न कश्चन ।
धैर्यमारभते भ्रष्टदुष्टोत्पाटनपाटवैः ॥२२३९॥

द्विजानुद्वेजयन् सुज्जिर्द्विजादेवाऽऽसदद् वधम् ।
विप्रेणैव हतश्चित्ररथो विप्रावमानकृत् ॥२२४०॥

द्विजोत्थापितया क्रान्तचित्तोऽसौ कृत्यया ध्रुवम् ।
दध्यौ तस्य वधं प्राणान् विना कारणमुत्सृजन् ॥२२४१॥

कृशानुसादकृषत विप्रा देहान् यदैव ते ।
तद्द्वेषस्तुल्यसंघर्षे तदैवाऽऽसीद्धतानुगः ॥२२४२॥

अनासादयतश्चित्ररथं पृथुबलान्वितम् ।
गणरात्रमभूद्धन्तुर्दिवारात्रं प्रजागरः ॥२२४३॥

स ह्यपर्यन्तसामन्तसीमन्तितपथो व्रजन् ।
अभूददृश्यो दृश्यश्च जनसंबाधमध्यगः ॥२२४४॥

तेन साश्चर्यनैश्चल्यनिष्ठुरेणैकदा जवात् ।
सोऽनुसस्रे व्यतिक्रान्तनिश्श्रेणिर्नृपवेश्मनि ॥२२४५॥

विलम्बितस्य स्तम्भाग्रे कृपाण्या मूर्ध्न्यथाऽस्य सः ।
सामन्तमध्यगस्यैव प्राहरत् तीव्रसाहसः ॥२२४६॥

मुमूर्षोरिव तत्राऽस्य वैह्वल्यगलितस्मृतेः ।
उद्भ्रान्तचक्षुषो वर्चश्च्यवनं समपद्यत ॥२२४७॥

2241. [a]) St °तयाक्रान्त° (for °तया क्रान्त°).

2246. [a]) C S′ विलुण्ठितस्य (for विलम्बितस्य). D (before suggestion) C S′ $P_{1,2}$ I_3 SA स्तम्बाग्रे; P_3 तस्याग्रे (for स्तम्भाग्रे suggested with St D). —[c]) P_{1-2} °गम्यैव (for °गस्यैव).

प्रमापितोऽयं राज्ञेति ज्ञात्वा सत्त्वबहिष्कृताः।
वित्रस्तास्तं तथाभूतमत्यजन्ननुजीविनः ॥२२४८॥

तं वीतजीवितं ज्ञात्वा न तीक्ष्णः प्राहरत् पुनः।
प्राप्तं द्वितीयनिश्रेण्या भ्रातरं निषिषेध च ॥२२४९॥

न पलायिष्ट निर्विघ्नसर्वमार्गोऽपि घातितः।
राज्ञा चित्ररथः शश्वदित्युच्चैः प्रोच्चकार सः ॥२२५०॥

प्रनष्टं भृष्टमांसादिराज्यभोगपुरस्सरैः।
सर्वैः कापुरुषैस्त्रासादथ चित्ररथानुगैः ॥२२५१॥

ज्यायाँल्लोठरथस्तस्य भ्राता भीत्या पलायितः।
शरणं नर्तकीमेकां ययौ वक्त्रार्पितस्तनः ॥२२५२॥

तादृक्प्रवेशितश्चित्ररथोऽभ्यर्णे महीभुजा।
मा भैषीः प्राहरत् कस्त्वामित्युक्त्वाऽऽश्वासितः स्वयम् ॥२२५३॥

नृपाज्ञया को निहन्ता द्वारेशस्येति वादिभिः।
तीक्ष्णोऽन्विष्टो भटैः सोऽहमित्युक्त्वा स्वं न्यदर्शयत् ॥२२५४॥

धीरो योधान् स्वधैर्यात्तलङ्घनश्लाघ्यविक्रमः।
त्रिंशद्विंशान् स हत्वाऽथ प्रहृत्य च रणे हतः ॥२२५५॥

"परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥२२५६॥"

2255. a) All Mss. except St read °धैर्याक्त° (for °धैर्यात्त°). —b) D (before suggestion) C S′ P_{1-3} °लङ्घनं; D suggests लङ्घयन् (for लङ्घन°). —d) St चरणे (for च रणे).

2256. This *v.* occurs in Bhagavadgitā (iii. 8).

लब्धा लिखिततत्कृत्यकारणा पत्रिका करात् ।
तस्याऽन्तसमयाशंसा श्लोकेनाऽनेन पावनी ॥२२५७॥

अरुच्युन्माददीनत्वयुतश्चित्ररथस्ततः ।
रूढव्रणोऽपि लालाटसंधिवेधादजायत ॥२२५८॥

स मासान् पञ्चषान्याप्य निराप्यायकृशाकृतिः ।
विवेष्टमानोऽवर्तिष्ट शयनीयतलेऽन्वहम् ॥२२५९॥

मल्लार्जुनं पुरस्कृत्य कोष्ठको विप्लवोन्मुखः ।
तन्मध्ये तरुसंबाधं गिरिदुर्गमगाहत ॥२२६०॥

स समभ्रमयत् भ्राम्यन् स्वयूथ्यग्रहणोद्यमात् ।
अविस्मृतापदं लोकं पुनर्द्वैराज्यशङ्किनम् ॥२२६१॥

अकाण्डाम्बुदजाड्येन पीडिताङ्गं इवाऽभजत् ।
परचक्रोदयेनाऽऽशु लोकः शिथिलशक्तिताम् ॥२२६२॥

तरुदुर्गं तदकृशक्रोशव्याप्यथ सर्वतः ।
व्याप्तोपान्तवनग्रामैः सचिवैः स न्यरोधयत् ॥२२६३॥

सज्जपाले यवनकैः स्कन्धावारं निबध्नति ।
अनुचक्रुर्द्विषोऽस्पन्दान्निवातस्तिमितांस्तरून् ॥२२६४॥

धन्योऽपि शिलिकाकोट्टपर्यस्तकटकोऽभवत् ।
गन्धद्वेषी गजरिपुः सिन्धुरस्येव वैरिणः ॥२२६५॥

2257. b) D I_3 °कारणात् (for °कारणा).
2261. a) All Mss. read मा मामभ्रमयं भ्रा° (for स समभ्रमयत् भ्रा° suggested with St, cf. St. fn.). —b) All Mss. read °ग्रसनो° (for °ग्रहणो° suggested with St.Tr.).
2263. b) P_1 SA °क्रोष° (for °क्रोश°).
2264. b) P_{1-3} I_3 SA स्कन्दा° (for स्कन्धा°).
2265. d) P_2 SA सिन्दुर° (for सिन्धुर°).

आवासितबलो राज्ञा गोवासे रिल्हणोऽकरोत् ।
अटवीं पर्यटन् घूकानिवाऽर्कों ब्रुडितानरीन् ॥२२६६॥

तीव्रशक्तेर्नृपस्यैवमारम्भैः स्तम्भितोऽभजत् ।
कोष्ठेश्वरस्त्रिचतुरान् मासान् संचारशून्यताम् ॥२२६७॥

क्लिष्टो देशान्तरे राष्ट्रानन्तरैर्न्यक्कृतो नृपैः ।
भिन्नस्ववर्गो भूभर्तृभृत्यव्यर्थीकृतोद्यमः ॥२२६८॥

बालिशत्वादकुशलो ज्ञातुं वृत्तिं महीभुजाम् ।
स विस्मृतागाः संधातुमैच्छच्छिन्नपदो नृपम् ॥२२६९॥

उज्जिहीर्षोः प्रभोर्मन्युं वाच्यं तद्वचनाद् विदन् ।
भक्त्येकाग्रः सज्जपालस्तस्येच्छां तामपूरयत् ॥२२७०॥

तथाऽऽर्त्तोऽपि रिपुं राज्ञः संधित्सुर्व्यग्रहीन्न सः ।
पृथ्वीहरप्रसूतानां निर्द्रोहत्वं न कौतुकम् ॥२२७१॥

तेन प्रहिण्वता राजवैरिणं स्वकराङ्गुलिम् ।
छिन्दताऽपि महीभर्तुर्मन्युश्छेत्तुं न पारितः ॥२२७२॥

कण्ठबद्धशिरश्शाटः शीर्षणोपानहं वहन् ।
भुक्तवेलोऽपि भूपालं कर्तुं नाऽशकदक्रुधम् ॥२२७३॥

अस्वीकृतद्वित्रभूभृल्लाञ्छनः स हि राजवत् ।
तत्तत्प्रत्युक्तभूपाज्ञः सर्वं गर्वाद् व्यवाहरत् ॥२२७४॥

2266. d) C S′ °र्कोत्कण्ठिता° (for °र्कों ब्रुडिता°).
2267. ab) P_1 om. *ab*.
2269. a) C P_{1-3} I_3 SA वालि° (for बालि°).
2270. b) All Mss. except P_2 read तद्व्रजनाद् (for तद्वचनाद्).
2271. a) P_1 तथात्तोऽपि; P_2 तथातोऽपि (for तथाऽऽर्तोऽपि). —b) St C P_3 °त्सुर्न्यग्र°; P_2 °त्समर्त्यग्र° (for °त्सुर्व्यग्र°).
2272. d) C P_3 °न्युंच्छेत्तुं (for °न्युश्छेत्तुं).
2273. c) P_1 °वैलो° (for °वेलो°, cf. *vv*. VII. 369; VIII. 522).

शुश्राव बद्धं तन्मध्ये यातं मल्लार्जुनं नृपः।
अनुबध्नाति भव्यानामुदयेऽभ्युदयान्तरम् ॥२२७५॥

नीयमानः स हि स्कन्धमधिरोप्याऽनुजीविभिः।
अजाङ्घिकतया मार्गोल्लङ्घनायासनिस्सहः ॥२२७६॥

ततस्ततो भयस्थानान्निस्तीर्णो लोहराश्रितम्।
सावर्णिकाभिधं ग्रामं प्राप्तो विन्यस्तरक्षिणा ॥२२७७॥

निरुद्धो जग्गिकाख्येन ठक्कुरेण महीपतिः।
प्रियंकरं तं च भृत्यं शुश्रावाऽन्तिकमागतम् ॥२२७८॥

बद्धप्रायोऽरिणा दुर्गान्निर्गतः स कथंचन।
बद्धस्तेन पुनः शक्तिः कस्य भाव्यर्थलङ्घने ॥२२७९॥

गङ्गा द्युमार्गलुठिता जठरात् कथंचि-
देकस्य संहृतवतो निसृता महर्षेः।
ग्रस्ताऽपरेण कृतसागरगर्तपूर्तिः
शक्तो न कोऽपि भवितव्यविलङ्घनायाम् ॥२२८०॥

जग्गिके बद्धसंप्राप्तिपर्यन्तोपान्तरक्षिणि।
राज्ञोदयद्वारपतिः प्रायोजि प्राज्यबुद्धिना ॥२२८१॥

तं विना धैर्यगाम्भीर्यशौर्यधुर्यं महाधियम्।
संकटे न ह्यवष्टम्भो राज्ञाऽज्ञाय्यन्यमन्त्रिणाम् ॥२२८२॥

2276. a) P_{1-3} I_3 SA स्कन्द° (for स्कन्ध°). —d) All Mss. read °नाय स
(for °नायास° suggested with St).

2278. a) P_1 जङ्गि°; P_3 जाङ्गि° (for जग्गि°).

2279. c) SA P_2 शक्ति (for शक्तिः). —d) SA P_2 भावार्थ° (for भाव्यर्थ°).

2281. a) P_1 जग्नके; P_2 SA I_3 जग्गके; P_3 जङ्गिके (for जग्गिके).

स ह्यतिक्रम्य साबाधान्मार्गाननुभयवेतनैः ।
तमोरिस्थितमद्राक्षीत् तं क्षमापतिविद्विषम् ॥२२८३॥

निष्ठाशून्येन धैर्येण शौर्यसंभावनावहः ।
स्तुवन् स तं बहिः प्राप्तं तत्तदुक्त्वाऽब्रवीत् पुनः ॥२२८४॥

सर्वतो ज्यायसीं भर्तृभक्तिं यो बहु मन्यते ।
भवान् धुर्यो मतिमतामाहृतो लोभनातुरैः ॥२२८५॥

कृता रक्षामणिसमं सहायं त्वादृशं विना ।
हानिर्मे दुर्नरेन्द्रस्य बाल्ये राज्ये बहुच्छलैः ॥२२८६॥

दुष्प्रेक्ष्याणां भवत्येव नियमाद् राजभास्वताम् ।
भाग्यान्तहेमन्तदिने जननेत्रविलङ्घ्यता ॥२२८७॥

शोभते रुधिराताम्रमण्डलाग्रो यथोदये ।
तथा योऽस्तमये भास्वानिव वन्द्यः स भूपतिः ॥२२८८॥

धन्योऽवतारो यस्याऽऽसीत् क्षुभ्यत्पौराङ्गनाजनः ।
उदयेऽस्तमयेऽप्युग्रे रागव्यग्राप्सरोगणः ॥२२८९॥

पदे प्रयोगं लब्ध्वाऽर्थं किंचित्कृत्वा कुलीनवत् ।
अहं कविरिवाऽप्रौढः प्राप्तो निर्व्यूढिमूढताम् ॥२२९०॥

सत्यंकारोऽधुना भूत्वा विधत्तां स्वान्तसुस्थितिम् ।
साध्यत्वानतिवृत्तेन वरेणैकेन मे भवान् ॥२२९१॥

2284. d) $P_{1,2}$ I_3 पुरः (for पुनः).
2285. d) D P_{1-3} °भनान्तरैः; C S′ °डनान्तरैः (for °भनातुरैः).
2290. c) All Mss. read °व प्रौढः (for °वाऽप्रौढः suggested with D).
2291. c) C S′ P_2 I_3 °नभि° (for °नति°). —d) C S′ P_2 सो (for मे).

इत्युक्त्वा प्रत्ययोत्पत्त्यै संस्प्रष्टुं स्फाटिकं ततः ।
स पीठं पुरतो द्वारपतेर्लिङ्गमुपानयत् ॥२२९२॥

अच्छलाहवसंमर्दप्रासशूलेषुवर्षिणः ।
योधान् योद्धुं वरं सोऽयं मानवान्नूनमिच्छति ॥२२९३॥

इति संभाव्य संस्पृष्टशिवलिङ्गः स वाञ्छितम् ।
वरं तस्योररीचक्रे स च भूयो जगाद तम् ॥२२९४॥

अकृष्टदृष्टिरहतः क्ष्माभुजोऽन्तिकमक्षतः ।
यथेदृगेव प्राप्नोमि तथा त्वामर्थयेऽधुना ॥२२९५॥

कार्पण्योपहतं तस्य वचः श्रुत्वा त्रपाजडाः ।
सर्वेऽप्युर्वीमुखास्तस्थुर्वृष्ट्यार्द्राः पल्लवा इव ॥२२९६॥

अन्त्यक्षणस्ततो भिक्षोः स्मर्यमाणः सचेतसाम् ।
विकासहेतुतां प्राप स्वस्थस्य मनसः पुनः ॥२२९७॥

मनुष्यवाह्यमारूढः पत्रं निन्ये स निस्त्रपः ।
तेन स्वपालिताँल्लोकानपि पश्यन्नविक्रियम् ॥२२९८॥

अहीनाहारनिद्रादिवैवश्यः पशुवत् पथि ।
कृष्यमाणः स केनाऽपि न विकल्पेन पस्पृशे ॥२२९९॥

2292. c) St सपी° (for स पी°).

2293. c) D C S′ P_{1-3} I_3 सायं; SA माऽयं; St P_2 मायं (for सोऽयं suggested).

2295. a) St C S′ $P_{1,2}$ I_3 आकृष्ट° (for अकृष्ट°). —c) All Mss. read प्राप्नोषि (for प्राप्नोमि suggested with D).

2297. a) C S′ अन्त्ये; St D $P_{1,2}$ I_3 अन्त° (for अन्त्य° found in P_3). —b) P_1 om. सचेतसाम्. D C S′ $P_{2,3}$ I_3 स चेतसाम् (for सचेतसाम्). cd) P_1 om.

पश्यन्नानीयमानं तं गोप्तृभिस्तादृशं जनः।
दयार्द्रहृदयश्चाऽऽसीन्नाऽभ्यनन्दच्च भूभुजम् ॥२३००॥

उवाच चाऽऽनुकम्प्येऽस्मिञ्जन्मज्येष्ठस्य भूपतेः।
नैतावद् भाति नैर्घृण्यमनुजे पितृवर्जिते ॥२३०१॥

असेचनकमेतस्य मेचकाब्जदृशो वपुः।
क्लेशगर्ह्यमनिस्त्रिंशचेताः कः कर्तुमर्हति ॥२३०२॥

पूर्वापरानुसंधानवन्ध्यस्तं दृष्टवांस्तदा।
विस्मृतागा नृपं तत्तदित्युपालभताऽध्वनि ॥२३०३॥

गणना काऽथवा बालबालिशादौ विधीयते।
न चित्तवृत्तेरैकाग्र्यं महतामपि सर्वदा ॥२३०४॥

श्रोतॄणां द्यूतपाञ्चालीकेशाकृष्टयादि शृण्वताम्।
पाण्डवेभ्योऽधिकः क्रोधो धार्तराष्ट्रेषु जायते ॥२३०५॥

कुरूणां क्षतजापाने भग्नोरोर्मूर्धताडने।
श्रुते पाण्डवविद्वेषस्तेषामेव च दृश्यते ॥२३०६॥

परावरज्ञः कार्याणां न कश्चिन्मध्यगं विना।
तटस्थेऽनुभवाभेदस्तत्र तत्र कथं भवेत् ॥२३०७॥

स पौरान् रोदयन्नङ्के छिन्नाङ्गुल्यङ्कमुद्वहन्।
युग्याधिरूढो मृत्पात्रं सायं नगरमासदत् ॥२३०८॥

2300. b) C S′ $P_{1,2}$ I_3 SA जना: (for जन:).

2302. a) D C S′ P_1 आसे° (for असे°). असेचनक means charming.

2304. ab) $P_{1,3}$ SA बालवालि°; P_2 I_3 वालवालि° (for बालबालि°).

2307. a) $P_{2,3}$ °रज्ञा: (for °रज्ञ:). —b) All Mss. read मध्यमं (for मध्यगं suggested). —c) C S′ततस्ते° (for तटस्थे°).

न्यधत्ताऽऽश्वयुजाशुक्लपञ्चदश्यां महीपतिः ।
एकादशेऽब्दे तं रक्षियुतं नवमठान्तरे ॥२३०९॥

त्यक्ताहारस्य च निशाः पञ्चषास्तस्य ताम्यतः ।
पार्श्वं जगाम कारुण्याच्चरणस्पर्शनार्थिनः ॥२३१०॥

अवादीदर्थितं तस्मै प्रतिशुश्रुवुषेऽभयम् ।
द्रोहावेकान्ततो वध्यौ स चित्ररथकोष्ठकौ ॥२३११॥

राजा निर्जग्मुषः स्वोर्वीं कोष्ठकस्याऽथ बन्धनम् ।
विधित्सुः पञ्चषानाप्तान् रिल्हणादीनचूचुदत् ॥२३१२॥

सर्वेषु गलितौजस्सु स्वयं राज्ञ्युद्यमस्पृशि ।
अथ तं रिल्हणो दोर्भ्यां झषं ग्राह इवाऽग्रहीत् ॥२३१३॥

हृतशस्त्रः स बलिनस्तस्य दोष्पञ्जरान्तरे ।
तस्थावचेष्टो निद्रान्धो भूतेनेवाऽसमीकृतः ॥२३१४॥

भ्रातृव्यो भिःखराजाख्यः कुलराजस्य कोपनः ।
भूभृद्भक्त्या कृपाण्याऽस्य निर्बिभेद कृकाटिकाम् ॥२३१५॥

परश्वधेन मूर्ध्न्येनं पृथ्वीपालश्च ताडयन् ।
राजबीजी स च क्रोधान्न्यषिध्यत महीभुजा ॥२३१६॥

कृकाटिकास्थिसंजातमर्मवेधोपचेष्टितः ।
विवेष्टमानोऽवर्तिष्ट क्षितौ स रुधिरोक्षितः ॥२३१७॥

2310. c) P_{1-3} I_3 °ण्याश्च° (for °ण्याच्च°).

2312. d) St °चुरत् (for °चुदत्).

2314. d) C S′ °लसीकृतः; St P_{1-3} I_3 °सनीकृतः (for °समीकृतः).

2315. a) SA भि×ख° (for भिःख°).

महाबलैः कमल्यिप्रमुखैस्तस्य सोदरः ।
चतुष्कः पातितोऽप्युर्व्यां गण्डशैल इव द्विपैः ॥२३१८॥

विलोक्य वैकल्यहतौ बद्धौ तौ स्वामिनौ तथा ।
कृष्टासिधेनुरुत्तस्थौ द्विजन्मा मल्लकाभिधः ॥२३१९॥

उच्चावचेषु प्रहरन् स भूपालोपजीविषु ।
अतर्क्यमाणस्तुमुलं राज्ञैवाऽलक्ष्यतापतन् ॥२३२०॥

नृपान्तिकादापततस्तांस्तान् घ्नन्तं महाभटान् ।
अधावत् सासिधेनुस्तं कुलराजो महौजसम् ॥२३२१॥

प्रतिप्रहृतिषु क्षिप्रापतत्पाणिमपारयन् ।
निहन्तुं संरुरोधेव भित्तौ व्यायामवित् स तम् ॥२३२२॥

अपयातुमवस्थातुं प्रहर्तुं वाऽप्यशक्नुवन् ।
तस्थौ च बहुसंधानः संस्तंभ्यैनमविक्षतम् ॥२३२३॥

चरणास्फालनोत्फालदोश्शब्दमुखरोऽन्तिकम् ।
धाविते पद्मराजेऽथ मल्लकोऽक्षिपदीक्षणम् ॥२३२४॥

प्राहरत् कुलराजोऽस्य लब्धरन्ध्रोऽथ वक्षसि ।
प्रहृत्य गच्छतः पाणेः स तस्याऽङ्गुष्ठमक्षिणोत् ॥२३२५॥

तौ बिज्जराजे दर्पोष्णनिबिडे प्रहरत्युभौ ।
तस्मिन् प्रतिप्रहरति क्षिप्रं प्राहरतां ततः ॥२३२६॥

2319. b) S' SA स्वामिनो; P_3 स्वामिना (for स्वामिनौ). —c) P_{1-3} °कृत्त° (for °रुत्त°).

2323. d) St (before corr. in corrigenda) D $P_{1,3}$ C S' संस्त° (for संस्तं°).

2326. a) All Mss. read °राजो (for °राजे suggested with St).

स त्रीनप्यभियोक्तृंस्तांस्त्यक्त्वा दृक्पथमागतम् ।
चतुष्किकाद्वारगतं राजानं समुपाद्रवत् ॥२३२७॥

लक्ष्यीभूते नृपे शीघ्रमनुधावन् ससंभ्रमम् ।
चकार कुलराजस्तं स्फिगस्थिक्षतिनिर्जवम् ॥२३२८॥

ततः सर्वैर्वृतो योधैः क्लीबाक्लीबान् स सत्वरम् ।
हत्वाऽभजद् वीरशय्यां रक्तस्यन्दोत्तरच्छदाम् ॥२३२९॥

जीवद्यापद्गतस्वामिवीक्षितः श्लाघ्यविक्रमः ।
स एव स्पृहणीयान्तक्षणो वीरेष्वगण्यत ॥२३३०॥

बहिः कोष्ठकभृत्येषु विद्रुतेष्वदरिद्रताम् ।
परं जनकचन्द्राख्यो धैर्येणोवाह डामरः ॥२३३१॥

निरायुधो राजभृत्याद्धृत्वैकस्मात् परश्वधम् ।
स ह्ययुद्धाऽग्रदूतत्वं नयन् भूरीन् यमान्तिके ॥२३३२॥

यियासोस्तस्य चण्डांशुमण्डलं परशुः करे ।
सुषुम्णाऽसंविभागार्थी शशिखण्ड इवाऽविशत् ॥२३३३॥

नाऽद्राक्ष्म नाऽश्रौष्म वाऽपि बद्धे भर्त्तरि यत्तदा ।
कोष्ठकस्य वधूरन्वतिष्ठन्मानवती सती ॥२३३४॥

जीवन् भूयोऽपि लभ्येत त्वया स पतिरित्यसौ ।
बन्धूनामवधीर्योक्तिं प्राविशद् यद्धुताशनम् ॥२३३५॥

सप्तर्षियोषिदाश्लेषतर्षकिल्बिषदूषितः ।
तस्याः सतीलोकगायाः पादाभ्यां पावितोऽनलः ॥२३३६॥

2328. a) St P_1 लक्षी°; P_2 लक्ष्ये (for लक्ष्यी°).

2330. c) St C S' P_2 I_3 एवास्पृ° (for एव स्पृ°).

2331. b) P_3 om. विद्रुतेष्व.

वसन्तस्य सुता धन्योदयभ्रातुः पुपोष सा ।
शुचिवंशाभिमानेन न डामरवधूव्रतम् ॥२३३७॥

लवन्यललनाः कुर्युर्वैधव्येऽपि धनेच्छया ।
ग्रामकार्यिकुटुम्ब्यादीन्नितम्बाभोगभागिनः ॥२३३८॥

मतिव्यामोहनिर्व्यूढवैक्लव्यस्याऽभिमानिनः ।
तयाऽनुगाभ्यां च कृतं कोष्ठकस्योच्चकैः शिरः ॥२३३९॥

रूढव्रणोऽपि क्रिमिसाद्भूतः कैरपि किल्बिषैः ।
निष्प्राणो गणरात्रेण कारायां कोष्ठकोऽभवत् ॥२३४०॥

अथ चित्ररथः शोषकृशः कलुषितं नृपम् ।
श्रुत्वा मल्लार्जुनेनाऽभूद् भयादत्यन्तदुःखितः ॥२३४१॥

पत्नी तस्यैकभार्यस्य प्रिया सूर्यमती सती ।
परलोकातिथिः पूर्वं विभवप्रतिभूरभूत् ॥२३४२॥

देहे याप्यहताप्याये गेहे गतपरिग्रहे ।
पत्यौ वैमत्यकलुषे नेषदप्येष पिप्रिये ॥२३४३॥

तीर्थस्थितस्य न स्यान्मे सागसोऽप्यप्रियं नृपात् ।
इति संचिन्त्य स प्रायान्मिषान्मर्तुं सुरेश्वरीम् ॥२३४४॥

अथ नानार्थभूयिष्ठां धनाधीशाधिकश्रियः ।
स्थानात् ततस्ततस्तस्य पार्थिवोऽपाहरच्छ्रियम् ॥२३४५॥

कनकांशुकसंनाहवाजिरत्नायुधादिभिः ।
स्वा स्वा प्रकाशिता लक्ष्मीः स्पर्धयेवाऽधिकाधिका ॥२३४६॥

2338. c) C S′ °कादि°; P_{1-3} °काहि° (for °कार्यि°).

2341. d) St C S′ P_{1-3} I_3 दुःस्थितः (for दुःखितः).

2344. d) For सुरेश्वरीम् cf. *vv*. V. 40, 41; VI. 147; VIII. 506, 744, 2363, 2418 and St. Tr. fn. *v*. V. 37.

2345. a) C S′ $P_{1,2}$ °यिष्ठा (for °यिष्ठां).

लोहरद्रोहघर्मोष्मशोषितो राजपादपः
तल्लक्ष्मीशैलतटिनीसेकेनाऽऽप्यायितोऽभवत् ॥२३४७॥

विप्लवे चिरनष्टेऽपि श्रीकल्याणपुरं न यः ।
वनवासोचितत्रासः शाल्वः सौभमिवाऽत्यजत् ॥२३४८॥

श्वेतच्छत्रांशुपृक्तेव चिन्तापाण्डुरवर्तत ।
बन्दीकृता नरेन्द्रश्रीर्निर्निद्रा यस्य मन्दिरे ॥२३४९॥

राज्ञा प्रयुक्तं विज्ञाय विजयः स भवोद्भवः ।
तीक्ष्णमानन्दनामानमवधीत् तेन चाऽवधि ॥२३५०॥

इत्थं स पप्रथे तादृक्प्रजापालनशालिनः ।
सर्वोत्साहमयोऽनेहा जयसिंहमहीभुजः ॥२३५१॥

तीर्थस्थिते चित्ररथे पादाग्रग्रहणैषिणौ ।
शृङ्गारजनकावास्तां तद्भृत्यौ व्यक्तचक्रिकौ ॥२३५२॥

प्रचुरोत्कोचदानेन स्वीकृत्य नृपतिं ययौ ।
शृङ्गारो भग्नजनकः स्वामिश्रीभोगभागिताम् ॥२३५३॥

चिरप्रचलितं द्वारमुदये निदधे पुनः ।
मेघकालः सरित्पूरं प्रतीर इव पार्थिवः ॥२३५४॥

अवश्यभोग्यदुष्कर्मदत्तमर्मव्यथश्चिरम् ।
कथाशेषोऽभवच्चित्ररथो मासैरथाऽष्टभिः ॥२३५५॥

2348. [d]) C S′ साल्रूरोऽन्धुमि°; P_1 सालुस्मो···मि; D (before suggestion) P_2 SA साल्वः सौ···मि°; P_3 सालः सौ···मि° (for शाल्वः सौभमि° suggested with St D).

2350. [d]) After this *v.* तिलकम् .

हास्यावहोऽप्यविकृतो विकृतोऽनपास्यो
दुर्गन्धिरप्यतिजडोऽपि गृहीतवाक्यः।
पूर्वानुभावजयिनो भवति प्रभावाद्
यस्य स्तुमस्तमतिसंस्तवमप्रतर्क्यम् ॥२३५६॥

निन्द्यैराद्यूनताद्यैर्यश्चेष्टितैः प्रागभीष्टताम्।
बाल्ये दुर्ललितस्याऽगाद् भूभर्तुश्चित्रचेतसः ॥२३५७॥

विसृज्यमानः संप्राप्तसाम्राज्येन दिवानिशम्।
क्रमात् स्वीकृत्य ताम्बूलं तेन चित्ररथान्तिकम् ॥२३५८॥

दूत्यैः कृत्यान्तरज्ञत्वं प्राप्तवानाप्ततां गतः।
तदन्ते घटयन् राज्ञस्तद्भृत्यान् कोशदर्शकान् ॥२३५९॥

तदा सर्वोन्नताशेषमन्त्रिशून्ये नृपास्पदे।
सज्जकस्याऽऽत्मजः प्राप शृङ्गारो मुख्यमन्त्रिताम् ॥२३६०॥

तस्य वैधेयताभ्यस्तकुदृष्टेरपि दुष्कृतम्।
नाऽगुः पात्रार्पणात्तुच्छत्यागित्वेनाऽपि संपदः ॥२३६१॥

योषित्कशिपुभोग्येन धन्यंमन्योऽपि सोऽभवत्।
धान्यदानवदान्यत्वं गुरूणामाजगाम यत् ॥२३६२॥

पीठं कृतवतो रूप्यं संयोज्य रजतैर्निजैः।
विद्यमानं सुरेश्वर्या सायुज्यं तस्य युज्यते ॥२३६३॥

2357. [a]) All Mss. read °द्यूतना° (for °द्यूनता° suggested with D).
2360. [c]) D C P_2 सज्ञक° (for सज्जक°). After this *v.* चक्कलकम्.
2361. [b]) All Mss. read दुष्कृताम् (for दुष्कृतम् suggested with St).—[c]) All Mss. except SA read नातः (for नाऽगुः).
2362. [c]) D C P_{1-3} I_3 SA °वद° (for °वदा°).
2363. [a]) SA रुप्यं (for रूप्यं).

उर्वीशैरपि नाऽर्वाग्भिर्योऽनुगन्तुमशक्यत ।
आषाढ्यामाढ्यसंभारो निविडद्रविणव्ययः ॥२३६४॥

नन्दिक्षेत्रे स तत्राऽऽद्यैः प्रणीतश्रणपकादिभिः ।
तेन कालानुसारेण पोषितः पञ्चषाः समाः ॥२३६५॥

नर्माङ्गतायां निस्सारो ज्ञातो यः सोऽधिकारभाक् ।
अचिन्त्यकृत्यकार्यासीत् स्वामिस्नेहप्रभावतः ॥२३६६॥

केलीसज्जैर्युवतिकरजैः कण्ठभूषादशायां
यस्याऽज्ञायि त्रुटनमसकृत्क्ष्माधरेष्वासकृष्टौ ।
सोऽप्यादिष्टस्त्रिपुररिपुणा प्राप भङ्गं न भोगी
शक्त्याधायी क्वचन न परो भर्तुराज्ञाप्रभावात् ॥२३६७॥

तं च रिल्हणधन्यौ च समाश्रित्येतरेतरम् ।
कार्यं जनकश्रृङ्गारावुत्कोचेनाऽपजह्नतुः ॥२३६८॥

कदाचिज्जनकं बद्ध्वा सार्धं भूषणमौक्तिकैः ।
सपुत्रदारं श्रृङ्गारो बाष्पबिन्दूनमोचयत् ॥२३६९॥

स तं च जातु निर्विद्य मानहीनमकारयत् ।
रूक्षरक्ष्यर्पितोत्कोचधनाभ्यर्थितमैथुनः ॥२३७०॥

अङ्गुष्ठनखनिर्घर्षनर्तितानामिकोर्मिकः ।
वदन्वामोत्तरौष्ठाग्रोदञ्चनैः कुञ्चितेक्षणः ॥२३७१॥

2365. b) C S′ $P_{2,3}$ I_3 °श्रम्पका° (for °श्रणपका°).

2369. c) All Mss. read श्रृङ्गारं (for श्रृङ्गारो suggested with St).

2370, c) St P_{1-3} °रक्ष्या°; I_3 C S′ °रक्षा° (for °रक्ष्य°).

2371. d) D C S′ P_{1-3} I_3 कुरुते क्षणः; SA कु˙˙˙तेक्षणः (for कुञ्चितेक्षणः suggested with St).

भ्रूभङ्गोद्वेल्लितवलीनिम्नोन्नतललाटभूः ।
पुनरेकस्तयोर्लब्धकार्यो लोकमहासयत् ॥२३७२॥

अव्यक्ताक्षरवाग्रौक्ष्यमीलिताक्षो रटन् बहु ।
हसन् सकरतालं च संपद्यन्यो व्यभाव्यत ॥२३७३॥

सोल्लेखप्रतिभोन्नीततत्त्वानां हास्यवस्तुनि ।
कथाशरीरं पर्याप्तं नेदृशां किमचेतसाम् ॥२३७४॥

सर्वस्मिन् वस्तुतोऽर्वाचि काले विगतयोग्यते ।
जाने तृणनृणां तुल्ये शृङ्गारोऽर्हत्यगर्ह्यताम् ॥२३७५॥

यः सर्वंकषनिष्कम्पशेमुषीकः क्षमापतिः ।
धुर्यतां धर्मचर्याभिर्गतः सुकृतशालिनाम् ॥२३७६॥

लब्धबोधिरिवाऽरेर्यश्चक्रे व्यापद्युपक्रियाम् ।
दावप्रदस्य दग्धाङ्गोल्लाघत्वमिव चन्दनः ॥२३७७॥

गुरुसूरिद्विजानाथप्रभृत्युचितयाऽपि यः ।
प्रतिपत्त्या संविभेजे संविभाग्यकुटुम्बकम् ॥२३७८॥

प्रासादान् विजयेशादिदेवव्रातस्य शुद्धधीः ।
सुधादानेन निन्ये च धन्यः कैलासतुल्यताम् ॥२३७९॥

मठदेवगृहारामह्रदकुल्यादियोजने ।
जीर्णोद्धृतिव्यसनिनस्तस्य चिन्ता निरन्तरा ॥२३८०॥

2372. a) St SA P_{1-3} °द्वेलित° (for °द्वेल्लित°). After this *v.* तिलकम्.

2374. b) All Mss. read °त्वरां (for °त्त्वानां suggested with St D). —d) All Mss. read न दृशां (for नेदृशां suggested with St).

2375. a) All Mss. read °तोवाचि (for °तोऽर्वाचि sugggested with D).

2377. c) $P_{1,3}$ °प्रशस्यो; P_2 I_3 °प्रदस्यो (for °प्रदस्य).

सकृद्दर्शितविद्वेषकार्यः सब्रह्मचारिणाम् ।
स क्रौर्यधाम पर्याप्तमीदृगप्युच्यते जडैः ॥२३८१॥

विश्वाप्यायनसप्तसिन्धुभरणब्रह्मादिसंप्रीणन-
प्रायं कृत्यमुदात्तमेकसमयोपात्तेन दुष्कर्मणा ।
स्वःसिन्धोर्लघुतां गतं सगरजश्रेणीचितास्पर्शना-
ज्ज्ञाता येन जनाः श्मशानमिव सा योग्या किलाऽस्थ्नां स्थितौ ॥

तदन्तरे शिवरथो द्विजः प्रचुरचाक्रिकः ।
कायस्थपाशः पाशेन गलं बद्ध्वा व्यपद्यत ॥२३८३॥

इत्थं पृथ्वीपतिः कृत्वा तत्तत्कण्टकपाटनम् ।
अपेतविघ्नं सौजन्यनिघ्नो व्यधित मण्डलम् ॥२३८४॥

विपक्षावरणापाये प्रायेण पृथिवीभुजः ।
तैक्ष्ण्यमायान्ति जीमूतमुक्ता रविकरा इव ॥२३८५॥

परिणाममनोज्ञत्वं राजरत्नं त्वयं नृपः ।
माधुर्याधिक्यमुत्पाको द्राक्षाद्रुम इवाऽऽययौ ॥२३८६॥

प्रावर्तयत सातत्यात् क्रतून् विततदक्षिणान् ।
विवाहतीर्थयात्रादीन् महितांश्च महोत्सवान् ॥२३८७॥

संविभेजे स्वसंभारैः स क्रिया धर्मचारिणाम् ।
तेजोभिः कुलशैलानामोषधीरिव चन्द्रमाः ॥२३८८॥

2381. b) All Mss. read °कार्यसब्रह्मचारिणा (for °कार्यः सब्रह्मचारिणाम् suggested with St).

2382. c) D C S′ P_3 सुरगज°; SA SL $P_{1,2}$ I_3 सरगज° (for सगरज° suggested with St). —cd) D St $P_{1,3}$ I_3 SA °स्पर्शना···ता; St suggests °स्पर्शनात्पूता; St. Tr. emends °स्पर्शनाज्ज्ञाता (for °स्पर्शनाज्जाता). P_2 जना; St. Tr. emends जन: (for जनाः, vocative case). $P_{1,2}$ I_3 °स्थां (for °स्थ्नां).

2383. a) All Mss. read तदन्तरं (for तदन्तरे suggested with St). —b) St $P_{1,2}$ °चक्रि° (for °चाक्रि°).

2384. d) D C S′ °विघ्नो (for °निघ्नो).

2385. a) All Mss. except D read °पाय° (for °पाये).

प्रतिज्ञातं सुतोद्वाहप्रतिष्ठादौ पुरौकसाम् ।
तेनौपयिकसामग्रीदानमव्यग्रचेतसा ॥२३८९॥

दारूणामाकराः कोशवृद्धये ये धराभुजाम् ।
नवीचक्रे पुरं सर्वं स्वाधीनान् स विधाय तान् ॥२३९०॥

मज्जतो राजकार्येषु तत्त्वविद्भिर्हरार्चने ।
विस्मितैर्वीक्ष्यते तस्य निष्ठा काष्ठा मुनेरिव ॥२३९१॥

प्राह्णादारभ्य सायाह्नपर्यन्तं चाऽस्य दृश्यते ।
न तत्कृत्यं गता यत्र नाऽध्यक्षत्वं विचक्षणाः ॥२३९२॥

अविचारान्धतमसे विद्या व्यद्योततान्तरा ।
जयापीडादिमेघश्रीसौदामिन्या विलोलया ॥२३९३॥

तेन श्रियं तु विश्राण्य स्थास्नुं रत्नप्रभामिव ।
गुणवैचित्र्यचित्रस्य प्रकाशोऽनश्वरः कृतः ॥२३९४॥

सूरयो येन संग्रामे विक्षतक्षेत्रसंपदाम् ।
ग्रामाणामाग्रहार्केन्दु सान्वयाः स्वामिनः कृताः ॥२३९५॥

विदुषां विततोत्सेधसौधास्तद्विहिता गृहाः ।
व्याप्ताः सप्तर्षिभिर्द्रष्टुमुत्कर्षमिव मूर्धसु ॥२३९६॥

प्रतिभाप्रभवे प्रश्नोपश्ने च पथि पान्थता ।
सार्थवाहं तमालम्ब्य निर्दोषा विदुषां स्थिता ॥२३९७॥

2390. a) SA P_2 I_3 कोष° (for कोश°).

2392. a) $P_{2,3}$ I_3 SA सायाह्ण° (for सायाह्न°).

2393. d) St D C S' P_1 I_3 °सौदामन्या (for °सौदामिन्या).

2395. a) D St SA_1 I_3 P_{1-3} om. संग्रामे. —c) D C S' $P_{1,3}$ °ग्रहाः कर्म; P_2 I_3 SA °ग्रहा कन्दु (for °ग्रहार्केन्दु found in SG *sec. manu*).

आसीद् यथाऽऽर्यराजस्य शयानस्याऽप्यतिप्रियः ।
कामं लिङ्गाभिषेकाम्भःसंक्षोभप्रभवो ध्वनिः ॥२३९८॥

निद्राणस्य तथा वेणुवीणादिपरिहारिणः ।
दयितं तस्य निर्द्वेषविद्वज्जल्पविकल्पनम् ॥२३९९॥

काले श्रीललितादित्यावन्तिवर्मादिभूभुजाम् ।
सिद्धं न यत्प्रतिष्ठादि निष्ठां तदधुना गतम् ॥२४००॥

मठदेवगृहेष्वेवं स्वकालप्रभवेषु यत् ।
सर्वेष्वेव कृता तेन निर्व्यपाया व्यवस्थितिः ॥२४०१॥

रत्नादेव्या दृढारूढभर्तृवल्लभताभुवः ।
सर्वप्रतिष्ठाप्रष्ठत्वं विहारः प्रथमं गतः ॥२४०२॥

रिल्हणोऽथ गुणिग्रामबान्धवो धर्मपद्धतौ ।
बभूव पूर्वपथिकः समस्तामात्यसंततेः ॥२४०३॥

तपोधनांल्लब्धवर्णान् धर्मवृद्धांश्च शुद्धधीः ।
विस्रम्भभवनस्थोऽपि शक्तस्त्यक्तुं न यः क्वचित् ॥२४०४॥

कृष्णाजिनोभयमुखीदानमुख्यैः सुकर्मभिः ।
धर्मकन्याविवाहैश्च यस्याऽशून्यत्वमायुषः ॥२४०५॥

सर्वेषामाहिताग्नीनां निष्प्रत्यूहा महात्मना ।
सर्वयागोपकरणैर्येन विश्राणितैः क्रियाः ॥२४०६॥

2398. b) All Mss. read °श्रियः (for °प्रियः suggested with D St). Cf. *v.* II. 126.

2401. a) All Mss. read °ष्वेव (for °ष्वेवं suggested). —d) St $P_{1,3}$ व्यय° (for व्यव°).

2403. a) All Mss. read गुण° (for गुणि° suggested with D).

2404. a) P_2 I_3 SA तपोधना° (for तपोधनां°).

2405. a) C S′ °मख° (for °मुखी°).

भोगान् बुभुजिरे भव्यान् सत्रे सूत्रितविस्मये ।
यस्य वर्णाश्चतुष्षष्टिः कुदृष्ट्यस्पृष्टचेतसः ॥२४०७॥

अग्रहारगणोदग्रैर्विततैर्मठसेतुभिः ।
पुरे परिष्कृते येन द्वयोः प्रवरसेनयोः ॥२४०८॥

आद्ये प्रवरभूभर्तुः पत्तने प्रत्तविस्मयः ।
प्राप्तः प्रतिष्ठाप्रष्ठत्वं यत्कृतो रिल्हणेश्वरः ॥२४०९॥

लोकान्तरगतां कान्तां कृतिनोद्दिश्य सुस्सलाम् ।
भलेरकप्रपास्थाने विहारस्तेन कारितः ॥२४१०॥

मार्जार्यास्तिर्यगुचितस्नेहविस्मृत्यपोहतः ।
मृतामनुमृतायास्तन्नाम्ना यः ख्यातिमागतः ॥२४११॥

तद्भर्तुरीर्ष्याकालुष्ये तस्या दूराग्रगा पुरः ।
प्रदेशे मानुषीवाऽऽसीत् प्रिया क्रीडाबिडालिका ॥२४१२॥

तीर्थप्रस्थानदिवसादारभ्याऽस्या विराविणी ।
उत्सृजन्त्याहृतं भोज्यं सा शुचा जीवितं जहौ ॥२४१३॥

आरोहति परां काष्ठां प्रतिष्ठाविविधाध्वना ।
दिद्दा नृपतिपत्नीषु मन्त्रिस्त्रीषु तु सुस्सला ॥२४१४॥

श्रीचङ्कुणविहारं या यातं नामावशेषताम् ।
अश्मप्रासादवेश्मादिकर्मणा निर्ममेऽधुना ॥२४१५॥

2408. a) C S′ P_1 °गुणो° (for °गणो°).

2410. c) C S′ भिक्षोरेक° (for भलेरक°, cf. *v.* VII. 1240).

2413. c) $P_{1,2}$ I_3 SA उत्सज° (for उत्सृज°).

2414. b) All Mss. read °धुना (for °ध्वना suggested with St D).

अरघट्टप्रबन्धान्धुच्छात्रशालादिकर्मभिः ।
तस्याः संपूर्णतां पुण्यप्रकारा निखिला गताः ॥२४१६॥

पूर्वराजकुलाखण्डस्थण्डिलव्यापिनाऽखिलम् ।
तद्विहारेण नगरं नीतं नेत्राभिरामताम् ॥२४१७॥

प्रापि प्रतिष्ठयैवाऽऽशु यक्ष्मक्षपितया तया ।
विपत्तिः श्रीसुरेश्वर्यां प्राज्यसायुज्यदूतिका ॥२४१८॥

मठाग्रहारा धन्येन वल्लभाभिधया कृताः ।
नाऽभीष्टं लेभिरे नाम ख्यातिः पुण्यैर्विना कुतः ॥२४१९॥

अग्रहारमठांस्तद्वदुदयः कम्पनापतिः ।
कृत्वाऽपि स्वाभिधामेव तत्संबद्धां सदाऽशृणोत् ॥२४२०॥

उदयद्वारपतिना सह ब्रह्मपुरीगणैः ।
कृते प्रष्ठे मठे शोभां लेभे पद्मसरस्तटः ॥२४२१॥

शृङ्गारतन्त्रपतिना श्रीद्वारेऽप्यग्र्यजन्मना ।
प्रत्यष्ठापि मठोद्यानदीर्घिकाद्यनघात्मना ॥२४२२॥

स्नानकोष्ठमठब्रह्मपुरीसेत्वादिकर्मणा ।
सोऽलंचकाराऽलंकारो बृहद्गञ्जाधिपो धराम् ॥२४२३॥

बुधः सदौषधीशान्तिहेतोर्जातः कलावतः ।
यः कविर्दानवत्त्वं च ख्यातस्त्यागेन योऽजयत् ॥२४२४॥

2416. d) St (before corr. in Tr.) SA SL P_{1-3} I_3 °प्राकारा (for °प्रकारा).

2418. a) All Mss. read °ष्ठये° (for °ष्ठयै° suggested with St. Tr.).

2424. c) D P_2 °वत्वे (for °वत्वं).

नृसिंहसेवी निर्हिंसहिरण्यकशिपुप्रदः ।
वराहसमये दत्तगौश्च योऽपूर्ववैष्णवः ॥२४२५॥

भट्टारकमठाभ्यर्णे पूर्णवार्धाविव प्रहिः ।
मठः शृङ्गारभट्टस्य ख्यात्याऽनौचित्ययोज्झितः ॥२४२६॥

सांधिविग्रहिको दार्वाभिसारोर्वीभुजोऽकरोत् ।
अष्टमूर्तेर्जड्डनामा प्रतिष्ठां पुण्यकर्मठः ॥२४२७॥

पुष्पाकरप्रणयभूः सुभगा विभूति-
रेकस्य हन्त करवीरतरोर्द्रुमेषु ।
पुष्पाणि यस्य सफलीकुरुते स्वयं तत्
प्रादुर्भवत् किमपि लिङ्गमनङ्गशत्रोः ॥२४२८॥

विभूत्या संविभक्तेषु भूभुजाऽखिलमन्त्रिषु ।
उत्कर्षकोटिं भुट्टाख्यः परं जल्हानुजोऽर्हति ॥२४२९॥

स्वयंभूः प्रकटीभूय पूजां स्वीकुरुते स्वयम् ।
ज्येष्ठरुद्रो वसिष्ठस्य यस्य वा बालकेश्वरः ॥२४३०॥

सविहारमठोदग्रवेश्मभिः कलुषोज्झितम् ।
तेन तत्र कृतं भुट्टपुराख्यं पुटभेदनम् ॥२४३१॥

नगरेऽपि हरः प्रत्यष्ठापि भुट्टेश्वराभिधः ।
सरश्च मडवग्रामे धर्मविभ्रमदर्पणः ॥२४३२॥

2425. b) D C S′ $P_{1,3}$ °पुच्छिदः; P_2 °पु···दः; I_3 SA °पुदः (for °पुप्रदः suggested with St).

2429. c) D (before suggestion) C S′ P_3 I_3 SA उत्कट्ट°; P_1 उत्कंठ°; P_2 उत्कंठा° (for उत्कर्ष° suggested with St D).

2431. b) All Mss. read °ज्झितः (for °ज्झितम् suggested with St D).

2432. c) St I_3 मडवा° (for मडव°).

नीत्वा प्रतिष्ठां वैकुण्ठमठादि स्वविहारभूः ।
रत्नादेव्या दृढं चक्रे स्वार्थग्रथनसुस्थिरा ॥२४३३॥

रत्नापुरे बहुद्वारमहार्घे निरघो मठः ।
धत्ते सुकृतहंसस्य स्फीतवीतंसविभ्रमम् ॥२४३४॥

मृत्युंजयो राजतेऽस्याः सुधाधौतान् भजन्गृहान् ।
जनस्याऽनित्यतोच्छित्त्यै श्वेतद्वीपं सृजन्निव ॥२४३५॥

गोकुलानां विधातारो गोकुले विहिते तया ।
गणिताः शूरवर्माद्याः सतृणाभ्यवहारिणः ॥२४३६॥

गवामव्याहतस्वैरसंचारचरकाङ्क्षिते ।
तत्र वैतस्ततोयाढ्ये यदपोढामयं वपुः ॥२४३७॥

मुकुन्दस्तत्र साश्चर्यसौन्दर्यौदार्यमन्दिरम् ।
अश्वा गोवर्धनधरः सिद्धो ना विश्वकर्मणः ॥२४३८॥

मठप्रतिष्ठां कृत्वा सा नन्दिक्षेत्रेऽकरोत् स्थितिम् ।
मठान् जयवनाद्येषु स्थानेषु च मनोरमान् ॥२४३९॥

दार्वाभिसारेऽप्युर्वीशसौन्दर्यौदार्यमन्दिरम् ।
स्वनामाङ्कं पुरं चक्रे तथा शक्रपुरोपमम् ॥२४४०॥

2438. SL om. *cd*. —c) D P_{1-3} अश्वाविव°; I_3 अद्वानोव° (for अश्वा गोव°). —d) C सिद्धौ (for सिद्धो). न is suggested with St. Tr. (for ना found in all Mss.).

2439. SL om. this *v*. —a) D St P_{1-3} SA om. प्रतिष्ठा with a *lacuna*. —b) D St P_{1-3} I_3 °रोत् क्षितिम् (for रोत् स्थितिम्). —c) D St P_{1-3} I_3 SA …जय°; C S′ विहारान् य° (for मठान् जय° suggested).

2440. a) SA दार्वासारेप्युर्वी°; C S′ दार्वागारेष्वप्यूर्व्वी°; P_1 दार्वाणरेप्युर्वी°; P_2 दार्वागारे च प्युर्वी°; P_3 दावाभिसारेप्युर्वी°; I_3 दार्वागारेप्युर्वी° (for दार्वाभिसारेऽप्युर्वी°). —b) St C S′ $P_{1,2}$ I_3 °सुन्दरौ° (for °सौन्दर्यौ°).

उद्दिश्योपरतान् मान्यमहत्तरसुखानपि ।
प्रतिष्ठा विविधाश्चक्रे सा राज्ञ्याश्रितवत्सला ॥२४४१॥

एवं सर्वाङ्गमामुक्तालंकृतेरथ स क्षितेः ।
विशेषकाभं भूभर्तृवृषा स्वमकरोन्मठम् ॥२४४२॥

अनुत्सिक्तेन यो दत्तभूरिग्रामो महीभुजा ।
तज्ज्ञैरारोपितः ख्यातिं मुख्यः सिंहपुराख्यया ॥२४४३॥

व्यधात् कारपथेशस्य दौहित्रः सिन्धुजान् द्विजान् ।
निबिडान् द्रविडांश्चाऽत्र प्राक् सिद्धच्छत्रमध्यगान् ॥२४४४॥

किं वा मठादिनिर्माणस्तुत्या तस्य व्यधत्त यः ।
भूयः सग्रामनगरं कृत्स्नं कश्मीरमण्डलम् ॥२४४५॥

जीर्णारण्यसधर्माऽयं कालदौरात्म्यतो भवन् ।
देशो धनजनावासैस्तेन भूयोऽपि योजितः ॥२४४६॥

आरम्भात् प्रभृति क्ष्मापे दीक्षितेऽभीष्टदत्तिषु ।
शिल्पिप्रायैरपि प्रायो मठदेवगृहाः कृताः ॥२४४७॥

सत्कोशांशुकरत्नादौ निरसूयेन भूभुजा ।
साधारणीकृते पौरास्तांस्तांश्चक्रुर्महोत्सवान् ॥२४४८॥

अकाण्डतुहिनापातोदीपाद्यैरप्युपद्रवैः ।
नष्टेषु शालिषु क्षीणं सुभिक्षं तत्र न क्षणे ॥२४४९॥

2442. c) D C S′ P_1 विशेषकामं (for विशेषकाभं).

2445. c) P_{1-3} SA C S′ संग्राम° (for सग्राम°).

2448. c) C S′ P_1 पौरां° (for पौरा°).

2449. c) D (before suggestion) SA_1 (after corr.) C S′ P_3 °लिष्वक्षी°; $P_{1,2}$ I_3 °लिष्टक्षी° (for °लिषु क्षी° found in SA_1 *Prima manu*).

अद्भुतं चाऽभवद् वाचः श्रुता यन्निशि रक्षसाम् ।
केत्वाद्युत्पातजातं च दृष्टं नष्टाश्च न प्रजाः ॥२४५०॥

कोष्ठेश्वरानुजश्छुड्डनामा विहितविप्लवः ।
आहवैर्गूढदण्डैश्च राज्ञा निन्येऽन्तकान्तिकम् ॥२४५१॥

चक्रे विक्रमराजादीन् भूपानुन्मथ्य पार्थिवः ।
प्ररोहं गुल्हणादीनां राज्ञां वल्लापुरादिषु ॥२४५२॥

प्रजेशान् कान्यकुब्जाद्यावजर्येण नृपार्यमा ।
स व्यधाद् भव्यभूभोगवैभवानभिमानिनः ॥२४५३॥

विद्योतमाने निश्चोद्यैर्मन्त्रैस्तत्रैवमेकदा ।
भेजे जीवितदारिद्र्यं दरद्राजो यशोधरः ॥२४५४॥

स भूम्यनन्तरोऽप्यन्तरज्ञो राज्ञोऽतिसेवया ।
विपत्तौ प्रकृतिक्रान्तसंतानश्छिन्त्यतामगात् ॥२४५५॥

निकृत्याऽस्य निजामात्यौ विड्डसीहाभिधो यतः ।
संभुज्य दयितां राज्यमप्रौढतनयेऽग्रहीत् ॥२४५६॥

वशीकृत्य शनैर्देशं नाममात्रनृपं शिशुम् ।
उच्छेत्तुमैच्छद् यावत्तं स जिघृक्षुः स्वयं क्षितिम् ॥२४५७॥

अन्योऽमात्यः पुरस्कृत्य यशोधरसुतं परम् ।
तावत्तेन समं भेजे पर्युकाख्यो विपर्ययम् ॥२४५८॥

2451. [a]) C S′ कौन्धे° (for कोष्ठे°). —[d]) P_2 I_3 SA °न्तिका° (for °न्तका°).

2453. [a]) D (before suggestion) $P_{1,3}$ I_3 प्रजेशाः; C S′ P_2 प्रजेशः; SA प्रजेशा (for प्रजेशान् suggested with St D).

2456. [b]) C S′ °सिहा° (for °सीहा°).

2457. [b]) All Mss. read °शिशुं नृपम् (for °नृपं शिशुम् suggested with St D).

2458. After this *v.* युग्मम् .

कश्मीरान् पृष्ठतः कृत्वा द्वैराज्यं तत्र कुर्वति ।
उत्सृज्य सज्जपालादीन् सर्वकार्यभरक्षमान् ॥२४५९॥

हेवाकप्रतिपत्त्यन्याभिधमौग्ध्यनिरुद्धधीः ।
सर्वाधिकाराद्यारोपान्मन्यमानोऽभिमानिताम् ॥२४६०॥

पर्युकाजयतः साज्जेरप्रौढमनुजं निजम् ।
प्रहिण्वानोऽनुमन्त्रित्वं मन्त्रज्ञोऽप्यभजन् नृपः ॥२४६१॥

अपूर्वमण्डलारब्धावाटोपाद्धामशालिनः ।
क्व सर्वंकषनिष्कम्पप्रतिभाः कार्यवेदिनः ॥२४६२॥

क्व बालबालिशप्रायो नष्टव्यवहृतिर्जनः ।
धिक्परीपाकविषमं स्वाच्छन्द्यं मेदिनीभुजाम् ॥२४६३॥

कार्यापेक्षविपक्षैः स्वैरिच्छन्त्युद्रिक्तताच्छिदाम् ।
सैन्यक्ष्माद्दुर्गकोशादेर्न पश्यन्त्यन्तरज्ञताम् ॥२४६४॥

प्रक्रियामात्रतो मन्त्रं गृह्णन्ति क्षित्यनन्तराः ।
कृतसाहायकैरेव चिन्त्या मित्रमुखा द्विषः ॥२४६५॥

युक्त्यारब्धविधौ तत्र वैरिसाहायकग्रहे ।
क्व वैधेया बकप्रायाः कार्यसंदर्भवेदिनः ॥२४६६॥

2460. [a]) All Mss. read °पत्त्या° (for °पत्त्य° suggested).

2461. [ab]) P_1 om. D C S′ $P_{1,2,3}$ सुज्जे°; I_3 SA सज्जे° (for साज्जे° suggested with St). —[c]) St °ण्वतो°; $P_{1,2}$ °स्वातो°; P_3 °ण्वातो°; S″ °ण्यातो°; I_3 °म्वातो° (for °ण्वानो°). After this *v.* तिलकम् .

2463. After this *v.* युग्मम् .

2464. [a]) D C S′ °क्षैस्तैरि°; P_{1-2} I_3 °क्षैस्त्वैरि° (for °क्षैः स्वैरि°). —[d]) D (before suggestion) $P_{1,3}$ I_3 °र्न···श्यन्त्यन्त°; P_2 °र्न···शक्रन्त°; C S′ °र्न शंसन्त्यन्त°; St SA °र्न···शन्त्यन्त°; St suggests °र्न विशन्त्यन्त° (for °र्न पश्यन्त्यन्त° suggested with D).

2465. [d]) C S′ चित्राचि°; $P_{1,2}$ I_3 चित्र्या मि°; P_2 शन्त्र्या मि° (for चिन्त्या मि°).

2466. [c]) All Mss. read वैधेयान्बकप्रायान् (for वैधेया बकप्रायाः suggested with St).

दरद्राजद्रुमोऽन्योन्यभेदकूलक्षयाच्च्युतः ।
कृष्टुं नाशक्यताऽप्रौढैः स्रोतोभिरिव मध्यगः ॥२४६७॥

पर्युकात् संकटे कार्ये तं तमुत्कोचमिच्छतः ।
स दुग्धघातमादातुमप्यासीदलसक्रमः ॥२४६८॥

पर्युकेण समं विड्डसीहः संधिं निबद्धवान् ।
यथागतं गते साज्जौ कश्मीरेन्द्रेऽग्रहीद्रुषम् ॥२४६९॥

सर्वाधिकारप्रवगाचिरसंचारभूरुहः ।
प्रसङ्गे तत्र शृङ्गारो मृत्युसौहित्यकार्यभूत् ॥२४७०॥

आलक्ष्मकान्तात् सर्वाधिकारोऽस्थादद्वितीयया ।
वृत्त्या ततस्तु शतधा निर्झराम्भ इवाऽभवत् ॥२४७१॥

अन्येऽप्यमात्याः सांमत्याद् भर्तुर्माहात्म्यभागिनः ।
प्रमयं समये तस्मिन् दैवात् किमपि लेभिरे ॥२४७२॥

प्रशंसामानृशंसस्य किं विदध्मो धराभुजः ।
मृतामात्यार्भकापत्यं निधत्ते यः पितुः पदे ॥२४७३॥

प्रवर्तिता त्वमात्यानां भृत्यैः पद्धतिरद्भुता ।
निर्वैलक्ष्याः प्रभोर्लक्ष्मीं जहुः स्वगृहिणीमिव ॥२४७४॥

भूभर्तुः प्राभृतीकृत्य मृतस्य स्वामिनः श्रियम् ।
संतानस्य विभूत्यर्थं कृत्वा कार्यं हि तेऽहरन् ॥२४७५॥

2467. ab) C S′ P_2 I_3 SA °न्योन्यं भे° (for °न्योन्यभे°).

2469. b) C S′ °सिंह:; P_2 °मीह: (for °सीह:). —c) D C S′ सुज्जौ; P_{1-3} I_3 SA सज्जौ (for साज्जौ suggested with St).

2470. a) D P_3 °प्रवरा°; C S′ °प्रवहा° (for °प्रवगा°).

2471. d) P_{1-3} I_3 SA निर्भरा° (for निर्झरा°).

गङ्गाधिपे विश्वनाम्नि विपन्ने रक्षिता परम् ।
एकेन सहजाख्येन सहायानां महार्घता ॥२४७६॥

नाऽध्यारुरोहाऽधिकारं पार्थिवेनाऽर्थितोऽपि यः ।
स्वामिसूनोष्टिष्टनाम्नो बुद्ध्यै साहायकं व्यधात् ॥२४७७॥

निष्ठायामप्रतिष्ठत्वं दृष्ट्वाऽपि प्रभविष्णुभिः ।
धिक्परम्परया भृत्याः प्रवर्ध्यन्तेऽधिकाधिकम् ॥२४७८॥

आसीदाचमनोपयोगि कलशे स्रष्टुर्जगल्लङ्घन-
क्लान्ताङ्घ्रिक्रमहार्यथाऽसुररिपोस्त्रैस्रोतसं यत्पयः ।
शंभुस्तन्निदधे स्वमूर्धनि जडेऽप्येकप्रयुक्तादृतौ
स्युः सर्वेऽप्यवशा गतानुगतया गाढादराः स्वामिनः ॥२४७९॥

सुज्जिनिर्वासनप्राप्तप्ररोहो दुर्नयद्रुमः ।
साज्जिजाड्यकृताप्यायः क्रमेणाऽऽसीत् फलोन्मुखः ॥२४८०॥

द्वित्राः समाः समन्युः स विड्डसीहस्ततोऽभवत् ।
अकुण्ठराज्याद्युत्कण्ठं दूतैरकृत लोठनम् ॥२४८१॥

दूरादखण्डितोत्थानः शूरमाश्रित्य भूपतिम् ।
जीवन् कृषिवणिज्यादिकर्मणा स सबान्धवः ॥२४८२॥

दरदां मन्त्रिणां जातज्ञातेयैरभियोगभाक् ।
चक्रेऽलंकारचक्राद्यैर्डामरैः सह चक्रिकाम् ॥२४८३॥

2477. d) D (after suggestion) C S′ वृद्ध्यै (for बुद्ध्यै).
2478. d) St $P_{2,3}$ I_3 प्राव° (for प्रव°).
2480. a) P_2 I_3 SA सुज्जिर्नि° (for सुज्जिनि°). —c) D suggests सौज्जि° (for साज्जि°).
2482. a) P_2 I_3 SA दूरा…खण्डि°; D C S′ P_{1-3} दूरादाखण्डि° (for दूरादखण्डि°). —c) C P_2 I_3 SA जीवत्कृ° (for जीवन् कृ°).
2483. After this *v.* $P_{2,3}$ add तिलकम् (for युग्मम्).

सोऽप्यद्रिदुर्गस्वाम्यस्य प्रथमप्रस्थितौ सुहृत् ।
क्षुद्रो जनकभद्राख्यः पार्श्वे लिप्सोर्व्यपद्यत ॥२४८४॥

कर्णाढकादावभवत् स्थाने स्थाने विलोक्य तम् ।
प्रस्थितं कस्यचिद् द्रोहे बुद्धिः कस्याऽपि साधुता ॥२४८५॥

तं तथा विपुलारम्भमपि शाठ्यादसंभ्रमम् ।
प्रविविक्षुमुपैक्षिष्ट कौसीद्यानुद्यमो नृपः ॥२४८६॥

पोषिते प्रेषितश्रीकैरुत्पिञ्जे विप्लवैषिभिः ।
अथोदयद्वारपतिः प्रैषि विश्वंभराभुजा ॥२४८७॥

संगृह्णता चमूस्तेन पुरे शंकरवर्मणः ।
प्राप्तोऽलंकारचक्रस्य पार्श्वमश्रावि लोठनः ॥२४८८॥

अपि विग्रहराजाख्यः सूनुः सुस्सलभूपतेः ।
भोजः सल्हणजन्मा च श्रुतौ तेन सहागतौ ॥२४८९॥

अथोपहत्या उत्थान एव तेषां स सत्वरः ।
मार्गं बहुदिनोल्लङ्घ्यमेकेनाऽह्ना व्यलङ्घयत् ॥२४९०॥

सयूथ्यकन्थाग्रथनासिद्धेर्यातो विधेयताम् ।
तदास्कन्दहतस्पन्दः स पलायिष्ट डामरः ॥२४९१॥

2484. a) C S′ $P_{1,2}$ I_3 SA साप्याद्रि°; P_3 सौम्याद्रि° (for सोऽप्यद्रि°).
2485. a) D C S′ कर्णाटका°; St $P_{1,2}$ I_3 कर्णाहका° (for कर्णाढका° cf. *v.* VIII. 2525=the modern *Karnāh* being the northern part of the Muzaffarabad district and the Kṛṣṇagaṅgā valley).
2486. ab) P_3 om.
2488. a) All Mss. read च मूर्तेन (for चमूस्तेन suggested with St D).
2489. c) All Mss. read सुल्हण° (for सल्हण° suggested with St). —d) P_1 °गतः; P_2 I_3 SA °गता (for °गतौ).
2490. a) D St P_{1-3} I_3 °पह···त्थान; C S′ °पचित उत्थान (for °पहत्या उत्थान suggested with St, cf. *v.* VIII. 2513).

सिन्धोर्मधुमतीमुक्ताश्रियोरन्तःस्थितं ततः ।
शिरश्शिलाभिधं कोट्टमथ तैरधिशिश्रिये ॥२४९२॥

गहने ब्रुडितः कोट्टे स्थितः किं वा स इत्यसौ ।
न निश्चिकाय द्वारेशो भ्राम्यन् दीर्घासु भूमिषु ॥२४९३॥

अथोपलब्धतद्दुर्गारोहणेऽस्मिन्नशङ्क्यत ।
दैवेनाऽपि न भूर्भर्तुः प्रभावो निष्पराभवः ॥२४९४॥

उत्थानोन्मुखतां सर्वेऽप्युत्पिञ्जे तत्र दस्यवः ।
पाल्वलास्तिमयो वर्षपृथक्कृत इवाऽभजन् ॥२४९५॥

तैस्त्रिल्लकादिभिर्गूढवैकृतैरथ लोठनः ।
पार्थ्वीहरिः पुनश्चक्रे मायाचतुरचाक्रिकः ॥२४९६॥

पुरग्रामादिदग्धारमसाध्यमथ धावताम् ।
पदे पदे कृच्छ्रगतं स्वपक्ष्यास्तमरक्षिषुः ॥२४९७॥

दिक्चक्रे नियतेर्भ्राम्यन् दृश्यादृश्यः स सर्वतः ।
कल्पात्ययोदयी ब्रह्मपुत्रः केतुरिवाऽभवत् ॥२४९८॥

श्रान्तैरमात्यैर्निर्बद्धे संधौ कालानुरोधतः ।
मेने मडवराज्योर्वी हारितेवाऽखिला जनैः ॥२४९९॥

2492. b) St °श्रिया अन्तः°; D C S′ P_3 °श्रियमन्त°; $P_{1,2}$ I_3 SA SL °श्रियरन्त°; SG *sec. manu* °श्रिय अन्ते (for °श्रियोरन्तः° suggested with St. Tr.).

2494. a) All Mss. read °पालब्ध° (for °पलब्ध° suggested with St. Tr.).

2495. c) C S′ पाला°; $P_{1,3}$ पाल्वा° (for पाल्व°). —d) All Mss. read °भवन् (for °भजन् suggested with St D).

2496. b) St. Tr. emends लोष्टकः or its prakritized form लोठक (for लोठनः, cf. *vv.* VIII. 2912, 2799 and St. Tr. fn. of this *v.*). —c) D P_{1-3} I_3 SA पा···हारिः; C S′ पालहारिः (for पार्थ्वीहरिः suggested with St, cf. *vv.* VIII. 2748, 2759, 2793, 2837). —d) All Mss. read °चाक्रिकैः (for °चाक्रिकः suggested with St).

2497. a) D C S′ °दग्ध्वार° (for °दग्धार°).

2499. a) All Mss. read °निर्बन्धे (for °निर्बद्धे suggested with D).

असंवृत्तप्रतीकारतयाऽऽरोहत्सु वैरिषु ।
तदन्तरेऽथ संमन्त्र्य धन्यं प्रास्थापयन्नृपः ॥२५००॥

तत्स्कन्धारोपिते कार्ये व्रीडां गच्छेत् तटस्थताम् ।
विपर्यासमथ द्वाराधीश इत्यभ्यधाज्जनः ॥२५०१॥

भिक्षुर्मल्लार्जुनस्त्वासीदेक एव त्रयस्त्वमी ।
संहता हन्त दुस्साधा दध्युश्चेत्यखिलाः प्रजाः ॥२५०२॥

द्वाराधिपस्त्वहेवाकव्यवहारो महीपतेः ।
सिद्धिं स्वस्याऽप्रसिद्ध्याऽपि वाञ्छन् ह्युद्यमोऽभवत् ॥२५०३॥

एकाकी यः किल न भजते मूढतां भर्तृकार्ये
नौदासीन्यं श्रयति च रुषा बद्धधीने च तस्मिन् ।
निर्हेवाकव्यवहृतितया साध्यसिद्धिं किलेच्छं-
स्तादृङ्मन्त्री प्रभवति परं नाऽल्पपुण्यस्य राज्ञः ॥२५०४॥

पद्मचन्द्रे मृते तस्याऽनुजं राजोपवेशने ।
न्यधाद् यं षष्ठचन्द्राख्यं सोऽप्यारब्ध्यै विनिर्ययौ ॥२५०५॥

द्विबाहुकाद्यो मुख्याश्चारणैः सह गायकैः ।
धन्यमेवाऽन्वयुर्बाह्याश्चाऽन्ये राजोपजीविनः ॥२५०६॥

धन्यादिषु तिलग्रामं कोटिसिन्धुतटाश्रयम् ।
श्रयत्स्वरुध्यद् द्वारेशो द्रङ्गस्थः पृष्ठपद्धतीः ॥२५०७॥

2501. [a]) $P_{2,3}$ I_3 SA तत्स्कन्दा° (for तत्स्कन्धा°).

2506. [b]) D P_3 मुख्या···; St मुख्य···:; P_2 SA मुखः; I_3 मुख्यः··· (for मुख्याश्चारणः). —[c]) P_1 धान्य° (for धन्य°).

2507. [b]) D C S′ P_1 कोटि° (for कोट°). —[c]) D P_{1-3} I_3 SA श्रय···द्द्वा°; C S श्रयत्स्वगच्छद् द्वा°; St. Tr. suggests श्रयत्स्ववधानाद्द्वा° (for श्रयत्स्वरुध्यद् द्वा° suggested).

हठप्रवेशायोग्याजिमुख्यहेवाकवर्जितः ।
शोषयन् द्विषतो धैर्यगम्भीरं स व्यवाहरत् ॥२५०८॥

कुठारिकादिभिः कारुवृन्दैर्मन्दिरपद्धतीः ।
धन्यो मधुमतीतीरे नगरस्पर्धिनीर्व्यधात् ॥२५०९॥

निर्ध्वान्तं द्रुमसंबाधं सनिकेता वनस्थलीः ।
कटकं सर्वभोगाढ्यं शक्तः परिवृढोऽकरोत् ॥२५१०॥

देशे भूरितुषारोग्रहिमतौं भाग्यसंपदा ।
भूभर्तुरभियोग्यैव भूरभूद् भानुभूषिता ॥२५११॥

भुवनाद्भुतसंभारप्रेषणं विजयैषिणः ।
द्वैराज्यमीलिताशेऽपि काले राज्ञो न खण्डितम् ॥२५१२॥

उत्थान एवोपहतिं भये यास्यत्यगात् परम् ।
भारोढिपीडितग्राम्याक्रन्दः क्षान्तिचरूपमाम् ॥२५१३॥

दीर्घप्रवासनिर्वेदाच्चलितान् दर्शयन् रुषम् ।
स्थास्नूंश्च तोषयन् दायैः स्थैर्यं निन्ये नृपश्चमूः ॥२५१४॥

इत्थं त्रिचतुरान् मासांस्तिष्ठद्भिरपि निष्ठुरैः ।
नैवाऽऽदातुमशक्यन्त कटकैः कोट्टसंश्रयाः ॥२५१५॥

तेषां हि वीवधासारनिरोधादीनि दृप्यताम् ।
अप्रियाणि न जातानि दैन्यदायीनि कानिचित् ॥२५१६॥

2508. S′ om. this *v.*

2511. [b]) $P_{1,2}$ °मतौ; I_3 °मन्तौ (for °मतौं).

2512. [b]) C S′ दिग्ज° (for विज°).

2513. [a]) SA I_3 एवौपह···भये; D C S′ P_1 एवोपहतभये; P_2 एवौपहतभये; P_3 एवोपह···भये (for एवोपहतिं भये suggested with St). —[d]) D SA I_3 क्रन्दं क्षान्तिचरू°; C S′ P_{1-3} क्रन्दं क्षान्तिचमू° (for क्रन्दः क्षान्तिचरू° suggested with St, cf. *v.* VII. 15).

2514. [b]) C S′ $P_{2,3}$ I_3 °श्चलितां; SA °चलितां; P_1 °च्चलितां; St suggests °चलिता (for °च्चलितान्). —[c]) St suggests स्थास्नूश्च (for स्थास्नूंश्च).

2515. [d]) C S' $P_{1,2}$ I_3 SA °संशयाः; P_3 °संश्रयैः (for °संश्रयाः).

चिकीर्षवस्तुषारान्ते स्वविभूतिप्रकाशनम् ।
तस्थुरङ्कुरितोल्लासाः पर्वता इव डामराः ॥२५१७॥

कृषिं कृषीवलैर्वेदपाठमुत्सृज्य च द्विजैः ।
उत्पिञ्जसज्जैर्ग्रामेषु सर्वतः शस्त्रमादधे ॥२५१८॥

प्रतीक्षमाणाः प्रालेयप्रलयं मार्गभूभृताम् ।
दारदास्तुरगानीकैः सज्जैस्तस्थुर्जिगीषवः ॥२५१९॥

मिहिकासंहतेः कालतूलतल्पकृतेर्दधत् ।
पातभीतिं राजसेनाजनः शश्वदवेपत ॥२५२०॥

इत्थं प्रत्यर्थिसामर्थ्यपरमार्थापरीक्षणात् ।
क्ष्माभृन्मिथ्यैवमारेभे संदेहं च जयेऽभजत् ॥२५२१॥

वैदग्ध्यदिग्धमनसामयमेक एव
कोऽप्यस्ति वञ्चनविधेरुचितः प्रकारः ।
येनाऽऽत्मना किल विशङ्कितशक्तयस्ते
मुग्धेऽपि वैरिणि विचारहतोद्यमाः स्युः ॥२५२२॥

प्रवादमात्रसाराद्यस्त्रसेत् परिकरादरेः ।
स्वयैव तस्य विघ्न्येत सिद्धिश्चिन्तान्धया धिया ॥२५२३॥

विध्येदाशु शिलीमुखैः प्रवितरेत् पत्रैरवस्कन्दनं
बध्नीयात् तदिदं गुणैः परिकरैर्मिथ्या प्रसिद्धैरिति ।
स्याच्चेदम्बुरुहं द्विपस्य भयकृच्चिन्तासहैः साहसं
प्रत्यूहेत ततो निजैरपघनैरप्येतदुन्मूलने ॥२५२४॥

2518. a) C S' P_1 I_3 कृषं (for कृषिं). —d) D I_3 °ददे (for °दधे).

2520. a) C S' D P_{1-3} I_3 SA हिमिका° (for मिहिका° found in SG *sec. manu*). —cd) All Mss. read जनो राजसेना (for राजसेनाजनः suggested).

लोठनाद्यैर्हि कर्णाहान्निस्तीर्णैस्तैः कथंचन ।
प्राप्तेऽलंकारचक्रेऽग्रे राज्यमज्ञायि निर्जितम् ॥२५२५॥

मिथ्यैव ग्रथिता कन्था स्वयूथ्यैः कथमन्यथा ।
तस्मिन्नमन्दमास्कन्दं धावन् द्वाराधिपो ददौ ॥२५२६॥

प्रत्यवस्थित्यसामर्थ्यात् ततः कोट्टं व्यसर्जयत् ।
स राजबीजिनस्तांश्च परेद्युः स्वयमन्वगात् ॥२५२७॥

कोट्टाद्रिः सलिलस्याऽन्तः कृशोधः पृष्ठदैर्घ्यभाक् ।
स तैर्वैसारिणग्रासव्यग्रो बक इवैक्ष्यत ॥२५२८॥

निस्सामर्थ्यं तद्विलोक्य गजागारमिवाऽगजम् ।
तत्यजुर्विजयाशंसां भयं चोदवहन् हृदि ॥२५२९॥

ततः शरैर्दृषद्वर्षैर्बाध्याश्चेतो विरोधिनः ।
अर्णसो रक्षणमितो रक्ष्या यन्त्रोपला इतः ॥२५३०॥

इत्थं स तैरभिदधद् धैर्यमादाय डामरः ।
मेने स्वगुप्तिमात्रार्थी न युद्धे बद्धनिश्चयः ॥२५३१॥

ततः कन्दलितास्कन्दे तिलग्रामे द्विषद्बले ।
प्रतीकाराक्षमे दस्यौ ते चिन्ताक्षामतां दधुः ॥२५३२॥

विस्रुताविस्रुतप्रज्ञासौष्ठवो लोठनः पुनः ।
डामरं कृत्यसंपूर्णमगूढं तमगर्हत ॥२५३३॥

2525. a) For कर्णाह cf. fn. *v.* VIII. 2485.

2528. b) P_{1-3} I_3 SA कृषोधः; C S′ कृशौघः (for कृशोधः). —c) P_{1-3} I_3 SA °सारण° (for °सारिण°).

2530. a) C S′ $P_{1,2}$ I_3 SA °द्विष° (for °दृष°).

2531. ab) D $P_{1,3}$ I_3 °भिरुद्धैर्या···दा°; C S′ °भिरुद्धैर्य्यावदा°; SA °भिदद्धैर्यादा°; P_2 °भिरुद्धैयादा°; St suggests °भिदधद्धैर्यादा° (for °भिदधद् धैर्यमादा° suggested). After this *v.* युग्मम् .

2532. b) D P_1 I_3 तिला° (for तिल°). —d) C S′ °क्षम° (for °क्षाम°).

2533. a) D C S′ P_{1-3} विस्रावापि स्रुत°; I_3 विस्रुवापि स्रुत°; St विस्रवाविस्रुत° (for विस्रुताविस्रुत° suggested).

भोजस्तूद्विजितं यन्नो द्रोहो रोहेदिति ब्रुवन् ।
रुद्ध्वा पितृव्यं तं व्याजस्तुत्या नित्यमुपाचरत् ॥२५३४॥

विमुखे लोठनेऽकुण्ठशाठ्यस्तस्य तु सान्त्वनैः ।
मेने मन्त्रज्ञतां किंचित् सोऽवर्तिष्ट च संविदि ॥२५३५॥

हन्यान्मां भूभृदित्येष यातेष्वेतेषु संत्यजेत् ।
नाऽस्मानुक्त्वेत्यरौत्सीत् स पितृव्यं गमनार्थनात् ॥२५३६॥

त्वय्यस्मासु च सर्वेषु वेष्टितेषूत्कटा द्विषः ।
पृष्ठकोपमसंभाव्य कुतश्चिन्निश्चलोद्यमाः ॥२५३७॥

यद्यद्विदध्युः सिध्येत् तत्तदेकं त्यज मामितः ।
अन्याँल्लवन्यानानीय दरदो वा जवेन वः ॥२५३८॥

बन्धनं त्वपनेष्यामि युक्तमित्युक्तवांश्च तम् ।
डामरं विदधे किंचिदिव सांमत्यमाश्रितम् ॥२५३९॥

विमोक्ष्यामि क्षपायां त्वामद्य श्वो वेति तं ब्रुवन् ।
स त्वसंक्षीणदाक्षिण्यो विप्रलेभे प्रतिक्षणम् ॥२५४०॥

अध्वरोधे सुदूरस्थैर्यथावदकृतेऽरिभिः ।
बाह्यग्रामाहृतैरन्नैस्ते त्वहान्यत्यवाहयन् ॥२५४१॥

2534. a) D C S′ P_1 I_3 SA भोजं तू°; P_2 भोजे तू°; P_3 भोज तू°; SR भोजो तू° (for भोजस्तू° suggested with St).

2535. a) D C S′ कुण्ठ° (for °[अ]कुण्ठ°). —b) D C S′ P_{1-5} I_3 सान्त्वने; SA सान्त्वने: (for सान्त्वनै: suggested with St). —d) C S′ °त्समवार्तिष्ट; SA °सवर्त्तिष्ट च; D P_{1-3} I_3 संवर्तिष्ट च (for °सोऽवर्तिष्ट च suggested with St).

2537. b) C S′ °त्कटान् (for °त्कटा).

2538. d) D C S′ P_{1-3} I_3 वा यवेन; SA वा···येन (for वा जवेन found in SG *sec. manu*).

2539. a) D व्यप° (for त्वप°).

2540. b) P_{1-3} I_3 SA ह्यो (for श्वो). —c) D $P_{1,3}$ I_3 SA सत्त्व° (for स त्व°).

2541. c) D C S′ $P_{1,2}$ S′ °रत्नै° (for °रन्नै°).

दुरुदर्कमथाऽऽशङ्क्य समयं ते व्यजिज्ञपन्।
धन्यादयो हि तैः संधिर्विधेय इति भूपतिम् ॥२५४२॥

तैस्तैर्निमित्तैः संधानमविधेयं विदन् नृपः।
तानादिदेश कर्तव्यं कोट्टाट्टालकवेष्टनम् ॥२५४३॥

संदिदेश च दायादा वञ्च्येरन् ख्यातिमागताः।
निजास्पदे ताञ्जहति दत्तोत्कोचेऽथ डामरे ॥२५४४॥

भूत्वा कठोरेऽप्यारम्भाऽनिष्ठा निस्सौष्ठवा ध्रुवम्।
क्रियातिपत्त्युपालम्भैर्यास्यामोऽनुशयं विशाम् ॥२५४५॥

नाऽस्त्यक्षद्धर्षदेवश्चेत् सत्ताहान्युद्यमं ततः।
दुग्धप्रवाहं प्राप्स्यत् स श्रुत्वेत्यन्योऽपि तप्यते ॥२५४६॥

प्राप्तव्यं प्राप्तवान् सर्वो निजैः कृत्यैः शुभाशुभैः।
क्रियातिपत्तिर्लोकेन त्रैलोक्यं तु मुखेऽर्प्यते ॥२५४७॥

पादेषु पक्षेषु च सत्सु नोर्व्यां
न व्योम्नि वा पक्षपिपीलकस्य।
पङ्ग्वन्धवच्चङ्क्रमणं तु गर्ते
किं संपदा स्यान्नियमे गतीनाम् ॥२५४८॥

2542. c) St °योहितैः (for °यो हि तैः).

2544. b) C S′ St $P_{2,3}$ I_3 वञ्चेरन् (for वञ्च्येरन्).

2545. a) D P_2 I^6 SA कठो…प्यार°; C कठोरोऽप्यार°; P_3 कठोर…र°; S′ कठोरोऽथार° (for कठोरेऽप्यार°). —b) SA P_{1-3} I_3 °ष्टान्नि° (for °ष्ठानि°). —d) D C S′ P_1 °स्यामोऽसंशयं; SA P_2 I_3 °स्यामो…शयं; P_3 स्यामोविषयं (for स्यामोऽनुशयं suggested with St).

2546. c) D C S′ SA प्राप्स्यन्स (for प्राप्स्यत् स).

2547. c) C S′ P_2 °र्लोकेपि; St °र्लोकेत्र°; SA °लोके…°; P_1 °नांके… (for °र्लोकेन).

2548. c) D C S′ P_{1-3} I_3 SA गर्भे (for गर्ते found in SG *sec. manu*).

सहस्रपादस्य गतेर्निमित्त-
मनूरुभावेऽप्यरुणः प्रजातः ।
तस्याऽभविष्यद् यदि पादयुग्मं
ततोऽधिकं तत्किमिवाऽकरिष्यत् ॥२५४९॥

उपेक्ष्य साक्षितां तस्मात् कृत्स्नं कोट्टं विवेष्ट्यताम् ।
प्रयातु तत्रैवाऽस्माकं तेषां च पुरुषायुषम् ॥२५५०॥

अविश्रान्तो वातो दहन इव शोषं जनयति
प्रसक्तं सातत्याद् दलयति कुलाद्रीनपि जलम् ।
प्रसूते कृत्येषु व्यवसितिरनिर्व्यूढसुदृढा
फलावाप्तिं लोके प्रतिकलमसंभाव्यविभवाम् ॥२५५१॥

क्रूरां नरपतेराज्ञां श्रुत्वा धन्यादयस्ततः ।
कोट्टप्रतोलीं कूलं तं त्यक्त्वाऽप्यारुरुहुर्जवात् ॥२५५२॥

कथं युद्धं विधास्यन्ति कथं स्थास्यन्ति वेति तान् ।
शरान् किरन्तः कोट्टस्था यावत् प्रैक्षन्त कौतुकात् ॥२५५३॥

अधःस्थोऽप्यूर्ध्वगान् युद्धैर्निष्पीड्य निविडैर्व्यधात् ।
धन्यः प्रदेशं तावत् तं निकेतैः पत्तनोपमम् ॥२५५४॥

अविश्रान्तैस्ततः संख्यैरसंख्येयश्चमूक्षयः ।
प्रतिक्षणं प्रववृते सैन्ययोरुभयोरपि ॥२५५५॥

2551. a) C S′ संयो°; P_2 सोयो; St D $P_{1,3}$ I_3 सोयं (for शोषं suggested). —b) All Mss. read प्रसक्ति (for प्रसक्तं suggested).

2553. d) All Mss. read प्रैक्ष्यन्त (for प्रैक्षन्त suggested with St).

2554. a) All Mss. read अधः सो° (for अधःस्थो° suggeted with St). After this *v.* युग्मम् .

परेद्युः शारदां दृष्ट्वा संप्राप्तो गर्गनन्दनः।
संक्रन्दनपुरीपौरवृद्धिं योधैर्हतैर्व्यधात् ॥२५५६॥

अलंकाराभिधो बाह्यराजस्थानाधिकारभाक्।
अधृष्योऽमानुषैर्युद्धैर्विरुद्धान् बहुधाऽवधीत् ॥२५५७॥

क्व भूधरचरैः स्पर्धा वसुधातलचारिणाम्।
तथाऽपि पृतनायन्त्रानन्त्यं चिन्त्यमचिन्त्यकृत् ॥२५५८॥

अल्पीयांसः कोट्टनिष्ठा भूयिष्ठाः कटकाश्रयाः।
अतः पूर्वं बहून् घ्नन्तोऽप्यासन् कृत्याल्पका क्षताः ॥२५५९॥

श्लिष्टद्वाराररिपुटं द्वित्रैः पीडितमाहवैः।
मीलिताक्षमिव त्रासात् ततो दुर्गमजायत ॥२५६०॥

गोप्तृभेदान्तरद्वैधमुखच्छिद्रानुसारिणः।
धन्यादीन् वीक्ष्य विश्वासं कोट्टस्था नोपलेभिरे ॥२५६१॥

निद्राच्छेदार्थमन्योन्यं क्रोशन्तो नाऽस्वपन्निशि।
स्वपन्तोऽह्नि तु निश्शब्दशून्यं कोट्टमदीदृशन् ॥२५६२॥

निशासु तत्तत्पृतना यामतूर्यरवैरपि।
चटकाः कोटरगता मेघशब्दैरिवाऽत्रसन् ॥२५६३॥

अहर्निशं भ्रमन्तीभिर्नौभिः संरुद्धपाथसः।
तान् समभ्रमयन् सर्वप्रकारं राजसैनिकाः ॥२५६४॥

2556. cd) All Mss. except SG *sec. manu* read °पौरयौधैर्वृद्धिं (for °पौरवृद्धिं योधै°).

2558. c) $P_{2,3}$ °यान्त्या° (for °यन्त्रा°).

2559. c) C S' 'वैंऽवरुन्धन्तो° (for °र्वं बहून् घ्नन्तो°).

2564. c) SA P_{1-3} ससंभ्र° (for समभ्र°).

ते रुद्धपाथसस्तर्षशोषं किंचिद् विषेहिरे।
निस्संचारास्तु संक्षीणे भोक्तव्ये क्लैब्यमाययुः ॥२५६५॥

बुभुक्षवः क्ष्मापयोग्यान् भोगान् भाग्योर्जितांस्ततः।
कदन्नैर्नृपदायादा अशनाशंसनं व्यधुः ॥२५६६॥

दूरे स्पर्धास्तु निस्तीर्णाः क्षुधितास्तेऽधिकं व्यधुः।
भूभर्तुर्भोगभागिभ्यो भृत्येभ्योऽप्यन्वहं स्पृहाम् ॥२५६७॥

व्यूढेष्ववसादु पर्याप्तमकार्यमिति भाषिणम्।
भोजं व्यधान्मध्यशृङ्गे दुर्गस्याऽथ स तं पृथक् ॥२५६८॥

एकस्य वार्धकाद् वेश्यापुत्रत्वादपरस्य च।
जानन्नयोग्यतां मेने द्वैराज्यार्हं तमेव सः ॥२५६९॥

विनाऽमुं चाऽनयोः सम्यक्संरम्भेरन्न वैरिणः।
इति मिथ्या प्रथां निन्ये तद्विनिस्सरणं बहिः ॥२५७०॥

कान्ताऽलंकारचक्रस्य काङ्क्षन्ती क्षयमित्वरी।
चक्षूरोगात् षष्ठचन्द्रे सान्द्रस्नेहार्द्रतां गता ॥२५७१॥

बहिराभ्यन्तरं भेदं नयन्ती मन्त्रमाययौ।
साल्हणेः कर्णसरणिं सर्वमन्विष्यतोऽन्वहम् ॥२५७२॥

रागध्वान्तान्वितधियः प्रतिभेदभयेन सः।
तस्य प्रकाशयन्नेनां गन्तुं तु प्रार्थनां व्यधात् ॥२५७३॥

2565. b) C S′ °दोषं; SR P_2 °रोषं (for °शोषं). St C $P_{1,3}$ I_3 कंचि°; D P_2 केचि° (for किंचि°).

2566. b) I_3 P_3 भोग्यान् (for भोगान्). —d) All Mss. read °शंसनैः (for °शंसनं suggested with St).

2568. a) All Mss. except SL read व्यूहे° (for व्यूढे°).

2572. After this *v.* युग्मम्.

2573. c) SA P_2 प्राकाश° (for प्रकाश°). D P_1 °न्नैनां (for °न्नेनां).

क्षमावाञ्छिक्षितोपेक्षो मैत्रीस्थैर्ये मुदं भजन् ।
नागः सागस्यपि दधे बोधिसत्त्व इव क्रुधम् ॥२५७४॥

प्रियामन्युः सरागेण मृत्युहेतुर्महानपि ।
हृदि विस्मर्यते पृष्ठे शरभेणेव वारणः ॥२५७५॥

अथ प्रस्थापितो भोजः सुतारिशिबिरान्तरात् ।
यातप्रायोऽप्यलंकारतनयेनाऽनुयायिना ॥२५७६॥

द्रोहेच्छया भयाद् वाऽपि ध्वस्तसत्त्वेन सत्वरम् ।
व्यावृत्त्याऽऽरोपितो भूयः कोट्टस्थस्याऽन्तिकं पितुः ॥२५७७॥

निर्भर्त्स्य पुत्रं गन्ताऽसि श्वो निशीत्यभिधाय तम् ।
छन्नमस्थापयत् सोऽह्नि यात इत्यखिलान् वदन् ॥२५७८॥

प्रोच्चल्यानिश्चयादेकः प्रायाद् द्वौ श्वः प्रयास्यतः ।
बोधितैरथ धन्याद्यैरजागार्यखिलैर्निशि ॥२५७९॥

प्रस्थास्नुः स निशीथेऽथ कोट्टाट्टालाद् व्यलोकयत् ।
जाग्रतः कटके सर्वान् परितो दीपितानले ॥२५८०॥

प्रकाश्य वह्निना दुर्गं प्रतोलीनिर्गतो यथा ।
पिपीलकोऽप्यलक्ष्यत्वं नोन्मुखानां द्विषां व्रजेत् ॥२५८१॥

ज्वालाप्रकाशचाञ्चल्याद् विलोला इव रक्षिताः ।
न्यषेधन्मूर्धकम्पेन साल्हणिं साहसाद् गृहाः ॥२५८२॥

2576. b) C SA P_2 I_3 °शिविरा° (for °शिबिरा°).

2577. After this *v.* युग्मम् .

2578. a) SA निभर्त्स्य (for निर्भर्त्स्य). —c) C S′ च्छन्न°; $P_{1,2}$ श्छन्न° (for छन्ने°).

2582. a) All Mss. [P_2 °प्रकाश्यं चा°] read °प्रकाशं चा° (for °प्रकाशचा° suggested with St D).

तद्धन्तुमक्षमं क्षिप्तं क्षपाप्रान्ते स डामरः ।
अधोऽवातीतरच्छ्वभ्रमालिङ्गितवटाकरम् ॥२५८३॥

क्षेमराजाभिधानेन डामरेशेन सोऽन्वितः ।
शिलां वितर्दिकातुल्यामध्यास्त श्वभ्रमध्यगाम् ॥२५८४॥

आरुह्याऽऽसनमात्रे तां पर्याप्तां पातभीतितः ।
निर्निद्रौ पञ्चरात्रीस्तावत्यवाहयतामुभौ ॥२५८५॥

निर्वर्तितप्राणयात्रौ करस्थैः सक्तुपिण्डकैः ।
तत एव व्यजहतां विष्ठां नीडादिवाऽण्डजौ ॥२५८६॥

अव्यक्तव्याकृती चित्रासूत्रिताविव तौ स्थितौ ।
वीक्ष्याऽरिकटके लक्ष्मीं पृष्ठाद् विस्मयमीयतुः ॥२५८७॥

तयोराश्रीयत स्फीतशीतविस्मृतिकारिणा ।
जयसिंहप्रतापाग्निसंतापेनोपकारिता ॥२५८८॥

षष्ठेऽह्नि तत्र निश्शेषीभूतभोक्तव्ययोरथ ।
क्षते क्षार इवाऽऽरम्भि तुषारं वर्षितुं घनैः ॥२५८९॥

अगृह्यतोचिते दन्तवीणावाद्योद्यमे तथा ।
शीतासादितसादेन पाणिपादेन सुप्तता ॥२५९०॥

तावचिन्तयतामद्य क्षुच्छीताभिहतौ ध्रुवम् ।
पतिष्यावोऽरिकटके पाशबद्धाविवाऽण्डजौ ॥२५९१॥

2583. [a]) All Mss. read °क्षमः (for °क्षमं suggested with St). —[c]) C S′ P_2 °च्छभ्र°; P_1 I_3 °च्छुभ्र° (for °च्छ्वभ्र°).

2584. [c]) D (before suggestion) P_{1-3} वैतर्दिका° (for वितर्दिका°).

2589. [c]) St D C S′ P_2 क्षतक्षार°; I_3 क्षतं क्षार° (for क्षते क्षार°).

2590. [a]) C S′ दत्त° (for दन्त°). —[d]) SA P_{1-3} I_3 पादि° (for पाणि°).

कं पूत्कुर्वः कस्य वावां विदितौ यो विनिर्हरेत् ।
इतः पङ्कान्तरामग्नौ यूथपः कलभाविव ॥२५९२॥

विषमस्थावथेत्थं तौ नक्तमभ्यर्थ्य डामरः ।
आरोप्य रज्ज्वाऽऽवसथे शून्ये स्थापयति स्म सः ॥२५९३॥

कृतशीतप्रतीकारौ पलालानलसेवनैः ।
दुःखं व्यस्मरतां तत्र निद्रया चिरलब्धया ॥२५९४॥

ततोऽप्यभ्यधिका व्यापद् भेजे लोठनविग्रहौ ।
अचक्षुष्यौ जनात् स्निग्धां गिरमप्यापतुर्न यौ ॥२५९५॥

यवकोद्रवपूपादि तयोः सतुषमश्नतोः ।
गात्रैर्वस्त्रैश्च वैवर्ण्यं शुद्धिवन्ध्यतया दधे ॥२५९६॥

धन्योऽलंकारचक्रस्य क्षीणभोज्यस्य सर्वतः ।
स्वीचकाराऽन्नदानेन तुल्यौ होलयशस्करौ ॥२५९७॥

ततः स दूतैर्विक्रेतुमङ्गीचक्रे नृपद्विषः ।
बुभुक्षाक्षुभितो भृत्यभेदभीतश्च डामरः ॥२५९८॥

दुस्तरव्यापदुद्रेकद्रुतसत्त्वतयाऽत्यजत् ।
पापोपलिप्तं तच्चित्तमधर्माकीर्तिसाध्वसम् ॥२५९९॥

भूपतेर्विद्विषच्छेषस्थापनात् स्वस्य रक्षणम् ।
ख्यातिशुद्ध्यै चिकीर्षुश्च कुशकाशावलम्बनम् ॥२६००॥

2592. c) All Mss. read ततः (for इतः suggested with D).

2595. c) C S′ P_3 जनान् स्निग्धौ; P_2 जनान्स्निग्धान् ; SA जनान् स्निग्धां (for जनात् स्निग्धां).

2597. b) SA P_2 °भोजस्य (for °भोज्यस्य).

2599. c) All Mss. read °लिप्तत° (for °लिप्तं त° suggested).

भृत्यस्योदयनाख्यस्य धिया प्रच्छादितं तथा ।
ररक्ष साल्हणिं भोजं द्वौ तु दातुं स तत्वरे ॥२६०१॥

तं विना च तयोर्भूपाद् दण्डं जानन्नसांप्रतम् ।
अबाधं स्वस्य चाऽशेषकृत्यं युक्तममन्यत ॥२६०२॥

भोज्याभावकृतां तस्य व्यापदं तच्च मन्त्रितम् ।
तदा नाऽश्वासिषुर्धन्यादयः संधिं विधित्सवः ॥२६०३॥

मिषाच्चिचलिषा तेषां कस्माच्चिदभवत् ततः ।
किं पुनस्तेन दायादद्वये दातुं प्रतिश्रुते ॥२६०४॥

देयविश्राणनानीकोत्थानादिपणसिद्धये ।
भ्रातृव्यमनयद् धन्यः कल्याणमवकल्यताम् ॥२६०५॥

प्रबन्धं निर्बध्नन्नरिमुपचरंश्छादितरुषं
महार्हिं संगृह्णन्नयकुटिलचेष्टं व्यवहरन् ।
स भूमिः सिद्धीनां दधदुचितकर्तव्यपरतां
भवेद्योनिर्व्यूढावपि सुदृढसंरम्भरभसः ॥२६०६॥

दुःखैर्दीर्घप्रवासोत्थैरपसारितसौष्ठवाः ।
तदा संरम्भशैथिल्यं भूभृद्भृत्याः प्रपेदिरे ॥२६०७॥

स सत्यं सचिवोऽप्राप्यः संग्रहीतुं प्रगल्भते ।
कथाशरीरमिव यो निर्व्यूढौ कार्यमाकुलम् ॥२६०८॥

2601. [d]) C S′ I_3 सत्वरे (for तत्वरे).

2603. [a]) C $P_{1,2}$ SA भोज्यभा°; S′ °भोजभा° (for भोज्याभा°).

2604. [a]) P_{1-3} I_3 मिषाश्वि° (for मिषाच्चि°).

2605. [d]) D C S′ $P_{1,2}$ I_3 °कल्पताम् (for °कल्यताम्).

2606. [a]) St °रञ्छादि°; C S′ P_3 °रच्छादि°; $P_{1,2}$ °रंच्छादि°; I_3 °रंच्छामि° (for °रंश्छादि°).

संधिं निबद्धं विज्ञाय सैनिकाः स्वगृहोन्मुखाः ।
उपेक्ष्य स्वामिदाक्षिण्यं क्षणादेव प्रतस्थिरे ॥२६०९॥

तद्विक्रीतमवाप्याऽन्नं लवन्यः कार्यमन्थरः ।
धन्याद्याः स्वल्पसैन्यत्वादासन् कृच्छ्रगतासवः ॥२६१०॥

प्रतोलीकीलितद्वराः प्रार्थितागमनाशया ।
तदहः सोऽभियोक्तॄंस्तानददत् तावतापयत् ॥२६११॥

रथाङ्गाक्रन्दिनी रात्रिस्तेषां कृच्छ्रेण साऽगमत् ।
विना जीवितसंन्यासमन्यत्कार्यमपश्यताम् ॥२६१२॥

प्रयत्नसंभृते कृत्ये नष्टे मन्दतया धियः ।
अस्मत्संभावनादूरीकृतवाक्यादरं प्रभुम् ॥२६१३॥

नष्टानुशोचनव्याजात् तत्तद्युक्त्युपहासिनः ।
सदयं नो ध्रुवं दुस्स्थीकरिष्यन्त्यन्यमन्त्रिणः ॥२६१४॥

सद्यो यात्रातारतम्यात् ताम्यन्तो नत्रपार्पणम् ।
कार्यनिष्ठामपश्यन्तः कुर्युर्वैत्यपरेऽब्रुवन् ॥२६१५॥

मायामेतां विहितवांस्तैः संमन्त्र्य नृपाहितैः ।
सिद्धसाध्योऽधुना दस्युर्हसन्नस्मान् ध्रुवं स्थितः ॥२६१६॥

अल्पेतरांस्तु संकल्पानेवं तेषां वितन्वताम् ।
दत्तानन्ततनुग्लानिः प्रभाता सा विभावरी ॥२६१७॥

2610. [d]) D C S′ कृच्छ्रा°; P_1 कश्छ° (for कृच्छ्र°).

2611. [a]) All Mss. read °केलित° (for °कीलित° found in SG *sec. manu*). —[d]) P_{1-3} °पातयत् (for °तापयत्).

2615. [c]) $P_{2,3}$ I_3 SA °पश्यन्त (for °पश्यन्तः).

2617. [c]) All Mss. read °ज्यानिः (for °ग्लानिः suggested). After this *v.* कुलकम् .

प्राह्णेऽथ राजस्थानीयोऽलंकारः साहसोत्सुकः ।
डामरं कोट्टमारुह्य निन्ये नयभयैर्वशम् ॥२६१८॥

एकाहं गमने सोढविलम्बस्तत्र वासरे ।
लोठनं क्षीणदाक्षिण्यः स गच्छेत्यब्रवीत् स्फुटम् ॥२६१९॥

उपन्यास्यंस्ततस्तस्य म्लानिप्रक्षालनक्षमम् ।
मानिनः केऽपि कर्तव्यं कीर्तिव्ययनिवर्हणम् ॥२६२०॥

कालः सोऽयं सकलजनतालोचनध्वान्तदायी
नित्यालोकप्रकटनपटुः किंन्तु सत्क्षत्रियाणाम् ।
अभ्रश्यामाऽद्भुतमसिलता स्ववधूसंगताऽपि
व्यक्तं सक्तिं दिशति रभसान्मण्डलेनोष्णभानोः ॥२६२१॥

संप्राप्नुवन्ति ननु मण्डलमेकमेव
क्ष्मापा जये समरसीम्नि वपुस्तु हित्वा ।
चण्डांशुमण्डलमथाऽभिमतानि कामं
प्रेमार्द्रनिर्जरवधूकुचमण्डलानि ॥२६२२॥

नाऽस्मिन् संततवेष्टनोल्बणतलैस्तल्पैरुदेति व्यथा
ग्रन्थिभ्यश्चलितैर्न चालमसुभिर्मर्मव्यथा जन्यते ।
क्रन्दद्बन्धुजनार्तनादचकितस्वान्तं न वा स्थीयते
नन्वेतन्मरणं सुखस्य सुभगा काऽप्येव संप्राप्तिभूः ॥२६२३॥

2618. [b]) D °सोन्मुखः (for °सोत्सुकः). —[d]) I_3 °टैर्वदन् (for °यैर्वशम्).

2619. [c]) D C $P_{1,3}$ I_3 SA लोठने; P_2 S′ लोठनो (for लोठनं suggested with St).

2620. [a]) All Mss. read उपन्य° (for उपन्या° suggested with St).

2623. [a]) C S′ P_{1-3} I_3 व्यर्था (for व्यथा). —[d]) C S′ P_{1-3} I_3 काम्येव (for काऽप्येव).

मार्गैः खड्गलतावितानगहनैर्यातः पिता ते दिवं
भ्रातृभ्यामसिधेनुकण्टकवने भ्रान्त्वाऽर्जिता सद्गतिः ।
वंशाक्षुण्णमिमं निषेव्य रभसादध्वानमुन्नद्धया
वृत्त्या व्योम्नि विशार्कमण्डलमिह स्वान्तं च तेजस्विनाम् ॥

साम्राज्यं विधिनोपनीतमसकृत्क्लैब्येन यद्धारितं
तत्राऽपि प्रशमोचिते वयसि यत्संचेष्टितं बालवत् ।
प्रायश्चित्तममुष्य लब्धमधुना तद्वेधसाऽऽपादितं
मा भूद् राज्यमिवैतदप्यसुलभं कर्तव्यमूढस्य ते ॥२६२५॥

राज्यं प्राप्तमपि प्रनष्टमसमोच्छिष्टाशनैर्यापितः
कालः सर्वजनक्षयस्य विषये याता स्थितिर्हेतुताम् ।
इत्यासीत् किमिवोचितं प्रभवतो भिक्षाचरक्ष्मापते-
र्निर्व्यूढं तु तदस्य देहविरतौ येनैष सर्वोन्नतः ॥२६२६॥

स तथोत्तेजितोऽप्योजो नाऽऽददे तेजसोज्झितः ।
न ज्वलत्यग्निसङ्गेऽपि निर्वीर्यं बाडवेन्धनम् ॥२६२७॥

शान्ताहन्तस्तु संवृत्तनिद्राभङ्ग इवाऽर्भकः ।
ऐच्छदुद्यद्भयोद्वेगो रोदितुं प्रसृताधरम् ॥२६२८॥

डामरेणाऽर्पितं नेतुं प्रवृत्तास्तं नृपाश्रिताः ।
तादृशं वीक्ष्य कारुण्याद् धैर्याधानार्थमभ्यधुः ॥२६२९॥

मा विषीद न देवस्य दयाचन्द्रोदयोज्ज्वले ।
हृदि प्ररोहति स्वैरं विकारतिमिरान्धता ॥२६३०॥

2625. d) All Mss. read °मूकस्य (for °मूढस्य suggested with D).
2627. d) D St P_{1-3} I_3 वानरे°; C S′ वा नवे° (for बाडवे° suggested).
2628. a) SA_1 gloss शान्ता अहन्ता अहंभावो यस्य (for शान्ताहन्तः).
2629. d) C S′ $P_{1,3}$ °भ्ययुः (for °भ्यधुः).
2630. a) C S′ SA P_{1-3} I_3 दैवस्य (for देवस्य).

स सौजन्यसुधासिन्धुः स स्थिरत्वसुराचलः ।
स प्रपन्नार्तिसंतापच्छेदचन्दनपादपः ॥२६३१॥

पुण्यां शुद्धां च संलक्ष्य शरदीव द्युवाहिनीम् ।
मूर्तिं तस्योल्बणं चेतः समाधास्यत एव ते ॥२६३२॥

निष्कलङ्कैर्वंशपूर्वैर्निर्विशेषं सभाजयन् ।
चारित्रं लाघवभुवो ह्रियस्त्वां सोऽपनेष्यति ॥२६३३॥

अपकर्तॄन् विपन्मग्नान् दयमानः परानपि ।
क्षमापरीक्षाहेतुत्वात् स वेत्ति ह्युपकारिणः ॥२६३४॥

उक्त्वेति हृष्टस्तैर्लोलस्थूलकूर्चो गृहात् ततः ।
व्यालम्बकम्बलो गोष्ठाद् वृद्धोक्ष इव निर्ययौ ॥२६३५॥

निर्भूषणं म्लानजीर्णवस्त्रशस्त्रं निरीक्ष्य तम् ।
युग्याधिरूढमायान्तं धन्यो ह्रीनम्रतां दधे ॥२६३६॥

दीर्घास्पन्देक्षणं रूक्षघनकूर्चांसविग्रहम् ।
व्यलोकयद्थोलूकमिव नष्टं गुहागृहात् ॥२६३७॥

रेजे शैलश्चलद्भिस्तैः शिबिरोद्दीपितानलः ।
भूपप्रतापस्वर्णस्य कषाश्मत्वमिवाऽऽगतः ॥२६३८॥

स्कन्धावारे गते वर्षत्तुषारं प्रसभं नभः ।
अमर्त्यभावे भूभर्तुर्विशां चिच्छेद संशयम् ॥२६३९॥

2633. d) D C S′ P_{1-3} I_3 [अ] प्रिय° (for ह्रिय°).

2637. b) D SL SA P_{1-3} I_3 °कूर्चं स°; C S′ °कूर्च्वं स° (for °कूर्चांस° suggested with St).

2638. b) SA $P_{1,2}$ I_3 शिवि° (for शिबि°).

2639. a) SA P_{1-3} I_3 स्कन्दा° (for स्कन्धा°).

प्राक् चेत्पतेद्धिमं तावन्म्रियेरन् त्रुडिताः क्षणात् ।
पिष्टातकान्तर्गर्ताटाः प्रविष्टा इव सैनिकाः ॥२६४०॥

एवमेकान्नविंशेऽब्दे दशम्यां शुक्लफाल्गुने ।
न्यूनाब्दषष्टिदेशीयो निबद्धो लोठनः पुनः ॥२६४१॥

दीर्घप्रवासादायातं सत्कर्तुं कटकं पुनः ।
निर्ममो हर्म्यमुत्तुङ्गमारुरोह महीपतिः ॥२६४२॥

यथोचितं दानमानसंभाषणविलोकनैः ।
संतोष्य विसृजन् सैन्यं धन्यादीन् प्रैक्षताऽऽगतान् ॥२६४३॥

तेषां पुनश्च दोर्द्वन्द्वमूले क्षिप्तकरं भटैः ।
न्यस्तेनाऽऽनासिकं वासःप्रान्तेनाऽऽच्छादिताननम् ॥२६४४॥

निर्भूषणश्रोत्रपालिप्रविष्टैः श्मश्रुलोमभिः ।
बलद्रूक्षैः प्रव्यक्तकार्श्यक्लेशं कपोलयोः ॥२६४५॥

उच्चावचोक्तिमुखरे पौरलोकेऽन्तरान्तरा ।
व्यापारयन्तं नेत्रान्तौ दीनस्तिमिततारकौ ॥२६४६॥

कातर्यदैन्यभीक्लान्तिक्षुदलक्ष्मीकटाक्षितम् ।
वेपमानविनिद्राङ्गं गां शीतेनाऽऽर्दितामिव ॥२६४७॥

2640. [a]) D (before suggestion) C S′ P_{1-3} I_3 प्राञ्च°; SA प्राञ्चे° (for प्राक् चे° found in SG *sec. manu*). —[b]) P_{1-3} I_3 °न्द्रिये° (for °न्म्रिये°).

2641. [a]) C °कोन° (for °कोन्न°). —[b]) C S′ P_{1-3} I_3 SA °फाल्गुणे (for °फाल्गुने).

2643. [e]) St C S′ P_{1-3} I_3 व्यसृजत् (for विसृजन्).

2645. [a]) $P_{2,3}$ I_3 °पाणि° (for °पालि°). —[e]) P_{1-3} I_3 SA वल° (for बल°).

भ्रान्तामिव क्ष्मां पर्यस्तानिवाऽद्रीन् पतितामिव ।
विदन्तं च दिवं शोषबहुशुष्करदच्छदम् ॥२६४८॥

दैविको वाऽन्तरायोऽस्तु ध्वान्तं वोग्रं प्रवर्तताम् ।
राजौकोऽभ्यर्णतां यातं वाता वा जरयन्त्विदम् ॥२६४९॥

सर्वापकारकृद्राज्ञः स्थास्यामि पुरतः कथम् ।
पदानि संनिरुन्धानं निर्ध्यायेति पदे पदे ॥२६५०॥

बहुलोकावृततया स्तोकसंलक्ष्यमैक्षत ।
प्रतीहारैरथाऽऽवेद्यमानं लोठनमङ्गने ॥२६५१॥

भ्रूसंज्ञया वितीर्णाज्ञो राज्ञा तामारुरोह सः ।
सभां पारिप्लवाम्भोजामिव प्रेक्षकलोचनैः ॥२६५२॥

दृष्ट्या निर्दिष्टपार्श्वोर्वीस्थितिः पृथ्वीभुजस्ततः ।
अस्प्राक्षीत् क्षितिनिक्षिप्तजानुर्मूर्ध्नाऽङ्घ्रिपङ्कजे ॥२६५३॥

हस्ताम्बुजाभ्यामालम्ब्य ललाटतटमानतम् ।
सम्राट् संभ्रमनम्रस्य तस्योदनमयच्छिरः ॥२६५४॥

रत्नौषधीजुषोः स्पर्शः पाण्योस्तापं स चेतसः ।
दौर्भाग्यमहरद् देहाच्चाऽस्य श्रीखण्डशीतलः ॥२६५५॥

पुण्यानुभावात् कारुण्यभाजो भूभर्तुरञ्जसा ।
विस्रम्भसंभावनया स क्षणात् पस्पृशे हृदि ॥२६५६॥

2648. b) D SA P_{1-3} I_3 °निव (for °मिव). —d) St D P_{1-3} I_3 om. बहुशुष्क.

2649. a) P_2 SA दैविको···न्तरा° (for दैविको वान्तरा°).

2650. After this *v*. अन्तर्युगलम् .

2651. After this *v*. कुलकम् .

2655. cd) D (before suggestion) C S′ P_{1-3} I_3 देहश्चा°; SA देहच्चा° (for देहाच्चा° suggested with St D).

मा भैषीरिति हसोक्तिः सुखं संप्राप्स्यसीति वाक्।
अगाम्भीर्येण भग्नेव मन्युर्न त्वयि सोऽधुना ॥२६५७॥

इत्युक्ते पूर्ववैराणां भवेदुद्घाटनं कृतम्।
बान्धवो नस्त्वमित्यस्मिन् परीहास इव क्षणे ॥२६५८॥

क्लिष्टोऽसीति स्वप्रतापप्रभावाभाषणं भवेत्।
ध्यात्वेति भूभृद् दृष्ट्वाऽस्य नाऽऽप्यायं तु गिराऽकरोत् ॥२६५९॥

अभयार्थनया पादौ स्प्रष्टुं नमयतः शिरः।
संस्पर्शं मौलिषु पुनर्विग्रहस्याऽङ्घ्रिणाऽकरोत् ॥२६६०॥

का योग्यता सत्क्रियायां ममेति वदता बलात्।
अजिग्रहत् पितृव्येण ताम्बूलं स्वकरार्पितम् ॥२६६१॥

नम्रं द्वारेशमूचेऽभूच्छ्रमो व इति सस्मितम्।
धन्यं षष्ठं च पस्पर्श प्रष्ठं सव्येन बाहुना ॥२६६२॥

दाक्ष्यदाक्षिण्यगाम्भीर्यविनयाद्यैर्विभाव्य तम्।
भूभृद्गुणैः परीतं स्वं लोठनोऽमन्यताऽवरम् ॥२६६३॥

आदिश्य सान्त्वनं धन्यमुखेनाऽथ त्रपानतम्।
पितृव्यं प्राहिणोद् वेश्म भ्राजिष्णु विनयाञ्जलिः ॥२६६४॥

अभियोगे य एवाऽस्य नीतौ विन्यस्यतो दृशम्।
मुखरागः स एवाऽभूत् फलावाप्तावविप्लुतः ॥२६६५॥

2657. d) All Mss. except SG *sec. manu* read मन्युना त्वयि साधुना; D suggests मन्युमें त्वयि साधुना (for मन्युर्न त्वयि सोऽधुना).

2659. After this *v.* तिलकम्.

2664. ab) $P_{2,3}$ I_3 SA धन्यं मु° (for धन्यमु°).

नाऽऽयाति वाडवशिखिक्कथनेन तापं
शैत्यं हिमाद्रिपयसा विशता न चाऽब्धिः ।
कश्चिद् गभीरमनसां सततं विषाद-
काले प्रमोदसमये च समोऽनुभावः ॥२६६६॥

प्रीतिस्थैर्यैर्ज्ञातियोग्यैश्चोपचारैरकृत्रिमैः ।
क्रमाद् राजाऽहरल्लज्जां पौरुषभ्रंशजीवयोः ॥२६६७॥

दायादोष्टद्वयादेव राष्ट्रे कृष्टेऽपि मन्त्रवित् ।
भोजेनोत्पिञ्जसर्पस्य दन्तं सोऽन्तरचिन्तयत् ॥२६६८॥

प्रवासायासभीत्या स्वैस्त्यक्तसंरम्भसंभ्रमैः ।
जिगीषुर्विद्विषच्छेषान् चक्रे यन्निष्प्रजागरः ॥२६६९॥

साल्हणिः स तु निस्तीर्णः श्वभ्राच्छून्यगृहे वसन् ।
पितृव्यविग्रहोदन्तमुपलेभे न कंचन ॥२६७०॥

राजगृह्यं त्वलंकारं डामरान्तिकमागतम् ।
पृष्ठाद् वीक्ष्याऽभवद् रोहद्द्रोहसंभावनस्तदा ॥२६७१॥

ददर्श च क्रमाद् दूरतया दुर्लक्ष्यविस्तृति ।
स्कन्धावारं बद्धमालं मार्गे नगरगामिनि ॥२६७२॥

2667. b) All Mss. read °कृत्रिमः (for °कृत्रिमैः suggested with St D).

2668. a) All Mss. read भोजनो° (for भोजेनो° suggested with St D).

2669. c) All Mss. read °च्छेषैः (for °च्छेषान् suggested).

2670. a) All Mss. read सल्हणः (for साल्हणिः suggested with St). —ab) D विस्तीर्णच्छ्व°; C S′ $P_{1,2}$ I_3 SA विस्तीर्णः श्व°; P_3 विस्तीर्णाच्छ्व° (for निस्तीर्णः श्व° suggested with St). —cd) P_1 om.

2671. a) D राजा गृहीत्वलंकार°; C S′ राजा गृहे त्वलंकारं; P_{1-3} I_3 SA SL राजा गृहे त्वलंकार° (for राजगृह्यं त्वलंकारं suggested with St, cf. *vv.* VIII. 2618, 2925).

2672. b) All Mss. read °विस्मृति (for °विस्तृति suggested with St D). —c) $P_{2,3}$ I_3 SA स्कन्द्रा° (for स्कन्धा°).

अज्ञातेन विदूरत्वात् पितृव्येणाऽऽश्रितं ततः।
युग्यं चाऽसौ धन्यषष्ठयुग्ययोरन्तरैक्षत ॥२६७३॥

अचिन्तयच्च को हेतुः कटकप्रस्थितेरितः।
युग्यारूढश्च कोऽथ स्यात् तृतीयो धन्यषष्ठयोः ॥२६७४॥

पृष्टस्तेनाऽवदत् कश्चित् पामरोऽथ प्रमोदभाक्।
संधिर्निबद्धो नगरं गतौ लोठनविग्रहौ ॥२६७५॥

सन्देहे जहति द्रोहभयमुन्मुखतां व्रजत्।
ज्ञातिस्नेहेन तस्याऽऽसीन्मुहूर्तमपहस्तितम् ॥२६७६॥

सैन्ये गते शून्यतया मिलितैर्विहगैः सरित्।
रुवद्भिस्तेन तौ नीतौ क्रन्दन्तीव व्यकल्प्यत ॥२६७७॥

लवन्य एव मां दध्याद्ध्यात्वेहस्थमवेत्य ते।
पुनर्नयेयुर्धन्याद्याः क्रमाद् दध्यावथेति सः ॥२६७८॥

स्वं नेतुं पार्थिवचमूं प्रत्यावृत्तां निनादिनीम्।
श्रुतेऽन्तरान्तरा घोषे निर्झराणामशङ्कत ॥२६७९॥

2674. b) C S′ °न्वितः (for °रितः).

2675. a) C S′ P_{1-3} I_3 SA पृष्टसेना° (for पृष्टस्तेना°).

2676. a) C S′ सन्देहोऽग्रहतद्रोहो; D $P_{1,3}$ सन्देहोजहतद्रोहो; St I_3 संदेहौजहतोद्रोहो; St suggests सन्देहं जहतो द्रोह°; P_2 संदेहे जहतद्रोहो (for सन्देहे जहति द्रोह° suggested). —b) SA_1 (after corr.) St I_3 भजेत् ; C S′ St. Tr. भजत् ; SA_1 (before corr.) D P_{1-3} व्रजेत् (for व्रजत् suggested).

2677. d) D C S′ P_1 क्रन्दतीव् (for क्रन्दन्तीव). All Mss. read अकल्पत (for व्यकल्प्यत suggested with St).

2678. a) All Mss. read मे (for मां suggested with St. Tr.).

अथाऽजायत जीमूतवितीर्णतिमिरं जगत् ।
वन्ध्यं मध्यंदिनेनेव निशीथव्यथितश्रिया ॥२६८०॥

राधमासावधि दधुस्ततः प्रभृति वारिदाः ।
दीक्षां क्षोण्यां तुषारौघसत्रासूत्रणकर्मणि ॥२६८१॥

विस्रब्धघात्यभव्योऽहं निर्ब्रह्मण्यो ह्रियोज्झितः ।
निन्दन् स्वमिति भोजाग्रे ततो दस्युरुपाविशत् ॥२६८२॥

समयापेक्षयाऽक्षोभो मन्युं संस्तभ्य साल्हणिः ।
सान्त्वयन्निव नास्त्यागस्तवाऽत्रेति जगाद तम् ॥२६८३॥

ऊचे च संश्रितापत्यज्ञात्याद्यापद्गतं त्वया ।
त्रातुमेतत्कृतं तत्र गर्हां नाऽर्हसि कस्यचित् ॥२६८४॥

तव द्रोहस्पृहा स्याच्चेन्नाऽऽनृशंस्यं भवेन्मयि ।
परवत्ताऽभवत् तस्मादियं कालानुरोधतः ॥२६८५॥

राज्ञश्च हर्षभूभर्तृवंश्या इव न वा वयम् ।
उच्छेद्याः किन्तु संयम्या राजधर्मानुरोधिनः ॥२६८६॥

स्वस्याऽख्यातिस्तयोर्बाधा राज्ञश्चाऽमार्गगामिता ।
शेषं मां रक्षता हन्त निषिद्धा धीमता त्वया ॥२६८७॥

इत्युक्तवन्तं तं त्यक्तलज्जाभार इवाऽवदत् ।
साक्षी त्वमेव सर्वत्र ममेति सततं स्तुवन् ॥२६८८॥

2680. c) D P_1 वन्ध्यमध्यं°; C S′ बद्धं मध्यं° (for वन्ध्यं मध्यं°). —d) D C S′ °व्ययित° (for °व्यथित°).
2683. b) P_2 I_3 SA संस्तम्भ्य (for संस्तभ्य).
2685. c) D C S′ P_{1-3} परकृत्ता° (for परवत्ता°).
2687. c) SA $P_{1,3}$ शंषं मां; C S′ स्वां सभां (for शेषं मां).
2688. c) St त्वमेवं; SA तमेव (for त्वमेव).

क्षणेन च प्रहिणु मामधुनेत्यभिधायिनम् ।
तमेव हिमवृष्ट्यन्ते कर्ताऽस्मीत्युक्तवान् ययौ ॥२६८९॥

त्वयि दुस्युर्विपर्यस्येन्मन्युं जानन्नभोजनम् ।
भोजस्तत्रेति केनाऽपि कथितो व्यधिताशनम् ॥२६९०॥

स्पृशंश्चाऽन्नं चिरात् प्राप्तमिदं विक्रीय ताविति ।
ध्यायञ्ज्ञात्योर्देहमांसं तयोर्भुक्तममन्यत ॥२६९१॥

दस्युस्तु हिमवृष्ट्यन्ते त्वां प्रहेष्यामि निश्चयात् ।
श्वो वाऽद्य वेति कथयन् द्वौ मासौ न मुमोच तम् ॥२६९२॥

मां ज्ञात्वेह स्थितं राज्ञः कृतारब्धेर्हिमात्यये ।
विक्रीणात्येष मत्वेति भोजोऽधाद् गमने त्वराम् ॥२६९३॥

मिषं यं यं समादाय गमनायोदपादयत् ।
दस्युस्तं तं समुच्छेद्य सापराधं व्यधत्त तम् ॥२६९४॥

तेजोनाम्नो बलहरात् संजातो भाद्रमातुरः ।
अभ्यधाद् बाल्यमाशास्य लम्बकम्बलकावृतः ॥२६९५॥

2690. a) C S′ P_{1-3} I_3 SA दस्यून्वि° (for दस्युर्वि°).

2691. b) All Mss. read विक्रीयतामिति (for विक्रीय ताविति suggested with St).

2692. c) P_2 I_3 SA देति (for वेति).

2693. a) All Mss. read राज्ञा (for राज्ञः suggested with St).

2694. a) All Mss. read निषेधाय (for समादाय suggested).

2695. a) All Mss. read ओजो° (for तेजो° suggested with St, cf. *v.* VIII. 2862). —b) All Mss. read °जातं (for °जातो suggested with St). —c) वर्धितो बाल्यमारभ्य is suggested (for अभ्यधाद् बाल्यमाशास्य found in all Mss.).

तेजोविस्फूर्जितां तत्तद्धीरोत्कर्षकषोपले ।
द्वैराज्ये सौस्सले सैन्ये पंक्तिपावनतां गतः ॥२६९६॥

पितुराप्ततया राज्ञा वर्धितस्तदनन्तरम् ।
एवेनकादिविषयाधीकारित्वं क्रमाद् भजन् ॥२६९७॥

विमुखे राज्ञि नागेन खयाश्रमभुवा कृते ।
तं राजवदनो नाम विजिघृक्षू ररक्ष तम् ॥२६९८॥

आनृशंस्यं भृत्यभावादलवन्यतयाऽस्य च ।
प्रत्यवस्थित्यसामर्थ्यं राज्ञि सर्वे शशङ्किरे ॥२६९९॥

अतोऽलंकारचक्रेण कुर्वतोऽत्यर्थमर्थनाम् ।
द्वैराज्येच्छो राजबीजी तदा न स समार्प्यत ॥२७००॥

नीतः प्रत्यक्षतां दूरस्थितेऽप्युदयने स तम् ।
विसृष्टवति दुभुक्षुस्त्यक्तुमेनं न सोऽशकत् ॥२७०१॥

राज्ञा कर्तुं विनियमं भोजस्य प्रहितो धनैः ।
प्राप द्रङ्गामलंकारो विषयाधिकृतस्ततः ॥२७०२॥

तत्पार्श्वमुद्यतं गन्तुं मां समुत्सृज्य यासि चेत् ।
त्यक्ष्यामि तदसूनेवमूचे भोजस्तु डामरम् ॥२७०३॥

श्वस्त्वां प्रभाते द्रक्ष्यामीत्येतावत् तत्र जल्पति ।
कोट्टादनुक्त्वैव निशस्तुर्ययामे विनिर्ययौ ॥२७०४॥

2696. a) D C S′ P_{1-3} I_3 SA °र्जितांस्त° (for °र्जितां त° found in SG).

2698. After this *v.* चक्कलकम् .

2700. b) All Mss. read कुर्वता° (for कुर्वतो° suggested with St). —d) All Mss. read समर्प्यत (for समार्प्यत suggested). After this *v.* युगलकम् .

2701. ab) The text here appears to be corrupt.

2702. c) All Mss. read प्राप्य (for प्राप suggested with St).

2703. b) I_3 SA मामुत्सृज्य; C S′ मासमुत्सृज्य (for मां समुत्सृज्य).

घनवर्षेऽप्यमर्षेण मार्गान्वेषी गवेषणम् ।
यावच्चक्रे क्षपान्ते तं तावच्छुश्राव निर्गतम् ॥२७०५॥

असाध्यप्रतिषेधोऽथ तमह्न्यनुजगाम सः ।
प्रस्थितं शारदादेवीस्थानं यावन्मितानुगः ॥२७०६॥

एकसार्थगतौ ज्ञाती विना तौ ज्ञातियोषिताम् ।
दाक्षिण्यादक्षमः स्थातुमग्रे सागा भवन्निव ॥२७०७॥

प्रवयाः पञ्चषान् वारान् व्यधादारब्धिमेष तु ।
युवाऽप्यकल्यः कौलीनमिति स्वस्य च चिन्तयन् ॥२७०८॥

दुराण्डगमने खण्डितेच्छः संश्रित्य दारदान् ।
संयुयुत्सुर्मधुमतीरोधसा मार्गमग्रहीत् ॥२७०९॥

क्वाऽपि श्यानाश्मसूच्यश्रिमृत्युदंष्ट्राङ्कुरोत्कटान् ।
क्वचिद् रुद्धप्रकाशाभ्रकालपाशान्धकारितान् ॥२७१०॥

प्रभ्रश्यद्धिमसंघातगजव्यूहोल्बणान् क्वचित् ।
क्वाऽपि निर्झरफूत्कारनाराचक्षतविग्रहान् ॥२७११॥

क्वचिद् दुस्स्पर्शपवनस्पष्टस्फुटदसृग्धरान् ।
क्वाऽप्यातपक्षतहिमज्योतिर्निहतदृक्पथान् ॥२७१२॥

दूरावरोहे प्रसृते स्फुटमप्रसृते विदन् ।
ऊर्ध्वावरोहमसकृन्मन्यमानोऽप्यधोगतेः ॥२७१३॥

2709. After this *v.* तिलकम् .

2712. [a]) All Mss. read सुस्पर्श° (for दुस्स्पर्श° suggested with D). —[d]) I_3 P_3 SA °र्निहित° (for °र्निहत°).

2713. [a]) All Mss. read °रोहे (for °रोहं suggested with St).

तुषारकालविषमान् षट्सप्तान् पथि वासरान् ।
उल्लङ्घ्य स दरद्राष्ट्रसीमान्तग्राममासदत् ॥२७१४॥

गूढार्पितात्मसामग्रीहताकिंचन्यलाघवम् ।
तं दुग्धघातकोट्टेशः प्रणम्याऽनयदर्घ्यताम् ॥२७१५॥

दूरस्थितो विड्डसीहस्तद्दूतोक्ततदागमः ।
प्रक्रियां प्राहिणोच्छत्रवादित्राद्यां नृपोचिताम् ॥२७१६॥

आदिष्टदिष्टवृद्धिश्च राष्ट्रे कोट्टाधिपेन सः ।
अकारयत् स्वकोशस्य स्वामित्वं राजबीजिनः ॥२७१७॥

राजायमानो भोजोऽथ राजवासगतोऽर्चितुम् ।
आनिन्ये राजवदनापत्येनाऽभ्येत्य पक्ष्यताम् ॥२७१८॥

स पित्रैकान्ततो राज्ञो भिन्नेन प्रहितोऽन्तिकम् ।
तेनाऽज्ञाय्यरिनीत्युग्रपाशाग्रस्थापनोपमः ॥२७१९॥

कार्यगौरवविश्वासाभावव्यतिकरोचितम् ।
संदिश्य प्राहिणोत् तं स न स्वीकुर्वन्न चोत्सृजन् ॥२७२०॥

किमाप्तोऽहं किमेकान्तभिन्नो राज्ञः शनैरिति ।
मां ज्ञास्यसीति तं दूतैः स राजवदनोऽवदत् ॥२७२१॥

2714. After this *v.* कुलकम् .

2715. c) St SA D $P_{1,3}$ I_3 S′ दुग्धघाट्ट°; C दुग्धघाट्ठ°; P_2 दुग्धघंटा° (for दुग्धघात° suggested, cf. *v.* VIII. 2468). —d) St °र्च्यताम् (for °र्घ्यताम्).

2716. b) D (before suggestion) P_{1-3} I_3 SA °गमम् (for °गमः). —d) C S′ SA °त्राद्यान्नृपो° (for °त्राद्यां नृपो°).

2717. c) All Mss. read अवारयत् (for अकारयत् suggested with D).

2718. b) D C S′ P_{1-3} °गतोचितम् ; I_3 SA °गतोचितुम् ; SG °गतोचिताम् (for °गतोऽर्चितुम् suggested with St). —d) D C S′ P_2 I_3 पक्षताम् (for पक्ष्यताम्).

तस्य दार्ढ्यं दर्शयितुं गोत्रिवैरिमिषान्नृपे ।
ब्रुवाणेऽथ विदोषत्वं नागाद्यैरग्रहीद् रणम् ॥२७२२॥

सामग्र्यूनः शनैः स्थैर्यं ततः साम्यमथ क्रमात् ।
आधिक्यं चाऽऽदधे तेषां विग्रहैर्धैर्यनिष्ठुरः ॥२७२३॥

तथा प्रतिष्ठां स प्राप तस्याऽपूर्वस्य भूमिजाः ।
दास्यमेत्य यथा व्रीडां नाऽगुर्नागस्य बान्धवाः ॥२७२४॥

स हि त्यागक्षमास्तम्भालोभादिगुणभूषितः ।
अभिगम्योऽभवन्नित्याभ्यस्तभूतिरिवोन्मिषन् ॥२७२५॥

स्थैर्यं पृथ्वीहरादीनां साश्रयाणां न कौतुकम् ।
आडम्बरो निरालम्बस्याऽस्य स्तुत्यस्तु विस्तृतः ॥२७२६॥

ग्रथयन् पृथुलान् व्यूहांश्चौराटविकघोषिकैः ।
क्रान्तग्रामोऽथ तस्थौ स भोजादीन् प्रतिपालयन् ॥२७२७॥

जहुरन्योन्यसंघर्षसेर्ष्यामात्यमतेन वा ।
ततो लुण्ठिप्रियत्वाद् वा नीतिमन्येऽपि डामराः ॥२७२८॥

उद्घातध्वंसितां विप्लवेच्छा लोठनबन्धने ।
याऽधात् तेषां तदानीं सा जगाम शतशाखताम् ॥२७२९॥

2722. a) C S′ तस्यादा° (for तस्य दा°). —b) C गोत्र° (for गोत्रि°). —d) All Mss. read रणे (for रणम् suggested with St).

2723. a) All Mss. read सामग्री नः (for सामग्र्यूनः suggested with St).

2725. b) C °षितम् ; D (before suggestion) S′ $P_{1,2}$ I_3 °षिताम् ; P_3 °षिताः (for °षितः).

2728. b) D (before suggestion) C S′ $P_{1,3}$ I_3 SA वः; P_2 यः (for वा suggested with St D).

2729. a) D P_3 °ध्वंसिनां (for °ध्वंसितां).

त्रिल्लको जयराजश्च राज्ञा संवर्धितावपि ।
अहार्ष्टौ नैव तपसा विवशौ चक्रमीलनात् ॥२७३०॥

यो घूकानामिव श्वभ्रमामयानामिव क्षयः ।
दैत्यानामिव पातालं यादसामिव सागरः ॥२७३१॥

आश्रयः सर्वदस्यूनां त्रिल्लको माययोल्बणः ।
स देवसरासाधीशं संबध्नन् विप्लवं व्यधात् ॥२७३२॥

काङ्क्षन्तोऽथ तदाऽऽक्षेपं क्षोणीत्राणार्थिनो द्विजाः ।
प्रायं नृपतिमुद्दिश्य चक्रिरे विजयेश्वरे ॥२७३३॥

अकालदस्युनिर्माथं जानतोऽभ्यर्थनां न ते ।
राज्ञोऽगृह्णंस्ततः सोऽभूद् दाक्षिण्यात् तत्सभानुगः ॥२७३४॥

प्रस्थातुं पार्थिवे सज्जे ज्यायान् यो विप्लुतेष्वभूत् ।
स जातोत्पातपिटको जयराजो व्यपद्यत ॥२७३५॥

भाग्यवानेकतोजातदस्युवैवित्त्यमीशिता ।
ततो मडवराज्यं स विप्रप्रीत्यै विनिर्ययौ ॥२७३६॥

अमात्यदत्तवैमत्यैः सशाढ्यं मठैरथ ।
द्विजैर्निषिद्धोऽलंकारो मन्त्री राज्ञोज्झितोऽन्तिकात् ॥२६३७॥

स व्यवस्थापने दुस्स्थदस्यूनां सोद्यमः सदा ।
सेर्ष्याणां प्रत्यभात् तेषां तद्दोषपरिपोषकः ॥२७३८॥

2730. c) All Mss. read अकार्ष्टौ (for अहार्ष्टौ suggested).

2732. After this *v.* युग्मम् .

2734. b) All Mss. read जानते° (for जानतो° suggested with St).

2737. a) D (before suggestion) °वैमात्यैः; D suggests °वैयात्यैः (for °वैमत्यैः). —b) St स्वशाद्य°; S′ P_3 I_3 SÁ स्वशाढ्यं (for सशाढ्यं).

त्रिलकोन्मूलनं कुर्यां कृत्वा द्वैराज्यभञ्जनम् ।
प्रतिज्ञायेति नृपतिर्विप्रान् प्रायान्न्यवीवरत् ॥२७३९॥

त्रस्तोऽथ त्रिलकस्तैस्तैरप्रियैरुदवेजयत् ।
अनुद्भिन्नमुखो गूढामयो रोगान्तरैरिव ॥२७४०॥

जयराजानुजं राज्ञा यशोराजं निवेशितम् ।
तन्मतेनाऽवचस्कन्द भ्रातृव्यं राजकाभिधः ॥२७४१॥

त्रातुं तं देवसरसं हस्तारात्याश्रितं गतः ।
सञ्जपालोऽल्पसैन्यत्वात् संदिग्धविजयोऽभवत् ॥२७४२॥

ज्ञातोदन्तस्ततोऽभ्येत्य रिल्हणो रणमुल्बणम् ।
जयलक्ष्मीकटाक्षाणां प्रथमातिथितामगात् ॥२७४३॥

मन्दरेणाऽथ तेनाऽरिवारिराशौ विलोडिते ।
कल्पोऽभूत् सञ्जपालाब्दस्तुच्छारातिजलाहृतौ ॥२७४४॥

जितेऽपि राजके स्वोर्व्यां विनाऽनुग्राहकं क्षमः ।
न बभूव यशोराजः शून्ये बाल इवाऽऽसितुम् ॥२७४५॥

प्रतीक्षमाणो द्वैराज्यपर्याप्तिं क्ष्माभुजेऽकरोत् ।
त्रिलकः कालहरणं तैस्तैर्मायानतिक्रमैः ॥२७४६॥

यथाकालं ततो गूढोपोढान्मण्डलकण्टकान् ।
स्वपक्षसूचीविशिखान् दिक्षु श्वाविदिवाऽक्षिपत् ॥२७४७॥

2744. c) St P_3 कल्यो° (for कल्पो°). All Mss. read °पालाब्धि° (for °पालाब्द° suggested with St).

2746. a) SA I_3 प्रतीक्ष्यमाणो (for प्रतीक्षमाणो).

अथ पार्थ्वींहरिर्योऽभूच्चतुष्कः कोष्ठकानुजः ।
राज्ञा भ्रात्रा समं बद्धः कारागारात् पलायितः ॥२७४८॥

स तेन निजजामात्रा रक्षितः स्वोपवेशने ।
असंख्यडामरयुतः शमालां संप्रवेशितः ॥२७४९॥

आकर्ण्य कुररस्येव निनादं तस्य भेजिरे ।
व्यक्ततां दस्यवो गूढा ह्रदस्थाः शफरा इव ॥२७५०॥

दृप्यन्तं राजवदनं षष्ठचन्द्रोऽथ गर्गजः ।
रुरोध प्रलयोद्वृत्तं वेलाद्रिरिव वारिधिम् ॥२७५१॥

वर्धमानक्षीयमाणसंहती तौ त्वजायताम् ।
घर्मे सजम्बालहिमौ तुषाराद्रितटाविव ॥२७५२॥

षष्ठस्य जयचन्द्रश्च श्रीचन्द्रश्चाऽनुजौ ततः ।
दूरविप्रकृतौ राजमन्दिरानाप्तवेतनौ ॥२७५३॥

ज्ञातनिर्वृत्त्यपर्याप्ती धुर्यकार्यवशप्रियात् ।
प्रतीक्ष्यादग्रजाद् राज्ञः शङ्कितावशुभागमम् ॥२७५४॥

2748. b) St erroneously emends लोष्ठका°; D कोष्टका° (for कोष्ठका°, cf. St. Tr.).

2749. After this *v.* युग्मम् .

2750. a) SA_2 gloss कुररस्येति कुररः नदहूर इति भाषया कश्मीरेषु प्रसिद्धः (for कुररस्य).

2751. b) SA_2 (after corr.) St P_{1-3} गग्गजः (for गर्गजः).

2752. c) C S′ P_3 °हिम° (for °हिमौ).

2753. d) All Mss. read °रावाप्त° (for °रानाप्त° suggested with St. Tr.).

2754. a) St $P_{1,3}$ I_3 °निवृत्त्य° (for °निर्वृत्य°).

कटकाद् विद्रुतौ राजवदनान्तिकमागतौ ।
श्वशुर्यावपि भूभर्तुरागतौ प्रतियोगिताम् ॥२७५५॥

शैलप्रस्थानपथिकैरसंख्यैरथ खाशकैः ।
स पूर्वराजकोशार्थी भूतेश्वरमलुण्ठयत् ॥२६५६॥

तस्कराक्रान्त्यशरणं बलवन्निहताबलम् ।
अराजकमिवाऽशेषं राष्ट्रं कष्टां दशामगात् ॥२७५७॥

उदयं कम्पनाधीशं रिल्हणं च ततो नृपः ।
चतुष्कयुद्धमादिश्य नगरं विवशोऽविशत् ॥२७५८॥

पार्थ्वीहरिस्तु दुस्साध्यो महाव्याधिरिवौषधैः ।
स्तम्भितोऽभूत् तयोः सैन्यैः संहन्तुं न त्वशक्यत ॥२७५९॥

कालापेक्षां स्वपक्ष्याणां दुर्बुद्धिं वाऽनुरुन्धतः ।
आसीन्मन्दप्रतापत्वं रिल्हणस्याऽपि तत्क्षणम् ॥२७६०॥

विड्डसीहस्तु विज्ञातभोजोदन्तो व्यसर्जयत् ।
दूतानानेतुमुर्वीशान् सुबहूनुत्तरापथे ॥२७६१॥

अपि वित्तेशवनितारहोवैयात्यवेदिभिः ।
अपि किंमानुषपुरीगीतोद्गारिदरीगृहैः ॥२७६२॥

अप्यौष्ण्याद् वालुकाम्भोधेः शीतावेदिभिरेकतः ।
अपि शृङ्गानिलैः प्रीतान् कुर्वाणैरुत्तरान्कुरून् ॥२७६३॥

2755. d) All Mss. read प्रतियोग्यताम् (for प्रतियोगिताम् suggested with St).
2757. a) D C S' $P_{1,3}$ °क्रान्त° (for °क्रान्त्य°).
2758. a) P_{1-3} I_3 SA °धीश° (for °धीशं).
2759. a) P_{1-3} I_3 St दुस्साधो (for दुस्साध्यो). —d) D P_2 I_3 P_3 संहर्तुं (for संहन्तुं).

हिमाद्रिकच्छैर्म्लेच्छेशाः प्रधावन्तोऽधिशिश्रियुः ।
दिशस्तुरंगै रुन्धन्तः स्कन्धावारं दरत्पतेः ॥२७६४॥

राज्ञां संघटनं यावद् व्यधादेवं दरन्नृपः ।
दिग्भ्यो भोजान्तिकं तावत् तत्सामन्ताः प्रपेदिरे ॥२७६५॥

स पिप्रिये तानज्ञातालापान् वीक्ष्य गिरिव्रजात् ।
प्रीतिप्ररूढप्रणयानवरूढान् कपीनिव ॥२७६६॥

जयचन्द्रादयो राजवदनप्रहिता अपि ।
कीराः काश्मीरिकाः पार्श्वमभजन् राजबीजिनः ॥२७६७॥

अभ्यर्णस्थान् बलहरप्रमुखांश्च विदूरगान् ।
अपुष्णात् साल्हणिः स्वर्णैः परां कोशेशतां भजन् ॥२७६८॥

ततः स्वजनितोत्पिञ्जतया निश्चोद्यचाक्रिकः ।
भोजेन राजवदनः समगंस्तापसाध्वसम् ॥२७६९॥

तयोरकृतकर्तव्यविशेषेणेतरेतरम् ।
जातसौष्ठवयोः क्षिप्रमविश्वासो व्यशीर्यत ॥२७७०॥

अभ्यमित्रीणतां तस्याऽनिच्छतो दरदं विना ।
मदात् साहायकार्यैच्छन्मितानेव स तान् हयान् ॥२७७१॥

स्युश्चेत् सोढाग्रिमाटोपाः कटकस्याऽस्य नो द्विषः ।
तत्साम्यमुन्मिषेद्यद् वा भङ्गो भूयोऽपि योगभित् ॥२७७२॥

2764. d) $P_{1,3}$ I_3 SA स्कन्दा° (for स्कन्धा°). After this *v.* तिलकम् .

2767. c) St (before corr. in corrigenda) काश्मीरकाः (for काश्मीरिकाः).

2769. a) St P_2 C S′ I_3 सुजनितो° (for स्वजनितो°). —b) St P_3 I_3 °चक्रिकः (for °चाक्रिकः).

तस्मात् सर्वाभिसारेण रणमेकं ममेच्छतः ।
विजयावजयावाप्तिरेकाहान्तरिता मता ॥२७७३॥

व्याजहारेति यड्डोजस्तदेषोऽथ हसन् स्मयात् ।
निन्ये तद्वारदं सैन्यमुपेक्ष्याऽऽगामिनीश्चमूः ॥२७७४॥

संकटान्ते वितीर्णानुयात्रस्तेषां प्रसर्पताम् ।
स राजबीजी शुश्राव दरद्राजमथाऽऽगतम् ॥२७७५॥

तत्संगमाय व्यावृत्ते तस्मिन् कोट्टान्तिकं पुनः ।
प्रावेशयद् बलहरो मातृग्रामं स तद्बलम् ॥२७७६॥

दिशस्ततो वीक्ष्य वाहैर्भ्रान्तिवातमृगा इव ।
निसर्गधीरधीर्गार्गिर्न धैर्यात् पर्यहीयत ॥२७७७॥

तस्य सर्वेऽपि नीलाश्वडामराः स्वे च सैनिकाः ।
विपक्षैः सह बद्धैक्याः सैन्यान् दुध्रुक्षवो ययुः ॥२७७८॥

स तथा विषमस्थोऽपि प्रस्थित्यै प्रार्थितो निजैः ।
म्लानाननः प्रभुं द्रष्टुं न क्षमोऽस्मीत्यभाषत ॥२७७९॥

स सूर्यवर्मचन्द्रस्य न जातः कश्चिदन्वये ।
उपयोगाय यो नाऽगान्मल्लाभिजनजन्मनाम् ॥२७८०॥

भोजं सभाजयित्वाऽथ विड्डसीहः सपार्थिवः ।
सारैः समं स्वसामन्तैर्विजयाय व्यसर्जयत् ॥२७८१॥

2774. d) D C S′ SA P_2 I_3 °गमिनी° (for °गामिनी°). After this *v.* तिलकम् .

2780. b) C S′ SA $P_{2,3}$ I_3 कैश्चि° (for कश्चि°).

2781. c) C S′ P_1 ससा° (for स्वसा°).

ततो म्लेच्छगणाकीर्णां व्रजन् संवाहयंश्चमूः ।
प्रयाणमात्रान्तरितः पृष्ठे तस्य बभूव च ॥२७८२॥

प्रादुष्कृतजगत्क्षोभे बले तत्राऽनुयायिनि ।
उत्साहात् साल्हणिर्मेने कृत्स्नां हस्तगतां महीम् ॥२७८३॥

वाजिभिस्तर्जकैर्म्लेच्छराजैश्च बलमूर्जितम् ।
स्थाने समुद्रधाराख्ये निर्बबन्धाऽथ तत्पदम् ॥२७८४॥

स राजवदनस्ताद्दग्दुर्जयाग्र्यबलोज्ज्वलः ।
मृत्युदन्तान्तरे दिष्टं षष्ठचन्द्रममन्यत ॥२७८५॥

ततः प्रावृट्पयोवाहकृतोदीपपरिप्लुता ।
संजायते स्म वसुधा समीभूतजलस्थला ॥२७८६॥

धरित्रीपानपात्रेऽम्भश्शीधुपूर्णे दधुर्द्रुमाः ।
मग्ना लक्ष्यशिखामात्रा वलन्नीलोत्पलोपमाम् ॥२७८७॥

षष्ठस्य संकटं जानन् भूभृच्छेषैर्बलैः समम् ।
अथोदयद्वारपतिं तं च धन्यं व्यसर्जयत् ॥२७८८॥

वाहिनीरुद्धमार्गौ तौ पदवीमनुसस्रतुः ।
मार्गे धनंजयस्येव शैनेयपवनात्मजौ ॥२७८९॥

लम्बाम्बुदेऽम्बरे दूरं वारिपूर्णे च भूतले ।
स्यूतेव विद्युद् ददृशे भिन्नद्योतननिस्स्वना ॥२७९०॥

2784. [a]) All Mss. read °स्तर्जितो; St suggests °स्तर्जिते (for °स्तर्जकै° suggested).

2785. [d]) D स्वम°; P_3 त्वम° (for °मम°).

2786. [a]) SA P_2 I_3 प्रावृड्°; P_3 प्रावृत्° (for प्रावृट्°).

2787. [b]) St °सीधु° (for °श्शीधु°).

2789. Cf. *v.* VIII. 469.

शोभामात्रोदितागर्हपरिबर्हाबहिष्कृतः ।
तत्राऽविभक्तकटकः पार्थिवः समजायत ॥२७९१॥

अनास्थो राजवदने सत्त्वावष्टम्भयोः पुरा ।
अत्राऽपरो न निक्षेप्यो राजबीजीति दारदान् ॥२७९२॥

त्रिल्लकः संदिशन् दूतैर्वृद्धिं पार्श्वाहरिं नयन् ।
तयोरेकस्य सामर्थ्यादैच्छत् तं हस्तपातिनम् ॥२७९३॥

अभित्तिलिखितालेख्यकल्पं बलहरस्य तत् ।
तादृग्विलोक्य सामर्थ्यमथ राज्ञश्च सर्वतः ॥२७९४॥

विभक्ताशेषसैन्यस्य तत्र तत्राऽरिसंकटे ।
ज्ञात्वाऽप्रतिसमाधेयच्छिद्रमुन्मुद्रदुर्नयः ॥२७९५॥

अकृशश्वाविदाचारश्चिरं स्वाङ्गैः स गोपितम् ।
बहिर्दुर्धर्षमत्याक्षीद् द्वितीयमपि कण्टकम् ॥२७९६॥

ध्वान्तेऽम्बुधरजालान्ध्यमहावाते रजोभरः ।
स्वपक्षभेदयोर्ज्ञातकर्णजपमहोद्यमः ॥२७९७॥

कुलच्छेदकृतो राज्ञस्तत्र तत्राऽतिसंकटे ।
अशान्तजागरोऽत्यर्थमनर्थपरिपोषकः ॥२७९८॥

सोऽथ शूरपुरेऽकस्माद् बहुभिः सह डामरैः ।
तेन संपूरितः पृथ्वीहरजो लोठकोऽपतत् ॥२७९९॥

2793. After this *v.* युग्मम् .

2796. After this *v.* तिलकम् .

2799. d) For लोठक cf. *vv.* VIII. 2496, 2748, 2912, 3313. After this *v.* तिलकम् .

तस्य संघटतः कन्थां प्रयातं वैकृतं चिरात् ।
पालीभङ्गे तटस्येव प्रावृट्पूर्णस्य लक्ष्यताम् ॥२८००॥

निद्राणोपेन्द्रजठरप्रसादनिसृतं जगत् ।
समेतमिव तत्सैन्यं प्रत्यभाज्जलदागमे ॥२८०१॥

यावद्भिः पार्यते नेदृक्संख्यातुमपि तद्बलम् ।
भर्तव्यकल्पैः सुस्वल्पयोधमध्यगतैरपि ॥२८०२॥

तावद्भिरञ्जुगैः पिञ्चदेवद्रङ्गाधिपो युधि ।
तद्योधान्यास्यहरितः सरितश्चाऽतिथीन् व्यधात् ॥२८०३॥

तटोज्ज्वलैश्चिताचक्रैर्बिम्बितैस्तटिनीजले ।
मृतानामपि संस्कारः क्रियमाण इवाऽभवत् ॥२८०४॥

इति विस्मृतमृत्युः स कुर्वन्नेकाहमाहवम् ।
कथंचिदाप्तैरन्येद्युर्भग्नसारोऽपसारितः ॥२८०५॥

पुरे स शून्ये सैन्यानि संगृह्णंस्तत्र सर्वतः ।
द्वित्रैरहोभिर्नगरं सुखग्राह्यममन्यत ॥२८०६॥

इच्छां पद्मपुरास्कन्दे मन्दत्वं त्रिल्लकोऽनयत् ।
पृष्ठस्थयोर्यशोराजकम्पनाधीशयोर्भयात् ॥२८०७॥

2801. b) D P_3 °प्रमाद° (for °प्रसाद°).

2802. c) D P_3 त्यक्तव्य° (for भर्तव्य°).

2803. b) D °इङ्गाधि° (for °द्रङ्गाधि°). —c) P_3 I_3 SA °हरित° (for °हरितः). After this v. युग्मम् .

2804. a) D P_{1-3} तदोज्ज्वलै°; C S' ततोज्ज्वला° (for तटोज्ज्वलै°).

न भृत्यैस्तद्विधः सिद्धश्चाऽस्यैकस्मिन्नसंमते।
विधेयान्यलवन्यस्य डामरे होलडौकसि ॥२८०८॥

द्वैराज्ये सुस्सलस्याऽपि नैवाऽदृश्यत तादृशः।
अनर्थौ यादृगुत्तस्थौ तत्सुतस्य समन्ततः ॥२८०९॥

चतुष्कमवधीर्याऽथ राज्ञा पादगदोपमम्।
रिल्हणः प्रैषि तं ग्रीवागण्डतुल्यं व्यपोहितुम् ॥२८१०॥

प्रस्थितस्तत्प्रमाथाय शमालैः सोऽन्ववध्यत।
व्रजन् प्राग्ज्योतिषं हन्तुं पार्थः संशप्तकैरिव ॥२८११॥

अधावच्चाऽभ्यमित्रीणस्तान् व्यावृत्त्य निपातयन्।
पश्चाकरोन्मुखः पृष्ठलग्नान् भृङ्गानिव द्विपः ॥२८१२॥

रणश्रान्तेन गमिता त्रियामा तेन रामुषे।
गर्जत्कुल्यार्पितारातिपृतनानादसंस्क्रिये ॥२८१३॥

तं कल्याणपुरं प्राह्णे विशन्तं सोऽग्रमागतः।
रुरोधाऽभ्येत्य भूयोऽपि बलैर्भरित्तदिङ्मुखः ॥२८१४॥

आपतन्नेव चाऽरातिपदातीन् संमुखागतान्।
दृष्टनष्टान् व्यधाच्छागानिवाऽग्रेऽजगलो गिलन् ॥२८१५॥

2808. d) SA होलळौ°; S′ लौलरौ°; C होलरौ° (for होलडौ°).

2810. c) All Mss. except SG read रिल्हणप्रेषितं (for रिल्हणः प्रैषि तं).

2813. b) St (before suggestion) C S′ $P_{1,2}$ I_3 रामशे; D (before suggestion) P_3 रामुशे (for रामुषे, cf. *v.* II. 55). —c) All Mss. read गर्जन्कु° (for गर्जत्कु° suggested with St). —d) D C S′ $P_{1,3}$ °नाश° (for °नाद°).

2814. a) All Mss. read तत्कल्या° (for तं कल्या° suggested with St).

उद्वृत्तमारुतस्येव तस्याऽऽपाते पदातिभिः ।
तत्यजे रिल्हणः पर्णैर्हेमन्त इव पादपः ॥२८१६॥

पश्यतस्तस्य ते विद्रवन्तो जिह्मा न जिह्रियुः ।
देहस्पृहापारमित्यै कस्यौचित्यमनत्ययम् ॥२८१७॥

आप्तैरथाऽपसृत्य स्वैरर्थितो रिल्हणोऽब्रवीत् ।
नयन् प्रजासृजश्चाऽऽस्यं स्वामिभक्तिस्मृतेः स्मितम् ॥२८१८॥

धीप्रभावाविशेषेऽपि जन्तोर्जन्तोर्यदीशिता ।
भृत्यभावेऽपि यो लुप्तकृत्यो धिक् तस्य जीवितम् ॥२८१९॥

जातं वक्त्रसरः श्मश्रुराजिनीलाब्जभोज्ज्वलम् ।
जराकैरवगौरं च राज्ञः पादान् प्रपद्य यान् ॥२८२०॥

म्लायत्सु तेषु भ्रूभङ्गभृङ्गभ्राजिष्णुभिर्भवेत् ।
कथं लक्ष्मीविलासैस्तदखण्डैरविडम्बितम् ॥२८२१॥

एषा कापुरुषासेव्या धीराणां नैव पद्धतिः ।
यदायासलवत्रासात् सौख्यवैमुख्यभागिता ॥२८२२॥

वस्त्रापासन एव शीतजनितस्त्रासोऽथ तीर्थाम्बुभिः
स्नाने ह्लादसुखोपलब्धिरसमब्रह्मानुभावोपमा ।
वैह्वल्यं समरे वपुर्विजहतामेवं किलोपक्रमे
कैवल्याख्यसुखोपलम्भपरमा पश्चात्पुनर्निर्वृतिः ॥२८२३॥

2818. c) All Mss. read प्रजासृजा साम्यं (for प्रजासृजश्चाऽऽस्यं found in SG *sec. manu*).

2819. a) D P_{1-3} I_3 ह्री···वा; C S′ ह्रीप्रभावा (for धीप्रभावा suggested).

2820. b) All Mss. read °भोजनम्; St suggests °भाजनम् (for °भोज्ज्वलम् suggested with D).

2821. After this *v.* युग्मम्.

2823. c) SA_1 (before corr.) वैह्वल्ये (for वैह्वल्यं). —d) C वैकल्पा°; S′ SA P_2 I_3 वैकल्या° (for कैवल्या°).

एवमुक्त्वा परानीकमेकाकी स व्यगाहत ।
गृह्णञ्शरान् हरिप्रोथश्वाससंदिग्धशूत्कृतान् ॥२८२४॥

स्वर्णत्सरुप्रभाजालहरितालोज्ज्वलोऽभजत् ।
खड्गपट्टनटस्तस्य रणरङ्गोत्तरङ्गताम् ॥२८२५॥

तत्खड्गस्य घ्नतः खड्गाञ्जीवैर्जालच्छलाद् ध्रुवम् ।
उत्थाय लग्नं शत्रूणां तृणैस्तृणमणेरिव ॥२८२६॥

आजौ तमनुजग्मुस्ते यैरगण्यन्त वैरिणः ।
तिर्यञ्चोलक्ष्यतां यातास्तेषां प्राणास्तृणान्यपि ॥२८२७॥

संप्रविष्टो मुखान् मृत्योः कैश्चिन्मार्गैः स निर्गतः ।
तिमेः संमीलितास्यस्य श्रोत्ररन्ध्रैरिवोदकम् ॥२८२८॥

शश्वत्कुर्वन् परावृत्तीः श्रमशान्त्यै विनिर्गतः ।
प्रक्षीणभूयिष्ठबलो लब्धोत्सेको रिपावभूत् ॥२८२९॥

पृष्ठतः स पपाताऽथ चतुष्कः पुष्कलैर्बलैः ।
साहायकागतं प्राक् स यं स्वं कंचिदमन्यत ॥२८३०॥

तस्योभयमुखस्याऽरिसैन्यस्याऽहेरिवेक्षणात् ।
न संरम्भः शिखण्डीव परं ताण्डवितोऽभवत् ॥२८३१॥

तौ व्यूहावथ पर्यायैर्मुखपृष्ठं प्रदर्शयन् ।
सोऽक्षिणोद् युधि मन्थाद्रिर्मथनेऽब्धितटाविव ॥२८३२॥

2825. a) SA $P_{1,2}$ I_3 °प्रजाजा° (for °प्रभाजा°).

2830. a) St C S' $P_{1,2}$ I_3 पृष्ठतोथ (for पृष्ठतः स).

2831. c) All Mss. read संरंभे (for संरंभः suggested with St).

कीलनिश्चलयोर्भ्राम्यन्नसकृद्वाऽन्तरे द्वयोः ।
कुविन्द इव पूरण्योः तुरंगमजवान्वितः ॥२८३३॥

भासः प्रत्यग्रहीत् तस्य तमेकपृतनारयम् ।
एकतोऽम्भोभरं द्वीपस्येव कूलबिलोद्गमः ॥२८३४॥

तेन वैरिचमूश्चक्रे लुलितायुधकुण्डला ।
क्रीडता चण्डवेगेन पुरुषायितुमक्षमा ॥२८३५॥

त्रासपाण्डून् द्विषां वक्त्रकुम्भान् स्वेदाम्भसाचितान् ।
स कुर्वन् भूभुजं जाने भूयो राज्येऽभ्यषेचयत् ॥२८३६॥

स च पार्थ्वीहरिश्चाऽऽस्तामन्योन्यस्य क्षपाक्षणे ।
सज्जौ मान्त्रिकवेतालाविव रन्ध्रगवेषिणौ ॥२८३७॥

साहायकागतान् साक्षीकृत्य क्ष्मापतिसैनिकान् ।
अन्येद्युः सोऽकरोच्छत्रुं वनमार्गावगाहिनम् ॥२८३८॥

पर्यस्तशौचान् संचिन्त्य त्रिल्लकादीनथाऽऽययौ ।
सञ्जपालस्तृतीयस्मिन् दिवसे रिल्हणान्तिकम् ॥२८३९॥

नृपप्रतापग्लपितः स ताभ्यां पर्यशोष्यत ।
वनान्तः शुचिशुक्राभ्यां घुणक्षीण इव द्रुमः ॥२८४०॥

2833. c) All Mss. except C S′ have a *lacuna* (for पूरण्योः). —d) D $P_{1,2}$ I_3 SA °तुरा°; St P_3 °त्वरा° (for °जवा°).

2834. b) D (before suggestion) SA P_{1-3} I_3 °नावयम् (for °नारयम्). —c) D °म्भोधरं (for °म्भोभरं).

2836. c) SA $P_{1,2}$ I_3 °भुजां (for °भुजं).

2837. a) C S′ पांक्ती°; $P_{1,3}$ पात्तवी°; I_3 पार्श्वी°; P_2 पाक्षी°(for पार्थ्वी°).

2838. b) All Mss. read °कृत° (for °कृत्य suggested with D St).

2839. a) P_1 I_3 संचित्य (for संचिन्त्य).

चितानल इवाऽऽसार्यैर्युद्धैः शममनाश्रितः।
उदयेन शनैर्निन्ये चतुष्कोऽपि मितोष्मताम् ॥२८४१॥

दारदं तद् बलं दृप्यद्धेमसंनाहवाहिभिः।
हयैरवरुरोहाऽद्रिकुहरादाहवोन्मुखम् ॥२८४२॥

तुरुष्कलोकेनाऽऽक्रान्तान् देशांस्तद्दशमीयुषः।
शङ्कमानैर्जनैर्ज्ञाता कृत्स्ना म्लेच्छावृतेव भूः ॥२८४३॥

प्रयाणमात्रान्तरिते धन्ये द्वारपतावपि।
साहसं निस्सहायस्य तत्खड्गैरग्रतोऽभवत् ॥२८४४॥

ज्वलत्कनकसंनाहं तत्सैन्यं स द्विषोऽरुधत्।
कचज्ज्वालावलिं दावं सनिर्झर इवाऽचलः ॥२८४५॥

विधूय जयचन्द्रादीनग्रप्रस्थानरोधिनः।
बलबाहुल्यदृप्तास्ते व्यगाहन्ताऽऽहवावनिम् ॥२८४६॥

तेषां हयसहस्राणि त्रिंशद्विंशत्तुरंगमैः।
रंहसा प्रतिजग्राह निजग्राह च गर्गजः ॥२८४७॥

तस्याऽसुहृद्भिर्ददृशे पौरुषं तदमानुषम्।
एकैकस्याऽग्रतो यत् स वैश्वरूप्यमिवाऽऽदधे ॥२८४८॥

अश्ववक्त्राग्रविन्यस्तवक्त्रास्ते विद्रुताः क्षणात्।
जगाहिरे कापुरुषा गिरीन् किंपुरुषा इव ॥२८४९॥

2841. b) P_1 °बंद्धः (for °र्युद्धैः).

2842. a) D St P_{1-3} I_3 SA have a *lacuna* (for तद्). D (before suggestion) P_{1-3} I_3 SA दृप्ये° (for दृप्य°).

2844. d) SA तत्खाङ्गे°; P_3 तत्खङ्गा°; P_2 तत्खंडे°; I_3 तत्खङ्गे° (for तत्खड्गै°).

2846. c) D C S′ P_1 °दीप्ता° (for °दृप्ता°).

2849. a) C S′ °वल्गा° (for °वक्त्रा°).

ज्योतिस्तर्जितकान्ति दन्तयुगलं बाध्यं सुधादीधिते-
दर्शनास्वादधिया प्रिया मधुलिहां कुम्भस्थली कुम्भिनः ।
नागस्यैष विरोधभाक्सरसिजस्येत्यत्र नेन्दो रति-
स्तस्याऽऽप्यायकृतोऽहितोऽयमिति नाऽप्यस्य द्विरेफा द्विषः ॥

प्रतिष्ठालोठनं कर्तुं ततो बलहरस्य सः ।
आजन्म वैरं संरेभे तेन भूभृद्धितेच्छया ॥२८६६॥

स तथा दारदान् भग्नानभिन्नो भूभुजेष वः ।
स भोजान् राजवदनो हन्यादित्यभ्यधान्निजैः ॥२८६७॥

दरद्राजानकानीतनेतारौ कम्पनापती ।
प्रख्यातक्षेमवदनमधुभद्राभिधावुभौ ॥२८६८॥

त्रस्यन्नोजसनामा च कोट्टेशो मन्त्रितं रहः ।
ब्रुवाणास्तद् व्यहस्यन्त भोजेनाऽन्तरवेदिना ॥२८६९॥

स्फाटिकेनेव सैन्येन तेनाऽग्रे रुद्धमप्यथ ।
दिधक्षु राजार्कमहो विड्डसीहेन्धनेऽपतत् ॥२८७०॥

पार्थिवानर्थदुश्चिन्ताऽऽमययक्ष्मपरिक्षतः ।
स यत्कृष्णक्षपाक्षीणसोमसाम्यं समाययौ ॥२८७१॥

2865. c) C S′ सुरस्यै°; St वासस्यै°; D P_{1-3} I_3 SA वा···स्यै° (for नागस्यै° suggested). —d) St D C °हितो (for [अ] हितो°).

2866. b) C S′ सा (for सः).

2867. b) D C S′ P_1 I_3 °न्नाभिन्नो (for °नभिन्नो).

2868. d) D P_{1-3} I_3 °मशु···भि°; St SA °मत्ता···भि° (for °मधुभद्राभि°).

2870. c) $P_{2,3}$ I_3 SA दिदक्षु (for दिधक्षु). —d) C S′ $P_{1,2}$ °सूर्ये°; I_3 SA °सूहे° (for °सीहे°).

रोगग्रस्ते रणप्रष्ठे पृष्ठगोतरि भर्तरि।
तथाऽभियोज्ये स्थाने च भयजर्जरतां गते ॥२८७२॥

आहारस्थं बलहरं विहाय निखिलास्ततः।
पलायिषत तेऽन्येद्युर्विगाह्य हरिभिर्गिरीन् ॥२८७३॥

दृष्ट्वा बहुमतं प्रातरागन्तारः पुनर्वयम्।
कथयित्वेति संप्रार्थ्य साल्हणिं सह तेऽनयन् ॥२८७४॥

प्राक्पीतकोशो वैवश्यात् स तेषामनुगोऽभवत्।
भ्रष्टकार्यस्तु वैह्वल्यं श्वभ्रे मज्जन्निवाऽऽदधे ॥२८७५॥

मुहुः सर्वशिरोद्रिक्तरक्तपूर्णमिव ज्वलत्।
अवरोहदनच्छाम्बुसोपानाश्मनिभं मुहुः ॥२८७६॥

ज्ञातेन पतितेनैव मुहुर्व्योम्ना महीसमम्।
व्रजतस्तस्य वैलक्ष्यादलक्ष्याक्षमभून्मुखम् ॥२८७७॥

दध्यौ च धिङ्नो ये शश्वत्प्रभावं वयमीदृशम्।
राज्ञो दृष्ट्वाऽप्यनात्मज्ञा जानीमो मर्त्यधर्मताम् ॥२८७८॥

प्रतिभाप्रौढिनिर्भाततत्त्वानां नाऽन्यथा गिरः।
महाकवीनामेतादृक्प्रतापानलवर्णने ॥२८७९॥

2873. c) C S′ पलायितास्ततोऽन्ये°; D (before suggestion) P_3 पलाय्यत तैरन्ये°; $P_{1,2}$ I_3 SA पलायिततेन्ये° (for पलायिषत तेऽन्ये° suggested with St D). After this *v.* युग्मम्.

2875. a) SA P_2 °कोषो (for °कोशो).

2876. a) C S′ वपुः (for मुहुः). C S′ SA P_2 I_3 °दृक्त° (for °द्रिक्त°). —b) D P_2 I_3 SA °व ज्वलन्; C S′ वोद्वहम्; P_1 °व ज्वलम् (for °व ज्वलत्).

2877. a) St C S′ °तेनेव (°तेनैव).

2879. a) All Mss. read °प्रौढ° (for °प्रौढि° suggested with D). —b) All Mss. read शिरः (for गिरः suggested with D).

राज्ञः प्रतापशिखिनः कणाः क्षोणौ न सन्ति चेत् ।
तत्कस्माद् वयमायाताः पदन्यासेऽप्यधीरताम् ॥२८८०॥

अनेकशोऽङ्गैर्वीराणां पीतधाराम्बुडम्बरे ।
शोषः प्रादुष्कृतो न स्यात् तज्ज्वालासंज्वरं विना ॥२८८१॥

किमन्तरेण तद्धूममालान्ध्यं प्रोन्मिषद्दृशः ।
मार्गामार्गविभागस्य परिज्ञाने विमूढता ॥२८८२॥

मधुमत्यास्तटेऽन्यस्मिन् विवर्ज्य दरदः स्थितान् ।
वीचीजवनिकाच्छन्नः सोऽवाप्याऽथ तटेऽवसत् ॥२८८३॥

क्रमादुत्खातखेदस्तैर्नीत्वा स्वशिबिरान्तरम् ।
तत्रैष्यतेति संधातुं रोहद्द्रोहस्पृहातुरैः ॥२८८४॥

नृपं तेषां ह्यगण्यार्थवर्षिणं नयनैपुणात् ।
उपजीवितुमिच्छाभूत् तद्रक्षणवणिज्यया ॥२८८५॥

नानेहा विग्रहस्याऽयं प्रत्यासन्नो हिमागमः ।
मधुमासि विधास्यामः पुनरारब्धिमुत्तमाम् ॥२८८६॥

कालक्षेपेऽक्षमत्वं चेद्भुट्टराष्ट्राध्वनाऽधुना ।
त्वां तन्निदध्मो बलिनस्त्रिल्लकस्योपवेशने ॥२८८७॥

राजानं राजवदनः श्रितस्तैरित्यसावतः ।
उक्त्वैष्यत स्वराष्ट्रान्तर्युक्त्या बन्धुं नराधमैः ॥२८८८॥

2880. b) C S′ P_2 काणाः (for कणाः).
2883. d) $P_{1,3}$ °वाप्य (for °वाप्याऽथ).
2884. a) C S′ P_2 °खेदै° (for °खेद°). —b) SA P_2 I_3 °विरा° (for °बिरा°). —d) D (before suggestion) P_{1-3} °द्द्रोहः स्पृहान्तरैः; C S′ I_3 SA °द्द्रोहः स्पृहातुरैः (for °द्द्रोहस्पृहातुरैः suggested with St D).
2887. c) All Mss. read त्वान्तर्नि°; अन्तर्नि° may also be suggested (for त्वां तन्नि° suggested),
2888. d) St बन्द्धुं (for बन्धुं). After this *v.* तिलकम् .

अपि राजपुरीयाणां कौटिल्यं तैर्हि जीयते।
दैर्घ्यं निदाघघस्राणां वियोगदिवसैरिव ॥२८८९॥

तथा यातमुपालेभे दूतैर्वलहरोऽथ तम्।
प्रह्वौ निहितवांस्त्वस्मीति त्रोटितवटाकरः ॥२८९०॥

उत्साहादाहवस्थोऽपि स तथा गार्गिमग्रिमम्।
आयान्तं च नृपानीकमुत्साहान्न व्यचिन्तयत् ॥२८९१॥

अकस्माद् विद्रुतदरद्राजभोजादिवार्तया।
न व्यदीर्यत यद्धैर्यपर्याप्तिस्तत्किलाऽङ्कनम् ॥२८९२॥

आडम्बरालम्बनस्य भेदेऽप्यच्छिन्नविग्रहः।
यदयुद्धोद्धतं सिध्येत् तत्कस्याऽमानुषं विना ॥२८९३॥

कालानुरोधात् संधित्सू धन्यद्वाराधिपावथ।
सोऽयोजयद् विलम्बेन भोजप्रत्यागमाशया ॥२८९४॥

ततोऽलंकारचक्रः स नेतुं साल्हणिमाययौ।
ज्ञातेयाद् दारदानेत्य प्रार्थिता परिपन्थिनीः ॥२८९५॥

बुद्ध्वा तदनुबन्धेऽपि द्रोहनिर्बन्धिनीः सभाः।
अग्रहीन्मार्गसेत्वग्रे निधनाद् व्यवसायिताम् ॥२८९६॥

भृत्यैः सह युवप्रायैर्वीक्ष्य तं मर्तुमुद्यतम्।
दरातुरं दरद्राजसैन्यं तद्दैन्यमाययौ ॥२८९७॥

2889. c) D (before suggestion) C S′ $P_{1,2}$ I_3 SA °दस्राणां; P_3 °खप्राणां (for °घस्राणां suggested with St D).

2891. b) P_2 I_3 SA गर्गि° (for गार्गि°). —cd) D P_{1-3} I_3 SA °नीकमु··· हान्न; C S′ °नीकं दृष्ट्वापि न व्य° (for °नीकमुत्साहान्न व्य° suggested with St).

2892. a) I_3 om. दर.

2895. c) D C S′ $P_{1,2}$ I_3 SA °वेत्य; P_3 °देत्य (for °नेत्य suggested with St). —d) C S′ °पन्थिनः; P_2 °मंत्रिनीः (for °पन्थिनीः).

व्यपोहन्ती बलहरी बाहुभिः कलहं सरित् ।
कल्लोलास्फालनोल्लापैर्निनिन्देव दरद्दलम् ॥२८९८॥

ह्रेपितः स्वावरोधैश्च सेर्ष्यैश्च म्लेच्छपार्थिवैः ।
सैन्यैः कदनभीतैश्च विड्डसीहोऽथ तं जहौ ॥२८९९॥

पुरस्सरैर्भग्नसेतुपालैः पारं परं ततः ।
विद्रावितानि स प्राप भिन्दंस्तूर्यरवैर्दिशः ॥२९००॥

असामर्थ्ये वरूथिन्याः स्वस्य चाऽर्थितसंधिना ।
आनीतो विड्डसीहेन दूतः प्रोक्तोऽथ भूपतेः ॥२९०१॥

अमानुषानुभावेन तावत्त्वत्स्वामिना भवेत् ।
प्रातिसीमिकसामन्तबुद्ध्या स्पर्धासु धीवरः ॥२९०२॥

अश्रद्धेयानुसंधान एव यान्तौ यमान्तिकम् ।
जयराजोऽस्मि वाऽमुष्य प्रभावावेदकौ दिवि ॥२९०३॥

तेन दिव्यानुभावेन निर्जयोऽपि जयो मम ।
पान्थस्य कूलविभ्रंशात् तीर्थे पतनमुन्नतिः ॥२९०४॥

अथाऽऽयातः पुरे स्थित्वा कंचित्कालं निजेऽविशत् ।
यमराष्ट्रमसत्कीर्तिलसद्घन्दनमालिकम् ॥२९०५॥

अबुद्ध्वा भोजमायान्तं संधिं तत्रैव वासरे ।
सार्धं द्वारेशधन्याभ्यां स राजवदनोऽप्यगात् ॥२९०६॥

2899. c) C S′ कदा न (for कदन°).

2900. c) St suggests विद्राव्य तानि (for विद्रावितानि, found in all Mss.).

2901. a) D C S′ P_{1-3} SA °थिन्या (for °थिन्याः). —c) C S′ °सिंहेन (for °सीहेन).

2902. b) D C S′ P_3 तावत्ततस्वा°; P_1 तावंतंद्र°; P_2 I_3 SA ताव···त्स्वा° (for तावत्त्वत्स्वा° suggested with St).

2903. b) D P_{1-3} I_3 SA यान्तो (for यान्तौ).

2905. d) C S′ P_{1-3} I_3 SA °मालिकाम् (for °मालिकम्).

अश्वागतं तं व्यावृत्य षष्ठं प्रष्ठं मनस्विनाम् ।
आदाय तावथाऽभ्यर्णं प्राविक्षातां क्षमापतेः ॥२९०७॥

अहंकाराद् विमोहाद् वाऽविमर्शेन बहिष्कृतौ ।
उपेक्षामक्षते भोजेऽभजतां राजबीजिनि ॥२९०८॥

आहूतस्तु हठोत्कण्ठाभाजाऽपि प्रभुणाऽसकृत् ।
अनिश्शेषीकृताराातिर्न व्यावर्तत रिल्हणः ॥२९०९॥

प्रभोः पुरस्तात् कार्यान्ते तेन स्थातुमशक्यत ।
प्रसादाकाङ्क्षिणा सूदेनेव भोक्तुं न हि क्वचित् ॥२९१०॥

द्विधा कृता येन युद्धे पृथ्वीहरसुतद्वयी ।
मगधेन्द्राकृतिर्भीमेनेव कार्याक्षमाऽभवत् ॥२९११॥

मातृकुक्षिमिव स्वोर्वीं तेनाऽऽजौ लोष्ठकः कृतः ।
खाण्डवे खण्डितः सर्प इव गाण्डीविनाऽविशत् ॥२९१२॥

भजंश्चतुष्कः संकोचं दुर्भेदं त्रिल्लकालयम् ।
स्वकायकर्परं दर्पोज्झितः कूर्म इवाऽविशत् ॥२९१३॥

निश्शेषीकृतकार्यः स शौर्येणैव महीपतेः ।
पार्श्वं पादनखज्योतिःपट्टबन्धाप्तये ययौ ॥२९१४॥

प्रतापैर्नृपतेरित्थं विप्लवः शोषितोऽप्यभूत् ।
अमात्यमतिदोषेण भूयः प्रादुष्कृताङ्कुरः ॥२९१५॥

2907. c) D C S′ P_{1-3} I_3 °ताभ्यर्णं (for °थाऽभ्यर्णं).

2908. b) D C S′ P_{1-3} I_3 SA °विमर्षेण (for °विमर्शेन). —d) All Mss. read भजते (for [अ]भजतां suggested with St).

2912. b) Cf. v. VIII. 2496 for लोष्ठकः.

2913. a) SA I_3 भजंश्च° (for भजंश्च°).

दण्डार्हो राजवदनो दानेनाऽऽप्यायितो यतः ।
निर्भयं भोजमायान्तं प्रतिजग्राह तं पुनः ॥२९१६॥

उत्कोचपरिणामात्तं सोऽथ स्थापयति स्म तम् ।
दिन्नाग्रामाभिधे स्थाने खाशकानां निवेशने ॥२९१७॥

इत्येनमब्रवीद्धयश्चेदायास्यो नाऽनुगामिनः ।
मितानुयायी द्वारेशः प्रायास्यद् गोचरान्मम ॥२९१८॥

सोत्कम्पः साहसस्रोतःपातेऽनीयत नौरिव ।
त्रिल्लकेनाऽपि स स्थैर्यं नीतिरज्जुप्रसारणात् ॥२९१९॥

व्यसनोल्लासवैवश्यं विशां पत्युर्व्यचिन्तयत् ।
येनाऽव्यवस्थाप्राथम्यं स जाल्मः पुनरग्रहीत् ॥२९२०॥

अलंकारादिभिः स्वास्थ्ये स्थाप्यमानोऽपि मन्त्रिभिः ।
अत्यजन्नैव कौटिल्यमजितात्मेव दुर्ग्रहम् ॥२९२१॥

गदं वैद्य इवाऽपाकं तमवज्ञाय पार्थिवः ।
पक्वगण्डानिवाऽऽरेभे रिपून् पाटयितुं परान् ॥२९२२॥

आगन्तव्यं त्वया पश्चाद्यात्स्वस्मासु प्रकम्पताम् ।
भोजमुक्त्वेत्यलंकारचक्रोऽगाद् विप्लवोद्यतः ॥२९२३॥

2918. [a]) All Mss. read °ब्रवीच्छ्व° (for °ब्रवीद्धय° suggested with St. Tr.).

2919. [a]) SA P_2 I_3 °स्रोत° (for °स्रोतः°).

2921. [c]) SA C $P_{2,3}$ I_3 °न्नेव (for °न्नैव). —[d]) SA $P_{2,3}$ I_3 °त्मैव (for °त्मेव).

2922. [a]) D P_1 गण्डं (for गदं).

2923. [d]) P_2 I_3 SA °चक्रेगा° (for °चक्रोऽगा°).

तं जयानन्दवाडाख्यो दस्युरानन्दवाडजः ।
अन्वयुर्विक्रमोदग्राः परेऽपि क्रमराज्यजाः ॥२९२४॥

अग्रस्थितो राजगृह्योऽलंकारः स्वल्पसैनिकः ।
वालुकासेतुकल्पस्तैर्जज्ञे सिन्धुरयैरिव ॥२९२५॥

स तु रामखराद्याजिक्षोभसंभावनां विशाम् ।
उदपादयदेकाकी कुर्वन् बहुभिराहवम् ॥२९२६॥

आपानरभसक्षुभ्यद्रक्षःसंभ्रमदक्षिणम् ।
रणं जगाम गञ्जात्वमञ्जसाऽस्रपरिस्रुतः ॥२९२७॥

स तूलकूटमिव तत्कटकं विकटं द्विषाम् ।
किमन्यत् प्रैरयत् क्वाऽपि प्रभञ्जन इवाऽञ्जसा ॥२९२८॥

ग्रासाय गृध्रकङ्कादिपत्त्रिव्रातस्य तत्यजे ।
आनन्दवाडसूनुः स हत्वा तेनेषुणा रणे ॥२९२९॥

भोजस्योत्थातुकामस्य जिघृक्षोः क्ष्माभुजश्च तत् ।
पङ्कप्रधावत्क्रकरव्याधन्यायो व्यवर्धत ॥२९३०॥

अनुड्डयनसामर्थ्यः श्राम्यति क्रकरो यथा ।
धावन् पङ्के पतन् व्याधोऽप्यनुधावत्यथाऽन्वहम् ॥२९३१॥

2924. a) S′ P_2 °वाराख्यो; SA °वाळाख्यो (for °वाडाख्यो). —b) S′ °वारजः; SA °वाळजः; P_2 °वाजः (for °वाडजः). —d) C S′ °ज्यकाः (for °ज्यजाः).

2925. c) D P_{1-3} I_3 SA °कल्पस्तं; C S′ °कल्पस्तु (for °कल्पस्तै° found in SG *sec. manu*).

2926. a) D P_{1-3} I_3 SA राम···रा°; C S′ शत्रुभिरा°; St suggests रामचरा° (for रामखरा° suggested).

2929. b) P_2 I_3 SA °पतित्रा°; C S′ °पातित्रा°; P_3 °षत्रित्रा° (for °पत्रित्रा°). —c) C S′ °वार°; SA °वाळ°; $P_{2,3}$ °वाडा° (for °वाड°).

2931. d) D P_1 I_1 °धावन् प°; C S′ P_2 °धावन् य° (for °धावन्स°).

प्रसङ्गे साहसस्यैवं भोजः क्लैब्यमगात् सदा।
तं प्राप्तुमिच्छुर्भूपोऽपि मतिमोहं मुहुर्मुहुः ॥२९३२॥

दिन्नाग्रामस्थिते भोजे स राजवदनोऽप्यगात्।
पुनः किं चौरचण्डालाः श्रेयसीत्युक्तिमीशितुः ॥२९३३॥

डामरा भग्नसंघाता भूयः पूर्वाधिकां ततः।
कन्थां ते ग्रन्थयामासुर्मुहुर्या शौर्यशालिनः ॥२९३४॥

ते द्वारपतिमायातं सोढुं शेकुर्न केवलम्।
अशक्यैराहवैर्यावत् तात्पर्यादुदवेजयन् ॥२९३५॥

तेषां त्राणार्थमन्येषामुत्थानार्थमथाऽऽययौ।
कृष्टोऽलंकारचक्रेण नीविं दत्त्वा स साल्हणिः ॥२९३६॥

तेषां परेद्युः पार्श्वं स यियासुरसकृद् यदा।
हायाश्रमं श्रान्तसैन्यो द्वारेशोऽबुद्ध तं तदा ॥२९३७॥

अजानन्निव तेषां स व्याजसन्धिं निबद्धवान्।
मिषात् कुतोऽप्यगात् तिर्यक्स्थितं सत्तारमूलकम् ॥२९३८॥

तस्मिंस्तत्र स्थिते दूरात् कुतस्त्यामपि पूत्कृतिम्।
श्रुत्वा भोजोऽवदत् सायं किमपि व्याकुलीभवन् ॥२९३९॥

निजैर्विहस्यमानोऽपि त्रासात् तस्मादहेतुकात्।
व्यरंसीत् संभ्रमान्नाऽसौ चक्रे सज्जांस्तु वाजिनः ॥२९४०॥

2932. c) All Mss. read तत्प्राप्तु° (for तं प्राप्तु° suggested with St). After this *v.* युग्मम्.

2936. b) C S′ °मुक्तानर्थ°; P_2 °मुक्तानार्थ° (for °मुत्थानार्थ°).

2937. cd) P_1 om.

2938. d) D C S′ $P_{1,3}$ I_3 SA संतार°; P_2 मंतार° (for सत्तार° suggested with St).

2939. ab) P_1 om.

त्रस्तोऽलंकारचक्रोऽथ दशग्राम्यग्रतो द्रुतम् ।
क राजपुत्र इत्येवं कथयित्वा पलायितः ॥२९४१॥

उदतिष्ठत् ततो ग्राममध्यात् तूर्यध्वनिर्महान् ।
आस्कन्दावेदकः सेनानिनादश्च क्षपासुखे ॥२९४२॥

अलक्षितो ध्वान्तमध्ये भेजे भोजः पलायनम् ।
श्वः कर्तव्येष्वलंकारचक्रो युद्धाय संदधे ॥२९४३॥

दत्तो द्वाराधिपेनाऽग्निर्गिरिवर्त्म प्रकाशयन् ।
ध्वान्तध्वस्तात्मनां तेषां तदाऽभूदुपकारकः ॥२९४४॥

द्वाराधिपस्य क्षाम्यन्तः संधिं भोजप्रतीक्षया ।
श्रुत्वा तमथ वृत्तान्तं भङ्क्त्वा ते डामरा ययुः ॥२९४५॥

समत्यजदपत्यादिबन्धं धीरोच्चलाश्रयात् ।
आर्जि च भोजोऽलंकारचक्रेणाऽमङ्गलावहम् ॥२९४६॥

संरंभात् कर्तुमारेभेऽसामर्थ्यान्न च चक्षमे ।
भोजस्तत्राऽप्यभूत् तर्षान्नाहारादिसुखान्वितः ॥२९४७॥

बाणाग्निजस्त्रिपुरनिर्दहने प्रतापः
पाथोनिधेः प्रमथने वडवाग्निजन्मा ।
आसाद्य मन्दरनगेन समागमं हि
न क्काऽपि पन्नगपतेः सुखसख्यमासीत् ॥२९४८॥

2944. c) P_2 I_3 SA °त्मना (for °त्मनां).
2945. a) P_{1-3} I_3 S′ SA क्षम्यन्तः (for क्षाम्यन्तः).
2946. a) All Mss. read असन्त्यजन्न° (for समत्यजद° suggested). —c) All Mss. read स (for च suggested).
2947. ab) D St SA P_{1-3} I_3 om. with a *lacuna*.

क्षुत्पिपासाश्रमं हन्तुं प्राप्तः स्वविषयावनौ ।
अलंकारात्मजैर्भूयो बन्द्धुं भोजोऽभ्यलक्ष्यत ॥२९४९॥

पितुर्मतेन बुद्ध्या वा स्वया तत्तद्दिधित्सतः ।
सोऽभिसंधाय निर्यातः प्रापाऽथ विषयान्तरम् ॥२९५०॥

ततो बलहरेणैव कृत्यं निश्चित्य कार्यवित् ।
अनास्थोऽन्यलवन्येषु दिन्नाग्रामं पुनर्ययौ ॥२९५१॥

द्वाराधिपोऽहितोद्धारधीरोऽप्यत्राऽन्तरेऽक्षमः ।
चक्षूरोगेण भग्नाभियोगोऽकस्माद् व्यधीयत ॥२९५२॥

भोजाय दातुमैच्छद् यो डामरस्ते सुते ददौ ।
पर्माण्डये गुल्हणाय राजजाय च निर्जितः ॥२९५३॥

रोगोच्चण्डतया दण्डप्रयोगावसरे कृते ।
तत्र साम प्रयुज्यैव द्वारेशो विवशोऽविशत् ॥२९५४॥

अभियोगक्षणे तस्मिन् ययौ भारसहः क्षयम् ।
दुर्नामिकामयक्षामः षष्ठचन्द्रोऽपि गर्गजः ॥२९५५॥

तत्राऽऽमयाविन्येवाऽऽत्तोद्रेकौ तदनुजौ निजौ ।
चक्राते वसुधां दुस्स्थामास्कन्दाद्यैरुपद्रवैः ॥२९५६॥

त्रिल्लकः प्रबलैरन्यैः सहाऽभेदं प्रवर्धयन् ।
नाऽग्रहीद् विग्रहैकाग्रः सान्त्वनामपि भूपतेः ॥२९५७॥

2949. d) C S′ $P_{1,2}$ I_3 बन्धुं (for बन्द्धुं).
2950. c) D सोसि° (for सोऽभि°).
2951. c) C S′ P_1 I_3 °स्थोऽन्यो (for °स्थोऽन्य°).
2954. a) C S′ °गश्च°; $P_{2,3}$ I_3 °गोश्च° (for °गोच्च°). —c) D P_3 प्रयोज्यैव (for प्रयुज्यैव).
2956. b) All Mss. read तमनुजं निजम् (for तदनुजौ निजौ suggested with St, cf. *v.* VIII. 2753).

षष्ठे निष्ठां गते रोगमग्ने द्वारपतावपि ।
नियुक्तः क्ष्माभुजा धन्यो निरगात् तारमूलकम् ॥२९५८॥

भोजश्च्युतोऽसुतोऽन्येषां बलिनां गोचरे पतेत् ।
प्राप्तप्रतिष्ठो निस्तीर्णो देशाद्वाऽसाध्यतां व्रजेत् ॥२९५९॥

इति संचिन्त्य सामाद्यैरुपायैस्तं जिघृक्षुणा ।
क्ष्माभुजा मर्मसंरम्भो विदधे सोऽभियोगभाक् ॥२९६०॥

अज्ञातोदर्कवैषम्या दुर्नीतिः सा महीभुजम् ।
व्यावृत्याऽबाधत च्छिन्नपुच्छाक्रुष्टेव पन्नगी ॥२९६१॥

बलिनं राजवदनं नृपं चाऽवेत्य निर्बलम् ।
आभ्यन्तराश्च बाह्याश्च विक्रियां यत्क्रमाद् ययुः ॥२९६२॥

छिद्रान्तराणि सुलभानि सदैव हन्त
पातालरन्ध्रसरणेरिव दण्डनीतेः ।
बद्धीभवन् प्रसरमन्तरसंप्रविष्टो
यात्यप्रतर्क्यनियमात् पतनं भजेद् वा ॥२९६३॥

भोजत्यागार्थितो राज्ञा क्षीणार्थोऽसौ व्रजेदितः ।
उक्त्वेत्यमुं बलहरस्तस्य वृत्तिमकारयत् ॥२९६४॥

2958. c) C S′ $P_{1,2}$ I_3 SA धन्ये (for धन्यो).

2960. c) St °जामन्द° (for °जा मर्म°). After this *v.* युग्मम् .

2961. b) C S′ P_2 I_3 SA °भुजाम् (for °भुजम्). —c) St C S′ $P_{2,3}$ I_3 °बाधता° (for °बाधत). —cd) P_1 om.

2964. a) All Mss. read °त्यागो° (for °त्यागा° suggested with St. Tr.). D P_3 °जितो (for °र्थितो).

तां लब्धप्रसरां मायां राजपक्षे विलोक्य सः ।
युक्त्यन्तराणि संलेभे प्रयोक्तुं नीतिकौशलात् ॥२९६५॥

संधिं पदे पदे बद्ध्वा सार्धं बलहरादिभिः ।
कुर्वन् गतागतं धन्यो जनस्याऽवाप हास्यताम् ॥२९६६॥

शश्वद्द्व्यावर्तमानस्य राजकार्यस्य नाऽवधिम् ।
अरघट्टघटीयन्त्रगुणस्येवाऽऽससाद सः ॥२९६७॥

तस्य चक्र इवोद्भ्रान्ते कर्तव्ये तैक्ष्ण्यभागपि ।
भेत्तुं प्ररोढुं वाऽप्यासीन्नयो बाण इवाऽक्षमः ॥२९६८॥

नीतराजद्वयो व्यग्रः शेषस्यैकस्य विग्रहे ।
चतुरङ्ग इव क्रीडन् विवशोऽभूद् विशां पतिः ॥२९६९॥

बद्धलक्ष्यः प्रदानार्थं ततश्च च्छद्मना परान् ।
भञ्जतो वाजिपत्त्यादि नाऽप्यासीन्नाऽप्यजीगणत् ॥२९७०॥

दस्युषूद्यतसङ्गेषु शीतापायप्रतीक्षिषु ।
नागाद् बलहरः स्वेषामुन्मूलनमशङ्कत ॥२९७१॥

सामर्थ्याशिथिलामित्रभावे सूत्रितविप्रिये ।
तस्मिन् धावति धन्ये च शश्वत्सोऽवेपताऽऽकुलः ॥२९७२॥

संमन्त्र्य सार्धं भोजेन धन्यं समदिशत् ततः ।
बद्ध्वाऽर्पयत नागं मे भोजं दास्यामि वस्ततः ॥२९७३॥

2965. c) C S′ युक्त्या° (for युक्त्य°). —d) P_3 °नैपुणात् (for °कौशलात्).
2967. a) D P_3 °द्विवर्त°; SA P_1 I_3 °द्वयवर्त° (for °द्व्यावर्त°).
2971. a) SA *prima manu* C S′ दस्युषु द्यूत°; SA *sec manu* St P_2 I_3 दस्युषु स्यूत° (for दस्युषूद्यत°).
2972. a) D (before suggestion) P_{1-3} I_3 °मित्रो° (for °मित्र°).
2973. d) C S′ $P_{1,2}$ वस्तुत: (for वस्तत:).

भूरिकार्यकृतं स्वस्य बन्धनार्थावहां रिपोः ।
धन्यो व्यसनवैवश्याद् धियं नाऽबुद्ध तस्य ताम् ॥२९७४॥

पार्थिवाः स्वार्थसंसिद्धित्वराविरतसत्त्वया ।
धियाऽविशुद्धं यत्किंचित् कुर्वन्तीति न नूतनम् ॥२९७५॥

काकुत्स्थोऽपि प्रियाप्रार्थी व्यग्रः सुग्रीवसंग्रहे ।
वीरोऽविधेयं स्वार्थान्ध्याद् वधं व्यधित वालिनः ॥२९७६॥

संहृत्य सत्यनित्यत्वं राज्यगर्वाविशुद्धधीः ।
आचार्यं पाण्डवो राजा धर्मनिघ्नोऽप्यघातयत् ॥२९७७॥

आ भिक्षुविग्रहान्नित्यद्रोग्धुर्नागस्य निग्रहः ।
स्वार्थापेक्षी तटस्थस्य तत्कालं न विगर्हितः ॥२९७८॥

अगृहीत्वा तु भूभर्त्रा कंचिद् भोजार्पणे पणम् ।
सोऽवाष्टम्भीत्यभूत् तस्मिन् मन्युर्मतिमतां मनाक् ॥२९७९॥

यथा तत्कृत्यमायत्यां हितं जातं तथैव चेत् ।
विचार्याऽकारि राज्ञा तच्छेमुषीयममानुषी ॥२९८०॥

विभिन्न इव भोजस्तु नागं समदिशद् यथा ।
दित्सुर्बलहरो राज्ञे त्वदर्पणपणेन माम् ॥२९८१॥

2974. b) All Mss. read °वहं (for °वहां suggested with St D).

2976. a) P_{1-3} SA काकस्थो° (for काकुत्स्थो°).

2978. b) All Mss. read विग्रहः (for निग्रहः suggested).

2979. c) All Mss. read सोव° (for सोऽवा° suggested with St).

2981. a) C S' दित्स्व° (for दित्सु°). D $P_{1,3}$ °लहरं; C S P_2 I_3 SA °लहरे (for °लहरो suggested with St). P_3 राज्ञा (for राज्ञे).

बन्धमश्रद्दधानोऽस्य राज्ञस्त्रासादसौ श्रयेत् ।
स विद्न्नथ माध्यस्थ्यमिति तं हि तथाऽवदत् ॥२९८२॥

षष्ठचन्द्रे गते निष्ठां जयचन्द्रेण पार्थिवः ।
संगृहीतेन तं नागं पार्श्वं प्रावेशयत् ततः ॥२९८३॥

पक्षीकृतः क्ष्माभुजाऽयं हन्यादस्मान् भयादिति ।
चलन्तमपि तं भोजस्तन्मन्त्रितमबोधयत् ॥२९८४॥

तथेति जानन्नपि तं कृष्टोऽस्म्येतैरनीशताम् ।
यातः किमपि हन्तेति दूतैर्नागोऽप्यभाषत ॥२९८५॥

नियतं नियतिस्रोतोगर्भे जन्तोर्निमज्जतः ।
कथ्यमानं तटस्थेन श्रोतुं न श्रवणौ क्षमौ ॥२९८६॥

नागे बद्धे तत्कुटुम्बैर्भीतैरेत्य समाश्रितः ।
मायाशाली बलहरो दुर्धर्षः समपद्यत ॥२९८७॥

भोजनिष्क्रयविक्रेयं तमादाय ययौ ततः ।
रिल्हणेन समं धन्यो धावन् बलहरान्तिकम् ॥२९८८॥

सान्तर्हासो मोहयंस्तौ प्राङ्नागं दत्त मे ततः ।
भोजं दास्यामि व इति ब्रुवन् भ्रामयति स्म सः ॥२९८९॥

2984. b) C S′ °मस्माद्; P_1 °मस्मान् (for °दस्मान्). —d) D C S′ P_{1-3} °न्त्रिणमरो°; SA I_3 °न्त्रिणमबो° (for °न्त्रितमबो° suggested with St).

2985. b) C S′ SA $P_{1,2}$ °सीत्यैतै° (for °स्म्येतै°).

2986. d) D (after suggestion) C S′ °णे क्षमौ (for °णौ क्षमौ).

2987. d) All Mss. read दुर्दर्शः (for दुर्धर्षः suggested with D).

2988. a) SA $P_{2,3}$ I_3 भोजोनि° (for भोजनि°). —d) SA P_2 I_3 °रोन्ति° (for °रान्ति°).

2989. a) C S′ °मोहयन्तः; St (after suggestion) P_1 I_3 °मोहयत्तौ; SA $P_{2,3}$ मोहयन्तौ (for मोहयंस्तौ).

बद्धमूलतया दूरं दुर्धर्षौ योद्धुमागतम् ।
सर्वं तच्च तयोः सैन्यं निन्ये कृत्यविधेयताम् ॥२९९०॥

वर्षयुद्धापकर्षादिभिः खिन्नौ तौ ततोऽभ्यधात् ।
इतोऽपसृतयोः कुर्यां युवयोर्मतमित्यसौ ॥२९९१॥

एकप्रयाणान्तरिते स्थितयोः पथि चाऽकरोत् ।
कार्यान्तःपातवैवश्ये तयोर्मतिविमोहनम् ॥२९९२॥

काचिद् बलहरस्याऽऽसीत् पर्याप्तिर्धैर्यसत्त्वयोः ।
निश्चोद्याऽद्यतने काले वीराणां विरलैव या ॥२९९३॥

तथा हारितमार्गाय साहसात् पार्श्वमीयुषे ।
द्रुह्यति स्म न धन्याय लोभाद् भोजाय नाऽपि यः ॥२९९४॥

मतिमोहेन नागं चेद्घ्नुर्मे सचिवास्ततः ।
कुर्यां तं स्वपदेऽभ्यर्थ्य चकारेति च चेतसि ॥२९९५॥

नागासांनिध्यलब्धर्द्धिदार्ढ्यार्थं गूढवैकृतः ।
भ्रातृव्योऽपातयन्नागं धन्याद्यैर्लोष्ठकाभिधः ॥२९९६॥

सचिवैर्निहते नागे निर्हेत्वहितमोहितैः ।
दुर्मन्त्रितं नरपतेः स्वैः परैश्च व्यगर्ह्यत ॥२९९७॥

स्वजातीयवधक्रोधाद् विरुद्धैः सर्वडामरैः ।
नागानुगैश्चाऽऽश्रितोऽभूत् ततो बलहरो बली ॥२९९८॥

2991. ab) D P_{1-3} I_3 St SA °दि···खिन्नौ; C S′ °दिसङ्खखिन्नौ (for °दिभिः खिन्नौ suggested). —b) A_1 (before corr.) °न्यधात् (for °भ्यधात्).

2995. a) C S′ मतेर्विमोहेन; SA_1 मतिमोहे (for मतिमोहेन).

देहिनो व्यसनापातवैवश्याद् भ्रमतोऽपथि ।
अकार्यं कुर्वतः कार्यं सिद्धः संसाधयेद् विधिः ॥२९९९॥

उद्यद्दुस्सहवित्ततानवतया बद्धावधाने मन-
स्युन्मार्गभ्रमणेऽवशस्य रभसाच्छ्वभ्रे परिभ्राम्यतः ।
अन्योऽपाहितकोशपृष्ठलुठनात् संदर्शिताङ्कक्षते-
र्जन्तोर्हन्त तनोति दुर्गतिशमं रम्यानुलोम्यो विधिः ॥३०००॥

तथा निरनुसंधानं नागं धीसचिवैर्हतम् ।
नाऽबुद्ध भोजः संजातत्रासस्त्वेवं व्यकल्पयत् ॥३००१॥

लब्धवर्णस्य नाऽवर्णावहं कर्मेदमीशितुः ।
अलब्धपणबन्धस्य वाञ्छिताप्त्यै विशङ्क्यते ॥३००२॥

यश्च युद्धमिति व्यग्रं हर्षादाद्यामवापि यः ।
भोजमन्यकरस्थोऽयमशक्यो ह्यन्यथा मम ॥३००३॥

उक्त्वेति मोहयन् धन्यमुख्यान्मुग्धोऽस्मि संदिशन् ।
इति मां राजवदनः स्थितस्तन्नूनमन्यथा ॥३००४॥

आ भिक्षुविप्लवाद् द्रोहसुभिक्षस्याऽनुबन्धिनः ।
किं राजवदनोऽप्येष लोभात् संभाव्यते न भूः ॥३००५॥

2999. b) C S′ P_3 भ्रमतः पथि (for भ्रमतोऽपथि).

3003. a) St suggests युद्धमतिव्यग्रं (for युद्धमिति व्यग्रं).

3004. b) St D SA P_{1-3} I_3 °मुख्या··· स्मि (for °मुख्यान्मुग्धोऽस्मि). All Mss. read संदिशेत् (for संदिशन् suggested with St). After this v. युग्मम् .

अथाऽविशङ्किनस्त्रासव्युदासायाऽस्य खाशकाः ।
रक्तार्द्रकृत्तिन्यस्ताङ्घ्रि कोशपानं प्रचक्रिरे ॥३००६॥

प्रादुष्कृतभियः क्षिप्तरक्षिणोऽमुष्य तिष्ठतः ।
विश्वासार्थं बलहरो विरलः पार्श्वमाययौ ॥३००७॥

अमात्यमतिजाड्येन नष्टे कृत्येऽथ कृत्यवित् ।
स्वयमुत्तम्भनं नीतेः संरेभेऽसंभ्रमो नृपः ॥३००८॥

चैत्रः पादपमण्डलस्य तटिनीतोयस्य वर्षागमः
सत्कारो गुणगौरवस्य नयनप्रेम्णोऽन्तिकासेवनम् ।
ऐश्वर्यस्य महोद्यमो जयविधेर्गाढाविषादग्रहः
कर्तव्यस्य च सिंहदेवनृपतिर्म्लानौ न तत्त्वावहः ॥३००९॥

प्रवाहेणेव कृत्यस्य हठेन हरतोऽन्तरे ।
प्रातिलोम्यं श्रितवता पारं गन्तुं न पार्यते ॥३०१०॥

अतो धूर्तो नृपो मुग्ध इति ज्ञातोऽरिभिर्मुधा ।
मौग्ध्यं प्रदर्शयंस्तेषां यतते स्माऽभिसंधये ॥३०११॥

स हि यत्तत्प्रदानेन भजन् भोजान्तिकस्थितीन् ।
तस्याऽविश्वासपात्रत्वं मंत्रस्तस्याऽभितोऽनयत् ॥३०१२॥

गन्धेन वासितोत्सङ्गाः कुरङ्गार्यङ्गजन्मना ।
प्रज्वलन्त्यो विभाव्यन्ते तटिन्योऽपि कवाटिभिः ॥३०१३॥

3006. c) St C S′ P1–3 I3 °स्रस्ता° (for °न्यस्ता°).

3008. c) All Mss. read °त्तम्भने [C S′ °नं] नीतः (for °त्तम्भनं नीतेः suggested with D).

3013. d) All Mss. read कवाटिभिः (for करेणुभिः suggested).

नीडस्याऽन्तः सरन्ध्रस्य सर्वतो हि भयं स्पृशन् ।
जाले द्वाराग्रबद्धे च निर्गमे पतनं विदन् ॥३०१४॥

ताम्येद्यथा खगो भोजस्तथाऽन्तस्स्थेष्वविश्वसन् ।
बहिर्भूपेन रुद्धाऽध्वा प्रस्थानेऽप्यभजद् भयम् ॥३०१५॥

तदा स दौस्स्थ्यातिथितां प्राप्तः प्रैक्षत न क्षणम् ।
मनोविनोदनं किंचित्कृत्यं लोकद्वयोचितम् ॥३०१६॥

उग्राभिषङ्गमनुषङ्गि परस्य दुःखं
हन्तांश्लथं व्यथयति प्रसभार्द्रभावम् ।
बद्धः सरोजकुहरे विरहार्त्तनादै-
श्चक्राभिधस्य मधुपोऽधिकमेति दैन्यम् ॥३०१७॥

रणे पूर्णव्रणाश्यानशोणितो लूनकुन्तलः ।
फेनोद्गार्याननः क्रन्दंस्तेनैकः प्रैक्ष्यत द्विजः ॥३०१८॥

स पृष्टो विप्लुतैर्नीतसर्वस्वं विक्षतं तथा ।
स्वं डामरैर्निवेद्यैनं निनिन्द त्रातुमक्षमम् ॥३०१९॥

स्वदौस्स्थ्यार्तमनास्तस्य दुःखेन व्यथितोऽन्वहम् ।
घट्टितार्द्रव्रण इव प्राह स्मेति स सान्त्वयन् ॥३०२०॥

गर्हार्होऽस्मि न ते ब्रह्मन् योऽनुग्राह्योऽहमीदृशः ।
विषमे वर्तमानश्चेत्यथ सोऽपि तमब्रवीत् ॥३०२१॥

3014. c) P_1 ज्वाले (for जाले).
3015. c) $P_{2,3}$ रुद्ध्वा° (for रुद्धा°). After this *v.* युग्मम् .
3016. a) St C S′ वौस्थ्या°; P_2 दोस्थ्या° (for दौस्स्थ्या°).
3017. a) C S′ °षद्धि (for °षङ्गि). —c) St °हार्त°; P_2 I_3 °हार्तु° (for °हार्त्त°).
3018. c) St C S′ फणो° (for फेनो°).
3019. a) D (before suggestion) P_{1-3} I_3 SA नीत: सर्व°; C S′ नीतं सर्वं° (for नीतसर्व° suggested with D).
3020. a) St C S′ °दौस्थ्यार्त°; P_{1-3} I_3 °दौस्थ्यन्त° (for °दौस्स्थ्यार्त°).

दुर्ग्रहेणाऽमुना ब्रूहि कोऽर्थः पार्थिवपुत्र ते।
सारासारविदो यूनः कुले जातस्य मानिनः ॥३०२२॥

प्राणान् संदेहमारोप्य प्रणम्य प्रकृताशयान्।
पीडयित्वा विशः क्लेशैः कार्यं किमिव पश्यसि ॥३०२३॥

यश्च ते प्रतिभात्येव जेतव्यो विदितो न किम्।
अग्निशौचः स सारङ्गः परशौर्याग्निमज्जने ॥३०२४॥

यत्र शस्त्रशलाकाऽपि विकला तद्विधीयते।
इन्दीवरदलद्रोण्या घटनं स्फाटिकाश्मनः ॥३०२५॥

पृथ्वीहरावताराद्रिप्रत्यनीकिजितः परे।
के नामाऽस्य न संघर्षे क्षुद्रप्राया दरिद्रति ॥३०२६॥

किं दृप्या एव बुद्ध्वाऽपि कृत्यं द्वैराज्यजीविनाम्।
भृत्याशयाः फणिग्राहिगृहीता इव भोगिनः ॥३०२७॥

जातैः क्ष्मावलयोद्वहे फणिकुले धिग्भोगिडिम्भैर्मुदा
व्यालग्राहिविकासितास्यकुहरैर्ग्रासस्य हा गृह्यते।
एतान् भिक्षयितुं न तु प्रथयितुं ते जीविकायै जन-
त्रासार्थं ननु कारयन्ति हि दृतेर्निमज्जनोन्मज्जनम् ॥३०२८॥

3022. c) सारसा is no longer legible in SA.

3024. c) For अग्निशौच cf. fn. *v.* V. 15.

3025. d) C S′ घटनां (for घटनं).

3027. a) All Mss. read दृप्य (for दृप्या suggested with St).

3028. a) D C S′ °लैर्धिग्भो°; SA P_{1-3} I_3 °लैर्धिर्भो° (for °ले धिग्भो° found in SG *sec. mauu*). D C S′ $P_{1,2}$ I_3 SA °र्मुधा (for °र्मुदा). —b) All Mss. read °तस्य कुहरैर्ग्रामस्य (for °तास्य-कुहरैर्ग्रासस्य suggested with St).

इत्युक्तवन्तं तं सान्त्वयित्वा भोजो व्यसर्जयत् ।
तदैव चाऽऽशु व्याकोशविवेकः समपद्यत ॥३०२९॥

भव्यात्मत्वं प्रशममहिमोल्लासने हन्त हेतु-
र्भावानां तु ध्रुवमपरथा मार्दवं क्रूरता वा ।
स्पृष्टं पादैरमृतमहसः स्यात्कठोरं हिमांशो-
र्याति ग्रावाऽप्यहह रभसादार्द्रतां चन्द्रकान्तः ॥३०३०॥

राजन्याभिजने जातोऽप्यलज्जत्वमशिक्षितः ।
सोऽन्तरं स्वस्य राज्ञश्च मुहुर्महदचिन्तयत् ॥३०३१॥

गुणैः शौर्यनयत्यागसत्यसत्त्वादिभिः प्रभोः ।
पूर्वेऽप्युर्वीभुजः खर्वाः क्षुद्राः स्पर्धासु के वयम् ॥३०३२॥

तस्य प्रभावदीप्तेऽपि समये क्षान्तिशीतला ।
शक्तिः क्षयजडत्वेऽपि मुग्धानां नो महोष्मता ॥३०३३॥

क्ष्वेडाग्नितापनिविडोरगसंगमेऽपि
तुङ्गस्य चन्दनतरोरतिशीतलत्वम् ।
काले हिमर्तुपरिपिञ्जरसंज्वरेऽपि
निम्नस्य कूपकुहरस्य महोष्मयोगः ॥३०३४॥

कुतोऽविपर्ययात् कार्यसुतं नृपममुं विना ।
प्राप्यं कस्य पुनः प्राप्यमप्यशुद्धया न बाधितम् ॥३०३५॥

3029. [c]) All Mss. read तदेव (for तदैव suggested with St D).
3030. [c]) SA P_3 स्पष्टं (for स्पृष्टं).
3033. [c]) C S′ जयजडत्वे° (for क्षयजडत्वे°).
3034. [b]) All Mss. read °रपि शी° (for °रतिशी° suggested with D).
3035. [a]) All Mss. read कुतोपि प° (for कुतोऽविप° suggested). —[ab]) All Mss. read कार्यं सु° (for कार्यसु° suggested). —[c]) All Mss. read प्राप्य (for प्राप्यं suggested). —[d]) D $P_{1,2}$ I_3 SA बाधितुम् (for बाधितम्).

भ्रष्टं निर्झरवारि शुभ्रमचलैः स्वीयेन भूयः क्वचि-
ल्लभ्यं लभ्यमथाऽभ्रतः कलुषताद्दुष्टं प्रकष्टं न तत् ।
निर्यन्निर्भरनिम्नगाम्बु नभसः प्राप्येत नित्यं दध-
त्प्रालेयत्वमुपेत्य शुद्धिमधिकां नाऽद्रेर्हिमाद्रेर्नगैः ॥३०३६॥

तदर्थमेव ग्रथितो योऽनर्थोऽग्रथितात्मनः ।
स तेन स्वस्थतां नेतुमर्थितो न स्पृशेद् रुषम् ॥३०३७॥

प्लोषाय योऽस्य दववह्निमदादमुष्मिन्
स्वस्थे स तेन शिखिना ग्लपितः समीपम् ।
अभ्येति चन्दनतरोर्दववह्निदाह-
शान्त्यै यदि प्रियकृदेष न तस्य किं स्यात् ॥३०३८॥

समग्रदुर्गतावर्हदपकर्तेव भूपतिम् ।
लोकनाथं तमुद्धर्तुं धीरं धन्यः पुनः पुनः ॥३०३९॥

राजप्रसादनोपायान्वेषी बलहरान्तिकम् ।
राजदूतमथाऽऽयान्तमेकदैकं व्यलोकयत् ॥३०४०॥

दरद्देशं व्रजन् दृष्टवान् प्राक्प्रज्ञातमन्तिकम् ।
स नमन्तं तमानीय ततः स्मेर इवाऽब्रवीत् ॥३०४१॥

राज्ञः किमन्यसंधानैः संधिं बध्नात्वसौ मया ।
प्राज्ञैर्हि भिषजा भोज्यमातुराय समर्प्यते ॥३०४२॥

3039. a) All Mss. except SG *sec. manu* and P_3 read समग्रोद्दु° (for समग्रदु°).

3040. d) All Mss. except SG *sec. manu* read °मेकमेकं (for °मेकदैकं).

3041. b) D C S′ P_{1-3} वाक्प्रज्ञातु°; P_2 I_3 SA वाक्प्रज्ञांत° (for प्राक्प्रज्ञात° suggested with St).

3042. b) D SA S′ P_{1-3} I_3 संधिबन्धात्त्व° (for संधिं बध्नात्व°).

तत्तस्याऽश्रद्दधानस्य नर्मस्मेरस्य जानतः ।
प्रत्ययोत्पादनं तैस्तैरालापैः किंचन व्यधात् ॥३०४३॥

निर्दम्भभाषितैरूढविस्रम्भः स कथान्तरे ।
अथाऽभिगम्य राजानं स्तुवन् भोजमभाषत ॥३०४४॥

राजपुत्राभिजातस्य पादच्छायाऽस्य लभ्यते ।
स्वर्णाद्रेरिव कल्याणप्रकृतेः पुण्यभागिभिः ॥३०४५॥

अनुवृत्त्याऽतिमृद्व्याऽपि तस्याऽपोह्येत वैकृतम् ।
ज्योत्स्नयेव शरद्भानुपरितापौष्ण्यमम्भसः ॥३०४६॥

अपि स्मरसि चारत्वे नियुक्तोऽस्मि महीभुजा ।
विशतस्ते दरद्देशमभूवं पुरतः पुरा ॥३०४७॥

ततो निवृत्तो वृत्तान्तं मुख्यमाख्याय तावकम् ।
कालं क्षेप्तुं कथां दैर्घ्यं नयन् मध्ये तमभ्यधाम् ॥३०४८॥

क्षुत्तृडध्वक्लमश्रान्तान् देव तानवलोक्य माम् ।
निन्दतः स्वानुगान् भोजो निर्भर्त्स्यैवं तदाऽब्रवीत् ॥३०४९॥

स दैवतमिवाऽस्माकं कुलालंकरणं प्रभुः ।
वयं त्वसुकृतो यस्य नाऽऽप्नुमः पादसेवनम् ॥३०५०॥

3046. b) All Mss. read °पोह्यत (for °पोह्येत suggested with St).

3047. a) All Mss. read चारुत्वे (for चारत्वे suggested with St D).

3048. c) All Mss. read कथादै° (for कथां दै° suggested with St). —d) C S′ SA $P_{1,2}$ I_3 °भ्यधात् (for °भ्यधाम्).

3049. a) SA $P_{1,2}$ I_3 क्षुन्दन्न° (for क्षुत्तृड°). —b) St P_{1-3} I_3 त्वाम° (for तान°). —c) C S′ $P_{1,2}$ I_3 SA भोजं (for भोजो).

3050. b) All Mss. read प्रभोः (for प्रभुः suggested).

गण्याः पर्यन्तनिस्सारास्तत्संबन्धादिमे वयम् ।
चन्दनभ्रान्तिकृत्काष्ठं यत्स्यात् तद्गन्धवासितम् ॥३०५१॥

तच्छ्रुत्वैव दयार्द्रत्वं त्वयि यातः स लक्षितः ।
पृच्छन् पितेव किं गर्भरूपो वक्तीति मां पुनः ॥३०५२॥

तन्निशम्यैव भोजस्य द्रवीभूतमभून्मनः ।
सोऽन्तर्बाष्पोऽप्यपश्यत् तं सान्त्वयन्तमिवाऽग्रतः ॥३०५३॥

स व्यक्तमात्रासंबोधमुग्धत्वेन विहीयते ।
तत्त्ववित्कारणाज्ञानादन्तःकरणवेदनम् ॥३०५४॥

अश्रद्दधानस्तामिच्छां भोजस्याऽकृच्छ्रवर्तिनः ।
प्रतिदूतीकृते तस्मिन् धन्यो न प्रत्ययं दधे ॥३०५५॥

देविताऽभूद् यथा नागवृत्तान्ते न भवेत् तथा ।
महीभुजं मोहयितुं मायया दीव्यते मया ॥३०५६॥

मा भूद् भिन्नोऽयमित्येवमुक्त्वा बलहरं रहः ।
व्याजार्जवेन भोजस्तु संधिबन्धाय तत्वरे ॥३०५७॥

तत्कालयोग्यसाचिव्यश्चक्रिकाचतुरस्तथा ।
तेनाऽऽशु दैशिकापत्यमेको दूत्ये न्ययोज्यत ॥३०५८॥

स बालकतया नित्यस्वतन्त्रश्चक्रिकां स्वयम् ।
आचरेदिति नाऽऽशङ्कां भोजे बलहरोऽभजत् ॥३०५९॥

3053. c) SA I_3 om. प्य.

3054. a) All Mss. read सुव्यक्त° (for स व्यक्त° suggested). —c) All Mss. except SG *sec. manu* read °कारणज्ञा° (for °कारणाज्ञा°).

3057. After this *v.* युग्मम्.

पार्थिवः प्रार्थितः संधिदूतमास्तं प्रतीक्षते ।
प्रत्यागतेन तेनेति ततो भोजोऽभ्यधीयत ॥३०६०॥

तत्राऽसंनिहितान्यास्तः स्त्रीत्वादप्रतिभामपि ।
धात्रीं नोनाभिधानां स्वां राज्ञोऽभ्यर्णं व्यसर्जयत् ॥३०६१॥

मृतेन पित्रा मात्रा च हीनं तमनुयातया ।
मातृकृत्यं ययाऽत्राऽऽसीच्छैशवे माननीयया ॥३०६२॥

पत्युः प्रीत्यै विसंधानध्वंसाकल्पादिकल्पनात् ।
सखीकृत्यं सपत्नीनां यया शान्तेर्ष्यया कृतम् ॥३०६३॥

ह्रासोल्लासे हि कार्याणां योग्यकृत्याप्तनिश्चयात् ।
न यां सुक्षत्रियां क्ष्माभृत् संभ्रान्तां जातु वीक्षते ॥३०६४॥

श्वशुरेण प्रजाभिश्च कृतं राज्ञोऽभिषेचने ।
आशास्यं या महादेवी पट्टबन्धं समादधे ॥३०६५॥

अपत्यप्रियताभोगलोभभर्तृप्रसादनैः ।
प्रेर्यमाणाऽप्यकार्येषु बुद्धिर्यस्या न धावति ॥३०६६॥

स्वस्याऽन्यस्य च संधाने जाते भर्तुरभिन्नधीः ।
भाग्योदयेष्वनुत्सिक्ता या चाऽखण्डितसद्व्रता ॥३०६७॥

आबाल्याद् भावविद्भर्तुः कुसृत्यनुसृतौ न सा ।
कार्यमध्यं विगाहेत मानाभिजनरक्षिणी ॥३०६८॥

3060. a) I_3 सन्धि (for सन्धि°).
3062. b) All Mss. read हीने (for हीनं suggested with St).
3063. d) C S′ यथा (for यया).
3064. a) All Mss. read °ह्लासो (for °ह्लासे suggested with St D).
3065. c) All Mss. read वा (for या suggested with St).
3066. d) C S′ I_3 °स्यात्र (for °स्या न).
3067. a) D (before suggestion) St $P_{1,2}$ I_3 स्वत्रान्यत्र; C S′ भत्रान्यत्र; P_3 स्वस्यान्यत्र (for स्वस्याऽन्यस्य suggested with D).

इति कल्हणिकादेव्या माध्यस्थ्ये स धियं व्यधात् ।
अस्थानपदयात्रां सा सीमान्तप्रापणावधि ॥३०६९॥

गुप्त्यै लन्नकवित्तादि परार्ध्यं मध्यपातिनाम् ।
पाथेयार्थं पृथुस्वर्णभाजि कोशादि चाऽऽत्मनः ॥३०७०॥

प्रापयामास किं चाऽष्टौ प्रकृष्टाभिजनोद्भवान् ।
पालनार्थं राजपुत्रान् देवी यत्सर्वसंविदम् ॥३०७१॥

वाचिकं तद् गृहीत्वा तामागमत् पार्थिवेन सः ।
धात्रीं स कारयन् धन्यो बद्धेच्छासिद्धिनिश्चयाम् ॥३०७२॥

विहितप्रत्ययस्तस्याः सद्यः स्यात्तु महीपतिः ।
राजधर्मस्य च वसन्नासीद् दोलाकुलाशयः ॥३०७३॥

स हि दध्यौ निर्विरोधो वैराग्येणाऽथ मायया ।
संकटान्मोचितव्योऽसौ यायात् कालेन विक्रियाम् ॥३०७४॥

अनिःशेषितजीमूतजालमाविर्भवन् रविः ।
अनूनक्लेशशेषं च विवेको न स्फुरेच्चिरम् ॥३०७५॥

3069. d) All Mss. read सीमन्ताप्रा° (for सीमान्तप्रा° suggested with St). After this *v.* कुलकम् .

3070. b) All Mss. read °नम् (for °नाम् suggested with St).

3071. a) SA P_{1-3} I_3 प्राप्नु° (for प्राप°). —d) All Mss. except SG *sec. manu* read °वत्स° (for यत्स°).

3072. a) All Mss. read वाचकं (for वाचिकं suggested with D) —b) P_{1-3} D पार्थिवेव (for पार्थिवेन).

3074. b) C S′ P_2 I_3 °ग्येनाथ (for °ग्येणाऽथ). —c) All Mss. read °तव्यासौ (for °तव्योऽसौ suggested with St).

मुग्धान्निरनुसंधाननागबाधाद्वेत्य नः ।
स्वार्थस्य सिद्धये माया तेनेयं निरमायि वा ॥३०७६॥

लब्धलक्षेऽपरिक्षीणे शक्ते यूनि गणाश्रिते ।
क्षत्रधर्मस्थिते नेदृग्विवेकः क्वाऽपि लक्ष्यते ॥३०७७॥

अवल्लि कौङ्कुमं पुष्पमपुष्पं क्षीरिणः फलम् ।
अकालपर्ययापेक्षं वैराग्यं वा महात्मनाम् ॥३०७८॥

न त्याज्यो राजपुत्रोऽसावेवं मायानिधिर्यदि ।
एवं विवर्तश्चेत् तस्मिन्नदृष्टे किं दृशोः फलम् ॥३०७९॥

राज्ञी राजात्मजाश्चैते प्रतिष्ठाभङ्गशंसिनः ।
ऋजुप्रभावात् सुस्पष्टमन्यत्कार्यं न मन्यते ॥३०८०॥

अटन्ती कुटिलं स्पष्टं सरित्सवैर्न लक्ष्यते ।
कान्ताकुन्तलनिःस्यन्दी तोयबिन्दुरिव क्रमः ॥३०८१॥

इति ध्यात्वा राजधर्मं सत्यप्रज्ञोचितं व्यधात् ।
धन्यरिल्हणयोः कार्यं श्रुतावन्यान् विसर्जयन् ॥३०८२॥

स्वस्यैवाऽर्थस्य दार्ढ्याय साल्हणिस्त्वां दिदृक्षते ।
समागमायेत्युक्त्वाऽथ धन्यो दूतैरनीयत ॥३०८३॥

3076. a) C SA P_2 मुग्धानिर° (for मुग्धान्निर°). —c) D (before suggestion) P_{1-3} स्वस्थस्य (for स्वार्थस्य).

3077. a) C °लक्षे परि° (for °लक्षेऽपरि°). —b) C SA P_2 I_3 शक्तो (for शक्ते).

3078. a) St C S′ $P_{1,2}$ I_3 कुङ्कुमं (for कौङ्कुमं).

3081. a) D $P_{1,3}$ I_3 अटिलं; SA_1 *prima manu* अ···लं; P_2 अटिले (for अटन्ती). —b) D P_{1-3} I_3 SA शरत्स° (for सरित्स°). —c) St P_2 I_3 °विष्यन्दी (for °निःस्यन्दी). —d) D °वाक्रमः (for °व क्रमः).

3082. d) $P_{1,3}$ श्रुत्वा° (for श्रुता°).

3083. b) C S′ SA P_{1-3} I_3 °णिस्तां (for °णिस्त्वां).

मा भैषीदेष संधित्सुः सैन्यादिति मितानुगः ।
अवर्तिष्ट तटिन्याः स द्वीपान्तस्तत्प्रतीक्षया ॥३०८४॥

सरित् सा जानुदघ्नाम्भा भूत्वा घर्मद्रुते हिमे ।
गगनालिङ्गिभिर्भीमा तरङ्गैः समपद्यत ॥३०८५॥

अवाप्तयेर्ष्ययाऽलङ्घ्यभावं यान्त्याऽपि दन्तिनाम् ।
रुद्धः सिन्ध्वाऽभवत् सोऽथ द्विषां रन्ध्रैषिणां वशे ॥३०८६॥

सिन्धोरुभयतस्तोयैर्व्याप्ततीरभुवोऽन्तरे ।
ते दिण्डीरोपमां प्रापुः पिण्डिताः पाण्डुवाससः ॥३०८७॥

खाशकानां सहस्राणि भोजस्य पतितं बले ।
स्थितवन्ति निहन्तुं तं तथास्थितमचिन्तयन् ॥३०८८॥

दृग्भ्यां संभ्रमदीनाभ्यामघशान्त्यै स्पृशन्निव ।
कर्णौ सल्हणसूनुस्तान् संतर्ज्याविृजिनोऽब्रवीत् ॥३०८९॥

निर्दम्भमस्य विस्रम्भाद् धावतो विहिते वधे ।
निरत्ययो निपातः स्यान्नियतं निरये पुनः ॥३०९०॥

3084. [a]) All Mss. read भैषीरेष (for भैषीदेष suggested with St). SA P_2 I_3 सन्धितस्व (for सन्धित्सुः).

3086. [a]) St C S′ P_2 I_3 अवाप्ता चे° (for अवाप्तये°). —[b]) All Mss. read यान्त्यपि (for यान्त्याऽपि suggested). —[c]) D C S′ P_1 सिन्धावभू° (for सिन्ध्वाऽभव°).

3087. [c]) P_3 om. ते. C S′ हिण्डी°; D suggests डिण्डी° (for दिण्डी°). P_{1-3} I_3 SA °रोपमतां (for °रोपमां).

3088. [a]) All Mss. read खशकानां (for खाशकानां suggested with St). —[b]) All Mss. except P_3 read पतिते (for पतितं). —[d]) All Mss. read °चिन्तयत् (for °चिन्तयन् suggested with St).

3089. [d]) All Mss. except P_3 read °तर्ज्य वृजिनो° (for °तर्ज्यावृजिनो°).

3090. [b]) All Mss. [P_3 विधे] read विधेः (for वधे suggested with St.)

हतेऽस्मिन् बहुभृत्यस्य न च शक्तिक्षयः प्रभोः।
नैकपक्षक्षये ताक्ष्यरंहः संहारमर्हति ॥३०९१॥

अपि वा वाच्यता राज्ञामेवं विस्रब्धबाधनात्।
तुल्यस्तुल्येन कर्तव्यं किमनुध्याय बाध्यते ॥३०९२॥

यथाऽयं वृत्तयेऽनन्यकर्मा भूपं निषेवते।
तथा ममाऽपि यत्नोऽयं तत्सेवासादने यतः ॥३०९३॥

युक्तमित्यादि तेनोक्ता अपि निश्चलनिश्चयाः।
ते न्यषिध्यन्त निर्बन्धात् प्रतिज्ञायाऽऽत्मनो वधम् ॥३०९४॥

रात्रौ तथैवाऽऽदारिद्र्याच्छिद्रं तद्रक्षितुं ततः।
कारिताः कोशपानं ते तमर्थं सोऽपि बोधितः ॥३०९५॥

तेनाऽऽवेदितनिर्व्याजतया धीरो महीपतिः।
अनुध्यायाऽथ संदिग्धां संधिसिद्धिमसुग्धधीः ॥३०९६॥

अजातनिश्चयः सिद्धेर्विनान्तःकरणं परैः।
अथ प्रास्थापयद् देवीं सामात्यां तारमूलकम् ॥३०९७॥

3091. ab) I_3 om.

3092. b) All Mss. read °बोधनात्; D suggests °बन्धनात् (for °बाधनात् suggested with St). —d) All Mss. read बध्यते (for बाध्यते suggested with St. Tr.).

3093. b) All Mss. read रूपं (for भूपं suggested with St D).

3095. ab) St °दरिद्राश्छि°; P_{1-3} I_3 °दरिद्राच्छि°; C S′ °दारिद्राच्छि° (for °दारिद्र्याच्छि°). —b) C S′ गतः (for ततः).

3096. c) All Mss. read संदिग्धं (for संदिग्धां suggested).

3097. ab) S′ repeats the *ab* of 3096. —a) All Mss. read अज्ञात° (for अजात° suggested). D $P_{1,3}$ °यासिद्धेः (for °यः सिद्धे°). —d) SA (conjectural reading) C S′ $P_{1,2}$ I_3 सामान्यां (for सामात्यां).

राजधर्मविधेयत्वादवार्यक्रौर्यशङ्किनी ।
प्रस्थानप्रार्थनां भर्तुः सा स्वीकृत्य ततोऽब्रवीत् ॥३०९८॥

असामान्येष्वमात्येषु कुसृत्यालोकनात् सकृत् ।
आर्यपुत्र विचार्योऽस्ति विस्रम्भः किं विरोधिनाम् ॥३०९९॥

यद्वा निर्मानुषोन्मेषं शेमुषीत्वं विगाहितुम् ।
प्रथते नु कथंकारं मूर्तत्वं मर्त्यधर्मिणाम् ॥३१००॥

देहोपकरणत्वं ते प्राणैर्मम विचिन्त्यते ।
सतीधर्मस्तु सहते राजधर्मस्य नोचितम् ॥३१०१॥

व्यञ्जितास्यसदाचारं कलिकृत्यं द्विषि त्वयि ।
प्रारब्धो देव भोजने हिमाद्रौ हिमविक्रयः ॥३१०२॥

न गृह्णाति शमं वेत्ति स्वस्याऽन्यस्य न चाऽन्तरम् ।
निर्व्यूढमददोषोऽद्य प्रायेण प्राकृतो जनः ॥३१०३॥

पुत्रमन्त्र्यवरोधादिबुद्ध्यशुद्ध्या प्रधावति ।
साध्वाचारोऽपि भूपालः क्रुध्यन् विस्रब्धबाधने ॥३१०४॥

समयालङ्घनामोघगिरा देवेन पीयते ।
लोकत्रयैकपात्रेऽस्मिन् यशो नूनं मया सह ॥३१०५॥

3098. b) All Mss. read °क्रूर° (for °क्रौर्य° suggested with D).

3099. c) All Mss. read °र्योसि (for °र्योऽस्ति suggested with St).

3100. a) D S′ °न्मेषां; P_3 °मैषां; C I_3 SA $P_{1,2}$ °न्माषां (for °न्मेषं).

3102. For the Proverb हिमाद्रौ हिमविक्रिय: cf. *v.* III. 138. —b) $P_{1,3}$ मयि (for त्वयि).

3104. a) C S′ P_3 °मन्त्र° (for °मन्त्र्य°). All Mss. read °विरो° (for °वरो° suggested with St. Tr.). —d) P_{1-3} I_3 SA क्रुध्य (for क्रुध्यन्). C S′ विश्र° (for विस्र°).

भ्रातृव्यसंश्रयोपेक्ष्यप्राणायास्त्वन्यदायशः ।
ममैवाऽऽस्वादयन्त्याः स्यादात्मंभरिपुरास्थितिः ॥३१०६॥

इत्युक्त्वा विरतां सत्यसंधः साध्वीं धरापतिः ।
शान्तशङ्कामकृत्वा तां समामन्त्र्य न्ययोजयत् ॥३१०७॥

भङ्गं सर्वानयं त्रातुं प्रयोक्तुं वेतनं नृपः ।
संरम्भे किमर्थं ध्यायन्त्यन्त! सर्वोऽप्यचिन्तयत् ॥३१०८॥

उपायेषु प्रयुक्तेषु देवीसंप्रेषणावधि ।
नाऽन्यदस्य प्रयोक्तव्यं यद्वाशिष्यत क्वचित् ॥३१०९॥

सपक्षभेदाद् भूभर्तुः सबलत्वाबलत्वयोः ।
परीक्षकत्वाद्ये केचिन्माध्यस्थ्येनाऽवसन् क्वचित् ॥३११०॥

तेऽप्यल्पाः वा महान्तो वा क्षीणदाक्षिण्यशृङ्खलाः ।
भोजगृह्यैः सहाऽबध्नन् कन्थां सर्वेऽपि डामराः ॥३१११॥

ते ह्यच्छिन्नतटस्थत्वाद् द्वैराज्येऽस्माभिरीदृशः ।
भोजः संजात इत्याशु माध्यस्थ्यं परिजह्रिरे ॥३११२॥

त्रिल्लको भोजसविधं तनूजं प्राहिणोद् द्रुतम् ।
प्रावेशयच्छमालां च चतुष्कं पुष्कलैर्बलैः ॥३११३॥

3106. a) All Mss. read °संक्षयो° (for °संश्रयो° suggested). —b) All Mss. read °दाशयः (for °दायशः suggested with St.Tr.). —c) C S′ I_3 ममे° (for ममै°). —cd) All Mss. read °यन्त्यादादा° (for °यन्त्याः स्यादा° suggested with St. Tr.).

3107. d) SA *Prima manu* om. समामन्त्र्य. SG *sec. manu* सोनामन्त्र्य; SA *sec. manu* D C S′ P_{1-3} I_3 माता मन्त्र्या (for समामन्त्र्य suggested with St).

3108. b) D P_1 वेदनं; P_2 वेतुनं; P_3 वदनं (for वेतनं).

3109. d) C S′ $P_{1,3}$ यदे° (for यद°).

3111. c) All Mss. read अल्पे (for अल्पाः suggested).

ये भिक्षुविप्लवेऽप्याऽऽसन् राजदाक्षिण्यरक्षिणः ।
विरोधिसविधं प्रापुस्तेऽपि नीलाश्वडामराः ॥३११४॥

लहराद् देवसरसाद्धोलडातश्च डामराः ।
त्रयो नीलाश्वतश्चैका डामरी पर्यशिष्यत ॥३११५॥

न व्यरंसीद्धिमं तत्तल्लवन्ये साल्हणेर्बले ।
पतत्प्राज्यद्विपमत्तौघयोधोऽम्भोधाविवोद्धतः ॥३११६॥

भोजस्तु देवीमायान्तीं श्रुत्वा बलहरं ततः ।
ध्रुवं संधित्सया बद्ध इति सुव्यक्तमभ्यधात् ॥३११७॥

एतावन्ति दिनान्यासीत् पुंसो भ्रमयिता पुमान् ।
संबन्धिनीनां माध्यस्थ्ये स्वकुल्यात् कोऽन्यथा भवेत् ॥३११८॥

कुलचूडामणिः प्रेम्णा स यत्रैवं प्रवर्तते ।
किं स्यादगण्यप्रायाणां कार्कश्यं तत्र मादृशाम् ॥३११९॥

यच्च मायामिमां ब्रूथ तत्तथाऽस्त्ववस्मि वञ्चितः ।
विश्वास्यैव भविष्यामि नाऽकीर्तीनां निकेतनम् ॥३१२०॥

मा च भूद् विजयाशा वः समेता निखिला इति ।
अद्राक्ष्म चेदृशान् व्यूहानवारुक्ष्याम वोन्नतेः ॥३१२१॥

3115. a) SA °द्धोलळातश्च; C S P_1 °त् होलरातश्च (for °द्धोलडातश्च).

3116. b) C S′ SA $P_{1,2}$ I_3 साल्हणे बले (for साल्हणेर्बले). —c) $P_{2,3}$ I_3 SA °मत्तोघ° (for °मत्तौघ°).

3117. a) C Ś दीवीमायात:; P_2 दीर्यीमायान्तौ; P_1 I_3 दीवीमायान्तौ; SA देवीमायान्तौ (for देवीमायान्तीं). —b) All Mss. read °हरस्तत: (for °हरं तत: suggested with St).

3121. cd) C S′ चेदृशं व्यूहमवरोक्ष्यामि; D $P_{1,2}$ चेदृशां व्यूहामवरुक्ष्याम; P_3 I_3 SA चेदृशां व्यूहानवरुक्ष्याम (for चेदृशान् व्यूहानवरुक्ष्याम suggested with St) P_{1-3} I_3 वोन्नतै: (for वोन्नते:).

युक्तियुक्तमिदं चाऽन्यच्चोक्तवान् बहु निश्चयात् ।
नाऽशक्यताऽन्यथा कर्तुं भोजो बल्हरादिभिः ॥३१२२॥

द्वित्राहान्तरितेऽमित्रप्रमाथेऽपरथा कथम् ।
फलकालेऽसि संवृत्त इति तं चाऽवदन् नृपाः ॥३१२३॥

तारमूलस्थितौ राज्ञ्यां ससैन्यौ धन्यरल्हणौ ।
राजपुत्रैः सह ततः पाश्विग्राममवापतुः ॥३१२४॥

प्राप्ताववेत्य तौ नद्यास्तीरेऽवाचि कृतस्थिती ।
परस्मिन् कूलगहने भोजोऽप्येतावुपाविशत् ॥३१२५॥

अश्रान्तं विशतो दिङ्मुखेभ्यस्तत्कटकं भटान् ।
पश्यन्तः केऽपि संधिं न श्रद्दधुर्नृपतेर्बले ॥३१२६॥

हठप्रविष्टान्निर्यातुमक्षमानल्पसैनिकान् ।
धन्यादीन् राजवदनो हन्तुं शश्वदचिन्तयत् ॥३१२७॥

छित्त्वा सुय्यपुरात् सेतुं राज्ञः सैन्यं जिघांसवः ।
महापद्मसरोनौषु निभृतं केचनाऽवसन् ॥३१२८॥

अन्ये तत्साहसोदन्तान्वेषिणः पतनोन्मुखाः ।
स्वैः स्वैर्मार्गैस्तत्र तत्र तस्थुर्भूभृदसंमताः ॥३१२९॥

आस्कन्दं भाङ्गिलेयाद्याः पुरे शंकरवर्मणः ।
शमालाः क्षितिकावार्तिं डामराः समचिन्तयन् ॥३१३०॥

3123. [c]) St P_{1-3} I_3 संवृत्तमिति (for संवृत्त इति). —[d]) C S′ I_3 P_1 नृपः (for नृपाः).

3124. [a]) D C S′ P_3 °स्थिते राज्ञि; $P_{1,2}$ I_3 °स्थिते राज्ञां; SA °स्थिते राज्ञ्यां (for स्थितौ राज्ञ्यां suggested with St). —[b]) SA $P_{1,2}$ I_3 धैन्य° (for धन्य°).

3130. [c]) All Mss. read शमाला°; SA_1 gloss श्वाल् (for शमालाः suggested with St. Tr.).

प्राप्यं महासरित्कूलं त्रिल्लकाद्यैरगण्यत ।
नीलाश्वडामरैर्वीक्षा कार्या च नगरान्तरे ॥३१३१॥

किमन्यद्राजगृह्याणां समं सर्वे जिघांसवः ।
कारण्डवानां तोयान्तर्वेष्टितानामिवाऽभवन् ॥३१३२॥

संदिग्धशिक्षितं कार्यं सर्वतः समतां तदा ।
प्राप वृष्टेरवग्राहग्रहयोगान्तरस्थितेः ॥३१३३॥

पदे पदे राजचमूवधायोत्थानमिच्छतः ।
छिन्दन् बलहरस्येच्छां भोजो व्यग्रत्वमग्रहीत् ॥३१३४॥

क्षणे क्षणे विसंधानध्यायिना तेन कश्चन ।
बध्यमानास्वन्तरायः संविधासु व्यधीयत ॥३१३५॥

घटनामुद्ययौ यो यो विरोधः कटकद्वयात् ।
सत्त्वैकाग्रः स्वयं भोजस्तं तं त्वरितमच्छिनत् ॥३१३६॥

दूत्ये विकत्थकत्वे वा येऽभूवन् राजरञ्जकाः ।
भयेन प्रययुस्ते यद्वैकल्यं कार्यसंकटे ॥३१३७॥

3131. c) St D P_{1-3} I_3 °रैर्वीशा; C S′ °रैरीर्ष्या (for °रैर्वीक्षा suggested).

3132. d) P_{1-3} SA °भवत् (for °भवन्).

3134. b) All Mss. read °पथायो°; St. Tr. °मथायो° (for °वधायो° suggested).

3135. c) C S′ वर्द्धमानस्वा°; $P_{1,2}$ I_3 SA बध्यमानस्वा°; D P_3 वाध्यमानस्वा° (for बध्यमानास्व° suggested with St). —d) D P_3 °यचीर्यत (for व्यधीयत).

3137. a) St P_3 च कल्यकत्वे; D C S′ $P_{1,2}$ I_3 च कल्पकत्वे (for विकत्थकत्वे suggested). —b) All Mss. read °रुव° (for °भूव° suggested).

कर्णे तत्कथयन्ति दुन्दुभिरवै राष्ट्रे यदुद्धोषितं
तन्नम्राङ्गतया वदन्ति करुणं यस्मात् त्रपावान् भवेत् ।
श्लाघन्ते तदुदीर्यते यदरिणाऽप्युग्रेण मर्मान्तकृद्
ये केचिन्ननु शाठ्यमौग्ध्यनिधयस्ते भूभृतो रञ्जकाः ॥३१३८॥

भाण्डस्ताण्डवमण्डपे कटुकथावीथीषु कन्थाकवि-
गोंष्ठश्वा स्वगृहाङ्गने शिखरिभूगर्भे खटाकुः स्फुटम् ।
पिण्डीशूरतया विटश्च पटुतां भूभृद्गृहे गाहते
गच्छन्ति ह्रदकृष्टकच्छपतुलां चित्रं ततोऽन्यत्र ते ॥३१३९॥

सूरोद्रेकविपर्यासाच्छान्तोष्मक्ष्माभृतस्ततः ।
वासरः शरणीचक्रे तुङ्गस्योत्तुङ्गमञ्जसा ॥३१४०॥

भानुर्दत्तपदोऽनूरोर्भ्रातुर्गोवलयान्तरे ।
क्ष्माभृच्छिरोर्पितकरो रक्तमण्डलतां दधे ॥३१४१॥

अहस्त्रियामामुखयोरपि मध्यस्थया दधे ।
सन्ध्यया वन्दनीयत्वं जनस्य व्यञ्जिताञ्जलेः ॥३१४२॥

कवाटिदन्तैर्विस्फोटाश्चन्द्रकान्तैः शिरोद्गमः ।
श्वयथुः पयसां पत्या दधे राज्युदयोन्मुखे ॥३१४३॥

3138. This verse and the following are found in Vallabhadeva's *Subhāṣitāvali*, 462-463; ed. Peterson and Durgaprasada. —ab) P_1 om. after तत्कथ upto तन्नम्राङ्गतया. —b) SA_1 om. न्नम्राङ्गतया with a *lacuna*. SA_1 (before corr.) करुणां (for करुणं). SA_1 °वाभवेत् (for °वान् भवेत्). —c) St *Subhāṣitāvalī* °प्युग्रं न (for °प्युग्रेण). SA_1 कर्मान्त° (for मर्मान्त°). —d) SA_1 om. न्ननु with a *lacuna*. St P_{1-3} I_3 भूसुजो (for भूभृतो).

3139. a) St भण्ड° (for भाण्ड°). All Mss. read कटुकथावीचीषु; *Subhāṣitāvalī* चटुकथावीथीषु (for कटुकथावीथीषु suggested with St). —b) SA_1 marg. St *Subhāṣitāvalī* °भूगर्ते (for °भूगर्भे).

3140. a) D St P_{1-3} I_3 शूरोद्रे° (for सूरोद्रे°). —b) D C S′ P_{1-3} °न्तोष्मा (for °न्तोष्म°). —d) SA_1 om. तुङ्ग with a *lacuna*.

3142. b) St P_3 I_3 om. रपि with a *lacuna*. —d) P_{1-3} SA जनयन्व्य° (for जनस्य व्य°).

3143. b) St P_2 I_3 सिरो° (for शिरो°).

सदैन्येष्वरविन्देषु हीनद्वन्द्वोपजीवनैः ।
कवाटिनां कटेष्वेव षट्पदैर्घटितं पदम् ॥३१४४॥

अदृष्टकार्यपर्यन्तास्ततस्ते विषमस्थिताः ।
सरित्तटे सकटकाः पर्यतप्यन्त मन्त्रिणः ॥३१४५॥

न किंचित्प्रत्यभात् तत्त्वं लघु भ्रान्तं च जानताम् ।
ओघेन ह्रियमाणानामिवैषामवलम्बनम् ॥३१४६॥

तीरे परस्मिन् सरितो वसन् बलहरः पुनः ।
रुद्धः कन्दलितास्कन्दबुद्धिः साल्हणिनाऽसकृत् ॥३१४७॥

कार्यातिपातादायातं मन्त्रिणां तन्मितं बलम् ।
तस्य प्रवर्धमानस्य सुखोच्छेदं बभूव यत् ॥३१४८॥

वितस्तासिन्धुसंभेदयात्रायां नगरे यथा ।
तथा तत्राऽपतद् रात्रौ लोकोऽश्रान्तो व्यवर्तत ॥३१४९॥

लेखैर्डामरसंहारखण्डनाय विसर्जितैः ।
सान्तरैर्ग्रथिता बाह्यैर्नानाग्रै राजबीजिनः ॥३१५०॥

शाठ्यान्वितैरनुचरैस्तुमुलोत्पादनैरपि ।
धीरो धैर्यान्निश्चयाद्वा स्वैः स क्रष्टुं न पारितः ॥३१५१॥

3144. c) St C S′ P_2 I_3 घटे° (for कटे°).

3146. a) D P_{1-3} I_3 SA °भा···त्स्वं; St °भातसर्वं; C S′ °भातस्वं (for भात् तत्त्वं suggested).

3147. cd) All Mss. except C read °स्कन्दो बुद्धिः (for °स्कन्दबुद्धिः). —d) I_3 SA °णना° (for °णिना°).

3149. b) C S′ यया (for यथा). —c) All Mss. read तथा° (for तत्रा° suggested with St. Tr.). —d) D C S′ P_2 लोकः; P_3 लोके (for लोको°).

3151. a) All Mss. read °तुसैर° (for °नुचरै° suggested).

सामन्तानामागतानामविस्रम्भादसंभ्रमम् ।
न्यक्कृतोऽयं निपत्याशु कुर्यादत्याहितं रुषा ॥३१५२॥

कृते च कदनोंकारेऽनेन सर्वस्समुन्मिषेत् ।
द्विजानामिव दस्यूनां समूहस्तेन सर्वतः ॥३१५३॥

इति निर्ध्याय दुध्रुक्षुरिव भोजः क्षपात्यये ।
कुर्मः साहसमित्युक्त्वा निन्ये बलहरं समम् ॥३१५४॥

तेषां तदर्थायातानां सामन्तानां सभाजने ।
दाक्षिण्यादिति नाऽभोजि तेनाऽप्यभिजनस्पृशा ॥३१५५॥

तथा स्वमत्याऽवैमत्यं तमज्ञात्वा तु मन्त्रिणः ।
निष्प्रत्ययास्ते न जातममन्यन्त नयात्ययम् ॥३१५६॥

पक्षिपक्षस्फुटास्फालशफरस्फुरितेऽप्यधात् ।
तेषामासविधास्कन्दः प्रधावदहितभ्रमम् ॥३१५७॥

कूलेऽपरस्मिन् कूलिन्याः स्वाभिसंधाननिर्वृतैः ।
समभाव्यत तैर्नाऽन्यो रथाङ्गेभ्योऽभिषङ्गभाक् ॥३१५८॥

3153. [b]) St I_3 P_3 SA have a *lacuna* of two Syllables before समुन्मिषेत्. D C S′ $P_{1,2}$ सर्वं (for सर्व: suggested).

3154. [a]) P_3 SA दुद्रु° (for दुध्रु°). After this *v.* तिलकम्.

3155. [a]) P_{1-3} I_3 SA एतां मदर्थया°; C S′ P_2 तेषां तदर्थया°; St suggests एषां मदर्थाया° (for तेषां तदर्थाया°). —[b]) P_{1-3} I_3 SA °नां सभोजनि:; P_2 °नां सभोजने; St suggests नां सभोजनः; D °नामभाजने (for °नां सभाजने suggested).

3156. [a]) All Mss. read समत्यावं° (for स्वमत्यावै° suggested with St). —[c]) All Mss. read °स्तेन (for स्ते न suggested).

3157. [c]) St °स्कन्दः प्र°; D C S′ P_{1-3} °स्कन्दं प्र° (for °स्कन्दप्र° found in I_3).

मरुत्काकुत्स्थदूतस्य कपेस्तीर्णाम्बुधेः पिता ।
ततान तेषां दूतानां सरित्पारगतो बलम् ॥३१५९॥

कीर्णकर्णज्वरांश्चाऽरीन् पीत्कृतैस्तीरभूरुहाम् ।
आश्रित्योन्निद्रकेणेत्थं निन्युस्ते तां निशीथिनीम् ॥३१६०॥

क्षपान्ते क्ष्माधरोत्तंसहेमतामरसभ्रमम् ।
उद्गच्छतो रवेर्यावच्चिच्छिदुर्न करच्छटाः ॥३१६१॥

चक्राह्वविरहालोकसशोकानामिवाऽगलत् ।
कुट्मलाक्षिपुटाद्यावन्नैशं नाऽम्भश्च वीरुधाम् ॥३१६२॥

मितपत्तियुतस्तावत् तरुकच्छाद् विनिर्गतः ।
स वीरस्त्वरयन् युग्यवाहान्मूर्ध्न्यङ्घ्रिणा स्पृशन् ॥३१६३॥

रोद्धुकामाण्डामरीयान् वीरान् दृष्टैर्विलोकितैः ।
सर्वतो धावतः कुर्वन् योधान् प्रतिहतौजसः ॥३१६४॥

पारश्वधी चारुवेषो युवा संमुखमापतन् ।
युग्याधिरूढस्तैः प्रैक्षि संप्राप्तः सरितस्तटम् ॥३१६५॥

अदृष्टपूर्वं तं दृष्ट्वा श्रीखण्डोल्लिखितालकम् ।
कुङ्कुमालेपिनं चैते भोजोऽयमिति मेनिरे ॥३१६६॥

अतिवाह्य निशां राजवदनं तं विमोहयन् ।
प्रातश्च तरसाऽऽमन्त्र्य स तथा संमुखो ह्यभूत् ॥३१६७॥

3159. [a]) SA P_2 I_3 °काकुस्थ° (for °काकुत्स्थ°). —[d]) St SA P_{1-3} I_3 om. बलम् with a *lacuna*.

3162. [b]) C S′ $P_{1,2}$ I_3 °मशो° (for °सशो°).

3163. [c]) St S′ P_3 I_3 om. स वीर with a *lacuna*. —[c]) All Mss. [SA युद्धय°] read युद्ध° (for युग्य° suggested with St. Tr.). —[d]) SA C S′ $P_{1,2}$ I_3 स्पृशत् (for स्पृशन्).

3165. After this *v.* कुलकम् .

प्रविष्टयुग्यं तोयान्तः पाराद्धावितवाजिनः ।
धन्यादयस्तमभ्येत्य मुदिताः पर्यवारयन् ॥३१६८॥

उदभूत् तुमुलः शब्दस्ततः कटकयोर्द्वयोः ।
एकत्राऽऽक्रन्दमुखरः परत्राऽऽनन्दनिर्भरः ॥३१६९॥

नादमाकर्ण्य संग्रामबुद्ध्या दिग्भ्यः प्रधावितैः ।
तं परैर्मिलितं वीक्ष्य मूर्ध्न्यताड्यत डामरैः ॥३१७०॥

तस्याऽभिनन्दनालापप्रमुखा प्रक्रियाऽभवत् ।
अदैन्यशुद्धा धन्यादिष्वनुज्झितनिजक्रमा ॥३१७१॥

प्लवमानं मनोहर्षे वेगात् संस्तम्भ्य सर्वतः ।
अथेत्थं स्तुवता तत्तत् स धन्येनाऽभ्यधीयत ॥३१७२॥

राजपुत्र पवित्रेयं पृथिवी स्थैर्यशालिना ।
त्वया धाम्ना सुमनसां मेरुणा वा महीभृता ॥३१७३॥

गवां जयति सर्वासां निर्विकारतया वसन् ।
विक्रियोपहतं गौस्ते क्षीरं च क्षीरवारिधेः ॥३१७४॥

कस्य पुंस्कोकिलस्येव त्वां विनाऽधममध्यतः ।
निर्गत्य निजकुल्यानां सिद्धं मध्यावगाहनम् ॥३१७५॥

3169. c) All Mss. read °क्रान्ति° (for °क्रन्द° suggested with St).

3170. c) SA_1 (before corr.) I_3 डामरै° (for तं परै°).

3171. b) C S′ P_2 I_3 SA °पक्रिया° (for प्रक्रिया°). —c) All Mss. read °शुद्ध° (for °शुद्धा suggested with D).

3172. b) St (before corr. in corrigenda) °स्तभ्य (for °स्तम्भ्य).

3174. a) D C S′ $P_{1,2}$ I_3 गवांज्ञ° (for गवां ज°). —d) St SA P_3 I_3 om. च with a *lacuna*. D C S′ $P_{1,2}$ तं (for च suggested).

सदाचारस्य भवता प्रथमं प्रहते पथि।
न तच्चित्रं संचरामश्चरमं चेत् ततोऽधिकम् ॥३१७६॥

इत्यादिप्रसृतालापदत्तोल्लापोऽधिरोप्य सः।
जयोत्तरङ्गं तुरगं स्तुवद्भिस्तैरनीयत ॥३१७७॥

लवन्याः कतिचित् क्रोशान् विक्रोशन्तस्तदा ययुः।
स्वकुल्यैर्नीयमानं तं काका इव पिकान्तिकम् ॥३१७८॥

स एवमेकविंशेऽब्दे ज्यैष्ठस्य दशमेऽहनि।
त्रयस्त्रिंशद्वर्षदेश्यः समगृह्यत भूभुजा ॥३१७९॥

राज्ञी कृतप्रणामं तं प्रियं पुत्रमिवाऽऽगतम्।
अभ्यनन्दच्छ्रान्तभृत्यमस्याऽऽहारमकल्पयत् ॥३१८०॥

इन्दुवंशाविसंवादिगुणग्राममवेक्ष्य तम्।
प्रागदृष्टवती मेने वञ्चिते सा विलोचने ॥३१८१॥

गुणैरशाठ्यदाक्षिण्यमाधुर्याद्यैरकृत्रिमैः।
तस्या विशदशीलं स क्षमापतिममन्यत ॥३१८२॥

मुखरागो मनोवृत्तेर्द्वारौज्ज्वल्यं गृहश्रियः।
भर्तृस्वभावस्याऽऽचारो योषितामनुमापकः ॥३१८३॥

3177. b) SA P_1 I_3 °दन्तोल्लापोधिरोह; C S′ P_2 °दत्तोल्लापोधिरुह्य; P_3 °दत्तोल्लापोभरोह; St (after suggestion) D °दत्तोल्लापोधिरोह्य (for °दत्तोल्लापोऽधिरोप्य suggested).

3178. a) C S′ लवन्य: (for लवन्या:). D P_3 °क्रोधाद्; C S′ $P_{1,2}$ I_3 SA °क्रोशाद् (for °क्रोशान् suggested with St).

3179. b) D SA S′ P_{1-3} I_3 ज्येष्ठस्य (for ज्यैष्ठस्य).

3181. a) C S′ $P_{1,2}$ I_3 SA इन्द्र° (for इन्दु°).

3182. d) D P_{1-3} °रमन्यत (for °ममन्यत).

3183. a) C S′ $P_{1,2}$ I_3 SA मुखरागम°; D (before suggestion) मुखरागं म° (for मुखरागो म° suggested with St D).

दिनक्षयव्यञ्जिताध्वक्रमं प्रस्थातुमुत्सुकम् ।
राज्ञोऽभ्यर्णं विशेत्येनं दाक्षिण्यात् कोऽपि नाऽब्रवीत् ॥३१८४॥

कथंचिद् रुद्धमाध्यस्थ्यैर्वैमत्यैः सचिवैरथ ।
स त्वादिक्षुर्नरपतिरशान्तेर्ष्योऽभ्यधीयत ॥३१८५॥

राज्ञोऽभ्यर्णं विशेत्युक्तेरुपोद्घातोपमं वचः ।
तत्तस्य श्रोत्रशष्कुल्यां तदा शङ्कुक्रियां व्यधात् ॥३१८६॥

चिरात् ताडितमर्मेव समाश्वास्यैक्षताऽथ सः ।
मध्यस्थानां स्थितं स्थैर्यं दाक्षिण्यादोष्ठयोः परम् ॥३१८७॥

प्राणान्मुमुक्षोस्ते रूक्षभाषिणस्तस्य सान्त्वनैः ।
मन्दत्वं विक्रियां निन्युर्विनयानतमौलयः ॥३१८८॥

आचारं चैनमस्निग्धमपि न्याय्यं वचस्विनम् ।
न कोऽपि प्रतिवाक्येन शक्यं जेतुममन्यत ॥३१८९॥

अथ स्वान्तस्थितस्वामिवैवश्यं दर्शयन्निव ।
दशनांशुवनैर्धन्यो वीरः स्निग्धमभाषत ॥३१९०॥

पद्धतिं राजधर्माणां सदाचारे स्थितिं च ते ।
जानतोऽपि कथं मोहः क्रमायातेषु वस्तुषु ॥३१९१॥

किं संधिः सोऽभिधीयेत यत्र संधेयदर्शनम् ।
अकृत्वा गम्यत इति प्राङ्नो कथमजीगणः ॥३१९२॥

3184. b) P_1 I_3 SA °क्रमां (for °क्रमं). —c) C P_{1-3} I_3 SA विशत्येनं; P_3 विशत्यैनं; S′ विशत्येवं (for विशेत्येनं).

3185. a) S′ $P_{1,2}$ °ध्यस्थ° (for °ध्यस्थ्य). —c) I_3 St त्वादिक्षन्न° (for त्वादिक्षुर्न°). —d) St SA P_1 I_3 °राशा° (for °रशा°). All Mss. read °न्तेभ्यो° (for °न्तेर्ष्यो° suggested with St).

3186. a) C S′ P_{1-3} I_3 SA विशत्यु° (for विशेत्यु°). —d) St SA P_3 I_3 om. तदा with a *lacuna*.

3187. a) C S′ निरताड्यत (for चिरात् ताडित°).

3191. b) D (before suggestion) St P_{1-3} I_3 स्थितां (for स्थितिं).

अनद्यतनभूभर्तृसुलभं भूभुजं तव।
ज्ञात्वा सत्त्वोज्ज्वलं ज्ञातिधर्मजातप्रवर्तनम् ॥३१९३॥

नाऽस्य दम्भस्मयस्तम्भाप्रीतिस्थैर्यखलोक्तयः।
आदरादर्शवैशद्ये निःश्वासस्याऽपि काः श्रियः ॥३१९४॥

अस्योपजीवनाद्या श्रीः साम्राज्यासादनान्न सा।
प्रकाशो बिम्बितो योऽर्कादीपात् स्याज्ज्वलतः स किम् ॥३१९५॥

निर्वाणगोष्ठीनिष्ठत्वं शमिनामाश्रयेषु यत्।
तत्पर्षद्यस्य राजर्षेर्विद्वद्वृन्दानुबन्धिनः ॥३१९६॥

एवं स्वगृहसंप्राप्यप्रायोनिःश्रेयसस्य ते।
स्थाने श्रियः समाप्त्याऽथ किं स्यादन्यैर्महीधरैः ॥३१९७॥

मुग्धा न केचन परे गणिताः फणिभ्यः
कालानुकूलनिजकुण्डजलत्यजो ये।
श्लिष्यन्ति चन्दनतरूञ्शिशिरान्निदाघे
माघेऽप्यशीतमपरं विवरं विशन्ति ॥३१९८॥

3193. b) All Mss. read °सुलभे (for °सुलभं suggested with St D). —b) All Mss. read भूभुजां (for भूभुजं suggested with St).

3194. ab) D C S′ P_{1-3} I_3 °स्तम्भः प्रीति°; SA °स्तम्भप्रीति° (for °स्तम्भाप्रीति° found in SG *sec. manu*).

3195. b) D (before suggestion) P_{1-3} I_3 SA सः (for सा). —c) I_3 P_3 SA बिम्बतो (for बिम्बितो).

3196. d) D P_2 C S′ °र्षेर्जनान्वृ°; $P_{1,3}$ I_3 SA °र्षेः···न्वृ° (for °र्षेर्विद्वद्वृ° suggested with St).

3197. c) All Mss. read स्थानैः श्रियः समाप्याथ (for स्थाने श्रियः समाप्त्याऽथ suggested).

3198. b) S′ SA $P_{1,2}$ I_3 °जल···जो; P_3 °जकुण्ड···ल···जो (for °जकुण्डजलत्यजो). —d) SA $P_{1,3}$ °शीतम···वं; D (before suggestion) St C S′ P_2 °शीतमनवं; I_3 °शीतम्बरं (for °शीतमपरं suggested with D).

प्राणोपकरणं राज्ञो राज्ञी राजात्मजाश्च ये ।
तद्धिते यदनौचित्यं तेषामौचित्यमेव तत् ॥३१९९॥

त्यक्तोष्मवैकृतं पाथ इव क्वथितशीतलम् ।
अनुतापेन ते कृत्यं भूयो वैरस्यमेष्यति ॥३२००॥

तथा समर्थां सामर्थ्यादप्रत्याख्याय भारतीम् ।
कुण्ठशाठ्यलवस्तस्थौ प्रस्थानार्थं स मन्थरः ॥३२०१॥

पथि संग्रथितस्तोत्रान् वास्तव्यान् वीक्ष्य सर्वतः ।
अजायताऽथ संरूढकृत्यसाधुत्वदार्ढ्यधीः ॥३२०२॥

पदातिचरणक्षुण्णरेणुव्याजाददृश्यत ।
वसुंधरातलं बद्धसंधीव नभसा समम् ॥३२०३॥

दध्यौ विज्ञतरो भोजः कच्चित्संप्राप्नुयां नृपम् ।
कच्चिन्नाऽमुष्य विघ्न्येत दर्शनं विप्रलम्भकैः ॥३२०४॥

आराधयन् प्रभुं धाम्नि नान्तराऽन्तरितो विटैः ।
स्वामिनां क इवाऽऽप्नोति गुणाविष्करणक्षणम् ॥३२०५॥

शीतोपचारकरणाद् दयितो भवेय-
मौर्वार्दितस्य जलधेः प्रसृतं धियेति ।
स्रोतो हिमाद्रिपयसो विनिपात एव
ग्रासीकृतं तिमिभिराहतमेव तत् स्यात् ॥३२०६॥

3201. [ab]) D C S′ P_2 समर्थासामर्थ्यान्न प्र°; P_{1-3} SA समर्थासामर्थ्या···प्र° (for सामर्था सामर्थ्यादप्र° suggested with St).

3204. [a]) St SA P_{1-3} I_3 om. (for विज्ञतरो). —[c]) D (before suggestion) St $P_{1,2}$ काञ्चिद°; C S′ P_3 I_3 कश्चिद° (for कच्चिन्ना° suggested with D). —[d]) St P_{1-3} I_3 °लम्बकैः (for °लम्भकैः).

3205. [a]) St P_{1-3} I_3 °धन···धा° (for °धयन् प्रभुं धा°).

3206. [d]) St $P_{1,3}$ I_3 om. मेव तत् with a *lacuna*.

इत्यादिचिन्तास्तैमित्यात् पुरक्षोभाद्यलक्षयन् ।
सैन्यस्य रुद्धाश्वतयाऽबुद्धाऽऽसन्नं नृपास्पदम् ॥३२०७॥

नाऽतिप्रांशुं नाऽतिकृशं सूर्यांशुश्यामलाननम् ।
सरोजकर्णिकागौरं शिथिलश्लथविग्रहम् ॥३२०८॥

ककुद्मत्ककुदोत्सेधिस्कन्धमायतवक्षसम् ।
श्मश्रुणाऽनतिदीर्घेण व्यक्तगण्डगलोन्नतिम् ॥३२०९॥

उन्नसं पक्वबिम्बोष्ठं विस्तीर्णानुल्बणालिकम् ।
तिर्यग्विप्रेक्षमाणास्यं धीरमन्थरगामिनम् ॥३२१०॥

समाहितांशुकोष्णीषमौलिं श्रीखण्डवक्षसम् ।
सीमन्तस्थानचुम्बिन्या रेखया चन्द्रगौरया ॥३२११॥

अश्वावरूढं हर्म्यस्थः सचिवैः परिवारितः ।
अनङ्गतुल्यमायान्तं तमवैक्षत पार्थिवः ॥३२१२॥

प्रीतिविस्फारितदृशा राज्ञा पृष्टस्ततः सभाम् ।
सोऽध्यारुरोह संबाधां कौतुकोत्कंधरैर्जनैः ॥३२१३॥

स्पृष्ट्वा पादौ निषण्णोऽग्रे नृपस्याऽऽनीय पाणिना ।
खड्गधेनुं पाणिबद्धामासनाग्रे समार्पयत् ॥३२१४॥

3207. d) C S′ P_1 I_3 SA °सन्न° (for °सन्नं).

3210. b) C S′ °णाङ्ककम् (for °णालिकम्). —c) D प्रेक्ष‥‥; St P_{1-3} I_5 SA °प्रेक्ष्य‥‥ (for °प्रेक्षमाणास्यं).

3211. a) St SA P_{1-3} I_3 om. मौलिं with a *lacuna*. —b) St P_1 I_3 °व‥म्; C S′ P_2 वर्द्धनम् (for °वक्षसम्). —c) St $P_{1,3}$ I_3 om. स्थान with a *lacuna*.

3212. a) All Mss. read हर्म्यस्थ° (for हर्म्यस्थः suggested with D). —b) All Mss. read °रितम् (for °रितः suggested with St). —c) St SA $P_{1,3}$ I_3 om. अनङ्गतुल्य with a *lacuna*. —d) D (before suggestion) P_{1-3} I_3 SA पार्थिवम् (for पार्थिवः). After this *v.* कुलकम्.

3214. d) $P_{2,3}$ I_3 SA समपर्यत् (for समार्पयत्).

पाणिं सफणिवल्लीकं विवृताग्राङ्गुलिद्वयम् ।
ततोऽस्य चिबुकोपान्ते विन्यस्यन् पार्थिवोऽब्रवीत् ॥३२१५॥

न विगृह्य गृहीतोऽसि नाऽधुनाऽपि निबध्यसे ।
तदङ्ग कस्माद् गृह्णीमः शस्त्रमेतत्त्वयाऽर्पितम् ॥३२१६॥

व्यजिज्ञपत् स भूपालं देव शस्त्रस्य धारणम् ।
स्वामिसंरक्षणं स्वस्य परित्राणस्य कारणम् ॥३२१७॥

देवे निजप्रतापाग्निगुप्तसप्तसरित्पतौ ।
सेवावकाशो विरलः स्वशस्त्रस्याऽपि दृश्यते ॥३२१८॥

लोकान्तरेऽपि शरणं चरणाश्रयणं प्रभोः ।
तत्राऽत्र लोके किं कार्यं त्राणोपकरणैः परैः ॥३२१९॥

राजा जगाद तं सत्त्वस्पर्धाबन्धेऽधुना भवान् ।
निर्व्यूढकृत्यो वादीव कृत्यं नो वर्तते परम् ॥३२२०॥

भोजो बभाषे दाक्षिण्यजननायाऽधुना प्रभोः ।
दृष्टादृते मया किंचिन्नोपचारार्थमुच्यते ॥३२२१॥

किं ते न चिन्तितं दुष्टं किं किं न कृतमप्रियम् ।
यदसिद्धं न तद् व्यक्तिमगादित्यवधार्यताम् ॥३२२२॥

किं न मल्लान्वये कश्चित् कारणेषूदितो भवान् ।
विद्मः स्माऽनन्यकुल्यं प्राग्यं वयं चर्मचक्षुषः ॥३२२३॥

3216. b) All Mss. read न वध्यसे (for निबध्यसे suggested with St D). —d) S′ om. after शस्त्र.

3217. ab) S′ om. upto शस्त्र (Scribe's error). —a) C P_{1-3} I_3 भूपाल (for भूपालं). —cd) P_{1-3} om.

3221. c) D (before suggestion) C S′ P_{1-3} I_3 स्रष्टा° (for दृष्टा°).

3222. a) C S′ दृष्टं (for दुष्टं).

3223. c) SA P_3 I_3 विद्म (for विद्मः). D C S′ $P_{1,2}$ °स्मानन्नुकुलं (for स्माऽनन्यकुल्यं).

यदा यदा देव वाञ्छामकार्ष्म भवदप्रिये।
भूमिस्तदा तदा भूता पात्रं कम्पस्य भूयसः ॥३२२४॥

यावत् कवीनां निर्भाति प्रतिभाऽनेन भास्वरः।
देवाऽभवन्नः प्रत्यक्षः प्रतापस्तावदेशस्तव ॥३२२५॥

न शेखरे न प्रदरे न दरेऽप्युज्झितो मया।
प्रालेये भूभृतः कुञ्जे संज्वरस्त्वत्प्रतापजः ॥३२२६॥

ततः प्रभृत्यवनतिप्रणयः शरणैषिणः।
सिद्धः संध्यादिवन्ध्यत्वाद् देव दूरस्थितेर्न मे ॥३२२७॥

अथाऽभेदाभिलाषेण पापाद् यत्किल चेष्टितम्।
स्फुरत्तामात्रकव्यक्त्यै नतु तद्विग्रहाग्रहात् ॥३२२८॥

त्वत्संबन्धादिमे दिक्षु प्रतीक्ष्याः क्ष्माभुजां वयम्।
सङ्गाद् गङ्गाम्भसः काचकुम्भसंभावना भुवि ॥३२२९॥

अद्याऽपि द्योतते शाहेराह्वयेन दिगन्तरे।
तत्संतानभवोऽनन्तः समूहः क्षत्रजन्मनाम् ॥३२३०॥

त्वय्यर्पिते पार्वतीयभूभृत्सङ्गे यदा हि नः।
कदन्नाशनदुर्भोगासुस्थैः खेदोन्मुखैरभूत् ॥३२३१॥

3224. cd) St $P_{1,3}$ I_3 SA भूम्ना भूप…भूयसः (for भूता पात्रं कम्पस्य भूयसः).
3225. b) C S′ P_1 I_3 भासुरः (for भास्वरः).
3226. b) C S′ P_{1-3} I_3 SA °ज्झिते (for °ज्झितो). —c) D suggests प्रालेयभूभृ° (for प्रालेये भूभृ°).
3227. c) All Mss. [P_3 सन्ध्याय°] read संध्यायि° (for संध्यादि° suggested with St). —d) C S′ SA P_{1-3} I_3 °स्थिते न; D °स्थितेन (for °स्थितेर्न suggested with St).
3228. b) SA $P_{1,3}$ I_3 पा…द् (for पापाद्).
3229. b) C S′ P_{1-3} I_3 SA क्ष्मासुजा (for क्ष्माभुजां).
3230. ab) All Mss. read शाहेवा° (for शाहेरा° suggested with St).
3231. b) All Mss. read °त्सङ्गेन्यदादि नः (for °त्सङ्गे यदा हि नः suggested). —cd) St SA $P_{1,3}$ I_3 °नदु…मुखैः; P_2 °नदु…सुस्थूः (for °नदुर्भोगासुस्थैः).

इतीदृशीभिः स्तुतिभिः प्रमाणमथवा प्रभुः ।
इत्युक्त्वा भूपतेर्मूर्ध्ना सोऽगृह्णाच्चरणौ पुनः ॥३२३२॥

प्रणामसंभ्रमस्रस्तोष्णीषशीर्षं ततो नृपः ।
तस्योत्थितस्य स्वशिरोवाससा समवस्त्रयत् ॥३२३३॥

स्वां तां च शस्त्रीं तन्न्यस्तामुत्सङ्गे सान्त्वयन् व्यधात् ।
तस्याऽसंक्षोभगाम्भीर्यैस्तमूचे च निषेधिनम् ॥३२३४॥

दत्ते मया बिभृहि वा त्वमेते पूजयाऽथवा ।
न शस्त्रग्रहवैमुख्यं कार्यं मच्छासनं त्वया ॥३२३५॥

अवन्ध्यशासने मानिन्यनुबध्नति ते व्यधात् ।
शस्त्र्यौ राजानुमत्यैव वन्दित्वाऽङ्के स कालवित् ॥३२३६॥

ततो निर्यन्त्रणत्वस्य नर्मणः सान्त्वनस्य च ।
चिरसेवीव तत्कालं राज्ञोऽजायत भाजनम् ॥३२३७॥

अन्यत्प्रविष्टो धन्योऽथ स्वार्चामकथयत् कृती ।
कृतप्रणामो भूपाल त्वद्गुणाकर्णनं विना ॥३२३८॥

3232. a) P_3 I_3 SA इदीदृ° (for इतीदृ°). St SA I_3 P_3 om. स्तुतिभिः with a *lacuna*.

3234. a) C S′ शांतां (for स्वां तां).

3235. a) C S′ दत्ता; D (before suggestion) P_{1-3} I_3 SA दत्तं (for दत्ते suggested with St D). —b) C S′ °मेतां; P_2 °मेता (for °मेते).

3236. a) All Mss. read °शासनो (for °शासने suggested with St). —ab) St ···त्यनुबध्नति; SA ···त्यनुबति; I_3 ···न्यनुवातिति; P_1 ···न्यनुबंध्नाति; C S′ मानीत्यनुवर्तिनि [P_2 °र्तिति]; D P_3 मानीत्यनुबध्नाति; St suggests राज्ञीत्यनुबध्नति (for मानिन्यनुबध्नति suggested). —b) C S′ तां; P_2 त; P_3 तं (for ते). C न्यधात् (for व्यधात्). —c) D (before suggestion) SA $P_{1,3}$ I_3 शस्त्रौ; C S′ P_2 शस्त्री (for शस्त्र्यौ suggested with St D). St D P_1 I_3 °गत्यैव; C S′ P_3 °गम्यैव; P_2 °गस्यैव (for °मत्यैव suggested). —d) D C S′ $P_{1,3}$ °त्वा कामका°; P_2 I_3 °त्वा कमका° (for °त्वाऽङ्के स का°).

3238. a) C S′ P_2 धन्यो वा (for धन्योऽथ). —b) St SA P_1 I_3 °म···यन्; C S′ P_2 °ममलयन् (for °मकथयत्).

न प्राणा द्रविणं नाऽद्य गण्यं निर्विक्रिया पुनः ।
सत्क्रिया स्वामिनोऽप्यर्थे तस्मात् पार्थिव चिन्त्यताम् ॥३२३९॥

तथाऽपि कथ्यमानं तन्न स्यात् संभावना भुवि ।
यदस्मिंश्चिन्त्यतेऽस्माभिरिति भूयोऽप्यभाषत ॥३२४०॥

क्षणमुच्चावचां चर्चां विरचय्य विशां पतिः ।
भोजेन सार्धं शुद्धान्तं रङ्गादेव्यास्ततो ययौ ॥३२४१॥

कृतप्रणामस्तां वीक्ष्य सौजन्यादिगुणोज्ज्वलाम् ।
स राजपारिजातं तं मेने कल्पलतायुतम् ॥३२४२॥

मान्योऽयं देवि सौजन्यज्ञातेयाभ्यामिहाऽऽगतः ।
विशिष्यतेऽसौ पुत्रेषु क्ष्माभृद्योषेत्यभाषत ॥३२४३॥

सभाजनाय सौजन्यनिधिर्भोजान्वितस्ततः ।
उदूढकार्यभाराणां दाराणामप्यगाद् गृहान् ॥३२४४॥

अभाणीन्निपुणा राज्ञी भोजं राज्ञा सहाऽऽगतम् ।
अधुनैव नृपस्याऽऽप्तः संवृत्तोऽसीति सस्मितम् ॥३२४५॥

लज्जास्मितमुखी पत्युः प्रणत्या स्वागतोक्तिषु ।
ददत्येवोत्तरं भोजं निर्दिशन्त्यप्यभाषत ॥३२४६॥

आर्यपुत्र न विस्मार्यं प्रत्याख्यातामन्त्रितम् ।
मानैकशरणस्याऽस्य ज्ञातिप्रीतिप्रवर्तनम् ॥३२४७॥

3239. c) SA $P_{1,3}$ I_3 om. प्य with a *lacuna*.
3240. a) C S′ P_2 अथापि (for तथाऽपि). —c) All Mss. read यदास्मिं° (for यदस्मिं° suggested with St). —d) C S′ P_2 भूयो व्यभा°; St भूपो व्यभा° (for भूयोऽप्यभा°).
3243. b) C S′ P_2 °ज्ञातेयात्त्वा°; P_1 °ज्ञातेयान्या°; P_3 °ज्ञातेयात्या°; I_3 °ज्ञातेयात्र्या° (for °ज्ञातेयाभ्या°). —d) SA °भृद्योपैत्य°; P_1 °व्रतोपत्य°; P_2 I_3 °भृद्योपेत्य°; P_3 °भृत्वोपेत्य° (for °भृद्योषेत्य°).
3245. d) C S′ P_2 I_3 °त्तोऽस्मीति; SA °त्तोमींति (for °त्तोऽसीति).
3246. b) C S′ P_2 °थिषु (for °क्तिषु).

पूर्वोपकर्तृ सलिलं वृद्धावस्पृशतोऽन्वहम् ।
पद्मान् स्वकुलपद्मानां युक्तं जेतुं भवादृशाम् ॥३२४८॥

कार्यकृच्छ्रेऽवसन्नानाममुष्याऽऽगमनं विना ।
सिध्येदौन्नत्यसंरक्षा नेह प्रत्यागमश्च नः ॥३२४९॥

उदीपे रक्षतस्तीरं शरीराश्रयिणी भवेत् ।
ध्रुवं वनस्पतेर्वीरुत्तन्निपातानुपातिनी ॥३२५०॥

पतिगत्यनुगामित्वं प्राणानां परिचिन्तितम् ।
तथा कार्यं यथा न स्यात्त्रातव्यस्याऽन्यथाऽऽत्मनः ॥३२५१॥

राजा जगाद तां देवि सर्वकर्तव्यसाक्षिणी ।
अन्यथा प्रतिपत्तिं मे त्वमप्यत्र न मन्यसे ॥३२५२॥

निगृहीतवतो दुष्टौ सुज्जिमल्लार्जुनावपि ।
निस्तापं मम नाऽद्याऽपि प्राप्तानुशयमाशयम् ॥३२५३॥

अथ राज्ञाऽर्थितः स्थातुं परार्ध्ये धाम्नि सानुगः ।
भोजो नाऽमन्यताऽन्यत्र राजधान्याः स्थिरां स्थितिम् ॥३२५४॥

विदूराश्रयनिर्गोप्तृभावाप्रचुरदर्शनैः ।
आराधनं धराभर्तुरसाध्यं ध्यातवान् हि सः ॥३२५५॥

रक्षितॄनग्रहीत् क्ष्मापात् स्थिरांश्च समकल्पयत् ।
अनुयातो नृपं कार्येष्वृजुराराधनागमे ॥३२५६॥

3248. c) D पद्मान् सुकु°; P_1 पद्मकु° (for पद्मान् स्वकु°).
3250. a) SA_1 gloss उदीप: अतिवृष्ट्या अत्युद्रिक्तजलागमः (for उदीपे).
3252. c) St °थाप्रतिपत्त्वं; C Ś $P_{1,2}$ SA °था प्रतिपत्यं (for °था प्रतिपत्तिं). —d) All Mss. [SA °प्य···] read °प्यस्य (for °प्यत्र suggested with St. Tr.).
3254. d) All Mss. read राजधान्यां (for राजधान्याः suggested with St).
3256. a) D C S′ $P_{1,2}$ I_3 SA °क्ष्मापान् (for °क्ष्मापात्). —b) All Mss. read स्थिरं च (for स्थिरांश्च suggested). —c) St SA $P_{1,3}$ I_3 अनया···नृ°; D S′ P_2 अनयातां नृ°; C अनयात्तं नृ° SG *sec. manu* अनुयान्तं नृ° (for अनुयातो नृ° suggested). —cd) D St C S′ P_{1-3} I_3 कार्या न सुरा; SG *sec. manu* कार्यान्नृसुरा (for कार्येष्वृजुरा° suggested).

विज्ञाय भावं प्रीतेन राज्ञा दत्तं ततो गृहम् ।
सर्वोपकरणापूर्णं राजधान्यन्तरेऽभजत् ॥३२५७॥

राजाऽपि ममतास्फीतप्रीतिभिः स्वैः परैस्तथा ।
उपासितस्तत्र रतिं चिराश्रित इवाऽऽययौ ॥३२५८॥

भोगवेलोचिताश्चर्यदर्शनादौ नृपोऽपि तम् ।
प्रियं पुत्रमिवाऽऽसार्षीद् दूतैः पार्श्वं निनाय च ॥३२५९॥

जग्राह दक्षिणे पार्श्वे भुञ्जानं ज्ञातिगौरवात् ।
स्पर्शास्वादितभोज्यादिदाने नैव व्यसर्जयत् ॥३२६०॥

अकृत्रिमं तथा स्नेहमुवाह जनको यथा ।
लडितज्ञातिवत्तस्मिंस्तद्बालापत्यकैः समम् ॥३२६१॥

तामेवाऽऽलम्बत व्यक्तां सोऽपि वृत्तिं तथा यथा ।
राजा सपरिवर्होऽपि विस्रम्भमविगर्हितम् ॥३२६२॥

आसन्नाभ्यन्तरा भिन्ना ये द्वैधे तानदर्शयत् ।
राज्ञा विरक्तिं स्वस्याऽरिवाहुल्यं च व्यसजर्यत् ॥३२६३॥

अकृत्रिमात् समाधनात् कारणानां सभान्तरे ।
न प्रत्यभाज्जडो नाऽपि धृष्टो नाऽपि बकव्रतः ॥३२६४॥

3257. a) P_2 भार्यां (for भावं). —b) P_1 I_3 SA दातुं (for दत्तं).
3260. d) St SA_5 P_3 व्यवर्जयत्; I_3 व्यसर्जयेत् (for व्यसर्जयत्).
3261. b) St $P_{1,3}$ I_3 om. जनको with a *lacuna*. —c) St C S′ D P_2 I_3 लडितं; P_1 लाडितं (for लडित° found in P_3). —d) SA C P_1 I_3 °स्तद्ब लाप° (for °स्तद्बालाप°).
3262. a) All Mss. read तमेवालम्बत व्यक्तिं (for तामेवाऽऽलम्बत व्यक्तां suggested with St). —b) All Mss. read यथा (for तथा suggested). —c) P_1 °वर्हेऽपि (for °वर्होऽपि).
3263. cd) P_3 om. —c) All Mss. read राज्ञां (for राज्ञा suggested with St).
3264. b) St C S′ P_2 करणानां (for कारणानां).

प्रमादस्खलिते हीनातिरिक्तत्वे च भूपतेः ।
कार्यें नाऽवदधे क्षुद्रकवितेव महाकवेः ॥३२६५॥

न विक्रमकथासत्रदानाद्यैः स्वं व्यकत्थत ।
प्राग्वृत्तमन्तरा पृष्टः सोपस्कारं च नाऽभ्यधात् ॥३२६६॥

विकत्थकान् प्रभोः साम्यसकुल्यत्वादिचाटुभिः ।
धीरो धृष्टैर्दृष्टिपातैरपुनर्भाषिणो व्यधात् ॥३२६७॥

तथा स्पृष्टोऽप्यनुत्तानाशयोऽभूदवगाहितुम् ।
न शेकुस्तं यथा जाल्मनर्मवित्पिशुनादयः ॥३२६८॥

क्षणेष्ववसितालोकक्षोभादिविशारारुषु ।
प्रायेणाऽवसथं गच्छञ्छङ्कां कामपि नाऽतनोत् ॥३२६९॥

यथा यथाऽस्य विस्रम्भाद् भूपोऽभूच्छिथिलाग्रहः ।
तथा तथैव सिद्धोऽश्व इव नाऽधावदुद्धतम् ॥३२७०॥

सदैवाऽग्रेसरोऽन्यत्र पश्चाद् रुद्धपदोऽभवत् ।
अनिषिद्धोऽपि शुद्धान्तमन्त्रागारावगाहने ॥३२७१॥

विज्ञाप्यौपयिकावाप्तिप्रार्थनामादरात् स्वयम् ।
दूरीचक्रे परापेक्षां शश्वत्संशयिताशयः ॥३२७२॥

3265. c) C S′ कार्येणा° (for कार्ये ना°). All Mss. read क्षुद्रः (for क्षुद्र° suggested).

3266. b) St $P_{1,3}$ I_3 SA om. दानाद्यैः स्वं with a *lacuna*.

3267. a) St SA P_{1-3} I_3 वि···कात् ; D C S′ विचारकात् ; St suggests विडम्बकान् or विगर्हकान् (for विकत्थकान् suggested). —c) St D धीराधृ°; P_1 धीरापृ°; P_2 धीरो पृ°; I_3 धीरान्धृ°; P_3 धीराद्दृ° (for धीरो धृ°).

3269. c) St SA P_1 I_3 प्रा···व°; C S′ प्राप्तोऽस्याव°; P_2 प्राप्तस्याव° (for प्रायेणाऽव°).

3272. a) D St C S′ SA P_3 I_3 विज्ञप्यौ° (for विज्ञाप्यौ°). —b) St °प्रांथनमादरा°; D SA $P_{1,3}$ I_3 °प्रार्थन···दर°; C S′ P_2 °प्रार्थनः स दर° (for °प्रार्थनामादरा° suggested).

अनाप्तसमये तस्य न ययुः पथि रक्षिणः ।
न स्वप्नवृत्तमप्यासीदनावेद्यं महीभुजे ॥३२७३॥

मन्त्र्यान्तःपुरिकादीनां परस्परविगर्हणम् ।
नाऽवर्णयद् विस्मृतिं च दुष्टस्वप्नमिवाऽनयत् ॥३२७४॥

सचेतनोऽपि दुर्नर्मगोष्ठीष्वनुरणद्वचः ।
नाऽवदत् स्फुरदप्यन्तर्विटानां नामलाघवम् ॥३२७५॥

एवं शुद्धानुभावस्य तस्य कृत्येन कृत्यवित् ।
पुत्रेभ्योऽप्यधिकां प्रीतिं स्निह्यन् भेजे क्रमान्नृपः ॥३२७६॥

कलिकालमहीपालदुस्तरः सिंहभूभुजा ।
सोऽयं गोत्रपरित्राणे नवः सेतुः प्रवर्तितः ॥३२७७॥

इत्थं विद्राविताशेषोपद्रवस्त्रिल्लकं ततः ।
अग्निप्रोषमपि स्वास्थ्यहेतुं भूभृदचिन्तयत् ॥३२७८॥

असौ हि निर्हिमोर्वीभृन्मार्गे काले पलायनम् ।
शाठ्यं सत्त्वस्य दुस्साध्यं बद्धं ध्यायन् व्यलम्बत ॥३२७९॥

अतः सुमेधा यात्रायां यावत् क्षणमपैक्षत ।
सज्जपालेनाऽविचारात् तावत् प्रारम्भि धावनम् ॥३२८०॥

3273. a) St SA $P_{1,3}$ I_3 om. प्त in अनाप्त with a *lacuna*. St I_3 C S′ तस्या (for तस्य). —b) St SA $P_{1,3}$ I_3 om. न ययुः पथि with a *lacuna*.

3275. b) All Mss. read °रणन्वचः (for °रणद्वचः suggested). —c) All Mss. read अवदत् (for नाऽवदत् suggested).

3276. d) S′ $P_{1,3}$ I_3 SA भोजे (for भेजे).

3278. b) All Mss. read °स्त्रिल्लकस्ततः (for °स्त्रिल्लकं ततः suggested with St. Tr.). —cd) St SA P_{1-3} I_3 om. प्रोष and हेतुं with *lacunae*.

अल्पाधिष्ठानसुभटः स देवसरसोद्भवैः ।
बहुभिः सहितः सैन्यैर्मार्तण्डे विदधे पदम् ॥३२८१॥

निर्निरोधप्रवेशः स प्रदेशः परिपन्थिनाम् ।
बाह्याश्च योधा निस्सारा दर्पान्वेति विवेद सः ॥३२८२॥

त्रिल्लकानुचरा युद्धमसंनिहितसायकाः ।
तेन सार्धं विदधिरे न चाऽहीयन्त पौरुषम् ॥३२८३॥

निस्सीमसैन्यसहितो लवन्योऽन्यत्र डामरः ।
तत्र सर्वाभिसारेण धावतो युयुधे क्रुधा ॥३२८४॥

लुण्ठितद्रविणापूर्णास्ते देवसरसौकसः ।
सर्वे ततः सज्जपालं विद्रुताः परिजह्निरे ॥३२८५॥

द्विषत्संवर्तवर्षार्त्या सर्वत्र त्रुडितेऽभवन् ।
अधिष्ठानभटा एव कुलशैला इवोद्धताः ॥३२८६॥

ते तीक्ष्णतीक्ष्णतरणौ सोढारातिरुषश्चिरम् ।
बहून्निहतवन्तोऽन्यांस्तत्र तत्राऽऽहवे हताः ॥३२८७॥

क्षतेषु युधि सर्वेषु भिन्दानैर्मण्डलं निजैः ।
शूरेषु तत्र मार्ताण्डोऽप्यासीदविरलव्रणः ॥३२८८॥

3281. b) St C S′ $P_{1,2}$ I_3 °द्भटैः (for °द्भवैः).

3284. b) All Mss. read डामरे (for डामरः suggested).

3285. d) C S′ परिजज्ञिरे; $P_{1,2}$ SA परिजग्रिरे; I_3 ···ग्रिरे (for परिजह्निरे).

3286. a) D C S′ P_{1-3} I_3 °र्षाद्या: (for °र्षार्त्या). —c) SA_1 (before corr.) D C S′ P_{1-3} I_3 SA °ष्ठाने भटा (for °ष्ठानभटा). —d) I_3 SA इवेद्धताः (for इवोद्धताः).

3287. c) P_{1-3} I_3 SA बहूनिह° (for बहून्निह°).

3288. a) C S′ हतेषु (for क्षतेषु). —b) All Mss. except D read विन्दानै° (for भिन्दानै°).

ऽराजाऽऽजौ साङ्गपालिर्गयापालो हतेषु यः ।
त्रिषु वाजिषु चातुर्यात् पदातिर्नोपलक्षितः ॥३२८९॥

तत्प्राथम्योपलब्धाजिर्जर्जस्तदनुजः शिशुः ।
निनाय विस्मयं वीरान् दृष्टासंख्यमहाहवान् ॥३२९०॥

दक्षिणं दोर्न तच्चक्रे यद्वामं कम्पनापतेः ।
महेभांस्तापयत्यर्कः कुर्याद् भग्नरदान् विधुः ॥३२९१॥

स धावन् वाजिनाऽराजदेकदोःस्फुरितायुधः ।
सधूमदण्डो दावाग्निः सपक्षेऽद्राविव स्थितः ॥३२९२॥

तं वैरितुमुले बाणव्रणभङ्गेष्वसौ पुनः ।
पृष्ठादलोठयद् वाजी तदन्वाबद्धपद्धतिः ॥३२९३॥

वर्मगौरवभूपृष्ठकाठिन्याघातपीडितः ।
स विसंज्ञो द्विषन्मध्यात् तनयाभ्यां विनिर्हृतः ॥३२९४॥

कटके सर्वतो नष्टे मार्ताण्डप्राङ्गनान्तरे ।
विरोध्यसाक्षि क्षिप्त्वा तं तावपासरतां ततः ॥३२९५॥

तत्रस्थं कम्पनाक्ष्माभृत् प्रस्थितः पृथुलैर्बलैः ।
तावद्भिः प्राप्यमप्याशु डामरं पिण्डितं व्यधात् ॥३२९६॥

3289. a) P_1 I_3 SA सङ्ग° (for साङ्ग°). —b) D P_{1-3} I_3 SA °र्गयपालो (for °र्गयापालो, cf. *v.* VIII. 3322.). —c) C S′ $P_{1,2}$ वाजिष्वचा°; SA I_3 वाजिष्मचा° (for वाजिषु चा°).

3290. d) P_2 I_3 SA दृष्ट° (for दृष्टा°).

3291. a) C I_3 दोन्न; P_3 चेन्न (for दोर्न). —b) C S′ यद्वासं (for यद्वामं).

3292. a) D °जिना राज° (for °जिनाऽराज°). —c) $P_{1,3}$ I_3 SA °दण्डं (for °दण्डो). —d) $P_{2,3}$ I_3 SA °द्रादिव (for °द्राविव).

3293. d) St SA $P_{1,3}$ I_3 ···न्वा° (for तदन्वा°).

3294. c) C S′ विसङ्गो (for विसंज्ञो).

3296. a) D St SA $P_{1,3}$ I_3 om. कम्प with a *lacuna*.

क्षमापाले विजयक्षेत्रं प्राप्ते त्रोटितवेश्मनः ।
सज्जपालो लवन्यस्य वसतीर्निरदाहयत् ॥३२९७॥

स तादृगपि भूपाले क्रुद्धे वक्रीकृतभ्रुवि ।
अदरिद्रो गिरिद्रोणीश्रेणिभूसुलभाशनः ॥३२९८॥

संवृत्तो निस्सहायश्च परिग्रहबहिष्कृतः ।
आपत्सुलभपाण्डित्यभृत्योपालम्भभाजनम् ॥३२९९॥

निकृत्तकरशाखोऽथ क्षमापकोपकपेर्व्यधात् ।
निरालम्भतया तस्य स स्वशीर्षफलार्थनाम् ॥३३००॥

रड्डादेवीतनूजानां ज्यायांसं गुल्हणाभिधम् ।
श्रीमांल्लोहरराज्येऽथ क्ष्मात्रृषा सोऽभ्यषेचयत् ॥३३०१॥

षट्सप्तहायनो राजतनयः स वयोधिकान् ।
चूताङ्कुरो जीर्णतरूनिवेशानजयद् गुणैः ॥३३०२॥

अभिषेक्तुं सुतं देव्या यातायाः क्ष्माभुजो व्यधुः ।
शिरश्शोणाश्मकिरणैश्चरणौ यावकारुणौ ॥३३०३॥

तत्राऽभिषिक्ते वसुधामुग्रावग्रहशोषिताम् ।
देवीभावाभिषेकार्थमिवाऽसिञ्चन् पयोमुचः ॥३३०४॥

भूयोऽपि राजवदनो विप्लवोत्पादनोत्सुकः ।
अमन्दमवचस्कन्द जयचन्द्रं नृपाज्ञया ॥३३०५॥

3297. b) St $P_{1,2}$ I_3 °वेष्टनः (for °वेश्मनः).

3298. b) P_2 I_3 SA क्रुद्धो (for क्रुद्धे). —d) SA $P_{1,3}$ I_3 °ण···सु° (for °णिभूसु°).

3300. c) St SA $P_{1,3}$ I_3 om. तस्य with a *lacuna*.

3301. c) C S′ श्रीमल्लो°; P_2 SA श्रीमाल्लो°; P_1 श्रीमाल्ले° (for श्रीमांल्लो°).

नागभ्रातृव्यसहितो गार्गेरन्तःप्रवेशिनः ।
पश्चात् प्रसर्पिणीः सेनाः सोऽवधीत् संकटेऽध्वनि ॥३३०६॥

गार्गिः परिभवम्लानाननस्तिष्ठन् दिनैस्ततः ।
नागभ्रातृसुताग्रण्यमबध्नाल्लोष्ठकं मृधे ॥३३०७॥

दुर्गमत्वादनाक्रान्तमन्यैर्वेगात् प्रविश्य च ।
दग्ध्वा स दिन्नाग्रामं तु निरगाल्लघुविक्रमः ॥३३०८॥

तथाऽपि राजवदनो न शौर्यात् पर्यहीयत ।
न संदधे न चक्रे च शक्यमस्य विनिर्गमम् ॥३३०९॥

अहन्यहनि हीनाभिः सेनाभिर्निपतन्नृपे ।
जयचन्द्रमुखाच्छश्वदसुखान्यन्वभीभवत् ॥३३१०॥

क्ष्मानायकोऽथ निस्सीमनखबाहुप्रसारणः ।
रणान्तरेव तं तीक्ष्णैर्गूढन्यस्तैरघातयत् ॥३३११॥

तन्मुण्डगण्डलेखेन लुठता खण्डशः कृतः ।
झटिति त्रुटितः स्वास्थ्यविटप्यङ्कुरणोन्मुखः ॥३३१२॥

3306. a) All Mss. read °सहिता (for सहितो suggested with St. Tr.). —b) All Mss. read गार्गेरन्तु° (for गार्गेरन्तः° suggested).

3307. b) St $P_{2,3}$ I_3 °ननं ति° (for °ननस्ति°). —c) D P_3 °सुताग्रस्थ°; P_1 I_3 SA °सुताग्रन्या° (for °सुताग्रण्य°).

3308. c) St च (for स). St C S′ $P_{1,2}$ I_3 स (for तु).

3309. c) All Mss. read चुक्रोध (for चक्रे च suggested). —d) C S °गैतम् (for °र्गमम्).

3310. b) St D C S′ P_1 I_3 °न्यंपत°; $P_{2,3}$ °नृपत° (for °निपत° suggested with St. Tr.). —d) All Mss. read °न्यवधी° [SA °न्यववधी° (for °न्यन्वभी° suggested).

3312. d) D °मिवास्य स्फुर°; SA_1 I_3 P_3 °विर्यास्यङ्कुरो°; C S′ P_2 °विवास्यंकुर° (for °विटप्यङ्कुर° suggested with St).

पृथ्वीहरकुलच्छेदस्वच्छन्दो मेदिनीपतिः ।
अवधील्लोठनमपि च्छन्नदण्डप्रयुक्तिभिः ॥३३१३

एकवारं वेष्टितोऽपि रक्षितस्त्रिल्लकेन सः ।
भूमिभृन्नीतिपाशस्य निपातेनाऽभ्यवर्तत ॥३३१४॥

मल्लकोष्ठक्षुरजय्यसड्डचन्द्राद्योऽभवन् ।
जीवन्मृताश्च शान्ताश्च दारिद्र्योपप्लवार्दिताः ॥३३१५॥

अविचिन्त्योच्चलक्ष्मोणिभृतः प्राणान् विनश्वरान् ।
ऐश्वर्यरूढिमूढत्वादनिर्व्यूढव्ययस्थितौ ॥३३१६॥

मठेऽनुमितकोशत्वं तत्तद्राजाश्रयाद् गते ।
कुलोद्वहो विहितवान् सिंहदेवो व्ययस्थितिम् ॥३३१७॥

सुल्लाविहारं पैतृव्यं पितुर्देवगृहत्रयम् ।
तच्चाऽर्धसिद्धं प्रासादं परिपूर्णं व्यधान्नृपः ॥३३१८॥

स एव ग्रामसामग्रीमहापणसमर्पणैः ।
निर्दोषपारिषद्यादिहृद्यान्निश्चोद्यधीर्व्यधात् ॥३३१९॥

3313. a) St P_1 I_3 °कुला° (for °कुल°). —b) All Mss. read °स्वच्छन्ना (for °स्वच्छन्दो suggested). P_1 °पते; $P_{2,3}$ I_3 SA °पतेः (for °पतिः). —c) for लोठन cf. fn. of *v*. VIII. 2496. —d) C S′ P_{1-3} SA च्छत्र° (for च्छन्न°).

3314. d) D °भिवर्तिना; P_1 I_3 SA °भ्यवर्तिता (for °भ्यवर्तत).

3315. a) D C S′ P_{1-3} °क्षरज°; I_3 °क्षुरज्ज° (for °क्षुरजय्य°). —b) D C S′ P_{1-3} I_3 SR °मड्डु° (for °सड्ड°, cf. *v*. VIII. 643).

3316. c) P_2 SA एश्वर्य रू° (for ऐश्वर्यरू°). —d) All Mss. read °व्यव° (for °व्यय° suggested with St. Tr.).

3317. d) C S′ P_2 I_3 SA व्यवस्थितम्; St D I_3 P_1 व्यवस्थितिम् (for व्ययस्थितिम् suggested with St. Tr.). After this *v*. युग्मम्.

3318. a) SA स्वल्ला°; C P_1 मुल्ला° (for सुल्ला°). P_3 SA पैतृव्य° (for पैतृव्यं). —c) St $P_{1,3}$ I_3 °सिद्धप्रासा° (for °सिद्धं प्रासा°).

3319. a) SG *sec. manu* St ग्रामान्सा° (for ग्रामसा°).

अवरोधेन्दुवदनां मृतामुद्दिश्य चन्दलाम् ।
प्रत्यष्ठापि मठोऽनूनश्रीर्द्वारेऽवारितातिथिः ॥३३२०॥

प्लुष्टो नगरनिर्दाहैः सोऽपि सूर्यमतीमठः ।
पूर्वाधिकोऽपगर्वेण तेनैव निरमीयत ॥३३२१॥

संजाते सज्ञपालस्य ततो लोकान्तराश्रये ।
कम्पने निदधे राज्ञा गयापालस्तदात्मजः ॥३३२२॥

विपाकसुकुमारोऽपि दुस्सहः सूनुनाऽभवत् ।
विस्मारितः स सौम्येन शरद्भानुरिवेन्दुना ॥३३२३॥

ग्रीष्मोष्मदोषविषमेष्वविशेषवृत्ते-
मेघोदये तटतरोस्तटिनीप्रवाहः ।
पश्यन्नकाण्डतडिदापतनेन नाशं
नाऽऽशंसति स्वसलिलस्य विभूतिलाभम् ॥३३२४॥

आ भिक्षुक्षपणाद् भोजभञ्जनादपि भूभुजः ।
विधुरे कार्यभाराणां योऽभूदूढधुरः परम् ॥३३२५॥

तस्य तस्मिन् नरपतौ क्षीणप्रक्षीणकण्टके ।
स धन्योऽनन्यसामान्यप्रेमा प्रमयमाययौ ॥३३२६॥

3320. a) $P_{1,2}$ I_3 SA °वदनं (for °वदनां). —b) C S′ P_2 चन्द्रलां; SA_5 दन्दलां (for चन्दलां).

3321. a) SG *sec. manu* St स्पृष्टो; SA C S′ P_{1-3} I_3 पृष्टो (for प्लुष्टो). All Mss. except SG *sec. manu* read °निर्मोहः (for °निर्दाहैः).

3322. a) D सज्जपाल° (for सज्ञपाल°). —d) D $P_{1,3}$ गय° (for गया°).

3323. c) C S′ I_3 P_1 SA सोम्येन; P_3 सोम्यन (for सौम्येन).

3324. c) C S′ शंसत्य° (for पश्यन्न°).

3325. b) D °सञ्ज° (for °भञ्ज°).

3326. a) All Mss. read नृपरतें; St. Tr. conjecturally suggests नृपरत्न (for नरपतौ suggested). —c) D C S′ SA $P_{1,2}$ I_3 धान्या नान्य° (for धन्योऽनन्य°). After this *v.* युग्मम् is suggested.

ताम्बूलमायात्रिकतां नीत्वाऽसूनामयानिव ।
आर्पिपन्मधुरावट्टं जीवं यस्य निजः सुतः ॥३३२७॥

स जगज्जीवितेनाऽपि रक्षणीयः क्षमापतिः ।
पदे पदे विपन्मग्नप्रजोद्धरणधीरधीः ॥३३२८॥

व्याधितस्य विनिद्रोऽपि संसक्तान्मङ्गलच्छुभिः ।
नाऽन्तक्षणे तस्य पार्श्वात् कृतज्ञोऽवाचलन्नृपः ॥३३२९॥

प्रियप्रजस्याऽमात्यस्य स्वरूपविपरीतता ।
तस्य कंचित्क्षणं जाता जनजीवितदा भवे ॥३३३०॥

भूभुजामपि मान्धातृमुखानां निधनेन याः ।
दुःखं ययुः प्रजास्तासां समभावि तदा सुखम् ॥३३३१॥

द्वैराज्योपप्लुते राष्ट्रे नवस्य नृपतेरभूत् ।
अव्याहतं यत्साचिव्यं तस्य सर्वाभिषङ्गभित् ॥३३३२॥

कालो बली व्यवहृतेर्ननु तद्वशेन
पूर्वापराचरणविस्मरणं न कस्य ।
शक्तिः क्षितेर्वहनकर्मणि भोगितायां
निर्दारणे मुरजितस्तु वराहतायाम् ॥३३३३॥

3327. b) St SA I_3 °त्वामूना°; D °त्वा सूना° (for °त्वाऽसूना°). —c) P_1 I_3 SA आर्पिपाम°; P_2 आपिपञ्च° (for आर्पिपन्म°). C S′ °वद्धं; P_1 °वधुं; P_2 °वद्वां (for °वट्टं).

3328. c) St °मग्न:; D C P_{1-3} °मग्नो; S′ °मग्रो (for °मग्न° found in I_3, also see St.Tr. fn.).

3330. d) D P_3 भवेत् (for भवे).

3332. c) All Mss. except C read अप्या° (for अव्या°).

3333. b) All Mss. read °रणे न [D °रणेन] (for °रणं न suggested). —c) All Mss. read योग्यतायां (for भोगितायां suggested with St. Tr.). —d) C S′ P_{1-3} I_3 SA निर्मारणे (for निर्दारणे, also found in SG *sec. manu*).

नगराधिकृतो भूत्वा सुज्जौ निर्वापिते पुरा।
चिरप्ररूढां यो देशस्याऽव्यवस्थां न्यवारयत् ॥३३३४॥

भ्रष्टः क्रयेषु दीन्नारव्यवहारोऽव्यवस्थया।
निगृह्य तां भ्रंशकारीं निर्वितण्डः प्रवर्तितः ॥३३३५॥

परिणीताङ्गनाशीलभ्रंशे गृहपतेरभूत्।
दण्डप्रवृत्तिर्या तेन सा विचार्य निवारिता ॥३३३६॥

एकान्ततो हितो भूत्वा विश्वासमेवं पुनर्व्यधात्।
नगराधिक्रियां लब्ध्वा स एव परिपीडनम् ॥३३३७॥

बद्धाभिर्नर्तकीभिश्च परिणीतगृहस्थितौ।
संप्रयुक्तान् कथ्यमानान् हठेनाऽदण्डयद् बहून् ॥३३३८॥

किं वाऽपराधलेशानां तुषाणामिव चिन्तनैः।
अद्रोहालोभयोर्भूमिर्न ताद्दगपरोऽभवत् ॥३३३९॥

भिक्षुमल्लार्जुनौ कालानुवृत्त्याऽऽश्रितवानपि।
नाऽसौ जहौ स्वामिहितं नतौ तावपि नाऽवधीत् ॥३३४०॥

3334. b) St C S′ $P_{1,2}$ I_3 सुज्जे: (for सुज्जौ).

3335. b) D C °हारो व्य°; P_2 °हारे व्य°; P_3 °हारव्य° (for °हारोऽव्य°). —c) All Mss. read तं भ्रंशकार्य° [P_3 °र्यो] (for तां भ्रंशकारीं). —d) D C S′ प्रवर्तते; P_{1-3} I_3 SA प्रवर्तत (for प्रवर्तित: suggested with St).

3337. bc) P_{1-3} om. —d) All Mss. read °पीडयन् (for °पीडनम् suggested with St).

3338. a) SA $P_{1,3}$ I_3 om. नर्त with a *lacuna*. —b) SA P_1 I_3 परि···त°; C P_2 परिवीत° (for परिणीत°).

3339. a) St $P_{1,3}$ I_3 SA किंवो···ले°; D C S′ P_2 किं वो भवेद्दले° (for किं वाऽपराधले° suggested with St. Tr.).

3340. a) P_{1-3} I_3 SA_5 भिल्लम° (for भिक्षुम°). —b) D °त्या श्रित°; C S′ °त्या श्रुत° (for °त्याऽऽश्रित°). —c) C S′ P_{1-3} SA स्वामिहतं (for स्वामिहितं). —d) St न तौ (for नतौ). St P_{1-3} I_3 SA om. तावपि with a *lacuna*.

अक्षीणत्यागहीनस्य विभूतिसमयेऽप्यभूत् ।
संस्कारौपयिकं नाऽस्य पर्याप्तं निधने धनम् ॥३३४१॥

कृतज्ञतायां राज्ञोऽन्यत् पर्याप्तं किमुदीर्यताम् ।
यो जीवित इवाऽऽनीतान् संविभेजेऽनुजीविनः ॥३३४२॥

लोकान्तरातिथिं बिजाभिधामुद्दिश्य वल्लभाम् ।
धन्यस्य बिजनामाख्यविहारारम्भकारिणः ॥३३४३॥

परलोकं प्रयातस्य निर्माणप्रतिपूरणम् ।
स्थितं व्यवस्थितेः कं च विनियोगं चकार सः ॥३३४४॥

भूभृद्धार्मिकतावाप्तसुकृतोत्सेकवासनैः ।
युद्धैकवृत्तिभिरपि प्रवृत्तं पुण्यकर्मणि ॥३३४५॥

विपक्षाणां सुभिक्षेण तुरुष्कविषयाश्रयात् ।
जन्मभूमेर्वृत्तये यैः क्रौर्यादन्यत्र शिक्षितम् ॥३३४६॥

येऽपि वृत्तिं विरोध्याऽऽजिव्यग्रे सुस्सलभूभुजि ।
कलहावसरेष्वेव कश्मीरेषु प्रपेदिरे ॥३३४७॥

गोत्रे तेषां क्षत्रियाणां जातः कमलियानुजः ।
राजवीजी सज्ञियाख्यः प्रतिष्ठां स्वाख्ययाऽकरोत् ॥३३४८॥

3343. c) St conjecturally suggests °नामाढ्य° (for °नामाख्य°).

3344. b) All Mss. read निर्वाण° (for निर्माण° suggested with St). After this *v.* युग्मम् .

3345. b) All Mss. read °वासवैः (for °वासनैः suggested with D). —d) All Mss. read प्रवृत्ते (for प्रवृत्तं suggested with St.Tr.).

3346. b) P_{1-3} I_3 तुरुष्कामि° (for तुरुष्कवि°).

वितस्तापुलिने बाणलिङ्गे तेन निवेशिते ।
जायते स्वर्धुनीरोधःसंप्ररूढाविमुक्तधीः ॥३३४९॥

तदीयं च मठं चैव तपोधनविभूषितम् ।
दृष्ट्वा निवर्तते रुद्रलोकालोकनकौतुकम् ॥३३५०॥

लोठनेऽन्यप्रतिष्ठानामधन्यद्रविणार्पणे ।
न तेनाऽद्यतने काले संरब्धं शुद्धबुद्धिना ॥३३५१॥

उदयस्य प्रिया चिन्ताभिधाना कम्पनापतेः ।
पुलिनोर्वी वितस्ताया विहारेण व्यभूषयत् ॥३३५२॥

प्रासादपञ्चकव्याजात् तद्विहारस्थितः करः ।
उदस्त इव धर्मेण प्रोत्तुङ्गाङ्गुलिपञ्चकः ॥३३५३॥

सांधिविग्रहिको मङ्खकाख्योऽलंकारसोदरः ।
समठस्याऽभवत् प्रष्ठः श्रीकण्ठस्य प्रतिष्ठया ॥३३५४॥

मठाग्रहारदेवौकोजीर्णोद्धारादिकर्मभिः ।
अनुजः सुमना नाम रिल्हणस्याऽऽसदत् तुलाम् ॥३३५५॥

भूतेश्वरे मठं कृत्वा त्रिग्राम्यामप्यपाययत् ।
तोयं कनकवाहिन्या वितस्तायाश्च यः पितॄन् ॥३३५६॥

प्रदेशे कश्यपागाराभिधाने नीलभूः सरित् ।
जिगीषयेव जाह्नव्या यत्र पूर्वां दिशं गता ॥३३५७॥

3349. d) All Mss. read °रूढवि° (for °रूढावि° suggested with D). अविमुक्त is an epithet of Benares.

3351. d) All Mss. read संरब्धे (for संरब्धं suggested with St).

3355. c) All Mss. read अनुजा (for अनुजः suggested with St).

3356. b) SA C I_3 °ग्राम्य° (for °ग्राम्या° cf. *v.* V. 97). All Mss. read °पातयत् (for °पाययत् suggested with St).

3357. a) D C S′ $P_{2,3}$ I_3 SA प्रदेश्य°; P_1 प्रदेश° (for प्रदेशे suggested with St).

उत्ताराय गवादीनां यः सेतुं तत्र बन्धयन् ।
निर्ममे निर्मलं कर्म संसारोत्तरणक्षमम् ॥३३५८॥

नगरेऽपि स्वनामाङ्कवृषाङ्कागारकारिणा ।
मठो येन कृतोऽभ्रष्टजटाधरघटाश्रयः ॥३३५९॥

मम्मेश्वरं स सौवर्णामलसारं चकार यः ।
सोमतीर्थे तथा तोयोद्यानसुद्द्योतितान्तिकम् ॥३३६०॥

अत्र क्षमाभुजो वंशे वंशौन्नत्यधनादिषु ।
सासूयत्वादमात्यानां धनप्राणादिहारिणः ॥३३६१॥

क्रुध्यन्नवाऽऽसनाध्यासासूयया वासवोऽपि वा ।
प्राभ्रंशयद् दिवो देवो मान्धातारं धराभुजम् ॥३३६२॥

अविप्लुतमतिर्भृत्यान् कृत्यौन्नत्यवतोऽन्वहम् ।
दृष्ट्वा ध्यातस्वमाहात्म्यवृद्धिस्तु प्रीयते नृपः ॥३३६३॥

कलशक्ष्मापतेः प्रज्ञोपज्ञं भृत्योऽस्य रिल्हणः ।
कुर्वन् स्वर्णातपत्राणां प्रतिष्ठां प्रीतिकार्यभूत् ॥३३६४॥

3359. d) P_1 °गजा° (for °घटा°).

3360. a) P_{1-3} मस्मे° (for मम्मे°). —b) SA_5 SR $P_{1,2}$ °शारं (for °सारं). —d) St °नादु°; D C S′ P_3 °नमु°; $P_{1,2}$ I_3 SA_5 SR °नामु° (for °नसु° suggested).

3361. a) C S′ $P_{1,2}$ I_3 SA क्ष्माभूभुजो (for क्षमाभुजो). —c) D C S′ $P_{1,3}$ I_3 °त्वम°; P_2 °त्वस°; S A °त्वमा° (for °त्वाद° suggested with St). P_3 °मान्यानां (for °मात्यानां). —d) C S′ P_2 I_3 SA_5 °धिहा° (for °दिहा°).

3362. c) $P_{1,3}$ देवा; I_3 SA देवीं (for देवो).

3364. a) SA_1 (before corr.) C I_3 °पतिः (for °पतेः). All Mss. read प्राज्ञो° (for प्रज्ञो° suggested).

स्वर्णपत्रं सुरेश्वर्याः शिवयोः समवेतयोः ।
सदीपारात्रिकामत्रं मैत्रीमेति सघण्टिकम् ॥३३६५॥

बन्धोर्हिमाद्रेर्दयितः सुताजामातरौ शिवौ ।
स्वर्णच्छत्रच्छलान्मेरुर्मूर्ध्न्याघ्रातुमुपागतः ॥३३६६॥

उद्दिश्य यं विदधदुद्यममात्मयोनि-
र्दग्धो मयाऽङ्गघटनं दयितेन गौर्याः ।
सिद्धं तदत्र करुणात्मतयेति हेम-
च्छत्रच्छलाद्धरदृशाश्वलितोऽग्निरूर्ध्वम् ॥३३६७॥

छत्रं तत्र च रिल्हणेन विहितं रौक्मं महद्रुक्मिणी-
प्रेयोमन्दिरमूर्ध्नि नद्धमधुनाऽदभ्रं परिभ्राजते ।
क्षैव्येण क्षतजास्रपानजनुषा नष्टं ततः स्वामिना
प्राप्तं चक्रमवेक्षितुं सुरुचिरं भास्वानिवाऽभ्यागतः ॥३३६८॥

तीर्थे मन्मथजित्खगध्वजदृढाजयोर्जिताचार्यके
साधाराभरणं क्रियापरिणतिस्वर्णातपत्रं प्रभोः ।
भात्येकस्य शिखाहिफूत्कृतिवलद्गङ्गाब्जरेणूपमं
केशान्तस्थितमेघपार्श्वगतडित्पिण्डाभमन्यस्य च ॥३३६९॥

3365. a) All Mss. read °पत्रां (for °पत्रं suggested with St). —c) All Mss. read °कामत्र° (for °कामत्रं suggested).

3367. a) All Mss. read यद्वि° (for यं वि° suggested). —c) St SA P_3 ···मुमयेति; P_2 I_3 ···सुमयेति; P_1 ···समयेति; D C S' करुणासुमयेति (for करुणात्मतयेति suggested).

3368. c) St C S' P_1 I_3 °व्येन (for °व्येण). All Mss. read °जावपान° (for °जास्रपान° suggested). —d) P_2 SA_5 SR चक्रमिवे° (for चक्रमवे°). St C S' $P_{1,2}$ स्वरुचिरं (for सुरुचिरं).

3369. b) St °णाति स्व° (for °णातिस्व°). —c) St P_1 I_3 SA °णूपगं (for °णूपमं).

सौवर्णद्रुहिणाण्डकर्परपुटे संसूत्रिता च्छत्रक-
व्याकोशस्य समुद्गकप्रतिकृतौ दीर्घार्धितार्धे घने ।
सङ्गेनेन्दुकिरीटकैटभरिपुश्यामासितालंक्रिया
सद्रत्नाकरयोः पिधानकरणं स्वर्णातपत्रं गतम् ॥३३७०॥

तं लोहरमहीपालमन्वजायन्त भूभुजः ।
रड्डादेव्या गुणोदाराश्चत्वारश्चतुराः सुताः ॥३३७१॥

गुल्हणेनाऽपरादित्यो राघवेणेव लक्ष्मणः ।
अभिन्नभावः संवृद्धिं वर्तते लोहरे श्रयन् ॥३३७२॥

ललितादित्यदेवेन जयापीडो हि दारकः ।
भरतेनेव शत्रुघ्नः पाल्यमानः प्रवर्धते ॥३३७३॥

पार्थिवाहस्कराच्चारुनमस्कारादु यशस्करः ।
पञ्चमः क्षितिभृद्व्योम्नि बालातप इवोदितः ॥३३७४॥

चपलैः शैशवाच्छुद्धानुभावत्वात् ससौष्ठवैः ।
लडितैर्ललितादित्यो भित्तीरप्यार्द्रयत्यहो ॥३३७५॥

दत्तरक्षाञ्जनं ताम्राधरं गौरं तदाननम् ।
सबालातपभृङ्गाङ्कस्वर्णपङ्केरुहायते ॥३३७६॥

3370. a) All Mss. read °पुरे (for °पुटे suggested with D); D °त्रिताच्छ° (for °त्रिता च्छ°). —b) St SA $P_{1,3}$ I_3 °र्धित···घने; S′ °चितार्धे घने; P_2 °र्धितार्धघने (for °र्धितार्धे घने). —d) St D P_2 I_3 C Ś °करणिं; P_1 °करिणां (for °करणं found in P_3).

3371. d) $P_{1,3}$ I_3 SA °तुरस्सुताः (for °तुराः सुताः).

3373. a) P_2 I_3 SA °तालि° (for °तादि°). —d) SA पालमानः (for पाल्यमानः). All Mss. read प्रवर्तते (for प्रवर्धते suggested with D).

3375. a) St SA $P_{1,2}$ I_3 C °च्छृद्धा° (for °च्छुद्धा°). —d) S′ चि···र°; C P_2 चितीर° (for भित्तीर°).

3376. d) $P_{1,2}$ I_3 SA °भृङ्गाङ्का°; C S′ °भङ्गाङ्क° (for °भृङ्गाङ्क°).

आलापास्तस्य माहात्म्यगर्भा बाल्यास्फुटा अपि ।
अमृतार्द्रा इवोद्गारा मथ्यमानस्य वारिधेः ॥३३७७॥

महाभिजनसंजातो राजसूनुः स शैशवे ।
अभिधत्तेऽनुभावेन भव्येनाऽऽगामि जृम्भितम् ॥३३७८॥

अत्यर्थमण्डनशिखण्डिशिखोऽपि तोय-
स्पर्शासहाञ्चितकलापिकलापभङ्ग्या ।
वार्पी निपीतसलिलो वलितं प्रयाति
चेष्टोक्तभावमहिमा वरवर्णिभावः ॥३३७९॥

चतस्रो मेनिला राजलक्ष्मीः पद्मश्रिया समम् ।
संजाताः कमला चाऽस्य कन्याः सत्कृत्यवृत्तयः ॥३३८०॥

विनोदलीलोद्यानैस्तैर्नित्यकान्तैरपत्यकैः ।
विद्योतेतेऽनवद्यौ तौ प्रावृट्पुष्पाकराविव ॥३३८१॥

तीर्थायतनपूतेऽस्मिन् मण्डलेऽखण्डितैर्व्ययैः ।
रड्डादेव्या एव याता भाग्यभावं विभूतयः ॥३३८२॥

3377. [b]) All Mss. read बालास्फु° (for बाल्यास्फु° suggested with St D). —[c]) D (before suggestion) °तार्द्रा भवोच्चारा; St °तार्द्रा इवोच्चारा; $P_{1,3}$ °ता······; C S′ °तप्रभवश्रद्धा; P_2 °तान्प्रभावोच्चक्ष°; I_3 °तांद्र इवोश्चारा (for °तार्द्रा इवोद्गारा suggested with D).

3379. [a]) St P_3 I_3 अत्यक्त°; P_1 अत्यक्तु° (for अत्यर्थ°). —[c]) C S′ P_2 वापी° (for वार्पी).

3380. [a]) I_3 SA मैनिला (for मेनिला, cf. *vv.* VIII. 3394, 3397). —[c]) St (before suggestion) D C S′ SA $P_{1,2}$ I_3 संजाता (for संजाताः found in P_3).

3381. [c]) SA $P_{1,3}$ I_3 विद्योतया°; D C S′ P_2 द्योतिताव° (for विद्योतेते° suggested with St).

कृतानुयात्रा सा देवयात्रासु क्षितिपाङ्गना ।
राजलक्ष्मीरिवाऽऽभाति राजसामन्तमन्त्रिभिः ॥३३८३॥

सतीदेशे तीर्थसार्थास्त्यजन्त्यस्या निमज्जने ।
स्नानासक्तसतीमूर्तिस्पर्शनौत्सुक्यमञ्जसा ॥३३८४॥

चित्रे कालेऽत्र यात्रासु द्रष्टुं वृष्ट्युत्तरैः सदा ।
यत्प्रावृडिव राज्ञीयं जीमूतैरनुगम्यते ॥३३८५॥

सा पार्थिवेषु तीर्थेषु स्नानाय प्रस्थिता ध्रुवम् ।
दिव्यैर्वर्षमिषात् तीर्थैः प्राद्दश्यत तदीर्ष्यया ॥३३८६॥

अभ्रंलिहान्न च गिरीन्न च कूलंकषा नदीः ।
मृद्वङ्गी दुर्गमा मार्गे तीर्थौत्सुक्येन वेत्त्यसौ ॥३३८७॥

सुबह्वीभिः प्रतिष्ठाभिर्जीर्णोद्धारैश्च धीरया ।
तया चित्रं चतुरया पङ्गुर्दिद्दा विलङ्घिता ॥३३८८॥

अद्याऽपि विक्षरत्क्षीरार्णवकान्तिच्छटाच्छलात् ।
यो भातीव सुधासूतिसितश्वेताश्मनिर्गतः ॥३३८९॥

उपमन्योरुदन्यायाः दारिद्र्योपद्रवापहः ।
रुद्रो रुद्रेश्वरो नाम्ना श्रीमान् कश्मीरभूषणम् ॥३३९०॥

जगत्सौन्दर्यसारः स सस्वर्णामलसारकः ।
शान्तावसादप्रासादोद्धारश्च विहितस्तया ॥३३९१॥

3383. a) St C S′ $P_{1,2}$ दैव°; I_3 चैव (for देव°). —b) P_3 I_3 SA °यात्रास्वक्षि° (for °यात्रासु क्षि°).

3384. सतीदेश- is an epithet of Kashmir, cf. *v.* I. 25.

3385. c) St SA D $P_{1,3}$ I_3 om. राज्ञीयं with a *lacuna*. C S′ P_2 तैश्चेयं (for राज्ञीयं suggested).

3386. a) P_2 C S′ स (for सा). P_1 मूर्तेषु (for तीर्थेषु). —b) C S′ P_2: प्रस्थितो; SA I_3 प्रस्थितं (for प्रस्थिता). —d) All Mss. read प्राद्दश्येत (for प्राद्दश्यत suggested).

3391. a) All Mss. read °सारं [P_2 °सारे] (for °सारः suggested).

सत्त्वानामिव भृत्यानां कोपौर्वैविकृते नृपे ।
उदन्वतीव शरणं सिन्धुर्हैमवतीव सा ॥३३९२॥

स्थिरप्रसादे भूपाले निग्रहानुग्रहौ क्षणात् ।
भूभुजामपि संवृत्तावविच्छिन्नौ तदिच्छया ॥३३९३॥

सोमपालात्मजो भूभृद्भूपालः प्रापितस्तया ।
मानिन्या मेनिलादेव्या विवाहेन महार्हताम् ॥३३९४॥

उत्पत्तिभूमिसुलभानुभवो न भूम्ना
कस्याऽप्यहो व्यभिचरत्यनुभावभावः ।
तेजस्तमोविलुठनव्रतमुष्णभानो-
श्छेदं तदुत्थमकरोत् तमसोऽपि चक्रम् ॥३३९५॥

भुवनाद्भुतसाम्राज्यमार्जने भूभुजोऽभजत् ।
प्रातिभाव्यं दृढं रत्नाक्रान्तसन्मण्डलावनिः ॥३३९६॥

ऊढायां मेनिलादेव्यां परिणेतुरभूदपि ।
पिता वैमत्यमुत्सृज्य निर्व्याजं राज्यदायकः ॥३३९७॥

राज्ञः प्राजिधरस्याऽऽजौ तरसा भूभुजोऽनुजः ।
वैरिभिर्निहतस्याऽग्रे वैरसंशोधनोद्यतः ॥३३९८॥

राज्ञां शरणमेत्योच्चमानौत्कट्यो घटोत्कचः ।
भेजे राज्यश्रियं प्राप्य चित्रं राज्यश्रियं पराम् ॥३३९९॥

3392. c) I_3 SA सरणं (for शरणं).

3393. d) All Mss. read °च्छिन्नस्त° (for °च्छिन्नौ त° suggested with St D).

3395. a) P_2 I_3 SA उत्पत्तिर्भू° (for उत्पत्तिभू°). P_3 °भावे (for °भवो). —d) $P_{2,3}$ तदुक्त°; P_1 तमुक्त° (for तदुत्थ°).

3396. b) All Mss. read °मार्जनो (for °मार्जने suggested with St). All Mss. read भूभुजाभवत् (for भूभुजोऽभजत् suggested).

3397. a) C S′ P_{1-3} I_3 रूढायां (for ऊढायां).

3398. a) D C S′ राज्ञा (for राज्ञः).

3399. ab) $P_{1,3}$ I_3 °मेत्योच्चं मानो° [SA °नौ°]; D C S′ P_2 °मेत्योच्चैर्मानो° (for °मेत्योच्चमानौ° suggested with St). —b) $P_{2,3}$ °कटो (for °कट्यो). After this *v.* कुलकम् .

कृतसाहायकोऽमात्यै राज्ञः सप्रज्जिमङ्गदम् ।
राज्यात् प्राभ्रंशयद् भ्रातृद्रुहं पञ्चवटं नृपम् ॥३४००॥

अलङ्घयत् तत्प्रभावात् स्फारदानाम्बुनिर्भरात् ।
सरितं खड्गवल्लीं च कृष्णां विद्वेषिगोचराम् ॥३४०१॥

द्वितीयस्योरशाभर्तुरकीर्तिं निर्जयेऽसृजत् ।
देवप्रभावाद् योधोऽग्रमत्युग्रपुरमग्रहीत् ॥३४०२॥

सितोष्णवारणशशिद्योतकल्लोलितास्ततः ।
बहवो वाहिनीनाथाः प्रथामित्थं प्रपेदिरे ॥३४०३॥

समाद्वाविंशती राज्यावाप्तेः प्राग्भूभुजो गताः ।
तावत्योऽवाप्तराज्यस्य पञ्चविंशतिवत्सरे ॥३४०४॥

इयद्दृष्टमनन्यत्र प्रजापुण्यैर्महीभुजः ।
परिपाकमनोज्ञत्वं स्थेयात् कल्पातिगाः समाः ॥३४०५॥

अम्भोऽपि प्रवहत्स्वभावमशनैराश्यानमश्मायते
ग्रावाम्भः स्रवति द्रवत्वमुदितोद्रेकेषु चाऽवेयुषः ।
